ॐ

॥ परस्मै गायत्रीपरब्रह्मणे नमः ॥

" ऋग्वेदे अद्वैतसिद्धान्तानां समीक्षणम् "

वाराणसेयसंस्कृतविश्वविद्यालयस्य " विद्यावारिधि " (Ph. D.)

इत्युपाध्यर्थं उपस्थाप्यमानोऽयमनुसन्धानप्रबन्धः

मार्गदर्शका :

डा० मल्लादि. द. बालसुब्रह्मण्यम्, M.A., Ph.D.
भूतपूर्वाध्यक्षः प्रकाशनविभागः
केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति (आ० प्र०)

अधुना कार्यभारी प्राचार्य ः
गङ्गनाथ झा केन्द्रीयसंस्कृतविद्यापीठम्
अलहाबाद-२

अनुसन्धाता

पा. सीताराम हेब्बारः
अद्वैतवेदान्तशिरोमणिः
संशोधनच्छात्रः
केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति (आ० प्र०)

१९७२

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठम्
मोतीलाल नेहरु पार्क, इलाहाबाद-

डा. मल्लादि द. बालसुब्रह्मण्यम्
एम्. ए. पीएच्. डि.
कार्यभारी प्राचार्य

सूचनार्थ प्रस्तुत -
संचालक,
अनुसन्धानविभाग,
~~संपूर्णानन्द~~ वाराणसेय संस्कृत विश्वविद्यालय
वाराणसी-२

'ऋग्वेदे अद्वैतसिद्धान्तानां समीक्षणम्' इत्ययं शोधप्रबन्धः मया प्रदर्शितम् अनुसन्धानमार्गम् आश्रित्य श्रीमता पा. सीताराम हेब्बारेण तिरुपति-संस्कृत-विद्यापीठ-शोध-छात्रेण ~~समालिखि~~ अलेखि । अयं शोधप्रबन्धः ~~संपूर्णानन्द~~ वाराणसेय-संस्कृत-विश्वविद्यालयीय-विद्यावारिधि-उपाध्यर्थम् अधुना मदीयानुमतिपुरः सरं श्रीमता सीताराम हेब्बारेण समर्प्यते ।।

इत्थं,
शोधप्रबन्धमार्गदर्शकः
मल्लादि द. बालसुब्रह्मण्यम्
(डा० मल्लादि द. बालसुब्रह्मण्यम्)
प्राचार्य
गंगानाथ झा केन्द्रीयसंस्कृतविद्यापीठम्
मोतीलाल नेहरु पार्क, इलाहाबाद-२
उ० प्र०

परस्मै गायत्रीपरब्रह्मणे नमः

साक्षाद्ब्रह्महरीशचिह्नवपुषा दीप्तत्रिमूर्त्यात्मने
निर्वैरस्थलवासिने वदनतः सिंहद्विपास्यश्रिये ।
कण्ठाधः परिदृश्यमाननृशरीरैक्याय सर्वात्मने
लोकानुग्रहवस्तुनेऽस्तु महसे तस्मै परस्मै नमः ।।

श्रीमद्वेदान्तवाक्यैर्मुनिगणकथितैः स्तूयमानां प्रसन्नाम्
गायत्रीं वेदगर्भां निखिलमनुमयीं सर्वयन्त्राधिवासाम् ।
सन्ध्यारूपां त्रिनेत्रां भजकसुखकरीं सर्वसंपत्प्रदात्रीम्
ब्रह्माद्यैर्वन्द्यमानां भवभयशमनीं भारतीं तां नमामि ।।

सत्त्वं मोक्षकामाः श्रुतिषु निरवदन् गुह्यया भाषया ये
मन्दानुद्धर्तुकामाः त्रिगुणपरवशान् कर्मकाण्डार्थमाहुः ।
तान् सर्वान् वेदगर्भान् करधृतबदरीतुल्यतत्त्वान्नताङ्गः,
कुर्वे सत्प्रेरितोऽहम् ऋगभिधनिगमे ब्रह्मतत्त्वार्थबोधाम् ।।

वाराणसीयविद्यालयप्रदेयो ह्युपाधिरस्त्येषः ।
'विद्यावारिधि' संज्ञः निबन्धमेतं करोमि तत्कामः ।।

इति शम्

विषयानुक्रमणिका

+++++++++++++

प्रस्तावना

ऋग्वेदे अद्वैतसिद्धान्तानां समीक्षणनामाऽयं शोधप्रबन्धः वाराणसेय-संस्कृतविश्वविद्यालयस्यानुसन्धानसंस्थानात् 'विद्यावारिधिः' इत्युपाधिलाभार्थमुपस्थाप्यते । ब्रह्मश्रीमद्भिः डा० मल्लादि. द. बालसुब्रह्मण्यमहोदयैः मार्गदर्शकैः दर्शितदिशा ग्रन्थोऽयं प्रादुर्भूतः । अध्यायचतुष्टयात्मके अस्मिन् शोधप्रबन्धे - प्रथमाध्याये-सूत्रभाष्ये ऋग्वेदप्रस्तावः, द्वितीयाध्याये-ऋङ्मन्त्रेषु अद्वैतसिद्धान्ताः, तृतीयाध्याये-ऐतरेयोपनिषदि अद्वैतसिद्धान्ताः, अन्तिमे उपसंहारश्च निरूपिताः । एकैकस्मिन् अध्याये अवान्तरविषयाः अवस्थापिताः वर्तन्ते । तत्र सर्वेऽपि अवान्तरविषयाः यथाशक्ति सप्रकरणं सप्रपंचं च विमर्शपद्धत्या विवेचिताः भवन्ति । तत्र सूत्रभाष्ये उदाहृतानां कौषीतकिब्राह्मणोपनिषद्वाक्यानां स्थलनिर्देशावसरे कौ० इति चिह्नं दत्तं वर्तते । प्रथमाध्याये षोडश संहितामन्त्राः ऐतरेयारण्यकब्राह्मणोपनिषन्मन्त्राः कौषीतकिमन्त्राश्च प्रतिपादिताः ।

अस्मिन् अध्याये संहितामन्त्राः सायणाचार्य-शंकराचार्ययोः भाष्यतोलनपुरस्सरं विवेचिताः वर्तन्ते । सूत्रभाष्ये प्रतिपादिताः तत्तदधिकरणपर्यालोचनपुरस्सरमनेके सिद्धान्ताः सम्यङ् निरूपिताः सन्ति । तत्र तत्र केचन ऋङ्मन्त्रेषु ऐतिहासिककथाश्च निबद्धाः वर्तन्ते ।

द्वितीयाध्याये आहत्य १३० त्रिंशदधिकशतमन्त्राः उल्लिखिताः वर्तन्ते । तत्र पंचनवतिः संपूर्णमन्त्राः, सप्तत्रिंशत् मन्त्राः पादद्वयभूयिष्ठाः, अन्ये एकपादाः । द्वितीयाध्यायस्थानां मन्त्राणामर्थविवरणावसरे मार्गोऽयमनुसृतः - मन्त्रोदाहरणम्, तस्य प्रकरणनिर्देशः, अद्वैततत्त्वमपेक्ष्य ऋगर्थविवरणम्, मन्त्रस्याभिलषितसिद्धिरिति । सर्वेऽपि मन्त्राः ब्रह्म-जगत्-आत्ममोक्षादितत्त्वाख्येषु तत्तत्त्वानुसारेण विवेचिताः भवन्ति । अन्ते पुरुषसूक्तम्(ऋ०सं० १०-९०) नासदासीयसूक्तम्(ऋ० सं० १०-१२९) इत्येते सूक्ते सायणभाष्यानुसारेण प्रतिपादिते स्तः । तत्रापि नासदासीयसूक्तं तैत्तिरीयब्राह्मणगतसायणभाष्येण प्रपंचितम् ।

तृतीयाध्याये ऐतरेयोपनिषदि विद्यमानानामद्वैतसिद्धान्तानां विवेचनं क्रियते। उपसंहारे तु आहत्य षोडशविषयाः स्वातन्त्र्येण निरूप्यन्ते। एते विषयाः प्रकरणेऽस्मिन् यथाशक्ति विवेचिताः भवन्ति।

१६७० तमे वत्सरे मैलापूरुसंस्कृतविद्यालये प्रचाल्यमानायामद्वैतवेदान्त-शिरोमणिकक्ष्यायां छात्रो भूत्वा मद्रपुरीविश्वविद्यालयेन प्रचलितपरीक्षायामुत्तीर्णः वेदान्तशिरोमणिरभवम्। श्रीवेंकटेश्वरकृपया केन्द्रीयसंस्कृतविद्यापीठे १६७० जुलाईमासे अनुसन्धानछात्रत्वेन प्रविष्टः। तदा श्रीयुत मल्लादि डा० द बालसुब्रह्मण्यमहोदयानां सप्रणयवचनानुसारेण 'ऋग्वेदे अद्वैतसिद्धान्तानां समीक्षणम्' इत्ययं विषयः अनुसन्धानप्रबन्धलेखनार्थं स्वीकृतः। अनन्तरं च प्रबन्धस्यास्य लेखने मम मार्गदर्शकत्वेन त एव डा० मल्लादि द. बालसुब्रह्मण्यमहोदयाः नियुक्ताः अभवन्। तेषामनुसन्धानशैल्या विमर्शपद्धत्या च ऋग्वेदाद्वैततत्त्वयोरुभयोः तोलनपुरस्सरं शोधप्रबन्धोऽयं सम्पन्नः। अस्मिन् ग्रन्थे शास्त्रपद्धत्या आधुनिकरीत्या च विषयविभागं कृत्वा सर्वे विषयाः विचारिताः सन्ति।

ग्रन्थेऽस्मिन् स्वीकृताः नियमाः

टंकणसौकर्यार्थं सर्वत्र ङ कारस्थाने अनुस्वारः प्रक्षिप्तः। टंकणयन्त्रे 'ञ'कारस्याभावात् तत्स्थाने अनुस्वारो दत्तः। अपिच प्रथमाध्याये ब्रह्मसूत्रभाष्यपुटसंख्यादानार्थं निर्णयसागर प्रेस मुम्बई, तथा वेंकटेश्वर प्रेस मुम्बई, इति मुद्रणस्थानद्वयपुस्तके स्वीकृते स्तः। उपसंहारेऽपि पुटसंख्यादानार्थं - ब्रह्मसूत्रशांकरभाष्यम्-कामकोटिकोशस्थानम् मद्रास्, शंकराचार्यग्रन्थावली-ईशादि-दशोपनिषद् भगवद्गीता च शांकरभाष्ययुतम्, इत्येतानि पुस्तकानि स्वीकृतानि।

कृतज्ञता निवेदनम्

बाल्ये एव संपूर्णऋग्वेदाध्यापनेन मां कृतार्थमापादितवतां नैयायिकानां हेब्बारोपपदानां श्रीनिवासशर्मणां मदीयपितृचरणानां चरणयोः सविनयं प्रणामान् करोमि। मद्रपुरीयसंस्कृतकलाशालायां अद्वैतग्रन्थोपदेशकानां क -

कीर्तिशेषाणां
~~कैवल्यं प्राप्तवतां~~ पण्डितराजेत्युपाधिभूतां पोलकम् श्रीराममूर्तिशास्त्रिपादानां, विद्वद्वरेण्यानां एस्. आर्. कृष्णमूर्तिशास्त्रिवर्याणां, जगदीशशास्त्रिचरणानां, पण्डितराजेत्याद्यनेकबिरुदभूषितानां राष्ट्रपतिसंमानितानां वेपत्तूरु. सुब्रह्मण्यशास्त्रिवर्याणाम्, अन्येषां च गुरूणां सप्रणामं कृतज्ञतां निवेदयामि । अस्मिन् केन्द्रीयसंस्कृतविद्यापीठे अनुसन्धानं कर्तुमवकाशं कल्पितवतामिदानीं पंजाबविश्वविद्यालये संस्कृतप्रोफेसरपदमधितिष्ठतां विदुषां भूतपूर्व-एतद्विद्यापीठ-निदेशकानां डा० बि. आर्. शर्ममहोदयानां, प्राध्यापकवर्याणां एतद्विद्यापीठ-वर्तमानप्रधानाध्यक्षाणां वेंकटराघवाचार्याणां च हार्दीं कृतज्ञतां प्रकटयामि । संशोधनप्रबन्धलेखने मार्गदर्शनं कृतवतां पुस्तकप्रकाशनविभागे अध्यक्षपदमधितिष्ठतां आधुनिकविमर्शकौशलवतां सिंहलद्वीपे प्राध्यापकपदमधितिष्ठितवतां, सम्प्रति गंगानाथ-झा केन्द्रीयसंस्कृतविद्यापीठे कार्यभारी प्राचार्याणां गुरूणां डा० मल्लादि द. बालसुब्रह्मण्यमहोदयानां सन्निधौ नमोवाकान् निवेदयामि । अथ च मदीयं शोधप्रबन्धं समीचीनया शास्त्रपद्धत्या आन्तं परिशीलितवद्भ्यः शान्तचित्तेभ्यः चतुस्तन्त्रपण्डितेभ्यः एन्. एस्. रामानुजताताचार्यमहाभागेभ्यः हार्दान् धन्यवादान् वितरामि । सर्वेषामावश्यकपुस्तकानां पठनाय सौकर्यं कृतवतां पुस्तकालयाध्यक्षाणां सन्निधौ भवाम्यहं कृतज्ञः । श्रीमन्तः वेपत्तूर्. सुब्रह्मण्यशास्त्रिमहाभागाः स्वदेहस्य श्रममप्यविगणय्य सत्यपि कार्येष्वनेकेषु मदीयं शोधप्रबन्धं संपूर्णं विमृश्य ग्रन्थस्यास्य शोभां प्रकाशयामासुः । अतः तेषां विद्वन्मणीनां चरणकमलयोः पातितशिरो भूत्वा आशीर्वचनमाकांक्षे । ततः वाराणसेयसंस्कृतविश्वविद्यालयस्य उपकुलपतिभ्यः, अनुसन्धानविभागसंचालकेभ्यश्च विद्यावारिधिः इत्युपाध्यर्थमस्य शोधप्रबन्धस्य स्वीकरणार्थमनुमतिं दत्तवद्भ्यः कृतज्ञतामावेदयामि । एवं मम शोधप्रबन्धलेखने साक्षात्परंपरया वा अनुकूलानां सर्वेषां कार्तज्ञ्यं प्रकटयामि ।।

इत्थम्
विद्वज्जनविधेयः
पा. सीताराम हेब्बारः
अद्वैतवेदान्तशिरोमणिः

केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति. आन्ध्रप्रदेशः
ता० ६ - ११ - १९७२

सङ्केतचिन्हानां सूचीपट्टिका

सङ्केतचिह्नम्	ग्रन्थनाम
अथ० अथर्व०	अथर्ववेद:
अम०	अमरकोश:
अ० सि०	अद्वैतसिद्धि:
अथर्व० उ०	अथर्ववेदोपनिषत्
आप० परि०	आपस्तंबीय यज्ञपरिभाषा
ईशा० शा० भा०	ईशादिदशोपनिषदि शांकरभाष्यम्
उ० सू०	उणादिसूत्रम्
ऋ० सं०	ऋक्संहिता
ऋ० ऋग्० सा० भा०	ऋग्वेदसायणभाष्यम्
एका० मि०	एकादशोपनिषदि मिताक्षरटीका
ऐ० उ०	ऐतरेयोपनिषत्
ऐ० आ०	ऐतरेय-आरण्यकम्
ऐ० ब्रा०	ऐतरेय-ब्राह्मणम्
कठ०	कठोपनिषत्
कारि०	कारिकावली
का० वृ०	काशिकावृत्ति:
कू० पु०	कूर्मपुराणम्
केन०	केनोपनिषत्
कौ०	कौषीतकिब्राह्मणोपनिषत्
गर्भो०	गर्भोपनिषत्
गी० भा०	गीताभाष्यम्
गो० ब्रा०	गोपथब्राह्मणम्
चित्सु०	चित्सुखी

सङ्केतचिह्नम्	ग्रन्थनाम
छा० उ०	छान्दोग्योपनिषद्
छा० उ० शा० भा०	छान्दोग्योपनिषच्छांकरभाष्यम्
तर्क०	तर्कसंग्रहः
तै० सं०	तैत्तिरीय-संहिता
तै० आ०	तैत्तिरीय-आरण्यकम्
तै० ब्रा०	तैत्तिरीय-ब्राह्मणम्
तै० उ०	तैत्तिरीयोपनिषद्
तै० उ० शा० भा०	तैत्तिरीयोपनिषच्छांकरभाष्यम्
देवता०	देवतानुक्रमणिका
देवी० दे०	देवीभागवते देवीगीता
निरा० उ०	निरालम्बोपनिषद्
नि०	निरुक्तम्
~~बृ० उ०~~ नृ० उ०	नृसिंहतापनीयोपनिषद्
नै० सि०	नैष्कर्म्यसिद्धिः
न्या० सू०	न्यायसूत्रम्
न्या० नि०	न्यायनिर्णयः
परि०	परिमलम्
प०	पंचपादिका
प० विव०	पंचपादिकाविवरणम्
पंच० (चि०)	पंचदशी (चित्रदीपप्रकरणम्)
प्र० उ०	प्रश्नोपनिषद्
प्रौ० म०	प्रौढमनोरमा
भ ब० उ०	बह्वृचोपनिषद्
बृ० उ०	बृहदारण्यकोपनिषद्
बृ० शा० भा०	बृहदारण्यकशांकरभाष्यम्

सङ्केतचिह्नम्	ग्रन्थनाम
ब्रह्मा०	~~ब्रह्म~~ ब्रह्मानन्दीयम्
ब्र० सि०	ब्रह्मसिद्धि:
ब्र० सू०	ब्रह्मसूत्राणि
ब्र० सू० शा० भा०	ब्रह्मसूत्रशांकरभाष्यम्
भग०	भगवद्गीता
भा०	भामती
भा० र०	भाष्य रत्नप्रभा
म० ना० उ०	महानारायणीयोपनिषत्
मा० भा०	महाभाष्यम्
मा० भा० वा०	महाभाष्यवार्तिकम्
महा० भा०	महाभारतम्
मनु० म०	मनुस्मृति:
मा० उ०	माण्डूक्योपनिषत्
मा० कारि०	माण्डूक्यकारिका
मा० का० शा० भा०	माण्डूक्यकारिकाशांकरभाष्यम्
मा० शा० भा०	माण्डूक्योपनिषच्छांकरभाष्यम्
मी० सू०	मीमांसासूत्रम्
मुण्ड०	मुण्डकोपनिषत्
मैत्रा० उ०	मैत्रायणीयोपनिषत्
याज्ञ० स्मृ०	याज्ञवल्क्यस्मृति:
यो० सू०	योगसूत्रम्
लि० पु०	लिङ्गपुराणम्
विवेक० चू०	विवेकचूडामणि:
व्या० सू०	व्याकरणसूत्राणि
व्या० सू० वा०	व्याकरणसूत्रवार्तिकम्

सङ्केतचिह्नम्	ग्रन्थनाम
शत० श्लो०	शतश्लोकी
शत० ब्रा०	शतपथब्राह्मणम्
शा० न्या० सं	शारीरकन्यायसंग्रह:
श्रीमद्भा०	श्रीमद्भागवतम्
श्वे० उ०	श्वेताश्वतरोपनिषत्
स० द० सं०	सर्वदर्शनसंग्रह:
सा० भा० उ०	सायणाचार्यभाष्योपोद्घात:
सिद्धा०	सिद्धान्तलेशसंग्रह:
सुरे० वा०	सुरेश्वराचार्यवार्तिकम्
सू० शत०	सूर्यशतकम्

१ प्रथमोऽध्यायः

ब्रह्मसूत्रशाङ्करभाष्ये ऋग्वेदप्रस्तावः

ओम् परस्मै ब्रह्मणे नमः

१० सूत्रभाष्ये प्रदर्शितानां ऋङ्मन्त्रब्राह्मणारण्यकोपनिषद्वाक्यानां विवेचनम्

भगवता वेदव्यासेन वेदान्तग्रन्थकुसुमग्रथनाय प्रणीतानां ब्रह्मसूत्राणां श्रीमच्छंकरभगवत्पादाः प्रसन्नगम्भीरं भाष्यं व्यरचयन् । अमुं ग्रन्थं सर्वे विद्वांसः पाश्चात्यविमर्शकाश्च आदरेण पठन्ति । अनेन ग्रन्थेन पठितेन जिज्ञासुः असम्भावनादिनिरासेन वेदान्तार्थं सम्यगवधारयति । अस्मात् ग्रन्थवृक्षादेव व्याख्योपव्याख्यानानि प्रकरणानि च कुसुमानि विकसितानि शोभन्ते । अस्य ग्रन्थस्य विचारेण अधिकारिणः आत्मसाक्षात्कारं लब्ध्वा कृतकृत्याः भवन्ति । अस्मिन् ब्रह्मसूत्रशांकरभाष्ये ऋक्संहितायाः ऋङ्मन्त्राः, तथा ऐतरेयारण्यकात् कौषीतकिब्राह्मणाच्च श्रुतयः तत्र तत्र विचारावसरे उद्धृताः सन्ति । तेषु ऋङ्मन्त्राः सायणाचार्यशंकराचार्ययोः भाष्यतोलनपुरस्सरं विचार्यन्ते । तथा अन्या अपि श्रुतयः अस्मिन् अध्याये विचारयिष्यन्ते । तत्र प्रथमतः ऋङ्मन्त्राः प्रस्तूयन्ते ।।

१ - १ सूत्रभाष्ये ऋङ्‌मन्त्रा:

ब्रह्मसूत्रशांकरभाष्यस्य प्रथमाध्यायप्रथमपादे 'आकाशस्तल्लिंगात्' (ब्र० सू० १-१-२२) इत्यधिकरणे इयमृगुद्धृता लक्ष्यते -

ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यन्ति य इत्तद्विदुस्त इमे समासते ।।

(ऋ० सं० १-१६४-३९) इति । प्रथममण्डले द्विपंचाशदुपेतं शतोत्तरचतुष्षाष्टितमं अस्यवामीयं सूक्तम् । तत्र एकोनचत्वारिंशी ऋगियम् ।

अस्य सूक्तस्य दीर्घतमा नाम ऋषि: । मन्त्रस्यास्य विश्वेदेवा देवता । इयम् ऋक् जगतीछन्दोबद्धा । प्राय: अस्मिन् सूक्ते संशयोत्थापनं, प्रश्न: प्रतिवचनम् इत्यनेके अर्था: प्रतिपाद्यन्ते । एतत्सूक्तजपस्य फलं पापविमोचनम् ।

स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषित: शुचि: ।
सूक्तं जप्त्वा अस्यवामीयं क्षिप्रं मुच्येत किल्बिषात् ।।

(ऋग्वि० १-१४४) इति ऋग्विधानोक्ते: । मन्त्रस्यास्य सायणाचार्यै: चतु:प्रकारा: अर्था: विवृता: भाष्ये । तथा हि -

(१) पूर्वस्मिन् 'अपाङ् प्राङेति' इति मन्त्रे देहात्मजीवात्मानौ, तत्स्वरूपम्, आत्मज्ञानस्य दुर्लभत्वमित्येते अर्था: प्रतिपादिता: अभवन् । अनेन मन्त्रेण जीवात्मन: पारमार्थिकं यत्स्वरूपं तत् प्रपंच्यते +-

ऋच: - ऋगिति शब्देन सांगापरविद्यात्मिकाश्चत्वारो वेदा: उच्यन्ते । वेदाश्चत्वार इति श्रूयते चतुर्वेदोपनिषदि -

'स ब्रह्मा चतुर्मुखो अजायत । स: ध्यातपूर्वोमुखो भूत्वा
भूरिति व्याहृति: गायत्री छन्द: ऋग्वेद: । पश्चिमामुखो
भूत्वा भूरिति व्याहृति: त्रैष्टुभं छन्द: यजुर्वेद: । उत्तरामुखो
भूत्वा भुवरिति व्याहृति: जागतं छन्द: सामवेद: ।
दक्षिणामुखो भूत्वा जनदिति व्याहृतिरानुष्टुभं
छन्दो अथर्ववेद: ।'

(चतुर्वेदोपनिषत् - १) इति । ऋगादीनां चतुर्णामपरविद्यात्वं, क्षरविद्याया:

परत्वं च मुण्डके श्रूयते -

'द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति
परा चैवापरा च'

इत्युपक्रम्य -

'तत्रापरा ऋग्वेदो यजुर्वेद: सामवेदो अथर्ववेद:'

इति प्रतिपाद्यान्ते -

'अथ परा यया तदक्षरमधिगम्यते'

(मुण्ड० १-४,५) इति। एवं च चत्वारो वेदा: आत्मसाक्षात्कारे अंगभूता इति। अथवा आत्मन: (आत्मन:) अंगभूता: इमे वेदा: इतीयं श्रुति: वदति -

'तस्य यजुरेव शिर:। ऋग्दक्षिण: पक्ष:। सामो-
त्तर: पक्ष:। आदेश आत्मा। अथर्वांगिरस: पुच्छं प्रतिष्ठा।'

(तै० उ० २-३) इति। यथा यागे अंगभूतकर्मानुष्ठानद्वारा प्रधानं कर्म संरक्ष्यते, एवम् ऋगादीनां पठनेनानुष्ठानेन च स आत्मा स्वात्मत्वेन रक्ष्यत इति। तस्मात् य: आत्मबुभुक्षु: स: अवश्यं वेदान् अशक्यत्वे स्वशाखां वेदं पठेत् इति।

ननु ऋग्वेदादय: चत्वारो वेदा:बाह्या अपरा विद्या इति कथ्यते, तर्हि सा कथं पराविद्या स्यान्मोक्षसाधनं च। तथा च स्मरन्ति -

'या वेदबाह्या: स्मृतय: याश्च काश्च कुदृष्टय:।'

इति। कुदृष्टित्वान्निष्फलत्वाच्च इयं विद्या अनादेया स्यात्। अपि चो-पनिषदां ऋग्वेदादिबाह्यत्वं भवेत्। एवं सति ऋग्वेदादित्वे तु पृथक्करणमनर्थकं भवति। अथ कथं परा विद्येति चेत्-उच्यते। विद्या इत्यत्र वेद्यविषयविज्ञानत्वात् नोक्तदोष: प्रसजति। उपनिषद्वेद्याक्षरविषयं हि विज्ञानमिह परा विद्येति प्राधान्येन विवक्षितम्, नोपनिषच्छब्दराशि:। वेदशब्देन तु सर्वत्र शब्दराशि: विवक्षित:। अत एव वेदस्य अपरविद्यात्वमभ्युपगम्यते। वेदस्य शब्दराश्यधिगमेऽपि गुर्वभिगमनादिलक्षणं शमदमादिवैराग्यं च विना यत्नान्तरमन्तरेण अक्षराधिगम: न सम्भवतीति ब्रह्मविद्याया: पृथक्करणं परा विद्या इति। एवं च आत्मविद्या परेति गीयते, इतरविद्या अपरा चेति। एवं ज्ञानाज्ञानयो: परापरत्वमवलोकितो भवति।

(अथवा) अथवा क्षरमक्षरमिति विद्याविद्ये द्वे भवतः । श्रूयते च श्वेताश्वतरोपनिषदि -

द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे ।

क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः ।।

(श्वे० ५-१) इति । अत्र अमृतस्वरूपम् अक्षरमित्युच्यते ।

अपरविद्यायाः सम्बन्धिनि अदृश्यत्वादिगुणके अनश्वरे सर्वत्र व्याप्ते क्षरणरहिते अक्षरे नित्ये ब्रह्मणि इति । अक्षरशब्दस्य तु ब्रह्मवाचकत्वं श्रुत्यादिषु प्रसिद्धं भवति । तथा हि -

'एतद्वै तदक्षरस्य प्रशासने गार्गि' (बृ० ३-८)

'येनाक्षरं पुरुषं वेद सत्यम्' (मुण्ड० १-२-१३)

इत्यादयः श्रुतयः । अक्षरशब्दस्य व्युत्पत्तिः बहुधा क्रियते । तद्यथा- न क्षरतीति अक्षरः, नान्यथाभावमापद्यत इति । न क्षीयते इत्यक्षरः, न कदाचिदपि विनश्यतीत्यर्थः । इत्यादीनि ।

ननु एवं च सति 'अक्षरात्परतः परः' (मुण्ड० २-१-२) इति मुण्डकश्रुतेः को अर्थ इति चेत्-उच्यते । नामाद्युपाधिभूताक्षरात् पर इति । केन केन व्यंजकरूपाक्षरेण पदार्थो गृह्यते स पदार्थः अक्षरवाच्यो भवति । एवं चाक्षरशब्देन सृष्टिं गताः सकलपदार्थाः स्वीक्रियन्ते । तथा चानया श्रुत्या 'नामरूपोपाधिभूतप्रपंचात्परतः पर' इत्यर्थो वर्ण्यते । अतो न क्षतिः इति ।

तथा च मुण्डकोपनिषदि श्रुतेरस्याः शांकरं भाष्यम्[1] -

'अक्षरात् - नामरूपबीजोपाधिलक्षितस्वरूपात् सर्वकार्यकरणबीजत्वेनोपलक्ष्यमाणत्वात् परं तत्त्वं तदुपाधिलक्षणमव्याकृताख्यमक्षरं सर्वविकारेभ्यः तस्मात्परतः अक्षरात्परः निरुपाधिकः पुरुष इत्यर्थः ।'

इति । ऋगक्षरयोः संबन्धः प्रतिपाद्यप्रतिपादकभावः इति गीयते । अत्र ऋचा प्रतिपाद्यं ब्रह्म, तस्य प्रतिपादिका ऋक् इत्यवधेयम् । ऋचा इत्यनेन ऋग्वेदमात्रं नोच्यते,

---

१ ईशा० शां० भा० पृ० ५११

अपि तु ऋगाद्यैस्सर्वैरपि तद्ब्रह्माधिगम्यते । तथा च श्रुतिः -

'तन्त्वौपनिषदं पुरुषं पृच्छामि' (बृ० ३-६-२६)

इति । ननु उपनिषद्भागानां श्रुतीनां मात्रं परस्परं प्रतिपाद्यप्रतिपादकभावरूपः सम्बन्धः भवद्भिः प्रकल्प्यताम् । कथं पुनः इतरेषाम् ऋगादिवेदानां ब्रह्मपरत्व-रूपसंबन्ध उच्यत इति चेत्-सत्यम् । इतरवेदादिभागानां यद्यपि सामान्यरूपेण यागादिविषयत्वम् तथाऽपि यागादिनाजनितसंस्कारवशेन चित्तशुद्ध्युत्पादनद्वारा वेदनसाधनत्वेन तेषामपि ऋगादिवेदानामपि ब्रह्मविषयत्वं भवत्येव । न मया एवमुच्यते, किन्तु साक्षाद्वदति उपनिषच्छ्रुतिः -

'तमेतं वेदानुवचनेन ब्राह्मणाः विविदिषन्ति यज्ञेन
दानेन तपसा अनाशकेन ।'

(बृ० ४-४-२२) इति । अत्र यज्ञेन दानेन तपसा अनाशकेन इति चतुर्भिः हेतुभिः आश्रमचतुष्टयमुक्तं भवति । क्रमेण ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासमिति । प्रथमोक्तत्रयाणामेव आश्रमिणां वेदाध्ययने अधिकारो वर्तते । सन्यासिनां तु तद्ग्रहणात् पूर्वमध्ययनं कर्तव्यम् । यदि पूर्वमध्ययनं न कृतं तदा वेदार्थभूतोपनिषच्छ्रुतीनामध्ययनं अवश्यं तैः कर्तव्यं भवति । एवं च चतुर्णामपि आश्रमिणामध्ययनं विहितं भवति ।

अत्र 'तमेतं वेदानुवचनेन' इति श्रुतेः भामतीकाराः अर्थमेवं वर्णयन्ति - 'निरतिशयानन्दरूपं ब्रह्म तत्प्राप्तौ विद्यासाधनम्' इत्यर्थं प्राचीनबहुजन्माधिष्ठितानभिसंहितफलकनित्यनैमित्तिककर्मोपसंजातचित्तप्रसादमहिम्ना संपन्नविश्वासस्य पुरुषस्य ब्रह्मावाप्तौ, विद्यायां च तदौन्मुख्यलक्षणायामिच्छायां सत्यामपि अनादिभवसंचितानेकदुरितदोषेण आस्तिककामुकस्य हेयकर्मणीव विषयभोगे प्रावण्यं सम्पादयता प्रतिबन्धात् विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ता रुचिः न जायते इति प्रतिबन्धनिरासपूर्वं तत्संपादकयज्ञादिविधानोपपत्तेः विद्यासंपादनद्वारा ब्रह्मावाप्त्युपायभूतायां विविदिषायां यज्ञादीनामुपयोग इति ।

तस्या एव श्रुतेः विवरणकारा एवमभिप्रयन्ति - 'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्' इति सामान्यन्यायापेक्षया इच्छाविषयतया सन्नन्त-शब्दबोध्य एव शाब्दसाधनतान्वय इति ज्योतिष्टोमादिवाक्ये क्लृप्तस्य

इच्छेष्यमाणसंयोगे इष्यमाणस्य प्राधान्यमिति विशेषन्यायस्य प्रबलत्वात् प्रकृत्यर्थे वेदने एव साधनात्वान्वयः । अत एव -

'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ।।'

(भग० ६·३) इति भगवद्गीतावचनानुसारेण चेतसः शुद्धौ विविदिषादिरूपप्रत्ययप्रावण्योदयपर्यन्तं यज्ञादिकर्मानुष्ठानं, ततः कर्मतत्सन्यासाभ्यां विद्यानिष्पत्त्युपपत्तेः इति ।

'द्वे विद्ये वेदितव्ये -------- परा चैवापरा चेति ।'

(मुण्ड० १-१-४) इत्यत्र वर्तमानपरविद्यारूपे तरभागानामपि आध्यात्मिकतत्वसूक्ष्मदृष्ट्या ब्रह्मविषयत्वं भवति । तथा हि -

'सर्वे वेदाः यत्पदमामनन्ति' (कठ० १-२-१५)
वेदैश्च सर्वैरहमेव वेद्यः' (भग० १५-१५)

इति श्रुतिस्मृतिभ्यां तत्सिध्यति । नच उक्तश्रुतिस्मृतयः परां विद्यामेवाभिदधते इति वाच्यम् । सर्वपदसंकोचे प्रबलप्रमाणाभावात् । श्रुतौ वर्तमानस्य सर्वे वेदाः इति पदस्य स्मृतौ वर्तमानस्य वेदैश्च इति पदस्य संकोचकरणेन वक्तुमशक्यत्वात् ।

अपि चेन्द्राग्न्यादिसर्वदेवतात्मकत्वादक्षरस्य ब्रह्मणः सर्ववेदवेद्यत्वमविरुद्धम् । तथा च सुस्पष्टमाम्नायते ऋग्वेदे -

'सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।

(ऋ० सं० १०-११४-५) इति,+

'यो देवानां नामधा एक एव'

(ऋ० सं० १०-८२-३) इति च । अत्र प्रथममन्त्रे वर्तमानसुपर्णमिति पदस्य शोभनपूर्णलक्षणं परमेश्वरमित्यर्थः । यश्च एकोऽद्वितीय एव सन् सकलदेवानां नामानि उपाधिभेदेन धारयतीति नामधा इति द्वितीयमन्त्रे वर्तमाननामधापदस्यार्थः । एवं प्रतिपादितदिशा एव सर्वत्र अग्न्यादिपदानां तत्तद्देवतात्वरूपेण तेषु तेषु स्थानविशेषेषु अवस्थितः परमात्मा एक एवेति सिद्धो भवति । यथा भूयांसो जनाः व्यष्ट्यभिप्रायेण नराः समष्ट्यभिप्रायेण त एव राष्ट्रं जनपदमिति व्यवह्रियन्ते ।

एवमेक एव परमात्मा व्यष्टिभावनया अग्न्यादयो देवा: समष्टिभावनया च परमेश्वर इति व्यपदिश्यते ।

प्रकृतमनुसराम: । निरतिशयरूपोत्कृष्टे व्योमसदृशे व्यामरूपे ब्रह्मणि वा । यथा आकाश: स्पर्शत्व-रूपत्व -व्याप्यत्वादिधर्मै: व्यवच्छिद्यते, एवं तत्सादृश्येनास्पर्शत्वनीरूपत्वव्यापित्वादि धर्मवान् ब्रह्म इत्युच्यते । तथा च श्रुतय: -

'आकाशशरीरं ब्रह्म' (तै० उ० १-६-२)

'आकाशे सर्वं प्रतिष्ठितम्' ( )

'आकाशवत्सर्वगतश्च नित्य:' ( )

य एषोऽन्तर्हृदय आकाश' (तै० उ० १-६-१)

'आकाश आत्मा' (तै० उ० २-२-१)

इत्यादय: । अथवा व्योमनि विशेषेण सर्वस्य रक्षके । निरधिष्ठा: सन्त: पदार्था: लोके न कुत्रापि दृश्यन्ते , स्वाध्यस्तस्य सर्वस्याधिष्ठानत्वेन सर्वपदार्थानां रक्षकत्वात् । तादृशे अधिष्ठानरूपके तत्वे भूत-भौतिकसकलप्रपंच: अध्यस्त इत्यर्थ: । अधिष्ठानभूते ब्रह्मणि इति तदेव विशिष्यते । यस्मिन् परमात्मनि सर्वे देवा: आश्रित्य तिष्ठन्ति, तस्मिन् उक्तलक्षणके ब्रह्मणि ऋगुपलक्षिता: सांगा: सर्वे वेदा: पर्यवसिता इति । देवानां स्वरूपलाभास्पदं कृत्स्नदेवतात्पर्यप्रतिपाद्यमेतादृशं यद्वस्तु यो मरणधर्मयुक्त: द्विज: न जानाति चेत् स द्विज: ऋगादिवेदानां शब्दजालेन केवलं किं करिष्यति । न कृतकृत्यो भवतीति । ज्ञानसाधनेन वेदेन वेद्यं यत् ब्रह्मस्वरूपं तदविदित्वा तेन किं साधयितुं शक्यते । मुख्यरूपप्रयोजनाभावात् सर्वस्यापि वेदस्य नैष्फल्यादिति भाव: ।

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।'

इति मीमांसान्यायात् वेदे ब्रह्मस्वरूपो प्रतिपाद्यते तदस्माभि: ज्ञातव्यमिति निश्चितबुध्या पठन-श्रवण-निदिध्यासनेषु प्रयत्न: कर्तव्य: + सर्वै: द्विजै: । अथवा 'यस्तन्न वेद' इत्यत्र एवमपि वक्तुं शक्यते - यागस्य फलदातारमक्षररूपं परमात्मानमविदित्वा यागादिकर्मणां कर्ता य: भवति तेन कृतं कर्म न फलभाक् भवति । तथाचोक्तं-

'यो वा एतदक्षरं गार्ग्यविदित्वा अस्मिंल्लोके
जुहोति, यजते, तपस्तप्यते, बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति, यो वा एतदक्षरं गार्ग्यविदित्वा अस्मात्

लोकात्पेति स कृपणः, अथ एतदक्षरं गार्गि
विदित्वा अस्माल्लोकात्प्रैति स ब्राह्मणः ।'

(बृ० ३-८-१०) इति ।

'आत्मलाभान्न परं विद्यते'

इति स्मृतिरपि तदतिरिक्तलाभस्य लाभत्वप्रतिषेधं करोति । अतः नित्य-निरतिशयानन्दरूपाक्षरस्यात्मनः एव लाभो लाभाय प्रकल्प्यते + इति श्रुतिस्मृतिभ्यां सिद्धं भवति । अथवा केवलं गार्हस्थ्येन धर्मेण शब्दजातमक्षररूपं वेदमविदित्वा स्वयं यागादीननुतिष्ठति अन्यान् अनुपश्यति च तेन कृतं कारितंच कर्म सम्यक् फलहेतुभूतं न भवति । इति ये एव द्विजाः अक्षररूपब्रह्मणः तत्त्वं सम्यक् जानन्ति उत ज्ञानोत्तरकाले तिष्ठन्ति ते एव इमे द्विजाः ज्ञाने योग्यभूताः सन्तः तस्मिन् ब्रह्मस्वरूपे सम्यक् तिष्ठन्ति । अपुनरावृत्त्या तस्यैव ब्रह्मणः स्वरूपे अवस्थानं प्राप्नुवन्तीत्यर्थः ।

अथवा मन्त्रे वर्तमानः इत् शब्दः अवधारणार्थकः ये अक्षराख्यं ब्रह्मस्वरूपं जानन्ति त एव नान्यत्कर्म अनुतिष्ठन्ति । स्वस्वरूपज्ञानापेक्षया कर्मणः गर्हितत्वात् । इवशब्दः जानन्तिपदसहयोगं कृत्वाऽपि वक्तुं शक्यते । एवं सति ये ब्रह्मस्वरूपं जानन्ति त एव तस्मिन् ब्रह्मणि समासते इति । अमुमर्थमेव कठवल्लीश्रुतिः संक्षिप्य उद्घोषयति । तथा हि -

'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ।।

(कठ० १-२-१६) इति+ ।

(२) ऋक् - मन्त्रस्यास्य द्वितीया व्याख्या -

ऋक् - अर्चनीयो आदित्यः अथवा ऋगादिमयमादित्यमण्डलं वा । तथा च श्रुतयः प्रतिपादयन्ति -

'ऋग्भिः पूर्वाह्णे दिवि देवः आदित्यो वा एष
एतन्मण्डलं तपति तत्र ता ऋचः तदृचा मण्डलं स ऋचां लोकः'

(तै० आर० १०-१२-१३) इति । अस्याः श्रुतेरर्थः - एष सोपाधिकः परमेश्वरः

नारायणशब्दवाच्य: स आदित्यरूपेण वर्तते । तस्यादित्यस्य अस्माभिर्दृश्यमानं वर्तुलाकारं उष्णं तेज: सन्तापं करोति, तस्मिन् मण्डले अध्यापकादिप्रसिद्धा: 'अग्निमीले इत्यादिका: ऋच: वर्तन्ते । अत: तदादित्यमण्डलं ऋचा निष्पादितमित्यायातम् । स ऋग्भिर्निष्पादित: मण्डलभाग: तत्तद्गाभिमानिदेवतानां निवासस्थानं भवति । तस्यादित्यमण्डलस्य संबन्धिनि अक्षरे व्योमवद्वर्तमान: इत्युक्तलक्षणके परमे ब्रह्मणि इति । तस्य ब्रह्मण: स्वरूपं श्रुत्यादिषु एवं प्रतिपाद्यते -

'य एषोऽन्तरादित्ये हिरण्मय: पुरुषो दृश्यते'

(छा० उ० १-१-६) इति । एवं प्रतिपाद्ये ब्रह्मणि सर्वे देवा: द्योतमाना: रश्मयश्च वर्तन्ते । ये एतत्तत्त्वं न विदु: ते केवलया ऋचा स्वजीवने किं साधयन्ति । अत: आदित्यरूपेणावस्थितो निरुपाधिक: स ब्रह्म सर्वै: द्रष्टव्य: श्रोतव्य: इति सर्वान् उपदिशत्ययं मन्त्र: । अत एवोच्यते श्वेताश्वतरोपनिषदि -

'अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तो: ।
तमक्रतुं पश्यति वीतशोको धातु: प्रसादान्महिमानमीशम्' ।।

(श्वे० उ० ३-२०) इति । इति मन्त्रस्य द्वितीया व्याख्या ।

(३) मन्त्रस्यास्य तृतीयो व्याख्यानप्रकार: प्रणवमधिकृत्य भवति -

ऋच: - ऋगुपलक्षितसर्ववेदसंबन्धिन्यक्षरे प्रणवरूपेऽक्षरे ओंकारे अविनाशिनि शब्दब्रह्मणि सर्ववेदेषु व्याप्ते वा । प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते -

'तान् वेदानभ्यतपत्तेभ्योऽभितप्तेभ्य: त्रयो वर्णा: अजायन्त,
अकार उकारो मकार इति तानेकधा समभवत्तदेतदोमिति ।'

(ऐ० ब्रा० ५-३२) इति । परमे- सर्वाधिके निरतिशये प्रकृष्टे इति । न हि प्रणवादधिकं किंचिन्मन्त्रजातमस्ति, त्रिकालातीतस्य ब्रह्मण: प्रतिपादकत्वात् । तच्चोक्तं माण्डूक्योपनिषदि -

'यच्चान्यत्त्रिकालातीतं तदप्योंकार एव' (मा० उ० १-१)

'ओमिति ब्रह्म' (तै० उ० १-८)

इत्यादिश्रुते: वेदानां प्रणवस्य च स्थानप्रतिनिधिभाव: संबन्ध: सिध्यति । अत्र श्रुति:-

'य ऋचो धीते' इत्याद्युपक्रम्य 'य: प्रणवमधीते स

सर्वमधीते, ओमिति प्रतिपद्यते, एतद्वै यजुस्त्रयीं विद्यां

प्रत्येषा वागेतत्परममक्षरम्'

(तै० आर० २-११-४) इति। प्रणवस्य सर्वमन्त्रात्मकत्वात् मन्त्रेषु सर्वदेवतानां निवासात् सर्वदेवनिवासत्वं, ब्रह्माधिष्ठानाद्वा ब्रह्मणि सर्वदेवानां निवासात् सर्वे देवाः तस्मिन् प्रणवरूपे ब्रह्मणि अधिनिषेदुः। ऋगादिषु ये देवाः ते सर्वे मन्त्रद्वारेणाक्षरे निषण्णाः भवन्ति, तस्याक्षरस्य मन्त्रादिशब्दकारणत्वात्। स्वर-व्यंजनोपासनेन मुक्तिरिति ऐतरेयारण्यके श्रूयते। तथा हि -

ऐतरेयारण्यके तृतीये द्वितीयाध्यायस्य द्वितीयखण्डे कौण्ठरव्यनाम्ना महर्षिणा वक्ष्यमाणोपासनप्रकरणे एवमाम्नातं भवति -

'त्रीणि षष्टि शतान्यक्षराणां त्रीणि षष्टि

शतान्यूष्माणां त्रीणि षष्टि शतानि सन्धीनाम्'

(ऐ० आ० ३-२-२-१) इति। अत्र अक्षरशब्देन अकारादयः स्वराः विवक्षिताः भवन्ति। ऊष्मशब्देन सर्वाणि व्यंजनाक्षराणि अभिधीयन्ते। सन्धिपद-प्रयोगेण तयोः स्वरव्यंजनयोः परस्परसंयोगो उपलक्ष्यते। एवमुपास्यत्वेन विहिता-क्षरव्यंजनयोः सन्धिषु तत्तद्देवतावयवनामहरादि दृष्टिं विधाय, तस्मिन्नेव अस्थ्यादिरूपपुरुषशरीरावयवादीनां दृष्टिः पुनः विधातव्या। अनन्तरं तत्र अस्थिदृष्ट्यनन्तरं यथा पुरुषशरीरे अस्थ्यनन्तरं मज्जा भवति, एवमत्रापि स्वरव्यंजनसन्धौ मज्जदृष्टिं कर्तव्या। अथ च तेष्वेव सन्धिषु शरीरावयवसन्धि-ध्यानमभिधत्ते -

'यान्त्सन्धीनमधिदेवतमवोचाम पर्वाणि तान्यध्यात्मम'

(ऐ० आर० ३-२-२-५) इति।

(एवमुम-) एवमक्षरव्यंजनयोः देवतावयवानां शरीरावयवास्थिमज्जादीनां ध्यानं विधाय, संख्याद्वारेण एतध्यानप्रशंसां करोति। द्रष्टव्यं चात्र सायणभाष्यम्[१]। अन्ते आध्यात्मिकरूपे पुरुषध्याने गुणविशेषान्विधाय एवमभिहितायाः उपासनायाः

---

१ ऐ० आर० सा० पृ० २४५

फलमेवं व्याचष्ट -

'स य एतमेवाक्षरसंमानं चक्षुर्मयं श्रोत्रमयं छन्दोमयं मनोमयं
वांग्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां सलोकताम-
श्नुते पुत्री पशुमान्भवति सर्वमायुरेति ।'

(ऐ० आर० ३-२-२-७) इति । एवमत्राक्षरव्यंजनयोः उपासना प्रतिपादिता । अनेन मार्गेण उपासकस्य क्रमेण मुक्तिरिति महर्षिरयमभिप्रैति । इति ।

अपि ओंकारस्वरूपे प्रणवे प्रथमायां मात्रायां पृथिवी, अग्निः, ऋग्वेदः पृथिवीलोकनिवासिन इति । द्वितीयायां मात्रायामन्तरिक्षं वायुर्यजूंषि, तल्लोकनिवासिनो जना इति । तृतीयायां मात्रायां द्यौरादित्यः, सामानि तल्लोकनिवासिनो जना इति । अत एवाम्नायते-

'तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण
सर्वा वाक् सन्तृण्णा, ओंकार एवेदं सर्वम्'

(छा० उ० २-२३-३) इति । यः तान्यक्षरात्मना न पश्यति, किमसौ ऋगादिभिः मन्त्रैः करिष्यति । ये तद्विदुः ते हि तत्परिज्ञानात् तद्भावमुपागताः प्रणवविग्रहमात्मानमनुप्रविश्य समीकृताः भवन्ति । ते शान्तार्चिष इवानलाः, निर्वाणं प्रपंचोपशमं ब्रह्मसुखमविरतमनुभवन्तीति यावत् ।

मन्त्रस्यास्य व्याख्यायाः चतुर्थप्रकारः - ऋचः - ऋगिति पदस्यार्चनीयो जीवः, जीवस्यास्य विविधैर्भोगैः सम्यगर्चनीयत्वं सिद्धम् । तस्य जीवस्य संबन्धिनि व्याप्तरूपे अविनाशे परमात्मनि इति । जीवपरमेश्वरयोः औपाधिकांशयवच्छिन्नानवच्छिन्नाभासनिवासादिभावः संबन्धः, अथवा औपाधिकस्यावच्छिन्नानवच्छिन्नाभासबिम्बादिभावः संबन्धः जीवपरमात्मनोः इति सिध्यति । अतः जीवापेक्षया उत्कृष्टे निरुपाधिके विशेषेण सर्वजीवाधिष्ठानतया व्योमसदृशे रक्षके परमात्मनि । यस्मिन् परमात्मनि देवाः गमनवन्तः इन्द्रियसंज्ञकाः भवन्ति, तानि इन्द्रियाणि विषयेषु च द्योतन्ते । तस्मिन् परमात्मनि सर्वेऽपि जीवाः आश्रित्य वर्तन्ते । तस्मिन् अवतिष्ठन्त इत्यर्थः । यः स्थूलबुद्धिर्जनः उपाध्यंशपरित्यागेन तस्य जीवस्वरूपं न पश्यति, स केवलया ऋचा किं करिष्यति । केवलेन जीवभावेन किं फलं प्राप्स्यति । तस्य जनन-मरणक्लेशादयः अनुवर्तन्ते । आविद्यकसंसारस्या-

नुवर्तमानत्वात् इति भाव: । येजीवा: एतादृशं तत्त्वं न विदु: ते: जीवने किं साधितं न किमपीत्यर्थ: ।

तस्मात् य: जीव: वेदाध्ययनं कृत्वा तस्यार्थं च सम्यगनुसन्धाय वेदार्थस्वरूपं मनसि अवधारयति स एव कृतकृत्यर्के: आत्मज्ञानसाक्षात्कारवान् भवति । तथा च आत्मज्ञानलाभ: वेदेनैव सिध्यति इत्यत: वेदाध्ययनमवश्यं सर्वै: कर्तव्यम् । वेदेषु ऋग्वेदस्य प्रथमत्वात् अस्मिन् वेदे सर्वै आत्मज्ञानविषयकतत्त्वानि सूक्ष्मरूपेण वर्तन्त इति सर्वेषामद्वैततत्त्वानां ऋग्वेद: मूलम् भवतीति ।

भगवता वेदव्यासेन प्रणीतानां ब्रह्मसूत्राणां भाष्यकर्ता भगवान् श्रीमच्छंकराचार्य: ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य प्रथमपादे द्वाविंशतितमे सूत्रे आकाशाधिकरणे ब्र० सू० १-१-२२ आकाशपदं ब्रह्मपरम् इति निरूपणार्थं मन्त्रममुं प्रतिपादयामास ।

अस्मिन्नधिकरणे प्रतिपादितो विशेष: - पूर्वस्मिन् अन्तराधिकरणे -

'य एषो न्तरादित्ये हिरण्मय: पुरुषो दृश्यते'

(छा० उ० १-६-६) इत्यादि छान्दोग्यश्रुतौ उपास्यत्वेन प्रतिपाद्यमान: कश्चित् संसारी उत परमेश्वर: इति विकल्प्य, अस्यां श्रुतौ परमात्मन: धर्माणां गीयमानत्वात् तस्यैव ब्रह्मण: असाधारणधर्मदर्शनात् विवक्षितोपाधिना अस्य परमात्मन एवोपासना भवितुमर्हति । अत: आदित्यशरीराभिमानिन: जीवात्मन: उपासना अनया श्रुत्या नोच्यत इति सिद्धान्तितम् । अस्मिन् आकाशाधिकरणे असाधारणधर्मदर्शनात् इति पूर्वोक्तेनैव हेतुना आकाशपदेन न भूताकाशो अभिधीयते, किन्तु परंब्रह्म इति निर्धार्यते । पूर्वस्याधिकरणस्य अस्याधिकरणस्य च प्रत्युदाहरणसंगति: । अस्मिन्नधिकरणे 'श्रुति: लिंगाद्बलीयसी' इति प्रदर्श्यते । अस्याधिकरणस्य विषयवाक्यं भवति यत् -

'अस्य लोकस्य का गतिरिति । आकाश इति होवाच ।
सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते,
आकाशं प्रत्यस्तं यन्ति । आकाशो ह्येवेभ्यो ज्यायान् ।
आकाश: परायणम् ।'

(छा० उ० १-९-१) इति छान्दोग्यश्रुति: । अत्र संशयो भवति आकाशशब्देन

भूताकाश: अभिधीयते उत परं ब्रह्मेति । श्रुतावस्यां संशयस्य मूलं तु - छान्दोग्ये अस्मिन् प्रकरणे शालावत्यो ब्राह्मण: जैवलिं राजानं पृच्छति - अस्य पृथ्वीलोकस्यान्येषां च लोकानां क: आधारो भवति इति । तदा राज्ञा प्रत्युच्यते- एतेषामाधारभूत: आकाशो भवतीति । अत: आकाशपदे सन्देह: । अपिच लोके वेदे चोभयत्रापि आकाशपदस्य व्यवहारो दृश्यते । लोके तावत् आकाशपदस्य व्यवहार: सुप्रसिद्ध: । ब्रह्मण्यपि आकाशपदस्य व्यवहार: श्रुत्यादिषु दृष्ट: । तथा हि -

'यदेष आकाश आनन्दो न स्यात्'

(तै० उ० २-७) इति । अत्र भूताकाशस्य ग्रहणे तस्यानन्द: न सिध्यति । अत: अत्र वर्तमानाकाशशब्दवाच्य: ब्रह्मेति । अन्यत्र च -

'आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म'

(छा० उ० ८-१४) इति श्रूयते । अत्रापि भूताकाशस्य नामरूपप्रपंचस्य निर्वाह:, प्रपंचे अन्तर्वर्तित्वे च न सिध्यत: । अत: आकाशपदेन परंब्रह्मेति निर्णय: क्रियते ।

अन्यत्र च छान्दोग्ये -

'-------- सत्यसंकल्प: आकाशात्मा सर्वकर्मा ----'

'ज्यायानन्तरिक्षात्' (छा० उ० ३-१४-२,३)

'अथाधिदैवतमाकाशो ब्रह्म' (छा० उ० ३-१८-१)

इत्यादय: श्रुतय: परब्रह्मण: श्रूयन्ते ।

अत्र पूर्वपक्षी आक्षिपति - उदाहृतश्रुतिमध्यपतिताकाशशब्देन भूताकाश एव श्रूयते, न परं ब्रह्मेति । आकाशशब्द: उभयो: साधारणत्वेन न प्रत्यभिज्ञायते । प्रसिद्धप्रयोगेण लोके तेन पदेन सार्वजनिका: भूताकाशमेवाभिधास्यन्ति । आकाशपदस्यान्यथानयने तस्यानेकार्थत्वप्रसंग: । अत: भूताकाशे एव आकाशपदस्य मुख्यत्वं ब्रह्मणि तस्य पदस्य गौणत्वेन व्यवहार इति । अपिच भूताकाशेनापि वाय्वादीनामन्येषामुत्पत्ति: श्रूयते । तथा हि -

'तस्माद्वा एतस्मादात्मन आकाश: संभूत:, आकाशात्
वायु:, वायोरग्नि:'

(तै० उ० २-१) इति । अनेन आकाशस्यापि कारणत्वं सिध्यति । तस्मात् अनया श्रुत्या प्रतिपादिताकाशपदेन भूताकाश एव परिगृह्यत इति चेत्-उच्यते ।

अस्यां श्रुतौ आकाशपदेन ब्रह्मण एव ग्रहणं कर्तव्यम् । अत्र तस्यैव परब्रह्मण: लिंगं भवति । तथा च श्रुति: -

'सर्वाणि ह वा (भुवनानि) इमानि भूतानि आकाशादेव
समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति, आकाशो ह्येवेभ्य:
ज्यायानाकाश: परायणम्'

(छा० उ० १-६-१) इति । केवलं भूताकाशेनैव वाय्वादिजगत्सृष्टिरिति वेदान्तेषु नोच्यते, अपितु परस्माद्ब्रह्मण एव जगदुत्पत्तिरिति वेदान्ता: प्रतिपादयन्ति । कारणत्वविषये मूलकारणापेक्षया अवान्तरकारणस्याप्रधानत्वात् । अत्र संग्रहश्लोको भवति[1] -

प्रथमत्वात्प्रधानत्वादाकाशं मुख्यमेव न: ।
पदानुगुण्येनान्यानि व्याख्येयानीति निश्चय: ।।

इति । भवति च भामतीकाराणां संग्रहश्लोक[2]: -

सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययो: ।
पौर्वापर्यपरामर्शात्प्रधानत्वेऽपि गौणता ।।

इति । भाष्यकार: आचार्य: स्वसिद्धान्तस्य मुख्यकारणतया इमां वेदश्रुतिमुदाहरति । अत्र शांकरं भाष्यम्[3] -

'आकाशपर्यायवाचिनामपि ब्रह्मणि प्रयोगो दृश्यते - 'ऋचो
अक्षरे ---------- विश्वे निषेदु:' इति'।

इति । अत्र भाष्यकारै: मन्त्रार्थ: प्रकरणेनैव सिद्धो भवतीति कृत्वा मन्त्रार्थविवरणे मति: न प्रदर्शिता । भाष्यरत्नप्रभायां[4] मन्त्रार्थस्तु एवम् -

'अक्षरे कूटस्थे व्योमन् व्योम्नि ऋच: वेदा: सन्ति
प्रमाणत्वेन यस्मिन् अक्षरे विश्वेदेवा अधिष्ठिता इत्यर्थ:'

इति । ब्रह्मज्ञापकत्वेन अथवा ब्रह्मलक्षणकत्वेन ऋग्वेदादिवेदा: वर्तन्त इति यावत् ।

---

१ ब्र० सू० शां० भा० पृ०
२ भामती पृ० २०६
३ ब्र० सू० शां भा० २११ - २१२
४ भा० र० पृ० २११ - २१२

आनन्दगिरीयन्यायनिर्णये मन्त्रस्यास्य एवमभिप्रेतं वर्तते -

'व्योमन् व्योम्नि परमे प्रकृष्टे अक्षरे कूटस्थे ब्रह्मणि

ऋगुपलक्षितास्सर्वे वेदा: ज्ञापका: सन्ति, यस्मिन्नक्षरे

विश्वेदेवा अधि निषेदुरधिष्ठिता स्वरूपत्वेन प्रविष्टा इत्यर्थ:'

इति । तस्मात् एतेषां भाष्यपर्यालोचनेन एतत्सिद्धं भवति यत् ऋगुपलक्षितै: वेदादिभिरेव ब्रह्मण: स्वरूपं ज्ञातुं शक्यते नान्यथा,+ अत: ऋगादीनामध्ययन-पुरस्सरं तत्र प्रतिपादितस्वरूपज्ञानार्थम् आत्मज्ञानार्थं वा तत्रोक्तरीत्या ब्रह्मण: श्रवण-मनन-निदिध्यासनानि कर्तव्यानि, ब्रह्मज्ञाने ऋगादिवेदादय: एव आत्मज्ञानार्थे प्रवृत्तपुरुषस्य शरणं भवन्तीति । तस्मात् अस्मिन्नधिकरणे विषयवाक्यत्वेन प्रतिपादितश्रुत्या वर्तमानाकाशपदस्य परब्रह्मणि तात्पर्यमिति सिध्यतीति शांकरभाष्यम् ।

सायणाचार्यै: मन्त्रस्यास्य चतु:प्रकारेणार्थौ विवृतो आसीत् । तत्र तृतीयव्याख्यानं प्रणवविषयकम् । इतराणि ब्रह्मपराणि । तत्रापि ऋच: इति पदेन सांगवेदा: विवक्षिता: प्रथमे तृतीये च । द्वितीये आदित्य: तन्मण्डलं वा । चतुर्थे तु जीव: विवक्षित: । चत्वारो अप्यर्था: मन्त्रस्य समानार्थका: भवन्ति । तत्र तै: प्रतिपादितं प्रथमं ब्रह्मपरार्थमेव मनसिकृत्वा श्रीमच्छंकराचार्यै: सूत्रभाष्ये मन्त्रो ऽप्युदाहृत: । अधिकरणे तत्र तै: ~~मन्त्रस्यास्य मुख्यार्थ: ब्रह्मपर एव भवति~~ तथा अस्यार्थ: प्रदर्शितश्च । अत: मन्त्रस्यास्य मुख्यार्थ: ब्रह्मपर एव भवति उभाभ्यां मततोलनेन । तस्मात् ऋग्वेदे ब्रह्मस्वरूपनिर्णय: अनया ऋचा सिध्यति । अद्वैतशास्त्रे परमोत्कृष्टं तत्त्वं ब्रह्म इत्युच्यते किल तस्य स्वरूपम् ऋग्वेदे एव उपवर्णितम् । अत: अद्वैतसिद्धान्त: न नवीन: किन्तु वेदकालादेव अद्वैतसिद्धान्तानां सत्ता ज्ञायते । अत एव वेदस्योत्कर्ष: तस्यापौरुषेयत्वं चेति विपश्चिद्भिर्विवेचनीयो विषय: इति शम् ।।

-0-0-0-0-0-0-

(सूक्तमकन्द)

सूत्रभाष्यस्य प्रथमाध्यायस्य प्रथमपादे चतुर्विंशतितमे सूत्रे ऋगियं पठिता -

एतावानस्य महिमा अतो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।

(ऋ० सं० १०-९०-३) इति । दशममण्डलस्य नवतितमे सहस्रशीर्षेतिषोडशर्चे सूक्ते अयं तृतीयः ।

सूक्तस्यास्य नारायणो नाम ऋषिः । अस्य सूक्तस्य 'पुरुषान्न परं किंचित्' (कठ०३-११) इत्यस्यां श्रुतौ प्रतिपादितः अव्यक्तमहदादिविलक्षणः चेतनः पुरुषो देवता । ऋगियं अनुष्टुब्छन्दोबद्धा । मन्त्रो अयं पुरुषस्य महिमावर्णनं,तस्य स्वरूपमपि प्रतिपादयति ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - प्रतिपाद्यमानः चेतनरूपपुरुषः स्वकीय-सामर्थ्यविशेषेण अतीतानागतवर्तमानरूपां भिन्न-विभिन्नप्रकारेण दृश्यमानां एतावतीं जगत्सृष्टिं चकार । सः जगदाकारेण न कदापि परिणमते, अत एव इदं भौतिकं जगत् न वास्तविकं भवितुमर्हति । एवं च परिदृश्यमानमिदं जगत् मायिकम् । परिशेषात् जगत् मिथ्या इति सिध्यति । तथाचोक्तम् -

'ब्रह्म सत्यं जगन्मिथ्या'

इति । तस्य जगतः वास्तवस्वरूपं तु शुद्धचेतनस्वरूपमेव । अत एव स पुरुषः महिमातिशयेन सर्वेषामपेक्षया ज्यायान् भवति । भुवने अस्मिन् कालत्रयवर्तीनि सर्वाणि च भूतजातानि पुरुषस्यास्य चतुर्थो अंश इति कथ्यते । अव्यक्तमहदादि-विलक्षणस्यास्य पुरुषस्यावशिष्टं पादत्रयस्वरूपं जनन-मरणरूपविनाशरहितं सत् द्योतनात्मके स्वप्रकाशरूपे चिदात्मनि व्यवतिष्ठत इति ।

ननु पादो नाम अंशः । निरतिशयानन्दस्वरूपस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य निरंशिनो ब्रह्मणः पादत्वकथनमिति-चेत्-उच्यते-+ नोपपन्नमिति चेत् - उच्यते । 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० २-१) इति श्रुत्या लक्षणस्वरूपेणाम्नातस्य परब्रह्मणः इयत्तायाः अभावात्,यद्यपि तस्य पादचतुष्टयमिति निरूपणमनुपपन्नमेव,+ तथाऽपि सकलभूतजातरूपेण जगदाकारेण च वर्तमानेयं सृष्टिः तस्य ब्रह्मणः

स्वरूपापेक्षया अत्यल्पेति अत्र विवक्षितत्वात् पादत्वकथनमुपपन्नमेवेति ।

श्रीमच्छंकराचार्याः ब्रह्मसूत्रभाष्ये मन्त्रममुं प्रथमाध्यायस्य प्रथमपादे नवमे ज्योतिश्चरणाधिकरणे (ब्र० सू० १-१-२४) इत्यत्र प्रतिपादयामासुः । अमुं मन्त्रमुपजीव्यैवअधिकरणं प्रवर्तयति । ~~अधिकरणस्यास्य-प्रथमं-सूत्रम्~~

'ज्योतिश्चराभिधानात्' (ब्र० सू० १-१-२४)

इति सूत्रस्थचरणशब्दस्य पाद इत्यर्थः । ~~तथा-चोक्तम्~~ -

~~चरणं-विततं-पवित्रं-विततं-पुराणम्~~

अस्मिन्नधिकरणे ज्योतिःपदार्थः कः इति संशय-पूर्वपक्षोत्थापनपूर्वकमुत्थाप्य विचार्यते । अधिकरणस्यास्य विचारार्थं विषयवाक्यमेतद् स्वीक्रियते -

'अथ यदतः परो दिवो ज्योतिर्दीप्यते ----अन्तःपुरुषे ज्योतिः'

(छा० उ० ३-१३-७) इति । अत्र ज्योतिःपदार्थः किमादित्यः उत परमात्मा इति विचार्यते । अत्र पूर्वपक्षी - तमो ज्योतिरिति परस्परद्वन्द्विपदार्थौ लोके प्रसिद्धौ । सर्वत्र लोकन्याय एव प्रथममादरणीयः, नास्ति वैचत्र लोकन्यायेतरः । अपि च श्रुतौ 'दीप्यते' इति वर्तते, यदि तेजःपदार्थः आदित्य एव स्यात् तदानीमेव तस्य दीपनं तापः इति वक्तुं शक्यते । ब्रह्म तु अदृश्यमानः पदार्थः । कथमदृश्यमानपदार्थेन ~~तापो-भवति-श~~ शरीरादिषु अन्यत्र भवेत् ? किं च महते हि फलाय ब्रह्मोपासनं सर्वैरिष्यते । मुक्तिफलार्थं हि ब्रह्मोपास्तिः । अतः अत्र अल्पफलाय ब्रह्मोपास्तिः न युक्ता । अनेन च कारणेन आदित्योपासनमेवात्र प्रतीयते । अपरं च 'त्रिपादस्यामृतं दिवि' इत्यत्र वर्तमानः द्युपदार्थः अधिकरणत्वेन श्रूयते । प्रकृते तु जीव इति प्रथमान्तत्वेन मर्यादावाचकत्वं भजते । अतः उक्तैः चतुर्भिर्हेतुभिः अनेन मन्त्रेण प्रतिपाद्यमानो ज्योतिःपदार्थः न परब्रह्मज्योतिरूपः, आदित्य एवेति स्वाभिमतं प्राचीकटत् ।

अत्राहुः सिद्धान्तमाचार्यपादाः - भो पूर्वपक्षिन् ? अलमलमतिप्रलापेन । अधिकरणेऽस्मिन् प्रतिपादितवाक्यस्य पूर्वापरं वाक्यं किंचित्समालोच्यताम् । अतः छान्दोग्यवाक्यस्य पंचमे प्रपाठके श्रुतिरियं पठिता ।

'सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम्'

(छा० उ० ३-१२-५) इति निरूप्यानन्तरोऽयं ऋङ्मन्त्रो पठितः - एतावानस्येति ।

प्रकरणे अस्मिन् श्रुतिरियं छान्दोग्येत्वेन श्रूयते । अस्यां 'एतावानस्य' इत्यत्र तावानस्येति तथा 'विश्वा' इत्यत्र सर्वा इति च वर्तते । छान्दोग्ये इयं श्रुतिः (३-१२-६) इत्यत्र पठिता । अत्र अतः- अतस्माद्धेतोः, ततः- अनन्तरं तदुपरि मिन्न इति विवेचनीयः । अन्यः श्रुत्यर्थः उभयत्र समानः । मन्त्रार्थः -

'गायत्री वा इदं सर्वम्' (छा० उ० ३-१२-१) इत्यादिना श्रुतेः यो अर्थः प्रतिपादितः तावत्परिमाणः सर्वः प्रपंचः एतदनुमतो अस्य ब्रह्मणः विभूतिरूपमहिमा, काल्पनिकवास्तवदृष्ट्या यावानयं प्रपंचः अस्माकं दृष्टिगोचरो भवति, ततः- तदपेक्षया पुरुषनेरूपो अयंब्रह्म ज्यायान्- महत्तरः । तस्य महत्वमेव चतुर्धा विभज्य पादशब्देनोच्यते । पादः- अंश इति । पूर्णरूपपरब्रह्मणः सर्वं भूत-भौतिकरूपमिदं जगत् एकांशः । तथा चोच्यते भगवता गीतायाम् -

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'

(भग० १०-४२) इति । अवशिष्टस्त्रतीयांशः तस्य द्योतनात्मकरूपे स्वप्रकाशे स्वात्मनि अमृतरूपे ब्रह्मणि अवतिष्ठत इति । एवंच मन्त्रेणानेन एतदायातम् - एकेनांशेन प्रकल्पितावास्तवरूपात्प्रपंचात् त्रिरंशेन अवशिष्यमाणः स ब्रह्म महान् सत्यश्चेति । अनेन ऋङ्मन्त्रेण जगन्मिथ्यात्वमवबुध्यते । भाष्ये तु -

'तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्'[1]

इति स्वसिद्धान्तो स्थापितो भवति ।

अस्मिन्नेवाधिकरणे 'भूतादिव्यपदेशोपपत्तेश्चैवम्' (ब्र० सू० १-१-२६) इति सूत्रव्याख्यानावसरे भाष्यकारैः कण्ठतः एवमुक्तो भवति[2] -

अनया हि ऋचा स्वरूपेण ब्रह्मैवाभिधीयते । 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इति सार्वात्म्योपपत्तेः । पुरुषसूक्ते अपीयमृक् ब्रह्मपरतयैव समाम्नायते ।'

इति । अतःअनया ऋचः बोधितः अद्वैतपरमसिद्धान्तः निर्विशयं चतुष्पात् ब्रह्म इति ।

सायणाचार्यशंकराचार्ययोरुभयोरपि पक्षे मन्त्रो अयं समानार्थकः । मन्त्रेण जगतः निकृष्टभावः ब्रह्मणः उत्कृष्टभावश्च बोधनीयत्वेन प्रतिपादितो भवति । इति शम् ।

---

१ ब्र० सू० शां० भा० पृ० २२५

२ ब्र० सू० शां० भा० पृ० २३०

पादचतुष्टयवत्त्वं प्रसिद्धस्य प्राकृतस्य ज्योतिषो न संभवति अपि तु परस्यैव ब्रह्मण: इति सिद्धान्तस्थापनाय अयं मन्त्र: भाष्ये उदाहृत इति सिद्धम् ।

अत्रेदमनुसन्धेयम् - प्रपंचे विद्यमानानामल्पकालपर्यन्तसुखजनकानां पदार्थानां साक्षात्करणे सर्वे जना: अधिकश्रमं वहन्ति, स्वायुष्कालमपि यापयन्ति च एवं ते निरन्तरसुखदायकं सुलभेन लभ्यमानं सर्वातिशयिमोक्षरूपं तद् ब्रह्म साक्षात्कर्तुं तदंगभूतवेदान्तशास्त्रविचारे श्रवण-मनन-ध्यानादीन् कर्तुं न प्रयतन्ते । संसारसागरे अस्मिन् लवलेशसुखमेव महत्सुखमिति मन्वानस्य पुरुषस्योद्धरणाय तमुपदिशति इति इयं श्रुति: - त्वया महदिति मन्यमानमेतत्सुखं अत्यल्पं भवति । सुखजनकीभूते इयं सृष्टि: ब्रह्मण: चतुर्थो अंश: भवति । सृष्टावपि व्यावहारिकसत्यत्वं वर्तते, तस्य एव भुवनाकारेण विवर्तत्वात् । अवशिष्टतृतीयांशेन स: तथैव स्वस्वरूपे तिष्ठति । अत: त्वमेकांशेनपरिणतप्रपंचगतसुखे इच्छा कर्तव्या उत तृतीयांशेनावशिष्टे तस्मिन् ब्रह्मणि इति सततं विचारं कुरु । एकांशेन जनितसुखापेक्षया अंशत्रयेणयुक्तं ब्रह्मसाक्षात्कारसुखमेवानन्तं निरतिशयानन्दं च भवति । अत: तद्विजिज्ञासस्वेति शम् ।

ooooo-----ooooo

ब्रह्मसूत्रभाष्ये ऋगियं प्रथमाध्यायस्य द्वितीयपादे द्वादशतमे सूत्रे पठिता भवति -

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।

दिवीव चक्षुराततम् ॥

(ऋ० सं० १-२२-२०) इति । प्रथममण्डलस्य द्वाविंशतितमं 'प्रातर्युजा' इति एकोनविंशत्यृचं सूक्तम् ।

अस्य सूक्तस्य काण्वो मेधातिथिः ऋषिः । अस्यां सूक्तानुक्रमणिकायां 'चोदगाथाः षाद् विष्णुदेवत्याः' इति पठितत्वात् अयं मन्त्रः विष्णुदेवताकः । प्रतिपादितेयम् ऋक् गायत्रीछन्दोबद्धा । प्रतिपादितस्यास्य मन्त्रस्य 'तद्विष्णोः परमं पदम्' इत्युक्तत्वात् निर्विशेषब्रह्मसाक्षात्कारं फलम् भवति ।

सायणभाष्यरीत्या मन्त्रार्थः - विद्वांसो ऋत्विगादयः उपनिषच्छास्त्रप्रसिद्धं नारायणस्य संबन्धिमोक्षरूपोत्कृष्टं स्थानं सर्वदा पश्यन्ति । यथा मनुष्यः सर्वतः प्रसृतमाकाशं निरोधाभावेन यावत्प्रदेशं चक्षुषा स्पष्टरूपेण पश्यति तद्वत् इति ।

मन्त्रस्यास्य व्याख्या एवमपि कर्तुं शक्यते - व्यापनशीलस्य विष्णोः सत्यज्ञानादिलक्षणं वाङ्मनसा अतीतं मुक्तोपसृप्यं ब्रह्मेति प्रसिद्धमुत्कृष्टमनौपम्यस्वभावं आत्मस्वरूपाहं ब्रह्मास्मीति ज्ञानेन, पदनीयं ज्ञातव्यं प्रत्यगभिन्नं ब्रह्मतत्त्वं पदं तस्य नित्यत्वात् कालत्रयेऽपि सम्यक् ब्रह्मज्ञानविदः पण्डिताः साक्षात्कुर्वन्ति । तथाचोक्तं श्रीमद्भागवते वेदव्यासेन -

परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ।

इति,

त एतदधिगच्छन्ति विष्णोर्यत्परमं पदम् ।

अहं ममेति दौर्जन्यं न येषां देहगेहजम् ॥

(श्रीमद्भा० १२-६-३२,३३) इति च ।

अथवा - मोक्षप्रदास्यस्थानसंबन्धिनं उपनिषच्छास्त्रेषु प्रतिपाद्यमानं नारायणं श्रवण-मनन-निदिध्यासनेभ्यः शास्त्रोक्तदिशा सर्वदा स्वहृदि प्रकाश्यमानं

तस्योत्कृष्टं स्थानं स्वात्मानं विपश्चितो मन्त्रदृष्टारः पश्यन्तीति । प्रतिपादितयोरुभयोरप्यर्थयोः मन्त्रस्य तृतीयपादेन साक्षात्कारस्य निदर्शनं कथमित्युच्यते ।
तद्यथा – दिवि दिवीवेत्यत्र वर्तमानस्य इवशब्दस्य 'यथा' इत्यर्थे प्रयोगः ।
अस्ति ह्युपमार्थस्य संप्रत्यर्थे प्रयोगः'। इहेव निधेहीति यथा (तु० या० ७-३१) इति दर्शनात् । द्युलोके व्योमनि रश्मिभिः समन्ततो विस्तारं प्राप्तं तत्र उद्यन्तं सूर्यं यथा जनाः पश्यन्ति एवं समदर्शिनं इति । चक्षुः सूर्यं इति कर्मणि द्वितीया ।
सूर्यस्य चक्षुष्ट्वं तावत् बह्वीषु श्रुतिषु तत्र तत्र उपलभ्यते -

सूर्यो भूतस्यैकं चक्षुः' (अथ० १३-२-४५)

सूर्यो वै प्रजानां चक्षुः' (शत० ब्रा० १३-३-८-४)

सूर्यो यथा सर्वलोकस्य चक्षुः (कठ० ५-११-)

इत्येवमादयः । एवं च सर्वेषां चक्षुस्थानीयं सूर्यमण्डलमिह चक्षुःशब्देनोच्यते ।
तं सूर्यं सर्वे जनाः स्पष्टतरमविवादं चक्षुरूपेणेन्द्रियेण यथा पश्यन्ति तथा विद्वांसः श्रोत्रियाः सर्वत्र परमं पदं प्रकाशानन्दस्वरूपं तत्त्वं आत्मसाक्षात्कारज्ञानेन पश्यन्तीति ।

स्कन्दस्वामी मन्त्रस्यास्य अर्थमेवं विवृणोति - स्तोतारः सदा विष्णोः स्वभूतं परमं पदं ततः पश्यन्ति । यथा दिवि द्योतमानं चक्षुःप्रकाशनमादित्यमण्डलं पश्यन्ति तद्वदिति ।

वेंकटेश वेंकटमाधवीयभाष्ये मन्त्रार्थः एवं वर्तते -

तत् विष्णोः उत्तमं स्थानं सदा पश्यन्ति प्राज्ञाः

अन्तरिक्षे विततमिव तेजः इति ।

प्रथमाध्यायस्य द्वितीयपादे तृतीयाधिकरणस्य द्वितीयसूत्रे (ब्र० सू० १-२-२) मन्त्रस्यास्य प्रथमपादान्तर्गत कठवल्लीश्रुतित्वेन -

'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्'

इत्यमुं मन्त्रं भाष्यकाराः श्रीमच्छंकराचार्याः गन्तव्यं परमात्मानं दर्शयितुं प्रत्यपादयन् ।

अस्मिन् गुहांप्रविष्टाधिकरणे

'ऋतं पिबन्तो सुकृतस्य लोके' (कठ० १-३-१)

इतीमां श्रुतिमुपजीव्य विचारः क्रियते । अस्यां श्रुतौ वर्तमानपिबन्तो इति शब्देन

बुद्धिजीवौ गृह्येते य उत जीवपरमात्मानौ गृह्येते इत्यत्र संशयः। अत्र पूर्वपक्षिण आशय एवं प्रकटीकुर्वन्ते-बत तः - प्रतिपादितावुभावपि बुद्धिजीव-जीवपरमात्मापक्षौ अत्र न संभवत इति। सर्वत्र क्रियमाणः आक्षेपः सिद्धान्तदार्ढ्यार्थमित्येवमवगन्तव्यम्। न आक्षेप्तुराक्षेप्तौ बलीयानेकः पक्षो वर्तत इति। इयं युक्तिः सर्वेषां समानम्। कथमिति चेत् - यः कोवा भवतु सः स्वाभिप्रेतं पक्षमेव सिद्धान्तपक्षमिति भावयित्वा स्वपक्षदार्ढ्यार्थं अन्यं पक्षम् अथवा स्वयमेव पक्षमेकमुपस्थाप्य पूर्वपक्षत्वेन पठित्वा तद्युक्तिखण्डनपुरस्सरं स्वपक्षं स्थापयति। अन्यपक्षस्य युक्तेः नाश एव सिद्धान्तपक्षस्य उत्कर्षः इति परिगण्यते। अनन्तरं च एषः पन्था स्वबुद्धिकौशलप्रदर्शनार्थमथवा शिष्यस्य सयुक्तिकं तत्वोपदेशार्थं वा वाक्चातुर्यप्रदर्शनार्थं वा आश्रियते। प्रकृते तु प्रतिपादितश्रुतेः एवमर्थः - कार्यरूपे देहे सुकृत-दुष्कृतरूपकर्मणः अवश्यंभावि तत्फलस्य भुंजानौ इति। कर्मफलोपभोगः अचेतनायाः बुद्धेः न संभवति। परिशेषात् तत्तु क्षेत्रज्ञस्यैव संभवति। अस्यामेव श्रुतौ पिबन्तौ इति द्विवचनेन द्वयोरपि पानस्योक्तत्वात् अनया श्रुत्या न बुद्धिजीवौ परिगृहीतौ भवतः। एवं जीवपरमात्मानाविति पक्षो अपि न संभवति। 'अनश्नन्नन्यो अभिचाकशीति' (मुण्ड० ३-१-१) इति श्रुतेः चेतनरूपपरस्यापि परमात्मनः ऋतपानायोगात्। अतः किं श्रुत्यर्थौ निरर्थक इति चेत् - न। 'पिबन्तौ' इत्यत्र औपचारिकः प्रयोगः स्वीकर्तव्यः। यथा 'राजा गच्छति' इत्यत्र एकेनैव राज्ञा राजपरिवारजनानां राजत्वोपचारः एवं एकेन जीवेनापि पिबता 'पिबन्तौ' इति प्रयोगो भवति। यः कारयति स करोत्येव' इति न्यायेन जीवपरमात्मनावित्यत्र जीवः पानस्य कर्ता, ईश्वरस्तु पानस्य कारयिता इति सिद्धेः। अतः जीवपरमात्मानौ' इत्ययं पक्षः समीचीनः। एवमेव बुद्धिजीवपक्षोऽपि साधुः एव। कर्तरि यो व्यपदेशः स एव करणे भवति। एधांसि पचन्तीतिवत्। एवं च अधिकरणेऽस्मिन् पक्षद्वयमपि साधु एव। इदमिदमनीं विचार्यते - उभयोरप्येतयोः पक्षयोः कः पक्षः श्रेयान् इति। तत्राह पूर्वपक्षी- अनया श्रुत्या बुद्धिजीवौ परिगृहीतौ भवतः। तत्कथमिति स्वयं विवृणोति- 'गुहां प्रविष्टौ' इत्यत्र यथा पिबन्तावित्यत्र लाक्षणिकत्वमुक्तम्वत् तद्वदत्रापि लाक्षणिकत्वं वक्तुं न संभवति। संभवति मुख्यार्थत्वे लाक्षणिकार्थत्वायोगात्। अतः बुद्धिजीवौ उच्येते। अपि चात्र 'न कर्मणा वर्धते नो कनीयान्' (बृ० ४-४-२३) इति श्रुतेः सुकृतस्य दुष्कृतस्य वा कर्मगोचरः परमात्मा न संभवति। 'छायातपौ' (कठ०१-३-१)

इति श्रुतिरपि चेतनाचेतनयोरेवोपसंहारं करोति । अत: ऋतं पिबन्तौ' इति श्रुत्यां प्रतिपादितौ बुद्धिजीवावेव स्यातामिति चेत् - उच्यते ।

"ऋतपानेन जीवात्मा निश्चितोऽस्य द्वितीयता । ब्रह्मणैव सरूपेण न तु बुध्या विरूपया ।।"

इति भामतीकारोक्तदिशा जीवपरमात्मानावेव अत्र इष्येते न बुद्धिजीवौ । यथा सजातीय गोरन्वेषणे नियुक्तो अन्यां गामेवानयति न विजातीयहस्त्यादीन् । एवं पिबन्तौ इत्यनया श्रुत्या सजातीयरूपावेव गृह्येते न चेतनाचेतने इति । प्रपंचितं चैतत् सविस्तरं सूत्रभाष्यतद्व्याख्यानग्रन्थेषु ।

अनन्तरं 'विशेषणाच्च' इति सूत्रेण मन्तृ-मन्तव्यत्वेन एतावेव जीवपरमात्मानौ विशेषितौ भवत इति निर्धार्यते । प्रकरणे अस्मिन् उक्तार्थदाढ्याय मन्त्रो यं पठितो वर्तते सोऽध्वन: पारमाप्नोति इति । मन्त्रार्थ: -

स: पदार्थभूत: जीव: अध्वरूपसंसारस्य पारभूतमुत्कृष्टं पदं व्यापनशीलस्य परमात्मन: स्वरूपं भजते । एवं च मन्ता जीव: स्वाविषयकसंसारविमोक्षार्थं मन्तव्य ईश्वर इति सिध्यति । मन्त्रे आप्नोतीति वर्तमानत्वात् गन्तृ-गन्तव्यत्वभावा: समीचीन इति ।

मन्त्रस्यास्य सायणाचार्या: एवमेवार्थं प्रत्यपादयन् । तत्र विपश्चित: विद्वांस: स्वात्मीयत्वेन सर्वदा विष्णो: तत्परमं स्थानं पश्यन्तीति । अत्रेतच्चिन्त्यम् । मन्त्रेणानेन झटिति अद्वितीयतत्त्वावबोधने सायणभाष्यमेव प्रथममुपकरोति । तत्कथमिति चेत् - तत्र स्वात्मीयस्वरूपत्वेन तत्स्थानं पश्यन्ति इति प्रतिपादनात् 'सोऽसौ सोऽयमात्मा' इत्ति ज्ञानेन

'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदाहं ब्रह्मास्मीति'

(बृ०) इत्यनुसन्धानेन च स्वहृदि वर्तमानमात्मानं भ्रान्तिनिरसनपूर्वकं सर्वदा पश्यन्ति । एवं च ब्रह्मण: अद्वितीयरूपमेकत्वं सिध्यति ।

श्रीमच्छंकराचार्यमतरीत्या तु मन्तृ-मन्तव्यत्वभावेन अथवा दृष्टृ-दृष्टव्यत्वभावेनोपनिषच्चक्षुषि: पूर्वमनुसन्धाय अनन्तरं निर्गुणं नित्यं शुद्धं परमात्मानं ~~स्वात्मैकत्वेन-कि~~ स्वात्मीयत्वेन विपश्चित: पश्यन्तीति । अत: जीवब्रह्मणोरद्वितीयत्वरूपैकत्वं मन्त्रेणानेन प्रतिपाद्यते इति पक्ष एव श्रेयान् । इति शम् ।

0-0-0-0-0-0-0

सूत्रभाष्यस्य प्रथमाध्यायस्य द्वितीयपादे एकादशे सूत्रे मन्त्रो यमाम्नात: -

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।

तयोरन्य: पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति ।।

(ऋ० सं० १-१६४-२०) इति । प्रथममण्डलस्य शतोत्तरचतुष्षष्टितमे अस्यवामीयसूक्ते मन्त्रो अयं विंशतितमो भवति ।

सूक्तस्यास्य दीर्घतमा इति नामांकित: ऋषि: । मन्त्रस्यास्य विश्वेदेवा देवता । ऋगियं जगतीछन्दोबद्धा । 'ऋचो अक्षरे' इत्यस्मिन् मन्त्रे विद्यमाना-क्षरशब्देन यद् ब्रह्म प्रतिपाद्यते तस्य ब्रह्मण: प्रसंशा प्रशंसा अनेन मन्त्रेण क्रियते ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थ: - पूर्वं लोकदृष्टान्तेन मन्त्रार्थमुक्त्वा अनन्तरं दार्ष्टान्तिके वास्तविके परब्रह्मणि मन्त्रार्थसमन्वय: क्रियते । शोभनगमनौ सुपतनौ द्वौ सुपर्णौ समानयोगौ समानख्यानौ च । एवं तौ समानमेकमेव वृक्षं सर्वदा आश्रयत: । तयो: पक्षिणोर्मध्ये एक: स्वादुतरं पक्वमश्नाति, अपरस्तु अनश्नन् सन् तमभिपश्यति इति लोकदृष्टान्त: । एवं दार्ष्टान्तिके पक्षिस्थानीयौ द्वौ जीवब्रह्मपरमात्मानौ समानयोगौ भवत: । योगो नाम संबन्ध: स च तादात्म्य-लक्षण इति कथ्यते । तादात्म्यस्वरूपस्तु एवं भवति - स एवात्मा जीवात्मन: स्वरूपं यस्य परमात्मन: स: तदात्मा, एवं स एवात्मा परमात्मन: स्वरूपं यस्य जीवात्मन: स तदात्मा इति । एवं द्वावपि एकस्वरूपौ भवत: ।

जीवपरमात्मनोरेकस्वरूपविषये भास्करमतानुयायिन: - जीवपरमात्मनो: स्वाभाविक: अभेद:, औपाधिक: भेद इति । परं तु ब्रह्म उपाधिश्चेति वस्तुद्वयं सत्यम् । शरीरात्मकोपाध्यवच्छिन्नं ब्रह्मैव जीव इति तन्मतम् । अद्वैतमते तु उपाधिरविद्यात्मक: अपारमार्थिक इति विशेष: । तथा च 'द्वा सुपर्णा' इति मन्त्र: जीवपरयोरौपाधिकं भेदमाचष्टे इति ते व्याचक्षते ।

रामानुजमतानुयायिन: माध्वमतानुयायिनश्च जीवपरमात्मनो: स्वाभाविकं भेदमंगीकुर्वन्ति । अतस्तन्मते अयं मन्त्र: तयो: स्वाभाविकं भेदमेव कथयतीति व्याख्यानम् । विस्तरभिया तत्तन्मतस्वरूपमत्र न विमृश्यते ।

ननु संबन्ध: वास्तविकपक्षिणोरेव भेदमपेक्षते, तस्य पदार्थद्वयनिष्ठत्वात्, अत: अत्र कथमैकात्म्यं संभवतीति चेन्न। संबन्ध: केवलभेदमपेक्ष्य न प्रवर्तते, किं तु औपाधिकभेदं वास्तवभेदं चापेक्ष्य प्रवृत्तो भवति। अत्र पक्षिरूपजीवेश्वरयो: औपाधिको भेद: न वास्तविको भेद:। वास्तविको भेद: साक्षात्पक्षिणोरेव संभवति। उक्तार्थमपेक्ष्यैव मन्त्रे 'सखायौ' समानख्यानौ नान्यख्यानौ इति।

ननु च 'एकस्य पदार्थस्य यादृशं स्थानं तत्समानाख्यं स्थानं अन्यस्यापि' इति व्युत्पत्त्या अत्र भेद: स्फुटं प्रतिभाति। सत्येवं कथं भवद्भि: तादात्म्यमुच्यत इति चेत्-उच्यते। मन्त्रेऽस्मिन् वक्ष्यमाणयो: जीवेश्वरयो: परस्परं दृष्टान्तदार्ष्टान्तिकभाव: नास्ति। यदि स्यात् तदा उक्तदोषापत्ति:। अपि च द्वावपि एकरूपप्रकाशवत्त्वात् यस्य यादृशं स्थानं परमात्मन: स्फुरणं तदेव स्थानमितरस्य जीवात्मन: इत्यत: सखायौ इति जीवेश्वरौ उच्येते। तस्मात् द्वयोरैकात्म्यमुपपन्नं भवति। अनेन औपाधिकभेदेन जीवेश्वरयो: संबन्धस्य साधितत्वात् जीवेश्वरयो: वास्तवभेदमंगीकृत्य ये सुसाधयन्ति ते अत्र निराकृता: भवन्ति इति।

उभावपि जीवेश्वरौ स्वं- स्वरूपं वृक्षं समानं परि षस्वजाते। जीवेश्वरयोरुभयोरपि औपाधिकत्वात् प्रज्ञानघनं ब्रह्म अत्र वृक्षशब्देनोच्यते। यथात्र आश्रयान्तराभावात् उभयोरेकाश्रयत्वं अवश्यमभ्युपगन्तव्यं भवति + तथा 'सयुजा' 'सखाया' इत्युभयत्रापि एकयोगस्थाने आश्रयणीये भवत:। अथवा वृश्च्यते इति वृक्षो देह:। स च जीवेश्वरयोरुभयो: समान: एक एव। जीवस्य भोगार्थत्वात् परमेश्वरस्य सृष्टस्य महाभूतै: आरब्धत्वात् तस्योपलब्धिस्थानत्वाच्च इति देहत्वं उभयोरपि समानम्। तादृशं समानं वृक्षं परि षस्वजाते- परिष्वज्य आश्रयत इति।

नच जीवस्य वस्तुत: ईश्वरत्वे सति तस्य जीवस्य जीवबुद्ध्या कथं संसारशोकस्ववत्त्वापत्तिरिति वाच्यम्, जीवस्य संसारशोकवत्त्वादे: मोहकृतत्वात्। अथवा ईश्वरत्वं जीवत्वमित्युभयोरपि परस्परं मोहकृतत्वात् इति।

एवं जीवेश्वरयो: मध्ये अन्य: जीवात्मा संचितं स्वादुभुक्तं कर्मफलं भुंक्ते। अत्र स्वादुत्वं सुस्कृतं-दुष्कृतयोरुभयोरपि सिध्यति। अवश्यं तेन अत्यत्वात्। यस्य यदुपार्जितं स्यात् तत्तस्य स्वादु भवति। अन्य: परमात्मा तु आप्तकामत्वेन

अभुंजान एव तथा तिष्ठति । तस्य भुजिकर्मणि स्पृहाया अभावात् । तथा चोक्तं माण्डूक्यकारिकायाम् -

'आप्तकामस्य का स्पृहा' (मा० का० १-६)

इति । तस्मादत्र अवास्तवभेदमुपजीव्य मन्त्रे 'तयोरन्य:' इत्युक्तं भवति । वस्तुतस्तु

'अनीशया शोचति मुह्यमान:' (मुण्ड०३-१-२)

इति मुण्डकश्रुत्युक्तरीत्या जीव-परमात्मनो: अभेद एवेति अस्मात् मन्त्रात् अद्वैतपरम-सिद्धान्त: जीवब्रह्मणोरभेद: सिद्धो भवति । य: ईश्वरत्वेनाध्यस्त: तादृश: परमात्मा स्वात्मनि अध्यस्तंजगत् साक्षित्वेन रूपेण पश्यतीति ।

आथर्वणिकास्तु मन्त्रमममुद्‌भाव्य मन्त्रे अस्मिन् प्रतिपादितस्यार्थस्य सन्देह-निवर्तनपुरस्सरं अन्यममुं मन्त्रमामनन्ति -

समाने वृक्षे पुरुषो निमग्न: अनीशया शोचति मुह्यमान: ।

जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक: ।।

(अथ० ६-१४-२१) इति । अथर्ववेदे ऽप्यस्मिन् प्रकरणे आचार्यसायणेन नैवार्थो लिखित: । तत्रास्य सूक्तानुक्रमणिकादशायां पंक्तिरेषा तैरुल्लिखिता वर्तते[१] -

'अस्य वामस्येत्यत सूक्तमन्त्रा: ऋगन्तर्गते तस्मिन्नेव

सूक्ते दृष्टा: । तत्र तद्भाष्यं द्रष्टव्यम् ।।'

इति । अत: अस्या: सूक्त्यनुसारेण पूर्वमेवात्र मन्त्रार्थमुप उपवर्णित: ।

श्रीमच्छंकराचार्या: उभयोरपि मन्त्रयोरर्थं मुण्डकोपनिषदि प्रत्यपादयन् । तस्यायं सारांश:[२] - पुन: पुन: प्रतिपादितेऽपि तत्त्वस्यात्यन्तदुरवगाहत्वात्, परमार्थवस्त्व-वधारणार्थं प्रकारान्तरेण सूत्रभूतोऽयं मन्त्र: उपन्यस्यते + इति प्रथममुपस्थाप्य, समानाभिव्यक्तिकारणौ अविद्याकामकर्मवासनाश्रयलिंगोपाध्यात्मेश्वरौ अव्यक्तमूलप्रभवं क्षेत्रसंज्ञकं सर्वप्राणिकर्मफलाश्रयं, वृक्षमिव उच्छेदनसामान्यात् शरीरं वृक्षं परिष्वक्तवन्तौ । तयोरेक: क्षेत्रज्ञ: अविवेकत: अनेकविचित्रवेदनास्वादरूपं सुखदु:खलक्षणं कर्मनिष्पन्नं फलं आसंसारान्तं भुंक्ते । नित्य-शुद्ध-बुद्ध-मुक्तस्वभाव: सर्वज्ञ: अन्य: न किमपि अश्नाति । तस्य कर्मनिष्पन्नफलस्याभावात् स ईश्वर: केवलं भुज्यमानस्य जीवस्य सर्वदा साक्षी

----
१ अथ० पृ० १२०४ (द्वितीयो भाग:)
२ ईशा० शां भा० पृ० ५२१

भवति । नच इष्टानिष्टरूपवृष्टिकर्मणि स ईश्वरः प्रेरयिता भवति, अतः तस्यापि कर्मफलभोक्तृत्वप्रसंग इति वाच्यम् । तस्य सृष्टिकर्मणि प्रेरयितृत्वं केवलं दर्शनमात्रमेव भवति न कर्मसापेक्षत्वमिति । यथा राजवत् । एवं सति कथमविद्यारूपसंसारे निमग्नः जीवः कृतकृत्यो भवति इत्याक्षेपे सति तदुत्तरतया मन्त्रोऽयं प्रवर्तते - समाने वृक्षे इति । भोक्ता जीवः अविद्याकामकर्मफलरागादिगुरुभाराक्रान्तः संसारसमुद्रे निमग्नः देहात्मभावमापन्नः निश्चयेन स्वात्मनि देहधर्मान् इन्द्रियधर्मान् अन्तःकरणधर्मांश्च अध्यस्य दीनभावेन सर्वदा शोचति । एवंभूतः जीवः मनुष्ययोनिजत्वमापद्य अनेकजन्मसु शुद्धधर्मसंचितनिमित्तः कदाचित् जीवभावमापन्नः सन् सः संचितपुण्यविशेषेण केनचित्परमकारुणिकेन दर्शितज्ञानमार्गः सन् अहिंसासत्यब्रह्मचर्यसर्वत्यागशमदमादिसंपन्नेन समाहितात्मा भूत्वा ज्ञानमार्गेण अन्यं वृक्षोपाधिलक्षणाद्विलक्षणमीशमसंसारिणं यस्मिन् काले पश्यति, तदा सर्वस्य जगतः सर्वस्य समः सर्वभूतस्थः अयमात्मा अहमस्मि नेतर इति अपगतवीतशोकन कृतकृत्यो भवति ।

सायणाचार्या अपि 'समाने वृक्षे' इति मन्त्रस्यैवमर्थमकार्षुः - शरीरे एक एव पूर्णः पुरुषः स परमात्मा, स्वयमीश्वरोऽपि शरीरे निगूढः सन् अनीश्वरबुध्या सर्वदा शोचति, यथा मूढवत् । सः जनन-मरणरूपसंसारे कर्ताऽहं भोक्तेत्यादिसुखदुःखधर्माननुभवति । यदा नित्यतृप्तमन्यं परमेश्वरं स्वानन्यतया स्वहृदि साक्षात्करोति तदा देहाद्व्यतिरिक्तः स्वस्वरूपदर्शनेन संसारे गततापत्रयो भवति । ईश्वरस्य महिमानमयं जीवः प्राप्नोति । ईश्वरभावानाप्तौ तन्महिमा न प्राप्यते । तस्मिन् ईश्वरे एकीभवति इत्यतः वस्तुतः एक एव । जीवेश्वरभेदभेदबुद्धिकल्पोपाध्या तयोर्भेदः स्वीकृतः, अतः सः भेदः कल्पितः । भेदस्तु मोहकृतः इति । भेदाभेदयोर्मध्ये अभेद एव बलवान् एकत्वात्, भेदस्तु नानापदार्थनिष्ठः। एकभिन्नमन्यन्नाना इत्युच्यते । अनुभवदशायां व्यावहारिकबुध्या जीवेश्वरयोः भेदमभ्युपेत्य तथा व्यवहारः क्रियते । ब्रह्मसाक्षात्काररूपानुभवसमनन्तरक्षणमेव व्यावहारिकी नानात्वबुद्धिः नश्यति । तथाचोक्तमद्वैतसिद्धौ मिथ्यात्वानुमाने 'ज्ञाननिवर्त्यत्वं मिथ्यात्वम्'[1] इत्यस्मिन् निर्वचने । निरूपितं च तत्र सप्रपंचं मधुसूदनसरस्वतिभिः इति ।

---

१ अ० सि० पृ०

निरुक्तेऽपि 'द्वा सुपर्णा' इति मन्त्रस्य अर्थो वर्णितः । तथा -

'द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्तारौ । दुष्कृतं पापं परिसारकमित्याचक्षते । सुपर्णा सरूपतां सखायेत्यात्मानं (दुरात्मानं) परमात्मानं प्रत्युत्तिष्ठति । शरीर एव तज्जायते वृक्षात् वृक्षं शरीरम् । वृक्षो पक्षौ प्रतिष्ठापयति । तयोरन्यद्भुङ्क्ते चान्नमनश्नन्नन्यां सरूपतां सलोकतामश्नुते । य एवं वेद । अन्नमनश्नन्नन्योऽभिचाकशीति इत्यात्मगतिमाचष्टे ।।'

(नि०१४-३०) इति । श्वेताश्वतरोपनिषद्यपि श्रुतिरियं पठिता । अस्याः अर्थः समानः सर्वत्र इति ।

श्रीमच्छंकराचार्याः मुण्डकश्रुतित्वेन मन्त्रममुं ब्रह्मसूत्रभाष्ये चतुर्षु स्थलेषु प्रत्यपादयन् । तत्प्रकरणं यथाक्रमं विशदीक्रियते । तत्र प्रथमतस्तावत् प्रथमाध्यायस्य द्वितीयपादे तृतीये गुहांप्रविष्टाधिकरणे तस्मिन्नेव प्रथमसूत्रे मन्त्रस्य चतुर्थपादमेव स्वीकृत्य अर्थो वर्णितः । अनन्तरं तस्यैवाधिकरणस्य द्वितीये सूत्रे मन्त्रस्य द्वितीयं पादं विहाय अन्यत्सर्वमुदाहृतं वर्तते । तृतीयप्रकारस्तु प्रथमाध्यायस्य तृतीयपादे 'स्थित्यदनाभ्यां च' (ब्र० सू० १-३-७) इति सूत्रव्याख्यानावसरे पठितः । अन्ते अवशिष्टो एकः तृतीयाध्यायस्य तृतीयपादे 'इयदामननात्' (ब्र० सू० ३-३-३४) इति सूत्राधिकरणस्य विषयवाक्यत्वेन उद्घोषितः । एवं प्रत्येकं चतुर्षु स्थलेषु एकमेवार्थं मन्त्रस्यास्य प्रतिपादयन्तः एकमेवाद्वैततत्त्वं निरूपयन्ति भाष्यकाराः । तथा हि-

प्रतिपादिते द्वे स्थले गुहांप्रविष्टाधिकरणे भवतः । अस्याधिकरणस्य विषयः 'तद्विष्णोः परमं पदम्' इति मन्त्रव्याख्यानावसरे सप्रपंचं प्रतिपादितः । अथ च प्रथमस्थले 'अनश्नन्नन्यो अभिचाकशीति' इति मात्रं वर्तते । तत्र भाष्यकाराः आशयमेवं प्राचोक्टन् - अनशनस्य परमात्मनः कर्मफलपानयोग्यतायाः असंभवात् इति । तथा च परमात्मा अशनरहितः नित्यः कूटस्थः साक्षी इति प्रकरणेनानेन ध्वनति । भाष्ये - 'इति मन्त्रवर्णात्' इत्युक्तम् ।

'द्वितीयस्थले विशेषणाच्च' (ब्र०सू०१-२-१२) इति सूत्रव्याख्याने 'द्वा सुपर्णा'

इति ऋड्•मन्त्रस्य कृते भाष्ये एव स्पष्टमुक्तं वर्तते । तथा च भाष्यम्[1] -

'एष एव न्याय: द्वा सुपर्णा सयुजा सखायौ' इत्येवमादिष्वपि'

इति । यथा अस्मिन् गुहांप्रविष्टाधिकरणे विषयवाक्यत्वेन गृहीतस्य 'ऋतं पिबन्तौ सुकृतस्य लोके' इति मन्त्रस्य व्याख्याने याऽ सरणि: निगदिता तया एव सरण्या 'द्वा सुपर्णा' इति मन्त्र: व्याख्यातव्य इति ।

किंच कठवल्लीश्रुत्यन्तर्गतस्य 'पिबन्तौ' इति शब्देन यथा जीवपरमात्मानौ उच्येयाताम्, एवं ऋड्•मन्त्रस्थेन 'सुपर्णौ' इति पदेन जीवपरमात्मानावेव प्रतिपादितौ भवत: । अत: अधिकरणास्यास्य विषयवाक्यभूतस्य ऋतं पिबन्तौ सुकृतस्य लोके' इति मन्त्रस्थाने 'द्वा सुपर्णा सयुजा सखायौ' इत्यमुं मन्त्रं निवेश्य अन्यत्सर्वं तद्व्याख्येयमिति हेतो: अनया ऋचा जीवात्मपरमात्मनो: ऐक्यं, ब्रह्मण: कूटस्थस्वरूपत्वम् जीवस्यैव संसारे भोक्तृ-भोग्यादिस्वरूपत्वं चेत्यादि सम्यक् प्रतिफलितं वर्तत इति भाष्यकाराणामाशय: । अत एवोक्तं भाष्ये - एष एव न्याय इति । एवं च ऋड्•मन्त्रो अद्वैततत्वस्य मुख्यभूतसारांशबोधक इति ।

स्थले तत्र तृतीये द्युम्वाधिकरणे वर्तमानस्य सप्तमसूत्रस्य स्थित्यदनाभ्यां च' (ब्र० सू० १-३।७) इत्यस्य व्याख्यानावसरे द्वा सुपर्णा' इत्ययं मन्त्र: उदाहृत: भाष्यकारै: । अस्मिन् द्युम्वाद्यधिकरणे -

"यस्मिन्द्यौ: पृथिवी चान्तरिक्षं --------- एष सेतु:'

(मुण्ड०२-२-५) इति मुण्डकश्रुतिमुपजीव्य विचार: प्रस्तूयते । अत्र पृथिव्यन्तरिक्षद्युवादीनां कल्पितमायतनं श्रुत्या किंचित् प्रतीयते, अत: तदायतनरूपं किं ब्रह्म भवति उत प्रधानादि इति सन्दिह्य विकल्पितयो तयो: द्वयो: पक्षयो: पूर्वपक्षी स्वाशयं प्रकटयति - अत्र आयतनरूपेण ब्रह्म सर्वथा न भवितुमर्हति, अत: अर्थान्तरं भवतु इति । अपिच अनया श्रुत्या 'अमृतस्यैष सेतु:' इति श्रूयते । 'अनन्तमपारम्' (बृ०२-४-१२) इति श्रुतिरीत्या तस्य ब्रह्मण: कालत: देशतो वा सेतोस्तरणरूपस्य पारवत्वं न संभवति । अत: अनया श्रुत्या अर्थान्तररूप: प्रधानं वायुर्वा प्रतिबुध्यते । 'वायुर्वै गौतम तत्सूत्रं' (बृ०३-७-२) इति श्रुत्या वायोरपि सूत्ररूपेण विधारणत्वश्रवणात् । अथवा अमृतव्यतिरिक्ते पारवति अर्थान्तरत्वेन शारीरो वा

---

१ ब्र० सू० शां० भा० १७३

भवतु । शारीरस्यापि द्युप्रभृतिषु भोक्तृभोग्याधायतनत्वात् + इति चेत्-उच्यते ।

अत्र अर्थान्तरकथनस्यावसर एव नास्ति, श्रुतौ [संभवति] आत्मानमिति स्वशब्दस्य प्रयुक्तत्वात् । संभवति मुख्ये अर्थे अन्यार्थकल्पनंमन्यन्मुख्यं-भवति-+ गौरवात् । परमात्मपरिग्रहे एव लोके आत्मशब्दप्रयोगो भवति । श्रुतावपि -

'तमेवैकं जानथ आत्मानम्' (मुण्ड० २-२-५)

इति । एकमात्मानं जानथ इत्युक्तत्वात् स एक आत्मा परमात्मैव भवितुमर्हति , न तु जीवात्मा इति वक्तुं शक्यते । जीवरूपोपाधिरूपेण परस्परजीवे विभिन्नत्वात् ।

अपि च ब्रह्मण: पारवत्त्वाभावात् सेतुस्तरणायोग्य: प्रधान-वायु-शारीर-हिरण्यगर्भाख्येषु अन्यतम: अर्थान्तरत्वेन वक्तव्यमित्यपि इत्यपि न । ब्रह्मापि सेतुत्वेनरूपेण वक्तुं शक्यत एव । सेतुत्वं नाम विधारणत्वमित्यर्थ: । अतः-श्रुतस्वत्र सिनोति बध्नाति इति सेतुपदार्थैकदेश: विधारणशब्दार्थ: । अत: श्रुतावत्र वर्तमान: सेतुशब्द: विधारणत्वं ब्रूते, न पारवत्त्वमिति । लोकेऽपि सेतुशब्दस्य एतदर्थ एव प्रयोगो दृश्यते - मृदारुमय: सेतु: इति । तत्र सेतुशब्देन पारवत्त्वं न बोध्यते । स सेतु: नद्या: अपरतटजिगमिषो: जनस्योपकारी भवति, एवं संसारसागरं तारयितुं उपनिषत्सु प्रतिपाद्यमानं निर्विशेषब्रह्म आत्मसाक्षात्कारार्थं प्रयतमानस्य पुरुषस्य उपकारी भवति । अत्र अत: द्युभ्वाद्यायतनरूप: परब्रह्म एव न प्रधानादि इति सिद्धं भवति । एवमनया श्रुत्या द्युभ्वाद्यायतनरूपेण परमात्मा बोध्यते इति प्रतिपाद्य अयमेवार्थ: ऋङ्मन्त्रेऽपि स्पष्टीकृत इति तन्मत्रं विशदयति भाष्यकार: 'द्वा सुपर्णा' इति । तथा चात्र भाष्यम्[१] -

> यदि चेश्वरो द्युभ्वाद्यायतनत्वेन विवक्षित:, ततस्तस्य प्रकृतस्येश्वरस्य क्षेत्रज्ञात्पृथग्वचनमवकल्पते । अन्यथा ह्यप्रकृतवचनमाकस्मिकमसंबद्धं स्यात् ।'

इति । स्थित्यदनाभ्यामिति सूत्रेण मन्त्रेऽस्मिन् ईश्वरक्षेत्रज्ञौ गृह्येते । स्थितिमात्रस्वरूप: ईश्वर: अदनकर्ता जीव इति । तथा च मन्त्रार्थ: सम्यक् प्रतिपादितो भवति ।

---

[१] ब्र० सू० शां० भा० पृ० २१०

अपिच अधिकरणेऽस्मिन् मन्त्रोऽयं किमर्थं प्रवेशित इति चेत् तत्रैव स्वारस्यं वर्तते। मन्त्रस्य च चतुर्थपादः-'अनश्नन्नन्यो अभिचाकशीति' इति। तत्र पूर्वपक्षिणा अर्थान्तरेण निगदिताः प्रधानं वायुः शारीरः हिरण्यगर्भश्च एते चत्वारः अपि मन्त्रोक्तलक्षणे नान्तर्भवन्ति। कारणाभिन्नप्रधानस्य कार्यप्रति-हेतुत्वात् प्रधाने उक्तलक्षणं न प्रसजति। वायोरपि कारणस्य कार्यत्वात् क्रियावत्वाच्च न भवति। शारीरस्तु धर्माधर्मस्य भोक्ता भवति। हिरण्यगर्भोऽपि उदासीनभावेन न स्थातुमर्हति, तस्यापि मरणरूपधर्मस्यानुवर्तमानत्वात् आदिजीव इति कथनाच्च सोऽपि भोक्ता एव। अतः मन्त्रोक्तलक्षणकः परमात्मा ब्रह्म एकैवेति सिध्यति। एवं च तस्य एकत्वमद्वितीयत्वं च सिध्यतः। एवं तस्य अन्यवस्तुना जीवेन सह अभेदोऽपि सिध्यति। सर्वेषु च पदार्थेषु शारीरेष च स परमात्मा आयतनरूपेण मध्यवर्ती भवति। यथा एकदेशस्थलिंगोपाधिनेश्वरेण प्राकारेणावलितस्य चतुष्प्रदेशभूमेः तस्यैवेश्वरस्य आयतनं आलय इति व्यपदिश्यते, तद्वत् द्युभ्वाद्यायतनेषु मध्यवर्तित्वेन तस्य विद्यमानत्वात् स एव द्युभ्वाद्यायतनरूपः इति द्युभ्वादीनां परमात्मनः च अभेदः सिध्यति। प्रतिपादितं चैतत् निरालम्बो-पनिषदि -

> 'ब्रह्मेति च महदहंकारपृथिव्यप्तेजोवाय्वाकाशत्वेन
> बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया भासमानम-
> द्वितीयमखिलोपाधिविनिर्मुक्तं तत्सकलशक्त्युपबृंहितम-
> नाद्यनन्तं शुद्धं शिवं शान्तं निर्गुणमित्यादिवाच्यम-
> निर्वाच्यं चैतन्यं ब्रह्म'

(निरा० उ० ३,(ब्रह्मस्वरूपम्) इति।

अन्ते च 'द्वा सुपर्णा' इति ऋङ्मन्त्रपुरस्सरं तन्मन्त्रव्याख्यानार्थमेव भाष्ये तुरतुरीये स्थाने इयदधिकरणं प्रवृत्तम्। अधिकरणस्य सूत्रं तावत् 'इयदामननात्' (ब्र० सू० ३-३-३४) इति। अधिकरणेऽस्मिन् 'ऋतं पिबन्तौ' इत्यस्यां श्रुतौ जीवब्रह्मणोरुभयोरपि सामान्यतः भोक्तृत्वमाम्नायते। 'द्वा सुपर्णा' इत्यस्यां श्रुतौ तु एकस्य जीवस्यैव भोक्तृत्वं, अन्यस्य परमात्मनः केवलमभोक्तृत्वं चोद्घुष्यते।

तथा च तयोः परस्परमन्त्रार्थविरोधः + इति सन्दिह्य आभ्यां द्वाभ्यामपि श्रुतिभ्यामुपपाद्यस्य ब्रह्मणः ॐ जीवाभिन्नस्य प्रतिपादनैक्यात् उभयोरपि श्रुत्योः सन्निधिकरण विद्यैक्यमेव प्रतिपाद्यते न विद्याभेद इति निर्णीयते ।

अधिकरणस्य विषयवाक्यं 'द्वा सुपर्णा' इति ऋङ्मन्त्रः । अधिकरणेऽस्मिन् सन्देहोत्थापनमन्त्रः 'ऋतं पिबन्तौ' (कठ० १-३-१) इति कठवल्लीश्रुतिः । मन्त्रद्वयेऽपि प्रतिपादनप्रकारभेदात् जिज्ञासैक्याभावाच्च अत्र विचारः क्रियते - विद्यैकत्वमुत विद्यानानात्वमिति । एतावुभावपि मन्त्रौ गुहांप्रविष्टाधिकरणे विचारेण सिद्धार्थावपि उपसंहारानुपसंहारप्रसंगात् गुणोपसंहारपादे पुनरप्यत्र विचार्येते । 'द्वा सुपर्णा' इत्यस्मिन् मन्त्रे भोक्त्रभोक्त्रोः वेद्यता नाम एकत्वं प्रतिपाद्यते । ऋतं पिबन्तावित्यत्र भोक्त्रोरेव वेद्यता उच्यते । अतः द्वयो वेद्यभेदात् विद्याभेद इति विचारस्यावसरः । प्राप्तयोर्द्वयोः पक्षयोः विद्यानानात्वमिति पूर्वपक्षः । तस्याशयः - ऋतं पिबन्तावित्यस्मिन् मन्त्रे पिबन्तौ इत्यत्र द्विवचनमध्यवर्तिब्रह्मणः निरूपणावसरे 'अक्षरं ब्रह्म यत्परम्' (कठ० १-३-२) इति श्रुत्युक्तरीत्या कूटस्थः परमात्मा ब्रह्म इति तस्य गुणाः गुहांप्रविष्टाधिकरणे निर्णीताः । द्वा सुपर्णा- वित्यत्र तु 'अनश्नन्नन्यो अभिचाकशीति' इति वाक्येन तस्य ब्रह्मणः अनश्नत्वा- दयो गुणाः उच्यन्ते । परस्परमन्त्रेषूक्तगुणेषु विशेषदर्शनात् तेषां गुणानां मिथो अनुपसंहार एव भवति । अतो विद्यानानात्वमिति ।

प्राप्ते एवं पूर्वपक्षे सिद्धान्ती आह - उभयोरपि श्रुत्योः विद्यैकत्वमेव प्रतीयते, न विद्यानानात्वमिति । 'द्वा सुपर्णा, ऋतं पिबन्तौ' इत्युभयोरपि मन्त्रयोः जीवद्वितीय ईश्वर एव प्रतिपाद्यते नान्यः । 'द्वा सुपर्णा' इत्यत्र तन्मन्त्रो- क्तलक्षणपुरस्सरं अशनायातीतः परमात्मा उच्यते । तत्रैव -

'जुष्टं यदा पश्यत्यन्यमीशम्' (श्वे० उ० ४-७)

ॐ वाक्यशेषेणापि स परमात्मा गृह्यते । ऋतं पिबन्तावित्यत्रापि पिबति जीवे तत्साहचर्यात् अशनायातीतः परमात्मा अपि पिबतीत्युपचर्यते, छत्रिन्यायवत् । उपक्रमोपसंहाराभ्यां अस्यां श्रुतौ प्रतिपाद्यमानः जीवभिन्नः परमात्मा एव भवितुम- र्हति । श्रुतिप्रतिपादितस्थलं तस्यैव प्रकरणं भवति ।

'अन्यत्र धर्मादन्यत्राधर्मात्' (कठ० १-२-१४)

इत्युपक्रम्यानन्तरं तस्यैव तृतीयावल्यां 'ऋतं पिबन्तौ' इत्युपन्यस्य,

'अशब्दमस्पर्शमरूपमव्ययम्' (कठ० १-३-१५)

इत्यादिना उपसंहारदर्शनात् अत्र परमात्मा एव प्रतिपाद्यते नार्थान्तरमिति स्पष्टं प्रतिभाति । अतः पिबन्तावित्यत्र पिबदपिबत्समूहः लक्षणया बोध्यते । अतः उभयोरप्यनयोः श्रुत्योः द्वित्वेऽपि तमभिन्नं वेद्यरूपमामन्यते । तस्मान्नास्ति विद्याभेदः । तथा च शांकरं भाष्यम्[१] -

'तस्माच्च विद्यैकत्वम् । अपि च त्रिष्वप्येतेषु वेदान्तेषु पौरापर्यालोचने परमात्मविद्यैवावगम्यते तादात्म्यविवक्षयैव जीवोपादानं नार्थान्तरविवक्षया ।'

इति । 'द्वा सुपर्णा' इति श्रुतिरियं जीवं न प्रतिपादयितुमुपक्रामयति, अपि तु परमात्मनो जीवस्य चाभेदं दर्शयितुं प्रवर्तयति । परमात्मविद्यायामभेदविषयस्यान्तर्भूतत्वात् + नान्यस्य विचारस्यात्रावसर इति । तथा च 'द्वा सुपर्णा, ऋतं पिबन्तौ' इत्येतौ मन्त्रौ जीवानुवादपुरस्सरमसंसारिब्रह्मणि तात्पर्यं ब्रुवाते इति सिद्धं भवति । तस्मात् परस्परमनयोः श्रुत्योः ब्रह्मलक्षणत्वेनोक्तानां गुणानां निर्धर्मके ब्रह्मणि उपसंहारः कर्तव्यः । अथवा परस्परश्रुत्योरेवोपसंहार इति । अतः नास्त्यत्र परस्परश्रुत्योर्वैषम्यभंग इति ।

अधिकरणेऽस्मिन् 'द्वा सुपर्णा' इति मन्त्रेण एतदायातं भवति यत् ब्रह्म असंसारि, कूटस्थः नित्यः, एकः, निर्गुणः, स एव सकलभूत-भौतिक-चराचराणां मध्यवर्ती, न केवलं मध्यवर्ती, तेषां स एव जीवः, तस्य जीवस्य चाभेदः, ऐकात्म्यभावश्च इत्येतानि अद्वैततत्वानि प्रतिभासन्त इति । भाष्येऽपि 'तादात्म्यविवक्षया' इति शब्दव्याजेन जीवेश्वरयोरभेदः तादात्म्यप्रतिपादितः । एवं च 'द्वा सुपर्णा' इति ऋङ्मन्त्रः अद्वैतसिद्धान्तानां तत्सिद्धान्तस्य महदुपकारकः, अर्थात् अद्वैतसिद्धान्ताः ऋङ्मन्त्राधिष्ठिताः इति । ऋङ्मन्त्रेण प्रतिपाद्यं तत्त्वमेव श्रीमच्छंकराचार्याः अनन्तरं मन्दबुद्धीन् जनानवलोक्य करुणया सप्रपंचं भाष्यादौ विस्तरेण निरूपयामासुः + इत्येतावता निरूपितग्रन्थेन स्पष्टं भवति ।

एवं च मन्त्रस्यास्य सायणाचार्यैः यो अर्थः प्रतिपादितः स एवार्थः भाष्यकारैःअधिकरणेऽस्मिन् प्रतिपादित इति कण्ठतः न वक्तव्यम् भवति । यद्यपि भाष्यकारैः भाष्ये मन्त्रार्थौ न विवृतः, अथाऽपि -

उपक्रमोपसंहारावभ्यासो पूर्वता फलम् ।
अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ।।

इति श्लोकेन, तन्मध्यपतितोपक्रमोपसंहारेण प्रकरणेन च मन्त्रेण अभेदः एकत्वम-द्वितीयत्वं च सिध्यन्तीति अनायासेनागताश्च अद्वैतसिद्धान्ताः ।। इति शम् ।।

++++++++++++++++++++++

ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य द्वितीयपादे त्रयोविंशतिसूत्रे मन्त्रो यमुदाहृत: -

हिरण्यगर्भ: समवर्तताग्रे भूतस्य जात: पतिरेक आसीत् ।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।

(ऋ० सं० १०-१२१-१) इति । दशममण्डलस्य शतोत्तरैकविंशतितमं दशर्चं 'हिरण्यगर्भ' इति सूक्तम् ।

अस्य सूक्तस्य प्रजापतिपुत्रो हिरण्यगर्भो नाम ऋषि: । सूक्तमिदं त्रैष्टुभम् । मन्त्रस्यास्य कशब्दाभिधेय: प्रजापतिर्देवता । तथा चानुक्रान्तं - 'हिरण्यगर्भो दश हिरण्यगर्भ: प्राजापत्य: कायम्' इति । अस्य सूक्तस्य फलं निष्कैवल्यज्ञानं भवति ।

सायणाभिप्रेतं मन्त्रार्थविवरणम् - हिरण्यगर्भस्याण्डस्य गर्भभूत: प्रजापति: हिरण्यगर्भ:, अथवा हिरण्मयो अण्ड: यस्योदरे गर्भवद्वर्तते स: सूत्रात्मा हिरण्यगर्भ इत्युच्यते । हिरण्यगर्भस्य प्रजापतिरित्यपि नामान्तरं वर्तते । तथा चोक्तं तैत्तिरीयसंहितायाम् -

'प्रजापतिर्वै हिरण्यगर्भ: प्रजापतेरनुरूपत्वाय'

(तै० सं० ५-५-१-२) इति अयं प्रजापति: प्रपंचस्योत्पत्ते: प्राक् समवर्तत । स प्रजापति: मायाध्यासात् सिसृक्षो परमात्मन: सकाशात् समजायत । एवं प्रजापति: सर्वप्राणिजातानामुत्पत्ते: पूर्वं प्रथमजीवव्यपदेशेन समजायत । अनन्तरमुत्पत्स्यमाना: सर्वे चराचररूपात्मान: तस्मात् हिरण्यगर्भरूपपरमात्मन: उत्पद्यन्ते ।

ब्रह्माण्डादे: सर्वस्य जगत: विकारजातस्य भूतस्य स: हिरण्यगर्भ: उत्पन्नमात्र एव अद्वितीय: सन् ईश्वर आसीत् । ईश्वर: नामरूपयुक्त:, सर्वज्ञ: सर्वशक्तियुक्त:, अष्टैश्वर्यसंपन्नभूत:, भूतेश्वर:, सर्वात्मा इत्येतै: गुणै: व्यपदिश्यते । एवंभूत: हिरण्यगर्भ: ईश्वरत्वेन रूपेण सकलचराचराणां पतिरप्यासीत् ।

ननु केवलं सादित्वेन रूपेण तस्य पतित्वं कथमिति चेत्-उच्यते । स हिरण्यगर्भ: अस्माभिर्दृश्यमानां पुरोवर्तिनीमिमां भूमिम्, अन्तरिक्षं दिवं च धारयति ।

मन्त्रेऽस्मिन् वर्तमानं 'दाधार' इति शब्दं किंचिद्विमृश्यते । तथा हि -

-८- अत्र प्रयुक्तं दाधारेति पदं 'धारयति' इति वर्तमानार्थं ब्रूते। धृञ् धारणे इति धातुनिष्पन्नं सत् लिडर्थे दधार इति रूपम्। छन्दसि लिडर्थे वर्तमानार्थप्रयोगो वर्तते। तथा च गमकम् -

'छन्दसि लुङ्लङ्लिटः' (पा० सू० ३-४-६)

इति सूत्रम्। अनेन च सूत्रेण अत्र दधारेत्ययं शब्दः वेदे पठितत्वात् अस्य लिडर्थकस्य दधारेतिपदस्य सार्वकालिकार्थवत्त्वं विधीयते। अत्र सूत्रनिष्पन्नं फलं दधारेति पदेन धारयतीति अर्थप्रतिपत्तिः।

नन्वेवं सति मन्त्रे 'स दधार' इत्येव भवितव्यं सार्वकालिकार्थवत्त्वात्, कुतो दाधार इति पदप्रयोगः संपन्नो भवतीति चेत्-उच्यते।

'तुजादीनां दीर्घोऽभ्यासस्य' (पा० सू० ६-१-७)

इति पाणिनिसूत्रेण छन्दसि प्रयोगो तुजादिधातूनामभ्यासस्य दीर्घो भवति। भवति सूत्रस्यास्य काशिकावृत्तिः[१] -

'तुजादीनामिति प्रकारे आदिशब्दः। कश्च प्रकारः। तुजेर्दीर्घोऽभ्यासस्य न विहितः, दृश्यते च, ये तथाभूतास्ते तुजादयः तेषामभ्यासस्य दीर्घं साधुर्भवति'

इति। तुजादिराकृतिगणः। तुजादिरित्यत्र आदिपदधातूनां सूचीक्रमः न कुत्रापि दृश्यते। अतः आदिपदेन तुजसमानार्थकाः धातवः इति ग्रहणं कर्तव्यम्। एवं चात्र छन्दसिवर्तमानस्य दधारेतिपदस्य तुजादीनामिति सूत्रेण दीर्घो भवति। अनेन सूत्रेण दीर्घो न विधीयते, किन्तु वर्तमानो दीर्घः साधु भवति। तथा च 'दाधार' इति पदनिष्पत्तिः। सः प्रजापतिः सूत्रे मणिगणा इव सृष्ट्यात्मकं सर्वं प्रपंचं सदा सर्वत्र धारयति। एवमात्मके वर्तमानः सः कार्यकरणसंघातविशिष्ट इति सिध्यति।

मन्त्रेऽस्मिन् वर्तमानः किं शब्दः अनिर्ज्ञातस्वरूपत्वात् प्रजापती भवति। अथवा

'अन्येभ्योऽपि दृश्यते' (पा० सू० ३-२-१०१)

इति पाणिनीयसूत्रेण अन्येभ्यः धातुभ्यः डप्रत्ययस्य दर्शितत्वात् इत्यर्थेन च क शब्दस्य ड प्रत्ययविधानेन कामयते इति कः इत्यर्थः सिध्यति। अत्र 'अन्येभ्योऽपि दृश्यते' इति सूत्रेण सर्वेषां धातूनां डप्रत्ययविधानार्थं इदं वार्तिकं प्रवृत्तं भवति -

---

१ का० वृ० पृ०

'अन्येष्वपि दृश्यते' (म० भा० वा०   )

इति । अत्र प्रौढमनोरमाकाराः भट्टोजिदीक्षिताः एवमाशेरन्ते । तस्यायमाशयः - अपि शब्द इति । यत्तु अन्तात्यन्ताध्वेति प्रकरणे अन्यत्रापि दृश्यत इत्युपसंख्यानं तद्भूतकालं विनापि यथा स्यादित्येवमर्थम् । वस्तुतस्तु प्रकृतसूत्रस्थस्य अपिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्तदाक्षिप्तमनेनैव गतार्थं विभावितं चेदम् 'इको गुणवृद्धी' इति सूत्रे ओदैत् प्रक्रम्य गमेरप्ययं डो वक्तव्य इति वदता भाष्यकारेण। दृश्यत इति वार्तिकमपि न गतार्थं बोध्यम् इति । एवंचात्र दुष्ट्यर्थं कामयते इति कः । अस्य संप्रदानकारकत्वे तु कस्मै इति । प्रजापतये इत्यर्थः ।

यदा 'क' इति शब्दः सुखपर्यायवाचकः । प्रजापतेरपि आनन्दरूपत्वात् सोऽपि कशब्दाभिधेय इति । अथवा अनया गाथया कशब्दार्थो निरूप्यते - इन्द्रेण पृष्टः प्रजापतिः अवदत् - मदीयं महत्त्वं तुभ्यं प्रदायाहं कः कीदृशः स्याम् इति । तदानीमिन्द्र उवाच - यदि त्वमेवमिदं ब्रवीषि यदहं कः स्यामिति ? तर्हि त्वं कशब्दाभिधेय एव भव इति । इयं कथा ऐतरेयब्राह्मणे श्रूयते । तत्रत्या श्रुतिः -

'इन्द्रो वै वृत्रं हत्वा सर्वा विजितीः विजित्याब्रवीत्'

(ऐ० ब्रा० ३-२१) इति । तथाचात्र इन्द्रेणोक्तः कशब्दाभिधेयः प्रजापतिः केवलं 'क' इति शब्दे एव सर्वत्र स्थापितो भवति । अत एव च लोके पुरुषाः यदा स्वपार्श्वे वर्तमानं दानयोग्यं वस्तु तदन्येभ्यो न दास्यति तदा सोऽपि केवलं 'दाता' इति शब्दयोग्य एव भवति इति इयं कथा ज्ञापयति । अत्र पर्यवसितोऽर्थः प्रजापतिः कशब्दवाच्य इति । प्रजापतेरिति वाचकः असौ किं शब्दः सर्वनामसु शब्देषु अन्तःपठितत्वात् शब्दस्यास्य संप्रदानकारके 'स्मै' भावः प्रसिद्धो भवति । एवं मन्त्रस्थ 'कस्मै' इति पदस्य 'प्रजापतये' इत्यर्थः । यदा असौ किं शब्दः यौगिको भवति तदा अस्य शब्दस्य चतुर्थीविभक्तिप्रयोगे स्मैभावः नागमिष्यति, किन्तु 'काय' इत्येव भवति । तथा च सूत्रम् -

'व्यत्ययो बहुलम्' (पा० सू० ३-१-८५)

इति । अथ च कस्मै इति पदस्य चतुर्थीविभक्त्यर्थः वक्तव्य इति । एवं च कस्मै हविषा विधेम ? इति प्रश्नार्थे एव वाक्यं पर्यवसितं स्यात् । मन्त्रस्य कुत्र

विनियोग इति न ज्ञायेत। तत् शास्त्रसंमतं न भवतीति मत्वा भाष्यकाराः कस्मै इति संप्रदानकारकार्थस्य पदस्य कर्मकारकार्थवत्त्वं प्रतिपादयन्ति। तथा हि -

'क्रियया यमभिप्रैति सोऽपि संप्रदानम्' (व्या० सू० वार्तिकम् १०८५)

इति वार्तिकेन यमर्थमुद्दिश्य क्रिया भवति तदानीं स संप्रदानमिति। एवंचात्र कस्मै इति पदस्य 'प्रजापतिम्' इत्यर्थः। वयं याज्ञिकाः दानादिरूपगुणयुक्तं प्रजापतिं पुरोडाशादिरूपहविर्भागयुक्तयागेन विधेम- परिचरेम इति।

विधेम इत्यत्र विध-विधाने इतिधातुः। अयं धातुः तुदादिगणे पठितः। विधिलिङ्-लकारस्य उत्तमपुरुषबहुवचनं रूपं विधेम इति। परिचरणकर्मणि विध् इति धातोः प्रयोगः। एवमवसितो मन्त्रार्थः।

अथवा कस्मै देवाय हविषा 'विधेम' इत्यत्र जिज्ञासायामाकांक्षापरिपूरणार्थं मन्त्रस्य चतुर्थः पादः प्रवर्तत इति। एवं कृते सति चतुर्थपादार्थः - मन्त्रेऽस्मिन् स्तूयमानं हिरण्यगर्भं विहाय अस्य अन्यस्य कस्य देवस्य कृते पुरोडाशादिदानेनानया ऋचा परिचरेम? अतः अस्य हिरण्यगर्भरूपदेवस्य कृते एव वयं पशोर्वपारूपेण यजनं कुर्म इति।

वेंकटमाधवस्तु स्वीये भाष्ये मन्त्रस्यास्य आशयमेवं प्रकटीचकार -

हिरण्यगर्भः प्राजापत्यः। हिरण्मयस्याण्डस्य गर्भभूतः सम् भूतः अग्रे संभूतस्य सर्वस्य भूतस्य एकः पति आसीत्। सः धारयति पृथिवीं अन्तरिक्षं अपि द्यावापृथिव्यौ। तस्मै देवाय हविषा परिचरणं कुर्मः इति।

मोक्षमूलरो पि मन्त्रस्यास्य सायणाभिप्रेतमर्थमेव स्वभाष्ये नुवदति।

अयमेव मन्त्रः तैत्तिरीयसंहितायामपि दरीदृश्यते -

'न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः।
हिरण्यगर्भ इत्येषा मा मा हिं सीत्येषा
यस्मान्न जात इत्येषः॥'

(तै० सं० ३२-३) इत्यत्र।

ब्रह्मसूत्राणां भाष्यकर्ता श्रीमच्छंकराचार्याः प्रथमाध्यायस्य द्वितीयपादे

षष्ठाधिकरणत्वेन परिगणिते अदृश्यत्वाधिकरणे तृतीयसूत्रत्वेन पठिते -

'रूपोपन्यासाच्च' (ब्र० सू० १-२-२३)

इति सूत्रे व्याख्यानावसरे ऋङ्मन्त्रममुं हिरण्यगर्भस्यैव भूतयोनित्वमाम्नायते इति निरूपणार्थमुररीचक्रु: ।

अस्मिन् अदृश्यत्वाधिकरणे भूतानां सृष्टिकारणक: क इति विचार्य निर्णीयते । अत्र पूर्वपक्षी -

'अथ परा यया तदक्षरमधिगम्यते', इत्युपक्रम्य

इत्युपक्रम्य मध्ये जगत्कारणस्य विशेषणगुणादीन् संकीर्त्यान्ते -

'यद्भूतयोनिं परिपश्यन्ति धीरा:'

(मुण्ड० १-१-५,६) इत्युपसंहारात्मिकां मुण्डकश्रुतिं प्रतिपाद्य तत्र भूतयोनि: प्रधानं, उत शारीर: अथवा परमेश्वर इति विकल्प्य पूर्वस्मिन्नन्तर्याम्यधिकरणे सिद्धान्तिना यदभिप्रेतं साधारणस्याप्यन्तर्यामिशब्दस्य लाघवसाहाय्यान्नित्यसिद्धनियन्तृत्वादिरे-श्वरपरत्वमिति, तन्मनसि सम्यगवधार्य प्रत्युदाहरणसंगत्या अस्मिन् वाक्येऽपि प्रतिपाद्यमान: अदृश्यत्वादिगुणक: य: भूतयोनि: स: प्रधानं साधारणदृश्यत्वादि-धर्मस्याचेतनदृष्टान्तोपादानबलात् इति अभिप्रैति ।

अथ च सिद्धान्तिना उच्येत यत् 'य: सर्वज्ञ: सर्ववित्' (मुण्ड० १-१-६) इति वाक्यशेषश्रुत्या प्रतिपाद्यमाना: सर्वज्ञत्वादिधर्मा: अचेतने प्रधाने न संभवन्ति । अत: भूतयोनि: कथं प्रधानं भवितुमर्हति इति सत्येवं वदाम:: भूतयोनि: शारीर: भवतु इति । अत्र शांकरं भाष्यम् -

'चेतनाधिष्ठितं ह्यचेतनमूर्णनाभिशरीरं सूत्रस्य योनि: पुरुषशरीरं च केशलोम्नामिति प्रसिद्धम्'

इति । शारीर: स्वशरीरमेवं केशलोमादिसृष्टे: कारणं भवति, अत: शारीर: भूतयोनिरिति ।[1] अत्रायं तस्याशय: - भूतसृष्टे: उपादानकारणत्वे सति भूतयोनि: प्रधानं भवति यदि योनिशब्द: निमित्तवाची तदा भूतयोनि: शारीरो भवत्विति ।

एवं प्राप्ते सिद्धान्ती आह - भूतयोनि: परमेश्वर एव भवितुमर्हति,

---

१ ब्र० सू० शां भा० पृ० २८७

न शारीर: न वा प्रधानम् इति । अत्र भाष्यस्यायं संग्रहश्लोक: -

'ईश्वरो भूतयोनि: स्यात्सर्वज्ञत्वादि कीर्तनात् ।

दिव्याद्युक्तेर्न जीव: स्यान्न प्रधानं भिदोक्तित: ।।'

इति । अक्लेश्यसर्वज्ञत्वादिरूपाणां धर्माणां परमेश्वरे एव संकीर्तनात् अचेतनस्य प्रधानस्य उपाधिपरिच्छिन्नदृष्टे: शारीरस्य च सर्वज्ञत्वं सर्वविद्त्वमित्यादिधर्मा: न संभवन्ति । तथा च दृश्यते श्रुति: -

'यस्सर्वज्ञ: सर्वविद्यस्य ज्ञानमयं तप: ।

तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ।।'

(मुण्ड० १-१-६) इति । अस्यां श्रुतौ सर्वज्ञत्वादिगुणवर्णनमुखेन एतदायातं भवति यत् - हिरण्यगर्भाख्यं कार्यलक्षणं ब्रह्म, तथैव रूपमन्नं, चराचरप्रपंचात्मिका भूतसृष्टि: जायत इति । परमेश्वर एव जायमानत्वेन हिरण्यगर्भ: प्रथमजीव इति च व्यपदिश्यते । तथा च स्मृति: -

'स वै शरीरी प्रथम: स वै पुरुष उच्यते ।

आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ।।'

इति । अत्र वर्तमानस्य ब्रह्मा इति पदस्य हिरण्यगर्भ इत्यर्थ: । तथा श्रुतिरपि -

'यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षि: ।

हिरण्यगर्भं जनयामास पूर्वं स नो बुध्या शुभया संयुनक्तु ।।'

(श्वे० उ० ३-४, ४-१२) इति । एवं श्वेताश्वतरश्रुतिप्रतिपादितदिशा एव 'अक्षरात्परत: पर:' (मुण्ड० २-१-२) इति श्रुति: समीचीनमर्थं लभते । मुण्डकश्रुत्यर्थ: 'ऋचो अक्षरे' इत्यत्र प्रतिपादित: । सूत्रभाष्यस्थ शांकरवचनमपि[१] -

'अक्षरात्परत: पर:' इत्यत्रापि न प्रकृतात् भूतयोनेर-
क्षरात्परत: कश्चिदभिधीयते । कथमेतदवगम्यते ?
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो
ब्रह्मविद्याम्' (मुण्ड० १-२-१३) इति प्रकृतस्यैवाक्षरस्य
भूतयोनेरदृश्यत्वादिगुणकस्य वक्तव्यत्वेन प्रतिज्ञातत्वात्'

इति । अधिकरणेऽस्मिन् प्रतिपादिताया: अस्या: मुण्डकश्रुतेरर्थ: भाष्यकारै:

---

१ ब्र० सू० शां० भा० पृ० २८६

निर्गुणब्रह्मपरतया कृतो भवति । तथा च तेषां भाष्यपंक्ति:[1] -

'अक्षरमव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतं सर्वस्माद्विकारात्पर: यो विकार: तस्मात्परत: पर इति भेदेन व्यपदेशात् परमात्मानमिह विवक्षितं दर्शयति ।'

इति । परमात्मा नाम निर्गुणब्रह्म । आत्मा जीव: परमात्मा ब्रह्म इति श्रुतिषु प्रतिपादितत्वात् । एवं च भूतयोनि: सर्वज्ञत्वादिगुणक: अद्रेश्यत्वादिधर्मयुक्त: हिरण्यगर्भ:, न तु प्रधानम् इति पूर्वसूत्रेण उपसंहरन् अनन्तरसूत्रेण शारीरोऽपि न भूतयोनि: भवितुमर्हति इति सिद्धान्तयति भाष्यकार: । तत्सूत्रम् -

'विशेषणभेदव्यपदेशाभ्यां च नेतरौ' (ब्र० सू० १-२-२२)

इति । परमेश्वरं विना इतरौ शारीरं प्रधानं वा भूतयोनि: न भवेताम् । अत्रोक्तस्य भूतयोने: विशेषणव्यपदेशात् भेदव्यपदेशाच्च ।

एवमुभाभ्यां सूत्राभ्यां प्रधानं शारीरं च भूतयोनि: न भवत इति प्रतिपाद्य परमेश्वर एव भूतयोनिरिति विशिष्य प्रदर्शनार्थम् -

'रूपोपन्यासाच्च' (ब्र० सू० १-२-२३)

इति सूत्रममुं व्याचष्ट । अत्र 'एतस्माज्जायते प्राण:' इत्यादिषु श्रुतिषु प्रतिपादितानां पृथिवीपर्यन्तानां तत्त्वानां सृष्टिक्रममुपन्यस्य तस्यैव भूतयोने: सर्वविकारात्मकं रूपमुपन्यस्यमानं श्रुतिषु अन्यत्र पश्याम: इति । सूत्रस्थचकारेण स्मृतिरप्यत्र संगृह्यते । तथा च परमात्मा एव भूतयोनि:, तस्यैव रूपोपन्यास इत्येवं स्थिते सति केचन एवं मन्यन्ते - यद्यपि भूतयोनि: परमेश्वर एव तथाऽपि अयं रूपोपन्यास: भूतयोने: न संभवति इति । तथा च श्रुति: -

'एतस्माज्जायते प्राणो मन: सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिराप: पृथिवी विश्वस्य धारिणी ।।'

(मुण्ड० २-१-३) इत्यनया मुण्डकश्रुत्या प्राणादिपृथिव्यन्तं वर्तमानं भूतजातं जायमानत्वेनोपदिश्यते । जायमानत्वेन पप्रथमत: हिरण्यगर्भ एव सगुणब्रह्म, प्रजापतिरित्यादिनाम्ना तत्र तत्र व्यपदिश्यते श्रुत्यादिषु । एवं त्रैलोक्यशरीरेण

---

१ ब्र० सू० शां भा० पृ० २६३

सोपाधिकेन हिरण्यगर्भेण पृथिव्यादीनां भूतानां जन्म निर्दिश्यमानमुपलभ्यते ऋग्वेदादिषु इति सम्यक् प्रतिपादनार्थममुम् ऋङ्मन्त्रमत्र अवतारयामासुः - हिरण्यगर्भेति । अनया ऋचा त्रैलोक्यशरीरस्य प्रजापतेः जन्म निर्दिश्यते इति ।

अस्मिन्मन्त्रे भाष्यरत्नप्रभाकाराः गोविन्दभगवन्तः एवमाशेरन्ते[१] - 'अग्रे समवर्तत जातः सन् भूतग्रामस्य एकः पतिरीश्वरप्रसादादभवत् । सः सूत्रात्मा द्यामिमां पृथिवीं च स्थूलं सर्वमधारयत् । कशब्दस्य प्रजापतिसंज्ञान्ते सर्वनामत्वाभावेन स्मा इत्ययोगादेकारलोपेन एकस्मै देवाय प्राणात्मने हविषा विधेम परिचरेमेति व्याख्येयम्' इति ।

न्यायनिर्णये आनन्दगिरिः एवमभिप्रैति[२] - 'कस्मै प्रजापतये । विधेम परिचरेम । हिरण्यगर्भः सृष्ट्यादाववतिष्ठेत्येतावदिहोक्तं न जन्मेत्याशङ्क्याऽऽह- समवर्ततेति । सः जातः संभूतग्रामस्येश्वराज्ञया पतिः बभूवेति शेषदर्शनादित्यर्थः' इति ।

एवं च निरुपाधिकब्रह्मणः सकाशात् सोपाधिकानां हिरण्यगर्भादीनां सर्वेषां भूतादीनामुत्पत्तिः इति सिध्यति । यथा कारणभूतस्य मृदः घटशरावाद्युपाधिभूतपदार्थानामुत्पत्तिः, तथा शरीरावच्छेदकोपाधिना स परमेश्वरः हिरण्यगर्भः, अग्निः, सूर्यः, इन्द्रः इत्याद्यनेकनामरूपैः व्यपदिश्यत इति ।

अस्मिन्पद्ये 'पुरुष एवेदं विश्वं कर्म' (मुण्ड० २-१-१०) इत्यादिसर्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरिति द्रष्टव्यम् इति ।

तुलनात्मकदिशायाम् - अस्य मन्त्रस्य सायणाचार्यैः यो अर्थः अभिप्रेतः तमेवार्थं मनसि कृत्वा शंकरभगवत्पादाः अस्मिन्नधिकरणे मन्त्रममुमवतारयामासुः । एतदधिकरणपर्यालोचनेन मन्त्रस्याशयः स्पष्टो भवति यत् उभयोरपि मन्त्रार्थः समान इति ।

मन्त्रेऽस्मिन् प्रतिपाद्यमानमद्वैततत्त्वं तु - हिरण्यगर्भः प्रथमः जीवः, स एव सकलभुवनेषु ओतप्रोतरूपेण तिष्ठति, सः समष्टिशरीरः, एकः अद्वितीयः सृष्टिकर्ता सोपाधिकः सगुणब्रह्म इत्यादीनि तत्त्वानि प्रतिभासन्त इति । इति शम् ।

ʊʊʊʊʊʊʊʊʊʊ

ब्रह्मसूत्रशांकरभाष्ये ऋगियं प्रथमाध्यायस्य द्वितीयपादे चतुर्विंशतितमे सूत्रे पठिता-

विश्वस्मा अग्निं भुवनाय देवाः वैश्वानरं केतुमह्नामकृण्वन् ।

आयस्ततानोषसो विभातीः अपो ऊर्णोतितमो अर्चिषा यन् ।।

(ऋ० सं० १०-८८-१२) इति । दशममण्डलस्य अष्टाशीतितमं एकोनविंशत्यृचं हविष्पान्तमिति सूक्तम् ।

सूक्तस्यास्य आंगिरसो नाम ऋषिः । अस्य सूक्तस्योभे देवते - सूर्यः, वैश्वानरगुणकः अग्निश्चेति । अत्र प्रतिपादितमन्त्रस्य अग्निः देवता । सूक्तेऽस्मिन् निरुक्ताः मन्त्राः त्रिष्टुब्छन्दोबद्धाः ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - विश्वनरहितमग्निं सर्वस्मै भुवनाय इन्द्रादयो देवाः दिवसानां प्रज्ञापकमकुर्वन् । प्रज्ञा नाम बुद्धिः । श्रूयते च -

'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः'।

इत्यमरकोशे । मन्त्रस्यास्य भावार्थः - प्रतिदिनं प्रातःकाले अग्निहोत्रादिनित्यकर्मानुष्ठेयं कर्तव्यमिति प्रकर्षेण बुद्धिं अयमग्निः उत्पादयति इति । अपिच -

'स जातो यावदायुषं जीवति, तं प्रेतं दिष्टमितो

अग्नय एव हरन्ति, यत एवेतो यतः संभूतो भवति'

(छा० उ० ५-९-२) इति श्रुत्युक्तरीत्या द्विजानां बुद्धौ स्वज्ञानं जनयतीति ।

अथवा प्रकर्षेण ज्ञापकं प्रज्ञापकं, दैनन्दिन(विशेष)कर्मणि नियुक्तानां समस्तजनानां अयमग्निः सूर्येणाप्रकाशमानां रात्रिं स्वतेजसा प्रकाशयन् 'रात्रिरायाता, अतः कर्मणा विश्रान्तिं भज' इति बोधयतीव अह्नः नाशं करोति । अथवा 'प्रज्ञानं ब्रह्म' (ऐ० उ० ३-३) इति श्रुत्या प्रज्ञा नाम ज्ञानम् । प्रज्ञानं- निरतिशयज्ञानपुंजरूप इति । अत्र तु अग्निः ज्ञानमूर्तिः भवति इत्यतः स : ब्रह्म इत्युच्यते । तथा च सः स्वज्ञानरूपप्रकाशेन संसारसागररूपान्धकारे तमसि मज्जोन्मज्जनेन विद्यमानानामार्तानां जीवानां यथा नष्टंगतस्य अह्नः रात्रिः प्रज्ञापिका तथा विगतचित्तानां तेषां जीवानां चिद्रूपं ब्रह्म भवति । भाष्ये दिवसानां प्रज्ञापकमित्युक्तत्वात् तेन दिवसानामिति

पदेन संसारिणां ग्रहणं कर्तव्यम् । यथा दिवसः सूर्याचन्द्रमसौ वर्तमानकालपर्यन्तं अनुस्यूतो भवति, तथा जीवस्य संसारः ब्रह्मज्ञानपर्यन्तमनुस्यूतः भवति । दृष्टान्त-दार्ष्टान्तिकयोः साधर्म्यात् एवं वर्ण्यते । यथा प्रापंचिकसकलकार्याणि दिवसे आरोप्यन्ते तथा प्रपंचगतनिखिलधर्माः परमात्मनि आरोप्यन्त इति ।

ननु एवं सति भाष्ये सोऽग्निः ज्ञानमूर्तिः तं देवाः दिवसानां प्रज्ञापकमकुर्वन् इति न संगच्छत इति चेत्-उच्यते । मन्त्रस्यास्य उत्तरार्धे सोऽग्निः तमः अपनयति इति दर्शितत्वात् अकुर्वन्नित्यत्र अकुर्वन्निव इति भागलक्षणा आश्रीयते । किं च तमः ज्योतिः इतीमौ शब्दौ परस्परद्वन्द्ववाचिनौ भवतः । यथा चक्षुर्वृत्तिनिरोधकं (प्रति)
शार्वरादिकं तम इत्युच्यते, एवं तस्या एव चक्षुर्वृत्तेः अनुग्राहकं आदित्यादिज्योति-रित्यभिधीयते । आत्मसाक्षात्काररूपाखण्डार्थावृत्तिः दग्धबीजवत् सविलासरूपा-विद्यायाः नाशपूर्वकं ब्रह्मसाक्षात्कारं जनयति । वेदान्तवाक्यैः जनिताखण्डार्था-कारवृत्या ज्ञानस्वरूपो अग्निः साक्षात्क्रियत इति । अग्निः ज्ञानस्वरूपः परमात्मा इति द्वितीयाध्याये स्पष्टीकरिष्यते ।

अयं वैश्वानरोऽग्निः उषःकालाभिमानिनीं देवतां विविधप्रकारेण दीप्यमानः सन् विस्तारयति । उषःकालादनन्तरं अग्नेः तेजः प्रकाशशून्यं भवतीति ।

सूत्रभाष्ये भगवानाचार्यः प्रथमाध्यायद्वितीयपादे वर्तमानसप्तमाधिकरणस्य प्रथमसूत्रस्य व्याख्यानावसरे पूर्वपक्षमुपोद्बलयन् मन्त्रममुं प्रत्यपादयत् । अस्मिन् वैश्वानराधिकरणे प्रकृते -

'को न आत्मा किं ब्रह्म' (छा० उ० ५-११-१)

इति छान्दोग्यश्रुतिमवलम्ब्य विचारः प्रस्तूयते । अत्र

'आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि, तमेव नो ब्रूहि'

(छा० उ० ५-११-६) इति श्रुतौ आत्मरूपेण प्रतिपाद्यमानः वैश्वानरः किं जाठरोऽग्निः उत भूताग्निः अथवा अग्न्यभिमानिनी देवता आहोस्वित् शारीरः अथ परमेश्वर इति बहुप्रकारेण विकल्प्य एतेषु कोऽयमसौ वैश्वानरशब्दवाच्य इति शंकापुरस्सरं अधिकरणमेतदुत्थापयति । अधिकरणस्योत्थापने को हेतुरिति शंकायामुच्यते -

केचन ऋषयः एकत्र मिलित्वा परस्परंमीमांसां चक्रुः - अस्माकं आत्मा कः ?

किं ब्रह्म ? इति । अत्र ब्रह्मभिन्न: अन्य: आत्मा इत्यत: द्वैतप्रसंग इति शंकनीयम्, यत: आत्मन: संसारित्वव्यवच्छेदार्थं ब्रह्मेति पदम्, एवं ब्रह्मण: आपरोक्ष्यार्थं आत्मेति पदमिति वक्तव्यत्वात् नोक्तदोषप्रसंग: । अथवा जीवब्रह्मणोरभेद-निरूपणार्थं पदद्वयसमाहार इति । आत्मेत्युक्ते जीवात्मनि प्रत्ययो माभूदित्यत उक्तं किं ब्रह्मेति । अत्र जीव: परिच्छिन्न: आत्मा अपरिच्छिन्न इति । ते तु ऋषय: परस्परभाषणेन निश्चयमनधिगच्छन्त: उद्दालकऋषिसमीपमवापु: । सोऽपि विषयेऽस्मिन्नहं सम्यक् न वेद्मि इत्युक्त्वा तैस्साकं वैश्वानरविद्याविदं कैकेयराजमुपसेद: । अथ स राजा तेषां भ्रान्तिनिरासार्थमेकैकमपृच्छत् - आत्मरूपेण त्वया क उपास्यत इति । तेऽपि क्रमेण स्वैरुपास्यमानं वैश्वानरं - दिवं, आदित्यं वायुं, आकाशं, आप:, पृथिवी इति विभज्य ऊचु: । अनन्तरं स राजा तेषां वचनं श्रुत्वा प्रत्येकोपासनस्य निन्दनं कृत्वा द्युप्रभृतीनां षण्णां यथाक्रमं तेषां सुतेजस्त्वादिगुणान्विधाय ऋषीणां मूर्धादिभावमुपदिश्य समस्तवैश्वानरध्यानविधिमु-पदिशति । एवं तेषामुपदिष्टो स वैश्वानर: अधिकरणस्यास्य विषयीभूत: । स वैश्वानर: किं स्वरूप इति विचार्यते अधुना -

पूर्वस्मिन् अदृश्यत्वाधिकरणे यथा वाक्यशेषस्थसर्वज्ञत्वादिलिंगेन अदृश्यत्वादि-साधारणधर्मस्य ब्रह्मनिष्ठत्वमुक्तम्, तथा अत्रापि वाक्यशेषस्थहोमाधारत्वलिंगेन उपक्रमस्थसाधारणवैश्वानरशब्दस्य जाठरनिष्ठत्वमस्तु इति।पूर्वपक्षे अथवा वैश्वानर: अग्निमात्रप्रयोगे वा भवतु इति पूर्वपक्षिणाे आशय: भवति । तस्य वैश्वानरस्य सामान्यरूपेण वेदेऽपि अग्नौ प्रयोगो दृश्यते, यथा - विश्वस्मा इति । तस्मात् केवलाग्निरेव वैश्वानरशब्दवाच्य इति स्वमतं वेदमन्त्रेण दृढीकरोति पूर्वपक्षी । भाष्ये मन्त्रार्थ: सुस्पष्टमिति मत्वा नैव प्रतिपादित: ।

सूत्रभाष्ये पूर्वपक्षिणा यदुक्तं अनेन ऋङ्मन्त्रेण केवलाग्निमात्रं बोध्यत इति एवमेव सायणाचार्य: स्वभाष्ये मन्त्रार्थमुपन्यस्तवानित्यत: उभयोरपि पक्षयो: मन्त्रार्थ: समानो भवति ।

अत्रेतच्चिन्त्यम् - सूर्यस्याप्यग्निरूपत्वात् अग्निशब्देन सूर्यस्यापि व्यपदेशो भवितुमर्हतीति विरोधशमनं कर्तव्यम् । अत एवानन्तरमन्त्रव्याख्यानावसरे सायणाचार्यै: 'सूर्यात्मकमग्निम्' इति विवृतम् ।। इति शम् ।।

सूत्रभाष्ये प्रथमाध्यायस्य द्वितीयपादे चतुर्विंशतितमे सूक्ते अ इयं प्रतिपादिता-

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।

इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ।।

(ऋ० सं० १-६८-१) इति । प्रथमे मण्डले अष्टानवतितमे वैश्वानरस्येति सूक्ते मन्त्रोऽयं प्रथमः ।

अस्य सूक्तस्य कुत्सः ऋषिः । अस्य सूक्तस्य देवता शुद्धाग्निः, अथवा 'वैश्वानरस्य इदं वैश्वानरीयम्' इति व्युत्पत्तेः सूक्तस्यास्य देवता वैश्वानरगुण-विशिष्टो अग्निः इति । ऋगियं त्रिष्टुब्छन्दोबद्धा ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - अन्यान् देवान् प्रति यज्ञभूमौ दत्तं हविः लोकान्तरं प्रति नेतुः वैश्वानरगुणकस्याग्नेः शोभनरूपानुग्रहात्मिकायां बुद्धौ विश्वस्मिन् व्यापृतानां जनानां संबन्धिनो वयं वर्तमाना भवेम । एवं च सोऽग्निः बुद्धिरूपोपाध्यवच्छिन्नः परमेश्वर इत्यायातम् । स हि वैश्वानररूप-परमात्मा सर्वैः भूतजातैः आभिमुख्येन सेवितः सन् सर्वेषां प्राणिजातानां स्वामी साक्षी च भवति । अत्र पाणिनिसूत्रम् -

'नरे संज्ञायाम्' (पा० सू० ६-३-१२९)

इति सूत्रेण पूर्वपदस्यास्य वैश्वानरशब्दस्य विश्वेषां नराणां संबन्धी इत्यर्थो उच्यते ।

अरणिद्वयादस्मात् जातमात्र एव स वैश्वानरोऽग्निः इदं जगत् विशेषेण पश्यति । समीपस्थजनानां प्रत्यक्षो भवतीत्यर्थः । अपि च यथा भूताग्निः प्रातरुद्यता सूर्येण संगच्छते एवं जीवरूपोऽयमग्निः आत्मसाक्षात्कारेण संपद्यमान-ब्रह्मणा सह एकीभवति । एवं अयमग्निः सर्वेषां भूतजातानां साक्षिरूपः अथवा जीव इति भूताग्निदृष्टान्तपुरस्सरं मन्त्रेणानेन सिध्यतीति ।

सायणाचार्यभाष्यरीत्या विशिष्यानेन मन्त्रेण विश्वनरगुणरूपः अग्निः एवंरूपः सः सर्वेषां बुद्धौ वर्तमानत्वात्, अग्निहोत्रादिकर्मसु अस्यकर्मप्रधानत्वात्

अयं विशिष्टो देवता भवितुमर्हति इति अग्ने: देवतात्वं सिध्यति ।

स्कन्दस्वामिना तु अस्य मन्त्रस्य स्वमर्थ: प्रत्यपादि - वैश्वानर: मध्यमोत्तमौ उच्येते । ताभ्यां प्रभवतीति वैश्वानरोऽयमग्नि: । अशनिना भिद्यमानात् वृक्षात् यो ग्नि: गृह्यते, स: वैद्युतात् प्रभवति । यस्तु आदित्याभिमुखे आदर्शे मणौ वा दृश्यते, स आदित्यात् प्रभवति । वैद्युत-आदित्याभ्यां वैश्वानरस्य (प्रभवद्वयस्य) प्रभवात् अग्ने: वैश्वानर इति इदं गुणाभिधानम् । एवंभूतस्याग्ने: शोभनायामनुग्राह्यबुद्धौ वयं स्याम इति + आशास्महे । कस्मात् ? राजा हि स: । लोके विद्यमानानां सकलभूतजातानां आश्रयणीय:, तस्मात् स राजा, ईश्वरो वैश्वानर इति । ओषधिवनस्पतिभ्यो जात: सो अग्नि: विश्वमपुं विशेषेण प्राणिनां कृताकृतं प्रत्यवेक्षयति । किंच वैश्वानर: प्रयत्नं करोति, प्रयत्नेन गमनं लक्ष्यते । यथा आदित्यात् अमुतो रश्मय: अध: अपगच्छन्ति एवं वैश्वानरोऽग्नि: सूर्येण सह संगच्छते इति । विशेष: स्कन्दस्वामिभाष्ये द्रष्टव्य:[१] ।

(ब्रह्म-सूत्र-भा-स) सूत्रभाष्ये शंकराचार्या: अमुं मन्त्रं प्रथमाध्यायस्य द्वितीयपादे सप्तमाधिकरणे प्रथमे सूत्रे (ब्र० सू० १-२-७-२४) अवतारयामासु: । अत्र अधिकरणस्य विवरणं विश्वस्मा अग्निरिति मन्त्रव्याख्यानावसरे सप्रपंचं प्रतिपादितम् । अमुं वैश्वानराग्निं चतुर्धा विकल्प्य तत्र पूर्वपक्षिणा अयमग्नि: जाठरोऽग्नि: वा भवतु अथवा अयं वैश्वानरशब्द: अग्निमात्रप्रयोगे वा भवतु इति सहेतुकं प्रत्यपादि । इदानीं पूर्वपक्षी तृतीयं पक्षमाश्रित्य स्वपक्षं स्थापयितुं प्रवर्तयति - अयं वैश्वानरोऽग्नि: अग्न्यभिमानिनी देवता इति भवितुमर्हति इति । उक्तमर्थमुपोद्बलयति ऋग्वेदश्रुत्याऽनया -

'वैश्वानरस्य सुमतौ स्याम' इति ।

ऐश्वर्याद्युपेतायां देवतायां वैश्वानरशब्दप्रयोग: अस्या: ऋच: अर्थसामर्थ्यात् संभवति । एवं चात्र पूर्वपक्षिमतेऽपि अर्थो वर्ण्यते चेत् तस्याभिमतं अनेन मन्त्रेण सिध्यति ।

तथा च मन्त्रोऽयं देवतामात्रं बोधयतीति प्रतिपादयत: पूर्वपक्षिण: मते मन्त्रवर्णेनानेन देवतारूपसगुणब्रह्मोपासनंब बोध्यते, एवं सायणाचार्यभाष्येऽपि । सिद्धान्तिमते तु छान्दोग्यस्य वैश्वानरशब्द: परमात्मवाची इति स्थापितत्वात्

---

१ स्कन्दस्वामी भाष्य पृ० ७१२

इयम् ऋक् सगुणब्रह्मोपासनं बोधयति इति पूर्वपक्षसिद्धान्तयोः विवेचनीयम् । मन्त्रार्थः आचार्यभाष्ये न विवृतः, रत्नप्रभादिभाष्यपर्यालोचनेन एतेषां मनसि सायणाचार्यैः यो अर्थो वर्णितः स एव मन्त्रार्थ इति प्रतिभाति । अस्याधिकरणस्य नव सूत्राणि वर्तन्ते । तत्र प्रथमसूत्रे एव पूर्वपक्षिणा चतुर्विधप्रकारेण स्वमतमुपस्थापितं खण्डयित्वा वैश्वानरशब्दः परमात्मवाचो इति भाष्यकारः सामान्यविशेषान्यायेन , उपक्रमोपसंहारन्यायेन च, श्रुत्यादिलिंगरूपैश्च सयुक्तिकं सिद्धान्तयति । विस्तरभियान्नेह तत्प्रस्तूयते आचार्यभाष्यं द्रष्टव्यम् ।। इति शम् ।।

00-00-00-00-00-00

---

१ ब्र० सू० शां० भा० पृ० १९६

सूत्रभाष्ये प्रथमाध्यायद्वितीयपादे सप्तमाधिकरणे भवतीयम् ऋक् -

देवैभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम् ।
यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम् ।।

(ऋ० सं० १०-८८-३) इति । दशममण्डलस्याष्टाशीतितमं हविष्पान्तमिति एकोनविंशत्यृचं सूक्तम् । सूक्तस्यास्य मूर्धन्वान्नाम ऋषिः । अस्य वैश्वानरगुणकोऽग्निः सूर्यश्च समुदितौ देवता । सूक्तमेतत् त्रैष्टुभं छान्दसम् ।

सायणभाष्यरीत्या मन्त्रार्थविवरणम् - यः स्वतेजसा पृथिव्यन्तरिक्षद्युलोकादीन् भासयति स्वयं प्रकाशयति च एवं पृथिव्यन्तरिक्षे तेनैव तिष्ठतः तयोः मध्ये स एव तिष्ठति च, स्वंभूतं जरामरणरहितं इन्द्रादिभिर्देवैः यज्ञार्थं प्रेषितं महान्तं तं वैश्वानरमग्निं अहं स्तौमि - स्तुत्या प्रीणयामि इति । एतन्मन्त्रविषये वेंकटमाधवस्य आशयोऽपि समानं वर्तते ।

सूत्रभाष्ये प्रथमाध्यायस्य द्वितीयपादे सप्तमाधिकरणे 'शब्दादिभ्य' (इति) (ब्र० सू० १-२-२६) इति सूत्रव्याख्यानावसरे भाष्य निरदिशन् मन्त्रममुं शंकराचार्याः । एतत् सूत्रं वैश्वानराधिकरणे तृतीयं भवति । अस्याधिकरणस्य संगतिः अधिकरणरचना च 'विश्वस्मा' 'वैश्वानरस्य' इत्यनयोर्मन्त्रयोः व्याख्यानयोः सविस्तरं प्रतिपादिता वर्तते ।

अस्मिन्नधिकरणे प्रथमसूत्रे एव वैश्वानरशब्दाभिधेयः क इति विचार्य परमात्मा एव वैश्वानरशब्दवाच्य इति सिद्धान्तितम् । तस्मिन्सूत्रे पूर्वपक्षी अग्निमात्रे देवतायां वा वैश्वानरशब्दप्रयोगो भवतु इति स्वोक्तिदाढर्याय प्रत्येकस्य पक्षस्य एकैकं मन्त्रं निरूपयामास । पंचविकल्पान्तर्गतजाठरोऽग्निविषये नाधिकमुक्तमिति बुध्वा जाठरोऽग्निः वैश्वानरशब्दवाच्य इति प्रकारान्तरेण सूत्रेऽस्मिन् स्वमतमुपस्थापयति पूर्वपक्षी + शब्दादिभ्यो न्तः प्रतिष्ठानादिति चेत्' इत्यादिना । पूर्वपक्षिणः अयमाशयः - वैश्वानरशब्दः अर्थान्तरे रूढत्वात् शब्दमात्रेण परमेश्वरे न संभवति । तथा चोक्तं वाजसनेयिब्राह्मणेऽग्निरहस्ये -

'स एषो ग्निर्वैश्वानर:' (बृ० उ०)

इत्यत्र वैश्वानरे अग्निशब्दप्रयोगात् तस्य परस्मिन् ब्रह्मणि अयोगात् तत्सामान्यात् अस्मिन् प्रकरणे पठितछान्दोग्यश्रुतावपि वैश्वानररूपाग्निरेवाभिधीयत इति ।

'स यो हैतमग्निं वैश्वानरं पुरुषविधं
पुरुषेऽन्त:प्रतिष्ठितं वेद स सर्वत्रान्नमत्ति ।'

(बृ० उ०) इत्यस्यां श्रुतौ प्रतिपाद्यमानान्त:प्रतिष्ठानादिति शब्दात् देहान्तरस्थत्वं जाठरे संभवतीति सिध्यति । अपि च 'मूर्धैव सुतेजा:' इत्यादि-विशेषलिंगदर्शनात् 'परमात्मैव वैश्वानरशब्दवाच्य:' इति भवन्मते वक्तुं न शक्यते । (उभय) उभयोरपि पक्षयो: अनया श्रुत्या विशेषप्रतिभानदर्शनात् ।

अथवा परिच्छिन्नजाठराग्ने: द्युलोकाद्यवयववत्त्वं न संभवति प्रत्यक्ष-विरोधादिति भवन्म तं, अस्तु तर्हि भूताग्निरेव वैश्वानर: इति । स एव अन्त: बहिश्च अवतिष्ठति । तस्य भूताग्ने: साक्षात् ऋङ्मन्त्रवर्णात् द्युलोका-दिसंबन्ध: अवगम्यते । स तु मन्त्र: 'यो भानुना' इति । अत्र भाष्ये ऋङ्मन्त्रस्य उत्तरार्ध एव स्वीकृत: यावत् आवश्यकं तावत् इति लोकन्यायेन । मन्त्रार्थ: -

प्रसिद्धपदार्थभूतौ इमां पृथिवीं यां च ते एव द्यावापृथिव्यौ ताभ्यामेव य: भूताग्नि: प्रकाशरूपेण व्याप्तवान्, स एव देव: द्यावापृथिव्यो: मध्यमन्तरिक्षं च व्याप्य तिष्ठति । स एव द्युलोकाद्यवयवरूपेण अस्माभिर्ध्येय इति ।

एवं चानेन मन्त्रेण पूर्वपक्षिण: पक्ष: सिद्धान्तितो भवति । तथा - अस्याधिकरणस्यारंभे 'को न आत्मा किं ब्रह्म' इति प्रश्नपुरस्सरमुपस्थाप्य तत्प्रश्न-प्रतिवचनं 'आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि' (छा० उ० ५-११-१,६) इति श्रुत्या एव प्रतिपादितं स दृश्यते । तत्र कोऽयं वैश्वानर इति सन्देहे जायमाने सति तं चतुर्धा विकल्प्य तत्र साधारणशब्दप्रयोगात् स वैश्वानर: भूताग्निरेव इति । यथा सर्वेषु च लोकेषु यो आत्मा भानुरूपेण व्याप्तवान्, स एव च तत्तल्लोकमध्य-मन्तरिक्षभावेन अस्माभिर्ध्यातव्य: तथा तद्वदत्रापि भूताग्निरिति तस्याशय: ।

मन्त्रस्यास्य सायणाचार्यै: यो अर्थो निगदित आसीत् स एवार्थ: शंकराचार्यै: मनसि संकल्प्य अत्र मन्त्रोऽयं प्रतिपादितो वेति । आचार्यै: मन्त्रार्थ: कण्ठत:

नोक्त: । व्याख्यातार: अस्यार्थं स्पष्टतया वर्णयन्ति ।

एतन्मन्त्रमधिकृत्य भामतीकारैरेवमुपवर्णितम्[१] - 'यो भानुना पृथिवीं द्यामुतेमाम्' इति मन्त्रवर्णोऽपि न केवलोष्ण्यप्रकाशविभवमात्रस्य भूताग्नेरिममीदृशं महिमानमाह, अपि तु ब्रह्मविकारतया तादूप्येणेति भाव:' इति ।

तथा च आत्मसमानप्रकरणेन अधिकरणेऽस्मिन् अग्ने पठितत्वात् अग्न्युपाधिक: आत्मा इति सिध्यति । तस्मिन् अग्नावेव सर्वं समाहितं वर्तते । एवंरूपो अग्नि: सर्वत्र व्याप्य तिष्ठति, स एवास्माभि: ध्येयरूप:, अथवा तं स्तुत्या प्रीणयामि इति अनेन मन्त्रेण सिध्यति ।

एवं च एक: आत्मा य: ब्रह्मरूपेण उपनिषत्सु प्रतिपाद्यते स एव अग्न्यात्मत्वेन ध्यातव्य: स एक एव सर्वं लोकं व्याप्य तिष्ठति चेत्यनया ऋचा प्रतिपादितमद्वैततत्त्वम् इति ।। इति शम् ।।

:o:o:o:o:o:o:o:o:

---

१ भा० पृ० ३०४ - ३०५

सूत्रभाष्ये प्रथमाध्यायस्य तृतीयपादे एकोनत्रिंशतितमे भवत्ययं मन्त्रः -

यज्ञेन॑ वा॒चः प॑द॒वीय॑माय॒न् तामन्व॑विन्द॒न्नृषि॑षु॒ प्रवि॑ष्टाम् ।

तामा॒भृत्या॒ व्य॑दधुः पुरु॒त्रा तां स॒प्तरे॒भा अ॒भि सं न॑वन्ते ।।

इति-+ (ऋ० सं० १०-७१-३) इति । दशममण्डलस्य एकसप्ततितमं 'बृहस्पते' इत्येकादशर्चं सूक्तम् । तत्र मन्त्रोऽयं तृतीयः ।

अस्य सूक्तस्यांगिरसो बृहस्पतिः ऋषिः । अनेन सूक्तेन परमपुरुषार्थसाधनं निरतिशयानन्दरूपं मोक्षसाधनं परब्रह्मज्ञानं स्तौतीति कृत्वा सूक्तस्यास्य देवतं - परब्रह्मज्ञानं भवति । ऋचा अज्ञान-तत्कार्यप्रविलयपूर्वकमुपनिषज्ज्ञानस्योत्पद्यमानत्वात् तज्ज्ञानस्योत्कृष्टत्वात् ब्रह्मज्ञानं स्तौतीति । श्रूयते च -

'सुज्योतिः परमं ब्रह्म यद्योगात्समुपासते ।

तज्ज्ञानमभितुष्टाव ---------- ।।'

इति बृहद्देवतायाम् । ऋगियं त्रिष्टुब्छन्दोबद्धा भवति ।

सायणाचार्याणांमतमभिप्रेत्य मन्त्रार्थो विव्रियते - अतीन्द्रियार्थदर्शिषु साधनचतुष्टयसंपन्नेषु शमदमादिना-विगतकामादियुक्तेषु आत्मज्ञानिषु ऋषिषु उपाधिरूपस्वशरीराकारेण प्रविष्टां तां वाचं वागधिष्ठितब्रह्मरूपं उपनिषदात्मक-शास्त्रविदितार्थाः सन्तः ते धीराः स्वस्वरूपेण अलभन्त । अनाद्यविद्यया अर आच्छादिततमोरूपव्यपोहनपूर्वकं ब्रह्मस्वरूपां तां वाचं ते अलभन्त इत्यर्थः । अत एवो-

(अत) च्यते (सम्प्रदाय--) सांप्रदायिकैः -

'ब्रह्मस्वरूपां परमां ज्योतिरूपां सनातनीम् ।

सर्वविद्याधिदेवीं यां तस्यै वाण्यै नमो नमः ।।'

इति । वेदमयीं ब्रह्मस्वरूपां वागधिष्ठितां तां गायत्रीम् ऋषयः स्तुवन्तीति ।

के ते धीराः ? केनोपायेन ते वागधिष्ठितब्रह्मस्वरूपं ज्ञातवन्तः ? इति प्रश्नपुरस्सरं सिद्धान्तयति श्रुतिः - यज्ञेन वाच इति । अहरहः कर्तव्यत्वेन विहितनित्यमहायज्ञैः, पदेन यातव्य इति पन्थाः पदेन अर्थः उच्यते, अर्थेन ज्ञायमानं

कर्म, अभिधीयते । तेन पथा - विहितनित्यकर्मणा इति । पदवीया: सन्त: ते वाच: - वेदस्य वाग्रूपमार्गं प्राप्तवन्त: । वेदोक्तमन्त्रानुसारेण आत्मसाक्षात्कारमलभन्तेति ।

मन्त्रस्यास्य प्रथमपादेन मध्यमाधिकारिण: उच्यन्ते, द्वितीयपादेन उत्तमाधिकारिण: अभिप्रयन्त इति विविच्य ज्ञातव्यं भवति । अथवा प्रथमपादेन सगुणब्रह्मोपासनं तेन च क्रममुक्ति:, अनन्तरपादेन निर्गुणब्रह्मोपासनं तेन साक्षात् मुक्तिश्च मन्त्रेणानेन उपदिश्येते इति ।

अनन्तरं च ते धीरा: ज्ञानिन: बहुषु देशेषु वर्तमानानां जिज्ञासूनां कृते तां ब्रह्मस्वरूपां वाचं विविच्य उपदेशपूर्वकं प्रकाशयामासु: । अथवा ते ऋषय: वेदमयीं तां वाचं अधिकारिभूतान् सर्वान् मनुष्यान् अध्यापयामासु: । एतादृशीं ब्रह्मस्वरूपां वेदरूपां तां वाचं पङ्क्तिरूपाणि गायत्र्यादीनि सप्त छन्दांसि शब्दायमाना: अभित: संगच्छते । यथा सूर्य: शब्दायमानै:सप्ताश्वै: नीयमानरथेन प्रत्यहं पूर्वस्यां दिशि उत्थाय पश्चिमस्यां दिशि अस्तं गच्छति, एवं सप्तछन्दोबद्धा वेदवाणी प्रत्यहं ब्राह्मणस्य मुखे प्रादुर्भूय तत्रैव वुसति देशे काले च उदेति अस्तं च भवतीति ।

ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य द्वितीयपादे नवमे देवताधिकरणे एकोनत्रिंशत्तमं सूत्रम् -

'अत एव च नित्यत्वम्' (ब्र० सू० १-३-२९)

इति । अस्मिन् देवताधिकरणे सगुणोपासनेन गृहीतदेवशरीरस्य पुरुषस्य देवस्य वा वेदान्तोपनिषच्छास्त्राणां श्रवण-मनन-निदिध्यासनेषु अधिकारो वर्तते उत न इति सन्दिह्य विविधविचित्रानन्दभोगभागिनां देवादीनां वैराग्याभावात् तेषां ब्रह्मविद्यायां न अर्थित्वमिति प्राप्ते पूर्वपक्षे सिद्धान्तयति सूत्रकार: -

'तदुपर्यपि बादरायण: संभवात्' (ब्र० सू० १-३-२६)

इत्यनेन सूत्रेण । उपरितनलोके स्थितानां देवादीनामपि उपनिषच्छास्त्रपठनरूपार्थित्वादि अधिकारकारणं संभवति इत्याचार्यो बादरायण: मन्यते स्म इति ।

प्रकरणेऽस्मिन् वर्तमासूत्र-तद्व्याख्यानोपनिषत्सु मुख्यत्वेन कथयिष्यमाणमेकत्वं नामाद्वितीयतत्त्वं सम्यक् प्रतिभाति । (अथ-) य: पुरुषशरीरोपाधिक: स एव

देवशरीरोपाधिक: । अत: देव-पुरुषशरीरयोरुभयोरेकस्मिन्नेव ब्रह्मशास्त्रे समानाधिकृताधिकारत्वदर्शनात् एकत्वं नाम तत्त्वमवसीयत इति ।

अथ च 'शब्द इति चेत्' इति सूत्रव्याख्यानावसरे भाष्यकारै: -

'नाम रूपे च भूतानां कर्मणां च प्रवर्तनम् ।

वेदशब्देभ्य एवादौ पृथक्संस्थां च निर्ममे ।।'

(मनु० १-२०) इति स्मृत्या स्रष्टु: प्रजापते: सृष्टे: पूर्वं वैदिका: शब्दा: मनसि प्रादुर्बभूवु:, अनन्तरं च स: प्रजापति: शब्दानुगतार्थरूपपदार्थान् तत्तन्नाम्ना ससर्ज इति प्रतिपादितम् । अनेन ज्ञायते यत् नामरूपात्मकं इदं जगत् मिथ्या इति । श्रुतिरप्यत्र भवति -

'स भूरिति व्याहरत्सभूमिमसृजत' (तै० ब्रा० २-२-४-२)

इति । अथ च - 'नित्यमेकमनेकानुगतं सामान्यम्' इति स्थिते: द्रव्यगुणकर्मणां व्यक्तय एवोत्पद्यन्ते, न आकृतय: । आकृतीनां च शब्दै: सह संबन्ध: न व्यक्तिभि: इति अस्मिन् सूत्रे प्रतिपादितम् । एवं पूर्वस्मिन् सूत्रे वेदशब्दस्य नित्यत्वं स्थापितमिति कृत्वा तद्दृढीकरणार्थमुच्यते समनन्तरं सूत्रम् + (ब्र० सू० १-३-२९) । अत्र भाष्यकारेणापि सिद्धमर्थं दृढीकर्तुमिमां वेदवाणीमभ्यधायि - यज्ञेन वाच इति । भाष्यरीत्या मन्त्रार्थ: - पूर्वसुकृतेन कर्मणा वेदस्य ग्रहणयोग्यतामाप्तवन्त: अनन्तरं ते याज्ञिका: ऋषिषु प्रविष्टां तां वाचं लब्धवन्त इति । अपि च -

कथमनेन मन्त्रेण वेदस्य नित्यत्वं बोध्यत इति चेत् इत्थम् - याज्ञिका: यज्ञेन- पुण्येनकर्मणा, वाचो - वेदस्य पदवीयं मार्गयोग्यतां ग्रहणयोग्यताम् आयन्- आप्तवन्त:, ततस्तां वाचम् ऋषिषु प्रविष्टां॰ विद्यमानाम् अन्वविन्दन्- अनुलब्धवन्त: इति मन्त्रार्थ: । अत्र च ऋषिषु स्थितमेव वेदं लब्धवन्त: याज्ञिका: इति कथनेन वेदनित्यत्वं लभ्यत इति । अयमेवार्थ: वेदव्यासेनापि -

'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षय: ।

लेभिरे तपसा पूर्वमनुज्ञाता: स्वयंभुवा ।।'

इति श्लोकेन प्रकटित: । तथा च वैदिकाच्छब्दादेव देवादिरूपाणां वर्णनं, एवं सकलचराचररूपात्मिका जगत्सृष्टिरपि भवतीति । तथाचोक्तं मनुस्मृतौ -

सर्वेषां च स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक्संस्थांश्च निर्ममे ।।

(मनु० १-२१) इति ।

तुलनात्मकदिशायां तु - सायणाचार्यभाष्यरीत्या पर्यालोच्यमाने तै: मन्त्रस्यास्य यो अर्थ: प्रतिपादित:, तत्र च ये सिद्धान्ता: र र उररीकृता: त अस्या: ऋच: स्वार्थप्रतिपादका: भवन्ति, इति कृत्वा मन्त्रस्य सायणार्थ ब एव साधुतरो भवति । शंकराचार्यास्तु सूत्रभाष्ये वेदस्य नित्यत्वस्थापनार्थं मन्त्रममुं प्रकाशितवन्त इति कृत्वा तेषामाशयेऽपि मन्त्रस्य सायणाचार्यै: यो र्थ: प्रतिपादित: स एव भवेदिति अत्र समाधानं भवति । सायणाचार्य-शंकराचार्ययो: मते मन्त्रस्थ 'वाच' इति पदस्य 'वेदस्य' इत्यर्थो वर्णित: । एवं चोभयो: भाष्यकारयोर्मते मन्त्र: समानार्थक इति ।

मन्त्रेऽस्मिन् प्रतिपादिता: सिद्धान्ता: - सायणाचार्यभाष्येण,- सगुण-निर्गुणब्रह्मोपासनं, एकत्वमिति, शंकराचार्यभाष्येण ,- ब मुक्तिस्वरूपं, एकत्वं, शब्दस्य नित्यत्वं , जगत: वेदप्रभवत्वमित्येते भवन्ति ।। इति शम् ।।

00-00-00-00-00

सूत्रभाष्ये प्रथमाध्यायस्य चतुर्थ पादे द्वादशतमे सूत्रे इयं पठिता वेदवाणी -

यत्पांचजन्यया विशेन्द्रे घोषा असृक्षत ।

अस्तृणाद्बर्हणा विपो३ र्यो मानस्य स क्षयः ।।

(ऋ० सं० ८-६३-७) इति । अष्टममण्डलस्य त्रिषष्टितमं 'स पूर्व्य' इति द्वादशर्चं सूक्तम् । तत्र सप्तमोऽयं मन्त्रः ।

सूक्तस्यास्य पूर्वापरसूक्तऋषिपर्यालोचनेन अस्यापि ऋषिः प्रगाथ इति सिध्यति । सूक्तमिदं इन्द्रदेवताकम् । मन्त्रोऽयं अनुष्टुप् छन्दसि पठितः ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - पांचजन्यपदेन निषादपंचमाश्चत्वारो वर्णाः पंचजनाः गृह्यन्ते । पंचजनानां भवाः पांचजन्याः तया पांचजन्यया इति । यदा इन्द्रे पांचजन्यया प्रजया स्तुत्यादिकर्मरूपफलादयः सृज्यन्ते, तदानीमेषः इन्द्रः स्वशक्त्या महत्त्वेन च कामक्रोधादिआन्तरिकबाहिरपून् हिनस्ति । एतादृशः स इन्द्रः सर्वदा साधनचतुष्टयसंपन्नस्य मेधाविना मम पूजायाः योग्यस्थाने हृदि निवासं करोतु इति । नित्यकर्मणा चित्तशुद्धिद्वारा परमपुरुषार्थस्य कैवल्यरूपस्य ब्रह्मज्ञानस्यावाप्तये श्रवण-मनन-निदिध्यासनविषया परंब्रह्म इन्द्रत्वेन रूपेण विधीयत इति सिध्यति । अथवा नामरूपव्याकृतः सोपाधिकः इन्द्रः एव उपास्यत्वेनात्र विधीयते । उपासनारूपफलेन सोपाधिकस्य हिरण्यगर्भस्य लोकं प्राप्य तत्र तेन सह ब्रह्मविचारं कृत्वा अन्ते परमपुरुषार्थं मोक्षं प्राप्नोति इति मन्त्रेणानेन क्रममुक्तिराम्नायते ।

ब्रह्मसूत्रभाष्ये शंकराचार्याः प्रथमाध्यायतुरीयपादे तृतीये संख्योपसंग्रहाधिकरणे द्वितीयत्वेन पठित 'प्राणादयो वाक्यशेषात्' (ब्र० सू० १-४-१२) इति सूत्रव्याख्यानावसरे अमुम् ऋङ्मन्त्रमुदाहृतवन्तः ।

अस्मिन्नधिकरणे -

'यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः ।

तमेव मन्ये आत्मानं विद्वान्ब्रह्मामृतो मृतम् ।।'

(बृ० उ० ४-४-१७) इति श्रुतिमुपपाद्य श्रुत्या प्रतिपादित: पंचजनशब्द: योगरूढ्यो-रनिश्चयात् किं सांख्यतत्वपर: उत अन्यपर इति संशयो भवति । पंचजनशब्दस्य रूढ्यर्थ: न संभवति, यत: पंचजना इति हि शब्द: समासार्थ: तत्तु पंचसंख्यया संबध्यते । 'दिक् संख्ये संज्ञायाम्' (पा० सू० २-१-५०) इति समासविधानात् अयं पंचजनशब्द: मनुजेषु निरूढ: इति नच वाच्यम्, तथा सति पंचमनुजा इति स्यात् । तथा च आत्मनि पंचमनुजानां तात्पर्येण न संबध्यते । सर्वस्यैव भूत-भौतिकवर्गस्य आत्मनि प्रतिष्ठानात् । तस्मात् यथा तत्त्वविद्याधिकारे आगायां अजापदे तात्पर्याभावात् रूढित्याग: तद्वदत्रापि पंचजना इति शब्दस्य पंचमनुष्येषु तात्पर्याभावात् पंचजनशब्दस्य रूढेरसंभवात् तत्त्यागेनात्र यौगिकार्थ एव वक्तव्य: । पंचजना इत्यत्र जनशब्देन तत्त्वानि ग्राह्याणि इति । श्रुत्या पंच पंचजना इत्यु-क्तत्वात् सांख्यैरभ्युपगतपंचविंशतितत्त्वानि गृह्यन्ते + इत्यत: अत्र सांख्यपक्ष: पूर्वपक्षात्वेन गृह्यते । सिद्धान्ते तु 'पंचानां त्वा पंचजनानाम्' (तै० आर० १-६-२-२) इति प्रयोगान्तरैश्च एकविभक्त्यैकैश्वर्यैकपदत्वावगमात् श्रुत्या प्रतिपादितेन पंचशब्देन प्राणाद्या: पंच एव गृह्यन्त इति फलं भवति ।

सूत्रद्वयवत्यस्मिन्नधिकरणे प्रथमसूत्रेण पंचपंचजना इत्यत्र सांख्यै: प्रतिपादित-पंचविंशतितत्त्वानि सहेतुकं निरस्य ब्रह्मस्वरूपनिरूपणाय प्राणादय: पंच निर्दिष्टा: इति स्वसिद्धान्तं समनन्तरसूत्रेण स्थापयति भाष्यकार: ।

'ते वा एते पंच ब्रह्मपुरुषा:' (छा० उ० ३-१३-६)

इति श्रुत्या पंचजना इत्यत्र जनवचन: पुरुषशब्द: प्राणिषु प्रविष्ट: इति निरूपयति ।

एकदेशिनामतद्वयेऽपि पंचजनशब्दस्य अर्थान्तरं दृश्यते । तद्यथा - गन्धर्वा: पितर: देवा: असुरा: रक्षांसि च इत्येतेषु पंचसु पंचजनशब्दप्रयोग: इत्येकं मतम् । अपरे तु पंचजनशब्देन चत्वारो वर्णा: निषादपंचमा: परिगृहीता: इति कथयन्ति ।

सूत्रभाष्ये पंचजनशब्दस्य अर्थान्तरप्रयोग: साक्षात् श्रुत्या श्रूयते इति प्रतिपादनार्थं ऋग्मन्त्र भाष्ये प्रतिपादिता - 'यत्पांचजन्यया विशा'[1] इति । अत्र पंचजनेति शब्दस्य प्रजापर: प्रयोग: दृश्यते । भाष्यरत्नप्रभायां मन्त्रस्यास्य उक्तो अर्थ: स्पष्टरीत्या

---

१ भा० र० पृ० ३१५

प्रतिपादितो वर्तते । एवं च पंचजनशब्दस्य बहुप्रकारेण व्याख्यानसंभवात् श्रुत्यो-
पपादितपंच पंचजना इत्यत्र सांख्योक्तरीत्या पंचविंशतितत्त्वानां न तात्पर्यम्,
अपि तु प्राणादयः पंच गृह्यन्ते इत्यस्मिन्नधिकरणे भाष्यकारैः राद्धान्तितम् ।

सायणाचार्य-शंकराचार्ययोः मते अस्य मन्त्रस्यार्थभेदो दृश्यते । सायणभाष्ये
मन्त्रे विद्यमानस्य पांचजन्यया इति पदस्य निषादपंचमाश्चत्वारो वर्णाः
इत्यर्थो वर्णितः । सूत्रभाष्ये शंकराचार्यैः पांचजन्यया इति शब्दस्य प्राणपरः
प्रयोगः इति स्पष्टं प्रत्यपादयत् । अद्वैतिनामेकदेशिमते पंचजनशब्दस्य
निषादपंचमाः चत्वारोः वर्णाः इत्यर्थो वर्णितः । बृहदारण्यकभाष्ये
शंकराचार्यैरपि एवमेवार्थोऽभिप्रेतो भवति । एवं च मन्त्रस्यास्य सायणाचार्यैः
यो अर्थः प्रतिपादितः स एवार्थः अद्वैतिनामपीऽपि इत्यतः पांचजन्यया इति
मन्त्र उभयत्र समानार्थक इति ।

अनेन ऋङ्‌-मन्त्रेण विशेषमद्वैततत्त्वं न प्रतिपाद्यते । शंकराचार्यैः अस्मिन्
प्रकरणे मन्त्रस्यास्य यावानंशो अपेक्षितः तावानेव अंशो गृहीतः इति ।। इति शम् ।।

****

ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य चतुर्थपादे सप्तविंशतिसूत्रे पठिता ऋगियम् -

योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।

विमुच्या वयोऽवसायाश्वान् दोषावस्तोर्वहीयसः प्रपित्वे ।।

(ऋ० सं० १-१०४-१) इति । प्रथममण्डलस्य चतुरुत्तरशततमं योनिरिति नवर्चं सूक्तम् । तत्र ऋगियं प्रथमा भवति ।

अस्य सूक्तस्य कुत्सो नाम ऋषिः । सूक्तस्यास्य देवता इन्द्रः । मन्त्रोऽयं त्रिष्टुप्छन्दोबद्धा ।

योनिशब्दस्य- कारणं, स्थानं, उपादानं, अवयवशब्देन योनिप्रभवं शोणितमित्यादयो अनेके अर्थाः उच्यन्ते । तत्र सायणाचार्याः द्वितीये स्थानमित्यर्थे योनिशब्दं प्रयुंजते ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - यथा अश्वः हेषाशब्दं कुर्वन् बहिर्देशात् शीघ्रं स्वस्थानमागच्छति, एवं रात्रावहनि च आदरातिशयेन रथवोढारः अश्वाः यागशालायां प्राप्तायां रश्मिभिः रथाद्विश्लिष्यन्ते चेत् ते अश्वाः शीघ्रमाहारस्थानं प्रति धावन्ति, तथा हे इन्द्र ! त्वमपि तवोपवेशनार्थं यागेऽस्मिन् अस्माभिः ऋत्विभिः प्रकल्पितं वेद्याख्यं स्थानं तत्र शीघ्रमागत्योपविश इति ।

श्रीशंकरभगवत्पादाः प्रथमाध्यायस्य चतुर्थपादे सप्तविंशसूत्रव्याख्यानावसरे मन्त्रममुं उदधरन् । तत्रस्थं शांकरं वचनम्[१] -

'क्वचित्स्थानवचनोऽपि योनिशब्दो दृष्टः - योनिष्ट इन्द्र निषदे अकारि'

इति ।

अस्मिन् प्रकृत्यधिकरणे मैत्रीयीब्राह्मणवाक्यं विषयीकृत्य विचारः क्रियते - किं ब्रह्मणः जगत्कर्तृत्वं निमित्तकारणत्वेन उत उपादानकारणत्वेन इति । अत्र पूर्वपक्षी स्वाभिप्रायमेवं व्याचष्ट - 'स ईक्षां चक्रे' (प्रश्न० उ० ६-३) इति

---

१ ब्र० सू० शां० भा० पृ० ३४२

श्रुतिरादेशद्वारा तस्य ब्रह्मणः ईक्षितृत्वम् अनन्तरं प्राणादीनां सृष्टिरित्यवगम्यते । यथा कुलालादयः घटशरावादिनिर्माणकाले तत्पूर्वमेव तस्य तस्याकारं मनसि समाधायानन्तरं तत्पदार्थसंपादनार्थं तत्कर्मणि इच्छां करोति, तथा ब्रह्मापि भूत-भौतिकादिजगत्सृष्टिकरणार्थं पूर्वं तत्सृष्टेः ईक्षणं करोति इति कुलाल-ईश्वरयोः समानं निमित्तकारणत्वम् । अपि च निर्विशेषब्रह्मणः सविशेषरूपेऽयं सृष्टिः नैव संपत्स्यत इति ।

अत्र सिद्धान्तिनोक्तं समाधानम् - प्रतिज्ञादृष्टान्तयोरनुपरोधात् ब्रह्मणः जगत्कर्तृत्वं उपादानकारणत्वेन इति वक्तव्यं भवति । नो चेत् प्रतिज्ञादृष्टान्तयोः भंगापत्तिः स्यात् । यद्येवमभ्युपगम्यते अनुमानमेव न सिध्यतीति मूलाघातः । संशयविषयीभूतपदार्थः सन्दिग्ध एवस्यात् न वस्तुसत्ये । अतः अनुमानेन साध्यमानं जगत्सृष्टिकर्तृत्वे ब्रह्मणः निमित्तकारणत्वमनादरणीयम् । तथा हि -

'न मुख्ये संभवत्यर्थे जघन्या वृत्तिरिष्यते ।
न चानुमानिकं युक्तमागमेनापबाधितम् ।।'[1]

इति भामतीकारोक्तेः ।

ईश्वरस्य इच्छापूर्विकेयं सृष्टिः । एवं कुलालस्य इच्छया घटशरावादि नैव सम्पत्स्यन्ते । घटकरणे तस्य कर्म आवश्यकं भवति, एवमीश्वरस्य सृष्टिकरणे यत्किंचित्कर्म नैवावश्यकं भवति । एवं चेश्वरः सृष्टौ इच्छया निमित्तकारणं भवति । कुलालस्तु कर्मणा घटादौ निमित्तकारणं भवति । दृष्टान्त-दार्ष्टान्तिकयोः एतावान् भेदः - इच्छा तु आत्मगतधर्मो भवति, कर्म तु देहगतधर्मः । इच्छा आत्मगतधर्मत्वात् कदाचित् करोति कदाचिन्नेति वैकल्पिकं भवति । कर्म तु देहगतधर्मत्वात् सति इच्छायां पदार्थसम्पादने अवश्यं कर्तव्यं भवति । तथा च अतः इच्छापूर्वकं कर्मेति । कुलालेन कुलालस्येच्छापूर्वककर्मणा साध्यो घटः, ईश्वरस्य इच्छामात्रेण जगत्सृष्टिःजायते इति तथा च दृष्टान्त-दार्ष्टान्तिकयोः वैषम्यः इति । अपि चेश्वरः सृष्टेःउपादानकारणमपि भवति, तेनैव जगतः उत्पन्नत्वात्, एवं कुलालः घटस्य कारणं न भवति, यतः

---

१ भा० पृ० ३३६

घटस्योपादानकारणं च मृदिति लोके प्रसिद्धत्वात् । अत: ईश्वर: निमित्तो-पादानोभयकारणमपीति सिध्यति, कुलालस्तु केवलं निमित्तकारणमिति ।

एक एव ईश्वर: स: निर्विशेष: तथाऽपि 'तदात्मानं स्वयमकुरुत' इत्यादि श्रुत: तस्यैव कर्तृत्वं कर्मत्वं चेति उभयमपि सिध्यति । प्रतिपादितश्रुतिरीत्या आत्मानमिति तस्यैवेश्वरस्य कर्मत्वं अकुरुतेति कर्तृत्वं च सिध्यत: । अविकारोऽपि सन्नात्मा कर्तृत्व-कर्मत्वरूपविशेषेण सविशेषरूपं प्रपंचं सृजति । उक्तं च भाष्ये[1] -

'पूर्वसिद्धोऽपि हि सन्नात्मा सवशेषेण विकारात्मना परिणमयामासात्मानमिति । विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्ध: । स्वयमिति च विशेषणान्निमित्तान्तरानपेक्षत्वमपि प्रतीयते ।'

इति । अत: साधु: अस्माकं पक्ष इत्युच्यते सिद्धान्तिना ।

अनन्तरं 'योनिश्च हि गीयते' (ब्र० सू० १४-२७) इत्यस्मिन् ब्रह्मसूत्रे 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्' (मुण्ड० ३-१३) इत्यादि उपनिषच्छ्रुतिषु प्रतिपाद्यमान: योनिशब्द: अत्र कारणमित्यर्थे संपन्नो भवति । उक्तार्थमेव स्पष्टीकरोतीयं श्रुति : -

तद्भूतयोनिं परिपश्यन्ति धीरा:' (मुण्ड० १-१६६)

इति । यथा ओषधिवनस्पतीनां पृथिवी योनिरितिवत् । क्वचित्स्थले योनिशब्द: स्थानमित्यर्थेऽपि प्रयुंजमाण: दृश्यते । यथा ऋङ्मन्त्रे १-१०४-१ इत्यत्र ।

मन्त्रार्थ: हे इन्द्र तवोपवेशनाय स्थानं मया कृतमिति भाष्यरत्नप्रभायाम्[2] ।

न्यायनिर्णयेऽपि[3] योनि: स्थानं ते तव भो इन्द्र निषदे- निषदनायो-पवेशनाय स्थित्यर्थमकारि कृतमिति मन्त्रार्थो वर्णित: ।

मन्त्रस्यास्य सायणाचार्यै: योऽर्थ: प्रतिपादित: तमर्थमेव शंकराचार्य: दृढीकरणार्थमत्र भाष्ये प्रतिपादयामासुरिति समानम् ।

विज्ञानभिक्षव: स्वभाष्ये विज्ञानामृताख्ये सूत्रभाष्ये 'योनिश्च हि गीयते'

---

१ ब्र० सू० शां भा० पृ० ३४१
२ भा० र० पृ० ३४२
३ भा० पृ० ३४२

इति सूत्रमित्थमुपपादयामासुः[१] -

'तदानुमानमीश्वरस्य योनिरपि जीवाख्यगर्भाधानस्थानमपि अंशभेदेन भवति, हि- यस्मात् तथा गीयते ये, (मोक्ष मोक्ष) 'यो योनिं योनिमधितिष्ठत्येकः' इत्यादिश्रुतिभिः इति ।' (बलदेव-मोक्ष)

अत्रापि योनिशब्दस्य स्थानमित्यर्थः ।

योनिशब्दस्य ऋङ्•मन्त्रे स्थानपरतया प्रयोगोऽपि 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्' इति मुण्डकोपनिषदि वर्तमानः योनिशब्दः कारणवाची, 'यथोर्णनाभिः सृजते गृह्यते च' इति वाक्यशेषबलात् स्थापनावसरे ऋगियमु-दाहृता । नास्याम् ऋचि किमप्येतत्तत्त्वं प्रकाश्यते ।। इति शम् ।।

0-0-0-0-0-0-0-0-0

ब्रह्मसूत्रभाष्ये द्वितीयाध्यायस्य प्रथमपादे षष्ठे सूत्रे ऋगियं पठिता -

को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टि: ।

अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आ बभूव ।।

(ऋ० सं० १०-१२९-६) इति । दशमे मण्डले एकोनत्रिंशदधिकशततमे नासदीसीये सूक्ते षष्ठो यं मन्त्र: ।

सूक्तेऽस्मिन् पंचमहाभूतानां सृष्टिस्थितिप्रलया: उच्यन्ते । सूक्तस्यास्य प्रजापतिर्नाम परमेष्ठी ऋषि:, परमात्मा देवता, त्रिष्टुब्छन्द: । सूक्तस्यास्य फलं सृष्टिस्थितिप्रलया: सहेतुका: अनित्या: अहेतुकाश्च ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थ: - यद्यपि भाष्यकारै: ब्रह्मतत्त्वपरेऽस्मिन् सूक्ते पूर्वोक्तेषु ऋक्षु ईश्वरस्य प्रपंचस्य च भोक्तृ-भोग्यस्वरूपेण वियदादिभावानां सृष्टि: प्रतिपादिता, तथाऽपि इदानीमस्याम् ऋचि या सृष्टि: प्रतिपादिता सैव सृष्टि: दुर्विज्ञेया विस्तरेण वक्तुमशक्या गहनरूपा सृष्टिरिति निरूपयते । भूत-भौतिक-भोक्तृ-भोग्यादिरूपेण परिदृश्यमाना विविधप्रकारेयं सृष्टि: कस्मादुपादानकारणादुद्भूता इति क: पुरुष: शास्त्रदृष्ट्या विविच्य जानाति ? किं च समन्ताज्जाता इयं सृष्टि: कस्मान्निमित्तकारणात् प्रादुर्भूता इति को वा जानाति ? उक्तोपादाननिमित्तकारणोभयं सम्यक् को वा जन: विस्तरेण वक्तुं प्रभवेत् ? अनेन गहनरूपां सृष्टिं प्रतिपादयितुं न कोऽपि पुरुष: समर्थ इति सृष्टे: दुर्विज्ञेयत्वं प्रतिपादितं भवति । एवं च सति सन्देह उदेति - ननु मनुष्येषु अन्यतम: उक्तरूपां इमां सृष्टिं जानाति, यथाऽपि सृष्टे: निमित्तोपादानकारणद्वयमपि देवा: जानन्ति । ते देवा: सर्वज्ञा:, तस्माद्धेतो: ते ज्ञात्वा , वक्तुं प्रभवन्ति च । इत्यत्राह - अर्वाग्देवा इति । जगत्कारणं ब्रह्म वियदादिपंचमहाभूतसृष्टिसमनन्तरमेव देवान् ससर्ज । अनन्तरं च यद्भौतिकं मायिकं भोग्यप्रपंचं सृष्टवान् । अत: देवा: पंचमहाभूतसृष्टे: पश्चाज्जाता: । यद्यपि या भौतिकी सृष्टि: तां सृष्टिमवश्यं जानन्त्येव ते तथाऽपि स्वात्मन: सृष्टे: पूर्वं या

वियदादिपांचभौतिकी सृष्टि: तां सृष्टिं नैव जानन्ति । अत: सा सृष्टि: तेषां दुर्विज्ञेया । अविज्ञातां पंचभूतानां सृष्टिं कथं वा ते वक्तुं प्रभवेयुरिति । (सर्व:) शास्त्र-तन्मूलवेदप्रमाणेनैकेनैव दुर्विज्ञेया इयं सृष्टि: विविच्य ज्ञातुं शक्यते इत्यर्थ: । एवं च सति सृष्टिव्यतिरिक्तं जगत्कारणं परंब्रह्म, ब्रह्मकारणात् कार्यरूपं कृत्स्नं जगत् अजायतेति । शास्त्रेषु अविश्वासचित्त: को वा पुरुष: कार्यकारणविवेकेन असंन्दिग्धेन वक्तुं प्रभवेत्, न कोऽपि न कदाऽपि शक्नोतीत्यर्थ इति ।

शंकराचार्य: द्वितीयाध्यायस्य प्रथमे पादे तृतीये न विलक्षणत्वाधिकरणे 'दृश्यते तु' (ब्र० सू० २-१-६) इति तृतीयसूत्रव्याख्यानावसरे ऋङ्मन्त्रमुमुप-पादयामासु: ।

अस्याधिकरणस्य आहत्य अष्टौ सूत्राणि । तत्र प्रथमसूत्रद्वयं पूर्वपक्षीयम् । अनन्तरं विद्यमानं पूर्वपक्षनिरासपूर्वकं सिद्धान्तसूत्रम् । कारणात् कार्यमभिन्नमिति प्रतिपादनार्थं तुरीयं सूत्रम् । पंचमसूत्रेण सत्कार्यवादस्य शंका उत्थाप्यते । समनन्तरषष्ठसूत्रेण आशंकितशंका निरस्यते । 'यस्योभयो: समो दोष:' इति न्यायात् वैलक्षण्यादीनां सांख्यपक्षेऽपि दोषत्वात् अस्माभि: न तन्निरासप्रयास: कार्य इति प्रतिपादनार्थं 'स्वपक्ष दोषाच्च' इति सप्तमं सूत्रं प्रवर्तयति । अनन्तरं अधिकरणेऽस्मिन् प्रतिपादितेषु सप्तसु सूत्रेषु विद्यमानस्य सारभूतसिद्धान्तस्य स्वमतस्य दृढीकरणार्थं व्यतिरेकपुरस्सरं तर्कस्य संभावितदोषत्वात् तेन निर्दोष-वेदान्तसमन्वयो न बाध्यत इति निरूपणार्थमन्तिमं सूत्रम् व्याचष्ट इति अस्या-धिकरणस्य सूत्राणां विवेचनं भवति । एतेषु तृतीये सूत्रे स्वसिद्धान्तस्यागमोऽपि प्रमाणमिति प्रदर्शनार्थमुद्धृता भाष्यकारै: ऋगियमुद्धृता ।

ब्रह्मसूत्रद्वितीयाध्यायस्य अविरोधाध्याय इति नाम । अत्र प्राय: सर्वेष्वपि अधिकरणेषु अस्य जगतो 'निमित्तकारणं ब्रह्म' इत्यत्र स्मृति- न्यायप्रधानादिवादाना-माशंकामुद्भाव्य उद्भावित: विरोध: परिह्रियते । तद्वदस्मिन्नधिकरणेऽपि ।

पूर्वस्मिन् योगप्रत्युक्ताधिकरणे स्मृतीनामप्राधाण्यात् ताभि: समन्वयो न विरुध्यत इति सिद्धान्तितम् । प्रकृते तु तर्कनिमित्तादोषं संभाव्य उद्ध्रियते । आम्नायैकगोचरत्वात् ब्रह्मण: इहास्ति न समानविषयता । समानविषयत्वे हि

विरोधो दृष्ट: । अत: तर्कनिमित्तादोपस्यात्र निरवकाशता इति चोद्य समाधत्ते -

'मानान्तरस्याविषय: सिद्धवस्त्ववगाहिन: ।[1]
धर्मोऽस्तु कार्यरूपत्वात् ब्रह्मसिद्धं तु गोचर: ।।'

इत्यत: अत्र ब्रह्मणि तर्कस्यावकाश: वर्तते । तत्रैवं दृष्टान्त: सावकाशनिरवकाशयो: निरवकाशो बलीय इति न्यायेन निरवकाशैकश्रुतिविरोधे भूयस्योऽपि सावकाशा: श्रुतय: तदनुरोधेन नीयन्ते,+ एवं भूयस्यो पि श्रुतय: निरवकाशैकतर्कविरोधे तदनुगुणतया गुणकल्पनया व्याख्येया: भवेयुरिति । अत: आगमार्थोऽपि तर्कस्यावसर: वर्तत इति अधिकरणस्यास्य विषयस्थापनादनन्तरं पूर्वपक्षी तार्किक:

'श्रोतव्यो-मन्तव्यो-निदिध्यासितव्य:' (बृ० उ० २-४-५)

इति श्रुतिपुरस्सरं स्वसिद्धान्तं द्वितीयसूत्रपर्यन्तं विशदीकरोति ।

'दृश्यते तु' इति सूत्रस्थ 'तु' शब्देन पूर्वपक्षो निरस्यते, सिद्धान्तश्च स्थापयिष्यते । विलक्षणत्वाद्धेतो: इदं जगत् न ब्रह्मप्रकृतिकम् इति यदुक्तं पूर्वपक्षिणा तन्न । चेतनेन अचेतनानामुत्पत्ति:, अचेतनानामपि चेतनानामुत्पत्तिरिति दृश्यते लोके । तद्यथा - चेतने पुरुषे विलक्षणनखकेशादीनामचेतनानामुत्पत्तिर्भवति, एवं विलक्षणरूपाचेतनेन गोमयेन चेतनरूपा: वृश्चिकादय: जायन्ते । अत: विलक्षणत्वादिति हेतो: व्यभिचार: । प्रज्ञानघनरूपे चैतन्ये वैलक्षण्यासंभव:, समस्तं वस्तुजातं ब्रह्मप्रकृतिकत्वेन अभ्युपगमात् । उक्तार्थे तर्क-प्रत्यक्षाभ्यां मात्रं केवलं न विरोध:, आगमविरोधोऽपि प्रसिद्धो भवति । तथा च श्रुति: - को अद्धा वेदेति ।

भाष्ये मन्त्रार्थ: सुस्पष्ट इति मत्या नैवार्थो वर्णित: । भाष्यकारमतेऽपि सायणभाष्यवदत्र अर्थो वर्णनीय: इति । एवं सति प्रकरणार्थे अन्वेति । तथा च भाष्यकाराणां शांबरं वचनम्[2] -

'इयम् ऋक् सिद्धानामपीश्वराणां दुर्बोधता जगत्कारणस्य दर्शयति'

इति । तथा च कार्य-कारणयो: अभेदात् कारणरूपब्रह्मण: कार्यरूपा जगत्सृष्टि: इति दुर्विज्ञेया इति । ब्रह्मविषयकज्ञाने तर्कस्य नोपयोग इति कठवल्या: श्रुतिरपि निगमा भजति -

'नैषा तर्केण मतिरापनेया' (कठ० १-२-९)

---

१ भा० पृ० ३५५ २ ब्र० सू० शां० भा० पृ० ३६०

इति । अत: जगत्कारणं ब्रह्म इत्यत्र तर्कस्य /नोपयोग: । अनेन ऋङ्मन्त्रेण सृष्टे: कारणं परंब्रह्म, जगत्सृष्टि: दुर्विज्ञेया चेति तर्कस्या त्र न प्रसर इति । तस्मात् तस्मादियम् ऋक् अधिकरणेऽस्मिन् प्रतिपादितं जगत्कारणं ब्रह्मेति मुख्यं सिद्धान्तं दृढीकरोति । सिद्धान्तस्यास्य अयं मन्त्र: मूलभूत इति । श्रुत्या अनया व्याकृताव्याकृतरूपजगत्सृष्टि: आम्नायत इति सिद्धम् ।

सूत्रभाष्ये प्रतिपादितं जन्माद्यधिकरणं एतद् ऋक्छ्रुतिमूलकम् । तथा च तत्रोक्तं शांकरभाष्यवचनम्[1] -

'अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्य-चिन्त्यरचनारूपस्य जन्मस्थितिभंगं सर्वज्ञात्सर्वशक्ते: कारणात् भवति, तद्ब्रह्म'

इति । भाष्योक्तवचनं स्पष्टार्थकम् भवति ।।--इति--शम्--।।

एवं च प्रपंचोपादाननिमित्तकारणभूतं ब्रह्म तर्केण वा प्रमाणान्तरेण न ज्ञातुं शक्यते, अपि तु श्रुत्यैव ज्ञातुं शक्यत इति प्रतिपादनाय ऋगियं प्रवृत्तेति उभयोरपि भाष्यकारयोराशय: ।। इति शम् ।।

:o:o:o:o:o:o:o:o:o:

----

१ ब्र० सू० शां० भा० पृ० ४७

ब्रह्मसूत्रभाष्ये द्वितीयाध्यायस्य प्रथमपादे षष्ठे सूत्रे अयं मन्त्रः पठितः -

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।

यो अस्याध्यक्षः परमे व्योमन् सो अंग वेद यदि वा न वेद ।।

(ऋ० सं० १०-१२९-७) इति । दशममण्डलस्य शतोत्तरैकोनत्रिंशत्तमं नासदासीयं सूक्तम् । तत्रायं मन्त्रः सप्तमत्वेन पठितः ।

सूक्त सूक्तस्यास्य ऋषिः परमेष्ठी ऋषिः, त्रिष्टुब्छन्दः । अस्मिन् मन्त्रे वियदादिपंचमहाभूतानां भावरूपजगतां च सृष्टि-स्थिति-प्रलयाः प्रतिपाद्यन्त इति हेतोः कार्यरूपप्रंचस्य कर्ता कारणरूपः यः परमेश्वरः सः मन्त्रस्यास्य देवता । अमुस्मिन् सूक्ते आन्तं पर्यालोच्यमाने अत्र वियदादिदृश्यमानप्रपंचस्य सृष्टि-स्थिति-प्रलयाः प्रसक्तसंशयविपर्यासनिरासमुखेन संक्षिप्तवर्णनेन च प्रतिपाद्यन्त इति सिध्यति ।

पूर्वं प्रतिपादितमन्त्रस्य इदानीं प्रतिपाद्यमानमन्त्रस्य च अर्थभेदः एवं द्रष्टव्यः - पूर्वोक्तमन्त्रेण जगत्सर्जनं दुर्विज्ञानमिति प्रतिपादितम्, अनेन मन्त्रेण सृष्टं सर्वं तज्जगत् सर्वदा धारयितुं न योग्यं जलफेनवत् इति प्रतिपाद्यत इति ।

उभयोरपि मन्त्रयोरयं सिद्धान्तः यत् दुर्विज्ञानमित्युक्तत्वात् जगत्सृष्टिः मिथ्या, सर्वदा न स्थास्यति इत्युक्तत्वात् कालत्रयेषु अस्य जगतः सद्भावः परिह्रियते इति ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - विचित्ररूपा गिरि-नदी-समुद्रादि-चराचररूपेण वर्तमानेयं वियदादिसृष्टिः यतः उपादानभूतात् परमात्मनः सकाशात् समजायत तत एव कार्यरूप प्रपंचरूपाख्या इयं सृष्टिः न परमार्थरूपा भवति । अतः आभासरूपेयं सृष्टिः सृष्टिरिव सृष्टिरिति अथवा पूर्वकल्पवर्ति युगान्ते नश्यतीति । एवं च परमेश्वरादन्यः को वा इमां मिथ्यारूपां सृष्टिं धारयति ? न कोऽपि धारयेत् । अतः अनेन ब्रह्मणः उपादानत्वरूपजगत्कारणत्वं सिद्धम् इति ।

अथवा नास्त्येव जगतो जन्म, न कदाचिदनीदृशं जगत् इति बहवो भ्रान्तचित्ताः

भवन्त्यपि । तत्र कारणम् -

'जनिकर्तुः प्रकृतिः' (पा० सू० १-४-३०)

इति सूत्रात् अपादानसंज्ञायां तसिल्प्रयोगः इत्यतः तत एव परमात्मनः उपादानात् इयं भूत-भौतिकी सृष्टिः बभूव इति सृष्टेः उपादानभूतं परमात्मानं को वा वेत्ति ? इति अस्य मन्त्रार्धस्य पूर्वमन्त्रेण सह संबन्धः । अनेन पूर्वस्मिन् मन्त्रे प्रतिपादितो अर्थो दृढीभवति । तत्र केचन जगत्सृष्टिं प्रकृतितः आम्नान्ति, अन्ये च परमाणुभ्यः, अपरे केचन जीवानां पुण्यपापफलरूपकर्मणा इत्येवं सृष्टिविषये इतरदार्शनिकाश्च बहवः भ्रान्तचित्ताः वर्तन्ते - यथा असंदिग्धार्थस्वरूपे ब्रह्मणि संदिग्धवचनानि 'इमानि शास्त्राणि चेत् प्रमाणानि स्युः' इतिवत् उपादानभूतः स एव परमात्मा स्वयमेव निमित्तभूतोऽपि सन् इमां जगद्रूपां सृष्टिं चकार, यदि वा न चकार इति । एक एव परमात्मा कारणरूपेण जगत्सृष्टिं विदधत इति तं परमात्मानं को वा पुरुषः पारमार्थ्यबुध्या जानाति ? बहवः जडात्, प्रधानात् इदं जगदुत्पद्यते, अथवा अकर्तृकमेवेदं जगत् स्वयमजायत इति विपरीतं प्रतिपन्नाः सन्तः 'अयं परमेश्वरः सृष्टेः उपादानकारणम्' इत्युक्तविधानमजानन्तः सन्ति । अपरे केचन सृष्टेः उपादानकारणातिरिक्तः कूटस्थ- तटस्थ एव ईश्वरः सृष्टिं विदधे इति प्रतिपन्नाः सन्ति इति पूर्वार्धमन्त्रस्यार्थो भवति ।

एवं मन्त्रस्य पूर्वार्धपर्यन्तमुपपाद्य उत्तरार्धमाकांक्षापुरस्सरमवतारयति भाष्यकारः सायणः - यद्येवं जगत्सृष्टिः अत्यन्तं दुरवबोधा तर्हि सा न प्रमाणपद्धतिमध्यास्ते इत्याशंक्य प्रमाणपद्धतिसद्भावे ईश्वर एव स्वतःप्रमाणमिति उक्तम् - यो अस्याध्यक्ष इति । सृष्टस्यास्य भूत-भौतिकात्मकस्य जगतः अध्यक्षः ईश्वरः सत्यभूते उत्कृष्टे आकाशवन्निर्मले व्योम्नि स्वप्रकाशे देश-काल-वस्तुभिरपरिच्छिन्नः, विशिष्टज्ञानरूपे स्वात्मनि प्रतिष्ठितः, एवंविधं तं को नाम अन्यो जानीयात् ? आत्मज्ञानी एव तं साक्षात्करोतीति । स अध्यक्ष इत्यत्र श्रुतिरपि भवति -

'कर्माध्यक्षः सर्वभूताधिवासी' (श्वे० उ० ६-११)

इति । एवंभूतः यः परमेश्वरः सः सर्वतन्त्रस्वतन्त्रः सन् सर्वं त्रैकालिकं जानाति,

उत न जानाति इति च एतदुभयं को वा अन्य: जानीयात् इति मन्त्रार्थ: ।

तथा चोक्तं श्वेताश्वतरोपनिषदि -

'छन्दांसि यज्ञा: क्रतवो व्रतानि भूतं भव्यं यच्च वेदा: वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्ध: ।।'

इति,

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ।।'

(श्व० उ० ४ - ६,१०) इति च ।

सूत्रभाष्ये शंकराचार्या: मन्त्रममुं द्वितीयाध्यायस्य प्रथमपादे तृतीयाधिकरणस्य तृतीये सूत्रे उदाजह्रु: । 'को अद्धा वेद' इति मन्त्रव्याख्यानावसरे अधिकरण-सूत्रसारांश: प्रतिपादित: । अधुना तु तस्योपरितनो भाग: विचार्यते -

जगत्कारणं ब्रह्म इत्यत्र ब्रह्मकार्यत्वेनाभिप्रेयमाणमिदं जगत् अशुद्धमचेतनं ब्रह्मविलक्षणं चेति दृश्यते, ब्रह्म तु शुद्धं चेतनं जगद्विलक्षणं चेति श्रुत्यादिषु दृश्यते । उभयो: परस्परविरुद्धधर्मवत्त्वात् कार्यकारणयोरैक्यात् न ब्रह्मकार्यं जगदिति प्राप्ते, उच्यते सिद्धान्तिना, यद्येवमभ्युपगम्यते तर्हि तस्य आगमविरोधोऽपि भवति इति प्रतिपाद्य आगमविरोधप्रदर्शनार्थामयम् ऋक् उपन्यस्ता - इयं विसृष्टिरिति । मन्त्रार्थ: सुगम इति भाष्ये न विवरणं कृतम् । अपि च -

अपि च 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य:' (बृ० उ० २-४-५) इति श्रवणव्यतिरेकेण मननं विदधती इयं श्रुति: तर्कस्यापि आदरणीयत्वं दर्शयतीति नच वाच्यम्, यत: अस्माभिरपि तर्को अंगीक्रियते य: श्रुत्यनुगृहीत: तर्क: । अत: अस्माकं सिद्धान्तस्य श्रुतिरेव प्रमाणम् । तथा च यथा स्मृति: तथा तर्क: अपि नैवादरणीय इति सिद्धान्तितमस्मिन् तृतीये सूत्रे ।

कारणात् कार्यमभिन्नमिति प्रतिपादनार्थं चतुर्थं सूत्रं प्रवर्तयति -

'असदिति चेन्न प्रतिषेधमात्रत्वात्' (ब्र० सू० २-१-७)

इति । अनेन उत्पत्ते: प्राक् कार्यमसदेव स्यात्, स्वविरुद्धकारणात्मना तस्य कार्यस्य सत्त्वायोगात् 'जगत्कारणं ब्रह्म' इत्यत्र अपसिद्धान्तापत्तिमाशंक्य समाधत्ते - कार्यस्य मिथ्यात्वात् तस्य कालत्रयेऽपि कारणात्मना सत्त्वमविरुद्धमिति ।

अत: कार्यस्य कारणात्मनैव सत्वम्, तत्तु प्रागुत्पत्तेरविशिष्टमिति सिध्यति ।

अनन्तरं समनन्तरसूत्रेण पुनश्च शंकते पूर्वपक्षी असत्कार्यवादी - कार्यमिव कारणस्यापि कार्यवत् अशुध्यादिप्रसंग: इति । तत्र दृष्टान्तमुपन्यस्यति - यथा समुद्रस्य फेनोर्मिबुद्बुदादि परिणामे न नियमो दृष्ट:, स च समुद्र: कदाचित् फेनोर्मिरूपेण परिणमते कदाचित् बुद्बुदादिना रूपेण । नचात्र क्रमनियम:, तथा सत्कार्यवादेऽपि भोग्यादिविभागनियम: क्रमनियमश्च असमंजस इति चेत्-न ।

अस्य समाधानार्थं षष्ठं सूत्रं प्रवर्तयति । नैव संभवति तत्र दृष्टान्ताभावात् । प्रलये जगत् न स्वकारणं दूषयति, कारणे लीनत्वात्, तन्तुषु रक्तपटवत् ।

'इदं सर्वं यदयमात्मा' (बृ० उ० २-४-१६)

'ब्रह्मैवेदममृतं पुरस्तात्' (मुण्ड० २-२-११)

इत्यादिभि: बह्वीभि: श्रुतिभि: त्रिष्वपि कालेषु अविशेषेण कार्यस्य कारणानन्यत्वश्रवणात् कार्य-कारणयोरनन्यत्वमभ्युपगम्यते । तथाचोक्तं परमात्मन: अवस्थात्रयनिरूपणे भगवता गौडपादाचार्येण -

'अनादिमायया सुप्तो यदा जीव: प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ।।'

(मा० कारि० १-१६) इति । तस्मात् इदं जगत् प्रलयेऽपि विभक्तं सत् परेण ब्रह्मणा नावतिष्ठत इत्यभ्युपगमात् औपनिषदं दर्शनं समंजसम्, न तु युक्त्या प्रतिष्ठापितमिति ।

अनन्तरं नैयायिकं विहाय सांख्यपक्षमनुवदति - कार्यकारणयो: वैलक्षण्यं तावदावयो: समानमेव इति । भवत्पक्षेऽपि एतद्दोषस्य समानत्वात् तन्निरासे अस्माभिर्नैव प्रयत्न: कार्य: । भवद्भि: नैयायिकं प्रति यदुत्तरं दीयते तदेव मया उच्यते इति निरूपणार्थं सप्तमं सूत्रं प्रवर्तयति 'स्वपक्ष दोषाच्च' (ब्र० सू० २-१-१०) इति । पूर्वं प्रतिपादिता: ये विलक्षणत्वादय: दोषा: ते सर्वे प्रधानकारणवादिमतेऽपि संभविष्यन्तीति ।

अष्टमसूत्रेण कांचनशंकामुद्भाव्य तां शंकां व्यतिरेकेण निगमयति - तर्कस्य

दोषवत्त्वेन संभावितत्वात् संभावितदोषसत्कृततर्केण न निर्दोषवेदान्तसमन्वयो बाध्यत इति । तथा चोक्तं भामत्याम्[1] -

'यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपद्यते ।।'

इति ।

अपि च 'कपिलो यदि सर्वज्ञः काणादा नेति का प्रमा' इति न्यायेन पुरुषमतीनामनेकरूपत्वेऽपि कपिलमुनौ माहात्म्यस्य प्रसिद्धत्वात् तेनापि प्रणीतो तर्क अप्रतिष्ठितो न भवतीति न, कदाचित् भविष्यत्येव । अस्माभिरपि श्रुत्यनुगृहीतः आवश्यकतर्कः सिद्धान्तदार्ढ्याय गृहीष्यते एव, परस्परश्रुत्यर्थविप्रतिपत्तौ वाक्यतात्पर्यनिर्णयः तेनैव क्रियत इति ।

यदि तर्कस्याप्रतिष्ठानत्वं न दोषत्वेन परिगण्यते तर्हि अनिर्मोक्षप्रसंगः । प्रमाणान्तरेण वेदानामगम्यमानत्वं ब्रह्मणो अतिगम्भीरत्वं, भावपदार्थजगत्कारणस्य याथात्म्यरूपमद्वयत्वं, मुक्त्यालम्बनं तत्वज्ञानं च आगममन्तरेण उत्प्रेक्षितुमपि न शक्यम् । अतः आगमबाह्यकेवलतर्केण मोक्षो न सिध्यतीति । केवलतर्केण ब्रह्मसाक्षात्कारो न भवतीति भावः । तथाचोक्तं भाष्ये[2] -

'तर्क-ज्ञानानां त्वन्योन्यविरोधात् प्रसिद्धा विप्रतिपत्तिः'

इति ।

एवं च तर्केणोत्थितज्ञानात् मुक्त्यसिद्धेः, तेन तर्केण वेदान्तसमन्वयो न युक्तः, वेदान्तसमन्वयस्य बाधे सम्यग्ज्ञानालाभेन संसारस्य अनिर्मोक्ष एव प्रसज्येत । तस्मात् आगमेन, आगमानुसारितर्केण च 'जगत्कारणं चेतनं ब्रह्म, स एव प्रकृतिश्च' इति स्थितत्वात् अयमेव अस्याधिकरणस्य फलितो विषय इति ।। इति शिवम् ।।

०००००००००००

---

१ भा० पृ० ३६७
२ ब्र० सू० शां० भा० पृ० ३६८ - ३६९

ब्रह्मसूत्रशांकरभाष्ये द्वितीयाध्यायस्य प्रथमे पादे षट्त्रिंशतितमसूत्रव्याख्याना-वसरे ऋगियमुद्धृता भाष्यकारैः -

सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।।

(ऋ० सं० १०-१९०-३) इति । दशममण्डले नवत्युत्तरशततमं ऋतम् इति सूक्तम् । तत्रायं तृतीयः ।

सूक्तस्यास्य द्रष्टा मधुच्छन्दसः पुत्रः अघमर्षण ऋषिः । सूक्तमेतदा-नुष्टुभम् । अस्मिन् सूक्ते रात्र्यादिभावपदार्थानां सृष्टि-स्थिति-प्रलयादि-प्रतिपादनात् तादृग्रूपार्थकः अस्य सूक्तस्य देवता । अनेन सूक्तेन सृष्टिः सम्यक् प्रतिपाद्यते । विशिष्यास्मिन् मन्त्रे विभिन्नकल्पेष्वपि सृष्टिः एकरूपा एव इति प्रतिपाद्यते ।

सायणाचार्याः स्वभाष्ये मन्त्रममुमेवं विवृतवन्तः - विधाता ब्रह्मा पूर्वस्मिन् कल्पे कालस्य ध्वजरूपेण स्थितौ सूर्याचन्द्रमसौ तौ अन्यांश्च सर्वान् पदार्थान् यथा ससर्ज तथा इदानीन्तने अस्मिन्नपि कल्पे तथैव सर्वान् सूर्याचन्द्रामसादीन् ससर्ज न प्रतिषेधेन न वा ~~स्वातन्त्र्येण~~ स्वातन्त्र्येण इति । अत्र अप्रतिषेधास्वातन्त्र्य-रूपाभ्यां हेतुभ्यां सर्गे सर्गेऽपि यथाक्रमसृष्टिः स्थिरीकृतं भवति । अत्रोक्तं 'अन्यान् सर्वान्' इत्यमुमर्थमेव विशदीकरोति ऋगियं स्वोत्तरार्धेन । सुप्रधानभूत-मादित्यादिमण्डलं दिवं, पृथिवीं, चतुर्दशभुवनानामाधारभूतमन्तरिक्षं च सः यथाक्रमसृष्ट्या उत्पादयामास । अथ च मन्त्रेऽस्मिन् द्वे पदे अवशिष्टे वर्तेते, के ते ? - अथ, स्वः इत्येते भवतः । अत्र ~~मन्तव्यमन्तं~~- अथशब्देन तत्तल्लोक-सृष्टिसमनन्तरं लोके भवितव्यानां पदार्थानां एवं पदार्थमनुभोक्तॄणां जीवरूपेण वर्तमानानां सकलचराचराणामपि यताक्रममस्मिन् कल्पे ससर्ज इत्युक्तं भवति । स्वःपदं सुखवाचि भवति । सुखशब्देन भोगविशेषाः गृह्यन्ते । एवं च सः ईश्वरः जीवानां कृते आन्तरिकान् धर्मान् सुखदुःखद्वेषेच्छादीन् एवं बाह्यधर्मांश्च अकल्पयत् ।

एवमनया ऋचा आन्तरिक्ष-बाह्येतिद्विविधरूपधर्माः, सकलचराचरात्मकं जगत्, सर्वे नित्य-नैमित्तिकपदार्थाः, सकलान् लोकान्, एवं सूर्याचन्द्रमसादिदेवादीन्, इत्येतान् सर्वानपि स विधाता यथाक्रमं यथापूर्वं च ससर्ज इत्यतः आन्ता सृष्टिः संक्षेपेणात्र प्रतिपाद्यत इत्यवधेयं समीक्षकैः ।

वेंकटमाधवीये भाष्ये मन्त्रार्थस्तु एवम् -

'सकलचराचरादिप्रपंचात्मकं सर्वं सृष्ट्वा सः धाता
अनन्तरं सूर्याचन्द्रमसादिदेवादीनामपि पूर्वकल्पानुसारेण
अकल्पयत'

इति । सत्येवं अस्य व्याख्याने [illegible] इयं श्रुतिः संगच्छते -

'तस्माद्वा [illegible] एतस्मादात्मन' इत्यारभ्य
'अन्नात्पुरुषः' (तै० उ० २-१-२)

इति । अनया श्रुत्या सृष्टिक्रमः व्यवस्थाप्यते । वेंकटमाधवीयभाष्ये अनन्तरम् इति पदस्य सद्भावात् तेनापि क्रमसृष्टिः बोधिता स्यादिति ।

शंकराचार्याः सूत्रभाष्ये द्वितीयाध्यायस्य प्रथमपादे वर्तमाने वैषम्यनैर्घृण्याधिकरणे - 'उपपद्यते चाप्युपलभ्यते च' (ब्र० सू० २-१-३६) इत्यस्मिन् सूत्रे व्याख्यानावसरे मन्त्रमेनमुदाहृतवन्तः ।

अस्मिन्नधिकरणे एवं विचिकित्सा क्रियते - 'जन्माद्यस्य यतः' (ब्र० सू० १-१-२) इति जन्मादिसूत्रे जगतः निमित्तोपादानोभयरूपकारणं ईश्वरः इति सिद्धान्तितम् । तं विषयं मनसिकृत्यात्र पूर्वपक्षी स्वाशयमाविष्करोति - जगतः कारणभूते तस्मिन्नीश्वरे वैषम्यनैर्घृण्यरूपदोषप्रसंगात् सः जगतः कारणं न भवति । सः ईश्वरः सर्वदा सुखमेव भोक्तुं योग्यभूतान् देवान्, एवं सदा दुःखफलोपभोगे निमित्तान् पश्वादीन्, सुखदुःखसम्मिश्रफलभोक्तॄन् मनुष्यादीन् इत्येवं सृष्टिरूपाख्ये एकस्मिन्नेव कर्मणि एतान् परस्परविरुद्धत्वेन सृजति । अतः तस्यापि मनुष्यवत् रागद्वेषोपपत्तेः नायं जगतः कारणमिति चेत्-न ।

स ईश्वरः सृष्टिरूपाख्ये कर्मणि हेतुं कंचित् निमित्तीकृत्यैव कार्यरूपां सृष्टिं करोति । तथा च शांकरं वचनम् -

'न तु निरपेक्षस्य निर्मातृत्वमस्ति । सापेक्षो

ईश्वरो विषमां सृष्टिं निर्मिमीते'[1]

इति । स ईश्वरः तत्तज्जन्तूनां सुखदुःखादिविशेषाणां धर्माधर्मरूपकर्मविशेषान् अपेक्ष्यैव देव- मनुष्य-पश्वादिविचित्ररूपां जगत्सृष्टिं करोति । अतः तेन विषमा सृष्टिः क्रियते इति नायमीश्वरस्यापराधो भवति । तस्मिन् वैषम्यनैर्घृण्यादि-दोषोऽपि न प्रसजति ।

पुनश्च शंकते समनन्तरसूत्रेण पूर्वपक्षी - अस्तु नाम एव । प्राण्यादिवर्गाणां सृष्टेः प्राक् कर्म आसीच्चेत् तेन सुकृत-दुष्कृतकर्मणा धर्माधर्मौ भवत इति । तेन धर्माधर्मरूपहेतुना सः सृष्टिं करोतीति अभ्युपगन्तुं शक्यते । नास्ति चैवम् । सृष्ट्यनन्तरं हि प्राणिधर्मरूपाः वर्गाः पुण्यापुण्यरूपं कर्म कर्तुं प्रभवन्ति । एवं सति तेषां सृष्टेः धर्माधर्मौ कथं कारणत्वेन भवत इति । अपि च तेषां प्राणिवर्गाणां सृष्ट्यर्थं कर्मापेक्ष्यते, तत्कर्म तु शरीरादिविभागापेक्षम् इति इतरेतराश्रयदोषोऽपि प्रसज्यते । अत अतः प्राण्यादिरूपजगतः सृष्टयै धर्माधर्मौ न अपेक्षेते इति ।

सिद्धान्तिनाऽत्र समाधीयते - यत् पूर्वपक्षिणा व्याहृतम् तन्नैवम् । मया यदि संसारस्यादिमत्त्वं स्वीकृतं भवति चेत् तदा एव भवदुक्तदोषः मयि प्रसजति । मया तु बीजांकुरादिवत् संसारस्यानादित्वमभ्युपगम्यते । अतः अस्माकं पक्षे नास्ति इतरेतराश्रयदोषप्रसक्तिः । संसारस्यानादित्वादेव प्राण्यादिविषमरूपा सृष्टिः उपपद्यत इति ।

श्रुतिस्मृत्यादिना संसारस्यानादित्वमुपपद्यते, एवं तत्र तत्र वेदादिषु उपलभ्यते च । अथवा अनादिरेषः संसारः इति श्रुत्या उपपद्यते, स्मृतौ च संसारः अनादिरिति उपलभ्यते इति । यदि संसारस्य आदिमत्त्वं स्यात् तर्हि मुक्तस्यापि पुनः संसारापत्तिः जायेत । अतः संसारस्य अनादित्वमेवाभ्युपगन्तव्यम् । सृष्टिविषयकानादित्वं वेदवाण्या अपि प्रतिपादितं वर्तते । तथा हि -

'सूर्याचन्द्रमसौ धाता ------ अकल्पयत्'

इति । अत्र सिद्धान्ती अनया ऋचा संसारस्यानादित्वं व्यवस्थापयति । स ईश्वरः पूर्वस्मिन् कल्पे यथा सृष्टिरासीत् कल्पे स्मिन्नपि तथैव सृजति, एवमुत्तरस्मिन्नपि कल्पे तथा स्रक्ष्यति इति त्रैकालिकेष्वपि संसारस्यानादित्वं अनेन मन्त्रवर्णेन

---

१ ब्र० सू० शां० भा० पृ० ६१६

स्थापितं भवति । एवं स्मृतावपि -

'न रूपमस्येह तथोऽपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा ।'

(भग० १५-३) इति सम्यक् तस्यानादित्वमतीतानागतानां च कल्पानां न विपरिणमते + इति प्रतिपादितम् ।

तुलनात्मकदिशायां - अस्मिन् मन्त्रे वर्तमानस्य यथा इति शब्दस्य येन प्रकारेण इत्यर्थः । स च प्रकारः वाचकशब्दानुस्मरणपूर्वकं वाच्य पदार्थसृष्टिः इति । तथा च पूर्वस्मिन् कल्पे यादृशं शब्दं स्मृत्वा यं पदार्थं धाता सृष्टवान् अस्मिन् कल्पेऽपि तं शब्दं स्मृत्वा तं पदार्थं सृष्टवान् इति मन्त्रार्थः सायणाचार्यसंमतः । अनेन च वाचकः शब्दः वाच्यः सृज्यमानपदार्थस्य पूर्वकल्पेऽपि आसीत् इति प्रतीत्या (मन्त्रे-विद्यमानस्य-यथाशब्दस्य) संसारस्य अनादित्वमवगम्यते । ब्रह्मसूत्रभाष्यकाराः अस्मिन् मन्त्रे विद्यमानस्य यथाशब्दस्य सृष्टिप्रतिपादनसन्दर्भे स्रष्टा प्रजापतिः सिसृक्षितमर्थं तद्वाचकं वैदिकं शब्दं च मनसा स्मृत्वा अर्थान् ससर्जेति प्रत्यपादयन् । एतत्सृष्टिप्रतिपादनभूतमद्वैततत्वं मनसि कृत्वा सायणाचार्याः मन्त्रममुं व्याचख्युरिति । तथा च मन्त्रस्य कृते भाष्यकारयो-रुभयोरपि अर्थः समीचीन इति प्रतिभाति ।

मन्त्रेऽस्मिन् प्रतिपाद्यमानमद्वैततत्वम् - भूतभविष्यद्वर्तमानरूपत्रिकालेष्वपि सृष्टिप्रणाली एकरूपा एव, न तु युगे युगे भिन्ना इति । अपि च जगत्सृष्टिः स्वयं नास्ति, सृष्टिकर्ता एको वर्तते, स एव ईश्वरः जगतः निमित्तोपादान-कारणभूतः । सः वैदिकाच्छब्दादेव यथोक्ता जगत्सृष्टिः करोति, न तु स्वातन्त्र्येण इति ।। इति शम् ।।

::::::::::::::::::

ब्रह्मसूत्रभाष्ये द्वितीयाध्यायस्य चतुर्थपादे अष्टमे सूत्रे ऋगियं पठिता -

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ।।

(ऋ० सं० १०-१२९-२) इति । दशममण्डलस्य शतोत्तर-एकोनत्रिंशं नासदासीदिति सप्तर्चं सूक्तम् । तत्रेयं द्वितीया ऋक् ।

सूक्तस्यास्य परमेष्ठी नाम प्रजापतिः ऋषिः । सप्तर्चयुक्तं सूक्तमेतत् त्रिष्टुब्छन्दोबद्धं वर्तते । सूक्तस्यास्य देवता परमात्मा । अस्मिन् सूक्ते वियदादिभावानां सृष्टि-स्थिति-प्रलयादयः प्रतिपाद्यन्ते । सूक्तस्यास्य फलं वियदादीनां सृष्टिस्थितिप्रलयज्ञानमिति ।

सायणाचार्यभाष्यरीत्या मन्त्रार्थः - जन्मयुक्तस्य प्रपंचस्य प्रतिसंहारस्य कृते एकः संहर्ता अपेक्षितः । यथा सर्वत्र उत्पत्तिमतः पदार्थस्य तस्य संहारस्य एकः कारणं भवति,+ एवं ब्रह्मणो भिन्नः एकः मृत्युरूपो विद्यत इत्यायातम् । अस्तु नाम को वा हानिः इति चेत् तथासति अद्वैतभंगः । अत आह - न मृत्युरासीद् इति । ब्रह्मणः पृथक् अन्यः मृत्युः नासीदित्यर्थः ।

ननु यदि संहारकर्ता स; मृत्युः नासीद्, तस्मिन् प्रतिहारसमये प्राणिनामवस्थानं अमरणं तदानीमपि स्यात् तत्राह - अमृतं न तर्हि " इति । तेषां प्राणिनां स्वस्वरूपेणावस्थानं विद्यत एव । अथवा तं मृत्युरूपं परंब्रह्म इति ज्ञात्वा अमृतरूपाः भवन्ति इति । अमृतं न तर्हि इत्येतद्वाक्यं प्रश्नो पि भवति प्रश्नस्य प्रतिवचनमपि भवति यथा तथा द्रष्टव्यम् । एतावता अयं भावः - सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदा उपभुक्तमासीद् तदा भोगाभावात् निष्प्रयोजनमिदं जगद् इति परमेश्वरस्य मनसि संजिहीर्षा जायते । तथैव स मृत्युः सर्वं जगद् संहरत इति किमनेन संहर्त्रा मृत्युना तदभावकृतं कथं वा अमरणं स्याद् इति । तथा च कठवल्ल्यां दृश्यते -

' यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।

मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ।।'

(कठ० २-२५) इति ।

ननु सर्वपदार्थानामधिकरणभूतः कालः सर्वत्र विद्यते, तथा च ब्रह्मणः भिन्नं वस्त्वन्तरं अस्तीत्यायातम् । एवं च द्वैतापत्तिरिति । तत्राह - न रात्र्या अह्न आसीत् इति-4) प्रकेतः इति । अहोरात्रयोर्हेतुभूतं प्रज्ञानं सूर्याचन्द्रमसोरभावात् पृथक् काल एव नास्ति । सूर्याचन्द्रमसं निमित्तीकृत्यैव खलु कालः प्रवर्तते । अनेन द्वितीयपादेन अहोरात्रनिषेधेन तदात्मकः मास-ऋतु-संवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातो भवति । कथं तर्हि नो सदासीन्नदानीमिति कालवाची प्रत्ययः ? उपचारादिति ब्रूमः । यथा इदानीन्तननिषेधस्य कालः अवच्छेदकः तथा माया अपि तदवच्छेदकहेतुः इति अवच्छेदकत्वसामान्येन अकाले अपि कालवाची भवति । अत्रेज्ञातव्यं यत् अस्याः ऋचः प्रथमपादेन परब्रह्मणः स्वरूपावस्था अद्वितीयत्वं च बोध्यते, द्वितीयपादेन सृष्टेः पूर्वावस्था बुध्यत इति ।

ब्रह्मणः परमार्थसत्त्वं वदयते अनेन पादेन - आनीदवातमिति । सकलवेदान्तप्रसिद्धं तत् परब्रह्मतत्त्वं प्राणितवदित्यर्थः । अथवा नन्वेवं प्राणनकर्तृजीवाभावापन्नस्यैव ब्रह्मणः सत्त्वं स्यात् न किन्तु तस्य निरुपाधिकब्रह्मणः । अतः तस्य ब्रह्मणः प्राणसंबन्धाभाव इति चेत् - उच्यते आनीदवातमिति ।

अयमाशयः - आनीदित्यत्र धात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसंबन्धः इति त्रयो अर्थाः प्रतीयन्ते । तत्र समुदायो न विधीयते । येन ब्रह्मणः सत्त्वं न स्यात् । किं तर्हि अनेन कर्तृत्वमनूद्य भूतकालावालक्षणः गुणो विधीयते यथा दध्ना जुहोति इतिवत् , वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम् । अत्रापि अनेन कर्तृत्वविशिष्टस्य न पूर्वकालसत्ता विधीयते तन्निषेधानुपपत्तिप्रसंगात् । अतः अनेन कर्तृत्वेन इदानींतनेनापेदितं सत्यज्ञानात्मकं अविनाशिरूपं यन्निरुपाधिकं परब्रह्म, तस्यैव ब्रह्मणः भूतकालसत्ता विधीयते । (अत)अतः कालवैपरीत्येनापि न कश्चिद्दोषः ।

ननु ईदृशस्य ब्रह्मणः मायया सह संबन्धासंभवात् सांख्याभिमता या स्वतन्त्रा सद्रूपा सत्वरजस्तमोरूपा त्रिगुणात्मिका मूलप्रकृतिरेव अभिमता इति भवति ।

एवं च कथं ना सदासीदिति , सदात्मवत् सत्वेन निर्वाच्यरूपायाः तस्याः मूलप्रकृतेः निषेधः ? इति , तत्रोच्यते - स्वधया इति । अत्रायमभिसन्धिः - 'सह युक्ते प्रधाने' (पा० सू० २-३-१९) इति सूत्रेण तृतीयायाः सहशब्दयोगाभावे पि 'वृद्धो यूना०' (पा० सू० १-(४५)-२-६५) इति सूत्रेण आदिष्टान्निपातरूपलिंगात् तृतीया सहार्थयोगे भवति । एवं च स्वधया इत्यत्र स्वस्मिन् (स्वधाः) धीयते ध्रियते आश्रित्य वर्तते इति या स्वधा सा माया । तया मायया एकं तद्ब्रह्म अविभागापन्नमासीत् । अत्र प्रकृति-प्रत्ययाभ्यां तस्याः मायायाः स्वातन्त्र्यं निवार्यते । सांख्यकारिकायां प्रतिपादितायाः मूलप्रकृतेः स्वातन्त्र्यमुच्यत इति तस्याः निषेधः युक्त एव । यद्यपि असंगस्य ब्रह्मणः मायया सह संबन्धो न संगच्छते तथाऽपि तस्मिन् ब्रह्मणि अविद्यया सर्वं तत्स्वरूपमिव अविद्यायाः संबन्धोऽपि अध्यस्यते, यथा शुक्तिकायां रजतस्येति । एवं च तस्याः अविद्यायाः ब्रह्मणः संबन्धस्याभ्युपगमतत्वात् तस्याः सद्रूपत्वमपि प्रत्याख्यातं भवति ।

ननु यदि माया ब्रह्मणा सह अविभागापन्ना तर्हि तस्याः अनिर्वाच्यत्वात् ब्रह्मणोऽपि तत्प्रसंग इति । एवं स्थिते आनीदवातमिति श्रुत्या तस्य ब्रह्मणः कथं सत्त्वमुक्तम् । ब्रह्म सदेव इत्युच्यते चेत् ब्रह्मणः सत्त्वात् अविद्याया अपि सत्त्वप्रसंगः, तथा च नो सदासीदिति कथं सत्त्वप्रतिषेधः? एवं परस्परमन्त्रार्थानां व्याघात इति चेत्-न । नास्ति परस्परमन्त्रार्थानां व्याहतिः । अनुभवदृष्ट्या ऐक्यावभासेऽपि अथवा अनुभवदृष्ट्या ऐक्याभावेऽपि युक्त्या तयोः स्वरूपं विविच्य मायांशस्य अनिर्वाच्यत्वं ब्रह्मणः सत्त्वं च इति भाष्यकारैः श्रुतौ च सम्यक् प्रतिपादितम् ।

ननु दृग्दृश्याविति द्वावेव पदार्थौ आनीदवातं , स्वधया चेति तौ चेत् अंगीक्रियेते, नासीद्रजो इति पूर्वमन्त्रस्य द्वितीयपादेन किमपरमवशिष्यते + प्रतिषेद्धुम् ? दृग्दृश्यव्यतिरिक्तान्यपदार्थस्यासत्त्वात् उक्तद्वितीयपादस्य वैयर्थ्यमिति चेत्- उच्यते । एतच्छंकापरिहारार्थमेव मन्त्रस्यास्य चतुर्थो पादः - तस्मादिति । पूर्वोक्तान्मायासहितात् तस्मात् खलु ब्रह्मणः अन्यत् किमपि वस्तु

भूत-भौतिकात्मक: जगत् न बभूव इति । तदानीमन्यस्य सत्त्वनिषेधो नच शंक्य: । असत्वे चाप्रसक्तत्वात् अनुभवदृष्ट्या ऐक्याभावेऽपि न निषेधोपयोग इति । अत: पर इति । सृष्टेरूर्ध्वं परस्ताच्च वर्तमानमिदं जगत् तदानीं न बभूव इत्यर्थ: । एवमनभ्युपगमे उक्तरीत्या क्वचिदपि निषेधो न स्यात् इति भाव: । तथा च शाट्यायनब्राह्मणश्रुति: -

'तस्मिन्नसति सति न - कस्मिंश्चन सत्यृतं ज्योतिष्मत् उदप्लवत, सत्यं ज्योतिष्मत् उदप्लवत, तपो ज्योतिष्मत् उदप्लवत, तयत् ऋतं इति वाक् सा, यत् सत्यं इति प्राण: सा, अथ यस्तप इति मनस्तत् । तेषाम-न्नमेव ज्योतिरासीत्'

(जै० ब्रा० ३-३६०) इति ।

शंकराचार्या: ब्रह्मसूत्रस्य द्वितीयाध्यायस्य चतुर्थपादे विद्यमानस्य अष्टमसूत्रान्तर्वर्तिचतुर्थाधिकरणस्य (ब्र० सू० २-४-८) प्रतिपादनावसरे बहुश्रुत्यनुरोधात् मुख्यस्य श्रेष्ठस्यापि प्राणस्य ब्रह्मविकारत्वं सिध्यति इति स्वसिद्धान्तनिरूपणप्रकरणे न मृत्युरासीदिति ऋङ्‌मन्त्रं प्रतिपादयामासु: ।

श्रेष्ठश्च इति सूत्रोपबृंहितप्राणश्रैष्ठ्याधिकरणे -

'एतस्माज्जायते प्राण: मन: सर्वेन्द्रियाणि च'

(मुण्ड० २-१-३) इति मुण्डकश्रुतौ प्रतिपादितस्य प्राणस्य सेन्द्रियमनोव्यतिरेकेण उत्पत्तिश्रवणात् स: प्राण: ब्रह्मवत् न ~~नि~~ नित्य: । न केवलं ~~एतत्~~ प्राणापानोदानव्यानसमाना: पंचप्राणा: ब्रह्मविकारा: इति पूर्वमुपपादिता:, एवं

'प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च' (छा० उ० ५-१-१)

इति श्रुतिप्रतिपादित: मुख्य: श्रेष्ठश्च य: प्राण: सो पि ब्रह्मविकार: इत्यस्मिन्नधिकरणे सिद्धान्त्यते । श्रुत्यादिषु च सर्वप्राणानां ब्रह्मविकारत्वमविशेषेण आख्यातमस्ति इति । अस्मिन्नधिकरणे 'तथा प्राणा' इति प्रथमाधिकरणोक्तन्याय: अतिदिश्यते ।

ननु प्राण: जायते न वा इति संशयासंभवात् किमर्थमतिदेशं कृत्वा एतद-

(धिकरण)

धिकरणस्थापनम्, अत: अतिदेश एव न युक्त इति चेत्-उच्यते ।

अनेनाधिकरणेन अधिकाशंकाया: अपनोदनं क्रियते । नासदासीत्यारम्य ब्रह्मपरे अधीते सूक्ते मन्त्र एव साक्षाद्वर्णयति - न मृत्युरासीदिति ।

अत्रेतच्चिन्त्यम् यत् मन्त्रे विद्यमान आनीदवातमितिशब्द: उभयोरप्यर्थयो: प्रतिपादक: । तत्र प्रथमो अर्थ: अस्मि अतिदेशन्यायसार्थक: तत्र आनीदिति शब्देन उत्पत्ते: प्राक् प्राण: सन्निव सूच्यते । प्रकृते महाप्रलयविषयत्वात् न पूर्वन्यायसिद्धि: । अत: ब्रह्मवत् प्राणोऽपि नित्य:, तथा च अद्वितीयभंग: इति कस्यचिन्मतिर्जायेत । इमामाशंकामतिदेशेनापनुदति इति । अन्यस्तु मन्त्रार्थ: एव । आनीदित्यत्र अनेन प्राणव्यापार:, स तु उत्पत्ते: प्रागवस्थायां प्राणसत्त्वे लिंगमित्युक्तम् । तत्र महाप्रलयावान्तरप्रलयभेदेन द्वयो: व्यवस्थानुपपत्तौ अन्यतरस्य गौणत्वे 'एतस्माज्जायते प्राण:' इति श्रुतिविरोधे लिंगस्यैव गौणत्वात् आनीच्छब्दस्य मूलकारणसत्तावाचित्वकल्पनया प्राणस्य जन्योपेयमिति शंकानिरासार्थं द्वितीयो अर्थ: प्रवर्तयति । आनीदवातमित्यत्र आनीच्छब्द: अवातमिति विशेषणात् उत्पत्ते: पूर्वं प्राणसद्भावं न सूचयति । भाष्यकारै: अस्मिन् मन्त्रे विवक्षितो अंश: - उत्पत्ते: प्राक् प्राणस्य सद्भावो नास्तीति ।[1] तैरस्मिन्मन्त्रे प्रतिपादित: मुख्यो सिद्धान्त: -

'तस्मात् कारणसद्भावप्रदर्शनार्थमेवायमानीच्छब्द इति'

इति । रत्नप्रभायां[2] मन्त्रार्थ: एवं दरीदृश्यते -

'तदा प्रलयकाले मारको मृत्यु: तस्य कार्यं वा नासीत्
देवभोग्यममृतमपि नासीत् , एवं स्वधया सह रात्र्या:
चिह्नरूपश्चन्द्र: तथा अह्न: प्रकेतरूपस्सूर्यश्च नास्ताम् ।
पितृभ्यो दयमन्नं स्वधा । अथवा स्वेन धृता माया
स्वधा तया सह तदेकं ब्रह्म आसीदिति । एष: अर्थ एव
मन्त्रस्य परमार्थ: इति ।'

आनन्दगिरिरपि मन्त्रस्यास्य एवमेवार्थं प्राचीकटत् स्वभाष्ये[3] इति ।

---

१ ब्र० सू० शां० भा० पृ० ५७६   ३ न्या० नि० पृ० ५७६
२ भा० र० पृ० ,,,

तथा चोक्तं शारीरकन्यायसंग्रहे[1] च -

'आनीदवातम्--- ' इत्यनेनैं प्राणव्यापार:, प्रलया-
वस्थायां प्राणसद्भावे लिंगम् । तत्र द्वयोर्महाप्रलयविषयतया
वान्तरप्रलयभेदेन व्यवस्थानुपपत्तौ द्वयोरन्यतरस्य गौणत्वे
वक्तव्ये श्रुतिविरोधाल्लिंगस्यैव गौणत्वं युक्तमिति न्यायेन
आनीच्छब्दस्य मूलकारणविद्यमानताभिधायित्वकल्पनया
प्राणस्य ब्रह्मणो जन्म दर्शितम्'

इति ।

सायणाचार्य-शंकराचार्ययोरुभयोरपि मते अयं मन्त्रार्थ: समानयोगक्षेमो भवति । सूत्रभाष्ये भाष्यकारा: ~~कस्य~~ जगत: कारणरूपब्रह्मण: सद्भाव-प्रदर्शनार्थं, तस्याद्वितीयत्वकथनाय च मन्त्रममुमुदाजह्रु: इति ।

मन्त्रेण लभ्यमानमद्वैततत्त्वम् - न मृत्युरासीदिति काल: कालकालो वा नासीदिति सिध्यति । अनेन ब्रह्म-विष्णु-महेश्वरादित्रिमूर्तीनां जायमान-हिरण्यगर्भस्य च उत्पत्ते: प्रागवस्था बोध्यते । प्रागवस्थायां को वा आसीत् ? इति जाते सन्देहे - 'आनन्दो जरो मृत:' (कौ० ३-८) इत्यादि बह्वीषु श्रुतिषु प्रतिपाद्यमानममृतरूपि कूटस्थं नित्यचैतन्यं निर्गुणं सद्ब्रह्म आसीत् इति मन्त्रस्थ अमृतं न तर्हि इति वाक्येन लभ्यते । अव्याकृतनामरूपप्रपंचस्योत्पत्ते: प्राक् रात्र्या: चिह्नभूत: चन्द्र:, अह्न: संकेतभूत: सूर्यश्च नास्ताम् इति मन्त्रस्य द्वितीयो पाद: वदति । तयो: सूर्याचन्द्रमसो: सृष्टि: -

'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्' (ऋ० सं० १०-१९०-३)

इत्यत्र आम्नात: । एवं च प्रकृतमन्त्रस्य द्वितीयपादेन अव्याकृतनामरूपप्रपंचस्य अभाव: प्रतीयते । तृतीयपादेन स्वशक्तिभूतमायाया: उपाधिभूत: स ब्रह्म एक इत्युच्यते । चतुर्थपादेन स्वभिन्नेतरपदार्थानां इतरदार्शनिकै: अभ्युपगम्यमानस्य तत्त्वस्य व्यावर्तनं भवति । तथा च चतुर्थपादव्याख्यानम् - तस्मात् त्रिभि: पादै: हेतुत्रयेण प्रतिपादितप्रकारेण ब्रह्मभिन्न: अन्य: पर: उत्कृष्ट: किंचन नास । उक्तार्थदार्ढ्यार्थं मन्त्रे हि इति पदप्रयोग: इति ।। इति शम् ।।

----

1 शा० न्या० सं० पृ०

ब्रह्मसूत्रशांकरभाष्ये तृतीयाध्यायस्य तृतीयपादे अष्टपंचाशत्तमे सूक्ते ऋगियमुदाहृता भाष्यकारैः -

यो जात एव प्रथमो मनस्वान्देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ।।

(ऋ० सं० २-१२-१) इति । प्रथममण्डलस्य यो जात इति पंचदशर्चं द्वादशं सूक्तम् । अत्रायं प्रथमः ।

सूक्तस्यास्य द्रष्टा गृत्समदो नाम ऋषिः । अस्य सूक्तस्य इन्द्रो देवता । मन्त्रोऽयं त्रिष्टुबुछन्दोबद्धः । अस्मिन् सूक्ते ऐतिहासिककथा प्रगीयते । अस्य सूक्तस्य फलं सत्यवस्तु कथनपुरस्सरं आवृतभ्रमनिवनरणरूपं पापविमोचनम् । तथा चोक्तं-

'विदित्वा तयोर्भावं ऋषिः पापं चिकीर्षतो: ।
यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् ।।'

(बृहद्दे० ४-६८) इति बृहद्देवतायाम् ।

मन्त्रेणानेन प्रतिपाद्यमानो विषयः - इन्द्रः गृत्समन्नामकऋषिणा प्रवर्तिष्यमाणस्य यज्ञस्य मुख्यातिथिः आसीत् । इन्द्रस्य अजातशत्रवः दैत्याः देवलोकेऽनुपस्थितं तं ज्ञात्वा तमन्विष्यमाणाः भूलोके संचरन्तः गृत्समदस्य यज्ञे अतिथिरूपेणोपविष्टं तं दृष्ट्वा जिघांसया तत्र समागमन् । स तु इन्द्रः स्वं हन्तुमागतान् स्वकुलोद्भवान् दृष्ट्वा तस्मात्स्थानात् गन्तुं मतिं चकार । स्वेन रूपेण गमनमनुचितमिति मत्वा प्रधानाध्वर्युः गृत्समदरूपेण बहिराजगाम । ते दैत्याः अयं गृत्समदः, अस्य सकाशे अस्माकं वैरं नास्ति अतः अयं यथेच्छं गच्छतु इति बुध्या तुष्णीं तस्थुः । चिरकाले व्यतीतेऽपि स इन्द्रः बहिर्नागत इति निमित्तीकृत्य ते असुराः यज्ञशालायामेव सः हन्तव्य इति मत्वा यज्ञशालां प्रविविशुः । तत्र वर्तमानं गृत्समदं दृष्ट्वा एवं तर्कितवन्तः - तदानीमेव गृत्समदऋषिः स्वेन रूपेण बहिरागत्य गतः । अत्रापि अन्यो गृत्समदः दृश्यते । अतः पूर्वमेव यो गतः निजनामधारी गृत्समदः स्यात् अयं तु अस्माकं भीत्या कपटगृत्समदवेषधारी

स इन्द्र इति निश्चित्य तं जिघांसव: जगृहु: । एतदुदन्तमजानन् स ऋषि: तेषां मुखेन प्रचलितं सर्वं ज्ञात्वा तेषां सकाशे सत्यांशं कथयति -

हे असुरा: ! मनस्विनामग्रगण्य: स्वकीयकर्मणा जायमानकालादेव देवानां प्रथमभूत: स: इन्द्र: सर्वेषामपि यागानां प्रथमभूत:-सन् अग्रगण्य: तथा प्रथम-पुरस्कारं च प्राप्नोति । एवं मया प्रवर्तिष्यमाणक्रतोरपि स: प्रथमातिथित्वेन उपस्थित: आसीत् । अस्या: यज्ञशालाया: केन रूपेण कदा आगत इति नाहं जाने । अतोऽहं गृत्समदनामाभिधेय: ऋषि: । भवन्त: मां मुंचन्तु, स इदानीं कुत्र वर्तत इति नाहं जाने गवेषयन्तु तमिति ।

अपि च इन्द्र: क: ? तस्य शक्ति: कीदृशी ? तस्य शरीरात् द्यावापृथिव्यौ अभ्यसेताम्, सकलसेनया युद्धे यद्बलं भवति स्वात्मानैकेनैव धारयन् स इन्द्र: कुत्र ? केवलं जीवनार्थं यजन-याजनादिकर्मानुष्ठाता तुच्छ: अहं कुत्र ? उक्तोभयकारणेन नाहमिन्द्र: इन्द्रस्वरूपधारी स अन्य: अत: भवद्भि: सत्यासत्यं विचार्य कृपया मां मुंचन्तु इति ।

अस्मिन् मन्त्रार्थे सायणाचार्या: - हे असुरा: य: जायमान एव देवानां प्रधानभूत: सन् मनस्विनामग्रगण्य: दीप्तमानश्च वृत्रवधादिलक्षणेन स्वकीयकर्मणा सर्वान् यागदेवान् रक्षकत्वेन पर्यग्रहीत् स इन्द्र: । यस्य इन्द्रस्य शरीरात् बलात् द्यावापृथिव्यौ अबिभीताम् स इन्द्र: । सेनालक्षणस्य बलस्य महत्त्वेन युक्त: स इन्द्र: इति अभिप्रयन्ति ।

वेंकटमाधवस्तु स्वभाष्ये - 'य: जात: एव प्रथमो मनस्वी देवो देवान् कर्मणा पर्यरक्षत् । यस्य शोषकात् तेजस: द्यावापृथिव्यौ अपि अबिभीतां बलस्य च महत्त्वेन युक्त: स इन्द्र: नाहम् हे जनास:' इति मन्त्रस्यास्यार्थं विवृणोति ।

सूत्रभाष्ये तृतीयाध्यायस्य तृतीयपादे षट्पंचाशत्तमसूत्रव्याख्यानावसरे शंकराचार्या: अमुं मन्त्रमुद्धृतवन्त: । अस्मिन्नधिकरणे -

'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा० उ० १-१-१)

इत्यादि छान्दोग्योपनिषद्वाक्यान्युदाहृत्य शाखाभेदेषु प्रतिवेदं विहिता: ते प्रत्यया: उद्गीथादिकर्मांगबद्धा: प्रत्यया: तत्तच्छाखागतेष्वेव उदगीथादिषु

भवेयुरुत सर्वशाखागतेषु इति संशय्य सन्निधानात् स्वशाखागतेष्वेव उद्गीथादिषु विधीयेरन् । अतः उद्गीथादिकर्मांगबद्धाः प्रत्ययाः प्रतिशाखं व्यवस्थया करणीया उपर्क इति प्राप्ते पूर्वपक्षे सिद्धान्तयति भाष्यकारः - उद्गीथादिश्रुतयः सर्वशाखासु अनुवर्तेरन्, प्रतिवेदं स्वशाखास्वेव व्यवतिष्ठेरन्निति नैव नियमः, उद्गीथश्रुतेरविशेषा विशिष्टार्थप्रत्यायकत्वात् । तच्छाखागतेष्वेव एताः श्रुतयः इति तच्छाखासंकोचकरणे नास्ति किंचित् प्रमाणम् । तच्छाखारूपसन्निधिमात्रात् सर्वशाखास्वनुवर्तनमपबाधितुं नार्हति । श्रुतिसामान्यद्वारेण सर्वविशेषगामिन्याः श्रुतेः एकस्मिन्नवस्थानं सर्वथा पीडैव । तथा नास्त्यत्र । तस्मात् सर्वशाखासु विहिताः उद्गीथादिविषयकर्मांगबद्धाः प्रत्ययाः इति प्रथमसूत्रे प्रतिपादयामास ।

शाखान्तरविहितोपास्तीनां शाखान्तरस्थांगसंबन्धे यः प्रतीतो विरोधः तमंगीकृत्य पूर्वस्मिन् सूत्रे उक्तं भवति, सम्प्रति विरोध एव नास्ति इति

'मन्त्रादिवद्वा अविरोधः' (ब्र० सू० ३-३-५६)

इति सूत्रव्याख्यानावसरे स्वाशयमेवमाविश्चकार । अन्यशाखागतेषु उद्गीथादिषु अन्यशाखाविहिताः प्रत्ययाः भवेयुरित्यत्र विरोध एव नास्ति । परस्परविरुद्धमन्त्राणां यथा एकत्र विनियोगः तथा अत्रापि अविरोधोपपत्तेः । तथा च भाष्यम्[1] -

> 'तथा बहृवृचपठितस्य सूक्तस्य 'यो जात एव प्रथमो
> मनस्वान्' इत्यस्य 'अध्वर्यवे सजनीयं शस्यम्' इत्यत्र
> परिग्रहो दृष्टः'

इति । तस्मात् यथा शाखान्तरोत्पन्नानामपि मन्त्राणां कर्मणां गुणानां च अन्यशाखान्तरे उपसंग्रहो दृश्यते, तथा शाखान्तरीयेषु उद्गीथादिषु शाखान्तरीयकर्मसंबन्धित्वमुपलब्धमिति अविरोध इति ।

गोविन्दानन्देन प्रणीतभाष्यरत्नप्रभायां मन्त्रस्यास्य एवमर्थो दृश्यते[2] -

> 'यो जातो बाल एव प्रथमो गुणैः श्रेष्ठः मनस्वान्
> विवेकवान् स इन्द्रः एवंविधो हे जनासो जनाः इति ।

---

१ ब्र० सू० शां० भा० पृ० ७७१
२ भा० र० पृ० ७७१

अपि च 'स जनास इन्द्रः' इत्यनेन उपलक्षितं सूक्तं सजनीयं तस्य याजुषाध्वर्युकर्तृकप्रयोगे शंसनं दृष्टमिति' इति ।

आचार्यभाष्यरीत्या एतदधिकरणे पर्यालोच्यमाने सति प्रतिपादितऋङ्मन्त्रेण एतत्सिद्धं भवति, यत् - वेदान्तरेषूत्पन्नानां मन्त्राणां वेदान्तरे परिग्रहोऽस्ति इत्यत्र अयम् ऋङ्मन्त्रः शांकरभाष्ये उदाहृतः । 'यो जात एव प्रथमो मनस्वान्' इति सूक्तम् ऋग्वेदे पठितम् । तस्य च 'अध्वर्यवे सजनीयं शस्यम्' इति वचनबलात् याजुषाध्वर्युकर्तृकप्रयोगे शंसनं विहितम् । सजनीयमित्यस्य 'स जनास इन्द्रः' इत्यनेनोपलक्षितं सूक्तमित्यर्थः । तच्च अध्वर्यवे - अध्वर्युकर्तृकप्रयोगार्थं शंसनीयमित्यर्थः-इति ।

अस्मिन् मन्त्रव्याख्याने सायण-शंकरयोः मतभेदो नास्ति । उभयोरपि पदार्थोः अनेन मन्त्रेण प्रतिपाद्यमानं सत्स्वरूपकथनं समानमेव इति ।

ब्रह्मसूत्रभाष्ये शंकराचार्याः विभिन्नवेदेषु परिपठितमन्त्राणां एकस्मिन्नेव अर्थे समावेशः स तु अर्थः सच्चिदानन्दस्वरूपो परब्रह्म इति मनसि निधाय उद्गीथादिश्रुतयः सर्वशाखासु अनुवर्तेरन् इति दृष्टान्तविषया अमुं बह्वृचं मन्त्रं अत्र प्रतिपादयामासुरिति । इति शिवम् ।

ㅁㅁ-००-ㅁㅁ-००ㅁㅁ

१ २ ऐतरेय-आरण्यकवाक्यानि

१ २ ऐतरेय-आरण्यकवाक्यानि

ऐतरेय-आरण्यकादय: ऋक्शाखानुविद्धा: भवन्ति । ता अपि श्रुतय: सूत्रभाष्ये भाष्यकारै: शंकराचार्यै: आम्नातत्वात् अत्र विचारस्यावकाशं लभन्त इति ।

ननु प्रबन्धशीर्षके ऋग्वेदस्य नाम मात्रं व्यपदिष्टं वर्तते, किं पुन: मध्ये यदि णीप्रवेशमिव इव आरण्यकादीनां कथनविचार इति चेत्-उच्यते । यद्यपि

'चत्वारो वै वेदा: ऋग्यजुस्सामाथर्वाश्च'

इति श्रुत्या प्रधान्येन चत्वार एव वेदा: इत्युच्यन्ते, तथा पि 'वेद्यते अनेन' इति वेदशब्दव्युत्पत्त्या वेदमूलकतया वेदार्थप्रतिपादनेन च तत्तत्संहिताशाखानुसारेण वर्तमाना: आरण्यकादय: वेदत्वेनाभ्युपगन्तुं प्रभवन्त्येव ।

ननु ननु चतुर्णामेव वेदानां वेदत्वव्यपदेश:, अन्येषां तु तत्तन्नाम्ना व्यपदेशो युक्त इति चेत् - न । सत्येवं भारतस्यापि पंचमवेदत्वव्यपदेश: भज्येत । भारतस्य तु पंचमवेदत्वेन व्यवहार: श्रुतौ प्रसिद्ध: इति ।

किं च वेद इति शब्दव्युत्पत्त्यनुसारं विद धातो: घ प्रत्ययेन वेदशब्दो प्रसिद्ध: । शब्दार्थनिर्णायको आचार्य: पाणिनि: विदधातो: अनेकार्थान् उल्लिखति । तद्यथा- विद ज्ञाने, विद विचारणे, विद लाभे, विद सत्तायामिति । अत्र यद्यपि ज्ञानविचारणयोरेकत्र समावेशो न भवति, तथा पि विदधातो: ज्ञानं, सत्ता, लाभश्चेति त्रयोऽप्यर्था: प्राप्यन्ते । अत्र सत्तार्थकेन जीवस्योत्पत्ति: लाभार्थकेन वेदपदेन जीवस्य रूपस्थितिश्च इति निरुक्ता भवति । विदज्ञाने इत्यत्र ज्ञानपद-निष्पत्तिश्च भावार्थे घ प्रत्ययेन 'अकर्तरि च' (पा० सू० ३-३-१९) इति सूत्रेण कारणे भवति । तेन ज्ञानं, ज्ञानसाधनं, ज्ञानकर्म, ज्ञानाधिकारिणं इत्येते अर्था: सिध्यन्ति । तस्मात् वेद इति एकेनैव पदेन जीवस्योत्पत्ति: तस्य जीवस्य स्थिति: तस्यैव जीवस्य ज्ञानसाधनमित्यादयो अर्था: प्रतिपाद्यन्ते । जीवस्य य: विषय: ज्ञानसाधको भवति स वेद इति । तस्मादारण्यकादीनां वेदत्वं पर्यवसितं भवति ।

अत्र ऐतरेयारण्यकब्राह्मणोपनिषत्सु यथाक्रमं ऐतरेयारण्यकश्रुतय: विचारार्थं

प्रथमं प्रस्तूयन्ते इति । तथा हि -

ब्रह्मसूत्रशांकरभाष्यस्य द्वितीयाध्यायस्य प्रथमपादे षोडशतमे सूत्रे भाष्यकारैः श्रुतिरियं पठिता दरीदृश्यते -

'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० आ० २-४-१-१)

इति । अस्याः श्रुतेरर्थः उपनिषद्वाक्यप्रकरणे तृतीयाध्याये च स्पष्टीकरिष्यते ।

प्रकृते तु अस्मिन् आरम्भणाधिकरणे युक्त्या एव स्वसिद्धान्तं स्थापयन्तिऽ नैयायिकाः । तेषां मतमुपन्यस्य सयुक्तिकं तैरुपन्यस्यमानाः युक्तयः खण्ड्यन्ते । नैयायिकाः असत्कार्यवादिनः । घटादयः उत्पत्तेः पूर्वमविद्यमाना एव उत्पद्यन्ते इति तेषां सिद्धान्तः । यदि घटादिरूपं कार्यं मृत्तिकादौ प्रागपि वर्तेत तर्हि कुलालादिना क्रियमाणः घटनिष्पादनार्थः चक्रभ्रमणादिरूपो व्यापारो निरर्थको भवेत् । इदं कार्यं इदं कारणमिति भेदेन व्यवहारोऽपि न संगच्छते । कारणं मृत्तिका इति शब्देन, कार्यं घट इति शब्देन व्यवह्रियते । अयं च नामभेदः सत्कार्यवादे न संगच्छते । एवं घटेन जलमाह्रियते मृत्तिकया तु न जलमाहर्तुं शक्यते । तस्मात् कार्यकारणयोर्भेदो अवश्यं वक्तव्य इति । उत्पत्तेः पूर्वमविद्यमानमेव घटादिकमुत्पद्यत (~~उत्पत्तेः पूर्वमसत्कार्यवादः~~) इति । तस्मात् असत्कार्यवाद एव युक्त इति तेषामाशयो भवति ।

एवं तेषामाशयं धनसिकृत्य सिद्धान्तयति भाष्यकारःशंकराचार्यः व्यासप्रणीतस्य 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र० सू० २-१-१४) इति सूत्रस्य व्याख्याने ।

पूर्वस्मिन् भोक्त्रधिकरणे यथा समुद्रे वीचीतरंगफेनादिभेदाः तज्जलस्य परिणामत्वेन अभ्युपगम्यन्ते तथा भोक्त्रादेरपि भेदांगीकारे द्वैतज्ञानेन अद्वैतसमन्वयस्य न विरोध इति परिणामवादमभ्युपगम्य उक्तम् । वस्तुतस्तु अस्माभिः कार्यकारणभावस्थले विवर्तवाद एव स्वीक्रियते इति अत्र परमसिद्धान्तं प्रतिपादयिष्यति । तथा च भाष्यपंक्तिः[1] -

'अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं
विभागं स्याल्लोकवदिति परिहारोऽभिहितः, न
त्वयं विभागः परमार्थतोऽस्ति । यस्मात्तयोः

---

१ ब्र० सू० शां० भा० ~~३०२-३०३~~ ५६६-५६७

कार्यकारणयोरनन्यत्वमवगम्यते । कार्यमा-
काशादिकं बहुप्रपंचं जगत् । कारणं- परं ब्रह्म ।'

इति ।

'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वा-
चारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'

(छा० उ० ६-४-१) इति । अत्र यथा दृष्टान्तभूतस्य मृदः साक्षात्कारेण च तज्ज्ञानेन च तत्कार्यभूतं घटशरावादिकं सर्वं ज्ञातं भवति, तथा सृष्टि-स्थिति-प्रलयादीनां कारणभूतस्यैकस्य परब्रह्मणः ज्ञानेन तत्कार्यभूतं सर्वं विज्ञातं भवति इति । एवं चात्र एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातं भवति । यथा दृष्टान्ते तथा दार्ष्टान्तिकेऽपि कार्यत्वेन विकारभूताः पदार्थाः केवलं शब्दाभिधेयाः न वस्तुसत्ताकाः, उत्पत्तिमत्त्वात् घटवत् इति सामान्यानुमानेन केवलं चित्स्वरूपं परब्रह्मैकं वस्तुसत् इत्यवशिष्यते । अयमेव विवर्तवाद इत्युच्यते । तथाच शांकरं भाष्यम्[1] -

'तत्र श्रुताद्वाचारम्भणशब्दाद्दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण
कार्यजातस्याभाव इति गम्यते'

इति । कार्यरूपः सर्वः प्रपंचः कारणे ब्रह्मणि विपरिणामं भजते इत्यर्थः ।

अत्र वाचस्पतिमिश्राणां भामतीग्रन्थः[2] -

'सत्स्वभावं चेद्विकारजातं, कथं कदाचिदसत् । असत्स्वभावं
चेत् कथं कदाचित् सत् । सदसतोरेकत्र विरोधात् । न हि
रूपं कदाचित् क्वचित् कथं चिद्वा गन्धो भवति । अथ तस्य
सदसत्त्वे धर्मौ, ते च स्वकारणाधीनजन्मतया कदाचिदेव
भवतः तर्हि विकारजातं दण्डायमानं सदातनमिति न
विकारः कस्यचित् । अथ असत्त्वसमये तन्नास्ति,
कथं तर्हि धर्मौ सत्त्वम् ।'

इति । विस्तरस्तु भाष्ये द्रष्टव्यः ।

एवं सविचारं विवर्तवादं स्थापयित्वा नैयायिकैरुद्भावितकमसत्कार्यवादं

---

१ ब्र० सू० शां० भा० पृ० ५६८
२ भा० पृ० ५६८

दूषयित्वा अनिर्वचनीयख्यातिं सिद्धान्तयति भाष्यकारः । तथा हि -

ब्रह्मावगतिरित्यत्र वर्तमानेनावगतिशब्देन ब्रह्मणः स्वरूपचैतन्यमथवा तस्य वृत्तिज्ञानमिति वा उच्यते । तयोः प्रथमे स्वरूपचैतन्ये चैतन्यस्याजन्यत्वात् असत्यात् न सत्यप्रतिपत्त्युत्पत्तौ दृष्टान्तत्वम् । द्वितीये वृत्तिज्ञाने तज्ज्ञानस्य विषयातिरिक्ताकाराभावात् तदनिर्वाच्यतायामनिर्वाच्यत्वेन असत्यत्वान्न असत्यात्सत्यप्रतिपत्त्युत्पत्तिः । अत एवांगीक्रियते -

'अर्थेनैव विशेषो हि निराकारतया धियाम्'[1]

इति । दृश्यते च शांकरभाष्यपंक्तिः -

'न हि स्वप्नादुत्थितः स्वप्नदृष्टसर्पदर्शनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते कश्चित्'

इति । अत्र न्यायनिर्णये आनन्दगिरिरेवमभिप्रैति[2] -

'परपक्षे सत्यस्यापि ज्ञानस्य जन्यत्वाभ्युपगमत्वात्
अस्मत्पक्षे च अभिव्यक्तिस्वीकारात् वृत्तिरूपस्यापि
ज्ञानस्य लौकिकाभिप्रायेण सत्यत्वादसत्यात्
सत्यप्रतिपत्त्युत्पत्तौ दृष्टान्तत्वमविरुद्धम्'

इति ।

एवं विस्तरतः उपपाद्य श्रुतावपि विवर्तवादः उद्घुष्यत इति 'सत्त्वाच्चावरस्य' (ब्र० सू० २-१-१६) इति सूत्रव्याख्यानावसरे ब्रवीति भाष्यकारः[3] -

यथा कारणं प्रागुत्पत्तेः कारणात्मनैव कारणे सत्त्वम-
वरकालीनस्य कार्यस्य श्रूयते - 'सदेव सोम्येदमग्र आसीत्'
(छा० उ० ६-२-१) 'आत्मा वा इदमेक एवाग्र आसीत्'
(ऐ० आ० २-४-१-१) इत्यादौ इदं शब्दगृहीतस्य कार्यस्य
कारणेन सामानाधिकरण्यात् ।'

इति ।

सर्वदर्शनसंग्रहेऽपि सत्कार्यवादस्य दूषणमेवं[4] कृतं भवति -

'नापि सतो सज्जायते । कारणव्यापारात्प्रागसतः

---

१ ब्र० सू० शां० भा० पृ० ५७५   ३ ब्र० सू० शां० भा० पृ० ५८५
२ न्या० नि० पृ०   ५७५   ४ स० द० पृ०

शशविषाणवत्सत्तासंबन्धलक्षणोत्पत्त्यनुपपत्तेः ।
न हि नीलं निपुणतमेनापि पीतं कर्तुं पार्यते । ननु
सत्त्वासत्त्वे घटस्य धर्माविति चेत् - तदचारु । असति
धर्मिणि तद्धर्म इति व्यपदेशानुपपत्त्या धर्मिणः सत्त्वापत्तेः ।'

इति । अत्र अनया ऐतरेयारण्यकश्रुत्या सतः ब्रह्मणः एकत्वप्रतिपादनात् कारणात् कार्यस्यानन्यत्वमेव निश्चीयते । एवं च श्रुतिरियमत्र अनिर्वचनीयख्यातिस्थापनार्थं भाष्यकारैरुद्धृता इति मन्तव्यम् । अस्याः श्रुतेरर्थः सर्वत्र समान एव भवति । इति ।

अस्मिन्नेवाधिकरणे भाष्यकारैः इयमपि ऐतरेयारण्यकश्रुतिः प्रतिपादिता -
'न चिरमिव जीविष्यतीति विद्यात्' इत्युक्त्वा
'अथ स्वप्नाः, पुरुषं कृष्णं कृष्णादन्तं पश्यति स एनं हन्ति'

(ऐ० आ० ३-२-४-१६,१७) इति । अस्याः श्रुतेरर्थः - 'स्वप्ने साकल्येन अत्यन्तं कृष्णवर्णं पुरुषादिकं कृष्णवर्णैः दन्तैर्युक्तं, अथवा कृष्णसर्पं यः पश्यति, तं स्वप्नद्रष्टारं पुरुषं स च पुरुषः आगत्य स्वप्नमध्ये एव मारयति' इति । एवं चात्र स्वप्नगतो अरिष्टविशेषः कथ्यते ।

भाष्ये तु कारणात् कार्यं भिन्नमित्युक्तम् । तत्र कारणं सत्, कार्यं तु असत् इति प्रतिपादितम् । अत्र पूर्वपक्षी नैयायिकः वदति - 'एवं सति भवन्तोऽपि अस्माकं पंक्तौ उपविष्टाः एव भवन्ति । यतोऽपि कारणं कार्यमसदित्युच्यते' इति । तस्योत्तरमादधानः भाष्यकारः स्वप्नदृष्टान्तत्वेन इमां श्रुतिमुपन्यस्यति । तथा च भाष्यम्[1] -

'तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु
'न चिरमिव जीविष्यतीति विद्यात्' इत्युक्त्वा
'अथ स्वप्नाः, पुरुषं कृष्णं कृष्णादन्तं पश्यति
स एनं हन्ति' इत्यादिना तेनासत्येनैव स्वप्नदर्शनेन
सत्यं मरणं सूच्यत इति दर्शयति ।'

इति । अनया उदाहृतश्रुत्या तस्याशयं खण्डयति । कथमिति चेत् - सत्यं

---

१ ब्र० सू० शां० भा० पृ० ५७६

यत्त्वया उक्तमस्ति, तत्र कश्चिद्विशेषस्त्वया ज्ञातव्यो भवति यत् - य: पुरुष: स्वप्ने (पुरुषं) कृष्णं कृष्णादन्तं च पुरुषं पश्यति, तस्य होमस्य हानिर्भवतीति असद्भूतेन स्वप्नदृष्टान्तेन सत्यभूतं मरणं सूचितं भवति यथा तथा असद्भूतेन कार्यप्रपंचेन सत्स्वरूपं ब्रह्म सूच्यते इति प्रपंचस्य प्रविलयपूर्वकं ब्रह्मण: वस्तुस्वरूपं सिध्यतीति । त्वया एवं नाभ्युपगम्यते । अत: अनया आरण्यकश्रुत्या स्वप्नदृष्टान्तपुरस्सरं ब्रह्म प्रपंचोपादानकारणमिति प्रतिपादयन्ति भाष्यकारा: श्रीमच्छंकराचार्या: इति ।।

'तस्य य आत्मानमविस्तरां वेद'

(ऐ० आ० २-३-२-१) इति । इयं श्रुति: ऐतरेये द्वितीयारण्यकस्य तृतीयाध्याये द्विसंख्याके खण्डे प्रथमा भवति ।

सायणाचार्यभाष्यरीत्या अर्थविवरणम् - पूर्वस्मिन् खण्डे उक्थस्य भूतपंचकरूपत्वमुपन्यस्तं भवति । एवं तत्र उक्थस्य पंचविधत्वमाम्नाय, तेषां मध्ये भोक्तृभोग्यरूपेण विभज्य तत्र ध्यानं चोपवर्ण्य इदानीमनेया श्रुत्या उक्थस्वरूपस्य पुरुषस्यात्मचैतन्याविर्भावातिशययुक्तत्वध्यानं प्रतिजानीते -'तस्य य' इति । उक्थरूपस्य तस्य पुरुषस्य शरीरे वर्तमानं निरतिशयानन्दरूपमात्मानमतिशयेन य: पुमान् उपास्ते, स पुमान् भूयोऽपि अतिशयेन प्रकटत्वमश्नुते इति । स: पुरुष: बहुलां विद्यैश्वर्यादिकीर्तिं प्राप्नोतीत्यर्थ: । ✓

सूत्रभाष्यस्य प्रथमाध्याये प्रथमे पादे एकादशसूत्रव्याख्यानावसरे ईक्षत्यधिकरणे भाष्यकारै: श्रुतिरियमुपपादिता भवति ।

अस्मिन् ईक्षत्यधिकरणे जगत्कारणं ब्रह्म उत प्रधानम् इति संशय्य वेदान्तेषु जगत: कारणमचेतनं प्रधानमिति वक्तुं न शक्यते । सांख्यैर्निरूप्यमाणे प्रधाने अशब्दत्वरूपहेतोरसत्त्वात् इति प्रधानकारणवादं युक्तिभि: खण्डयित्वा 'जगत्कारणं ब्रह्म' इति उपनिषच्छ्रुतिभि:[१] स्वमतं परमसिद्धान्तं स्थापयति + भाष्यकार: ।

अत्र भामतीग्रन्थ: -

'तदेवमाम्नायैकसमधिगमनीये जगत्कारणे

---

१ भा० पृ० १५६

पौर्वापर्यपरामर्शाद्धि यदाम्नायोऽञ्जसा वदेत् ।
जगद्बीजं तदेवेष्टं चेतने च स आंजसः ।।
तेषु तेषु चाम्नायप्रदेशेषु 'तदैक्षत' इत्येवंजातीयकैः
वाक्यैरीक्षितुः कारणाज्जगज्जन्माख्यायत इति'

इति । अनन्तरं अधिकरणस्यास्य सप्तमस्य 'श्रुतत्वाच्च' (ब्र० सू० १-१-११) इति सूत्रस्य व्याख्यानावसरे इयमैतरेयारण्यकश्रुतिः उदाहृता भाष्यकारैः । अस्मिंश्च सूत्रे सर्वज्ञः ईश्वरः जगतः कारणमिति सिद्धान्त्यते । 'जन्माद्यस्य यतः' (ब्र० सू० १-१-२) इति सूत्रादारभ्य एतत्सूत्रपर्यन्तं जन्मस्थितिलयकारणं सर्वज्ञः ईश्वरः इति सिद्धान्तितम् ।इतः परं वर्तमानो ग्रन्थः सगुण-निर्गुणोभयविध-रूपब्रह्मणः स्वरूपं सविस्तरं प्रपंचयति । तथा च शांकरभाष्यम्[१] -

'द्विरूपं हि ब्रह्मावगम्यते - नामरूपविकारभेदोपाधिविशिष्टं,
तद्विपरीतं च सर्वोपाधिविवर्जितम्'

इति । एवं प्रतिपाद्य उभयविधरूपब्रह्मणः स्वरूपं वेदान्तश्रुतिभिः प्रतिपादयति । एवं सहस्रश्रुतिभिः सोपाधिकं सेश्वरमुपन्यस्य निरुपाधिकब्रह्मणः स्वरूपं वक्तुमुपक्रामति,+ श्रुतिस्मृतिभ्यः तस्य स्वरूपं निर्धारयति च । एवमुभयविधस्यात्मनः निरूपणावसरे सन्देहो जायते यत् आत्मा एकः उत अनेके इति । एवमापतित-सन्देहनिवारणार्थमियं आरण्यकश्रुतिः प्रवर्तते । अत्र भाष्यकाराणां पंक्तिः[२] -

'यद्यप्येक एव त्वात्मा सर्वभूतेषु गूढः, तथाऽपि चित्तोपाधि-
विशेषतारतम्यादात्मनः कूटस्थनित्यैकरूपस्याप्युत्तरोत्तर-
माविष्कृततारतम्यमैश्वर्यशक्तिविशेषैः श्रूयते - 'तस्य
य आत्मानमाविस्तरां वेद' इत्यत्र ।'

इति ।

अत्रैतदभिधीयते - एक एवात्मा वेदान्तेषु उपदिष्टो भवति । उपास्य-तारतम्यात् [३] औपाधिकाः आत्मानः अनेके इति । अत्र वाचस्पतिमिश्राः एवमभिप्रयन्ति -

'यद्यपि निरतिशयमेकमेव रूपमात्मनः ऐश्वर्यं च

---

१ ब्र० सू० शां० भा० पृ० १८० ३ भा० पृ० १८३
२ ,, ,, ,, ,, ,, १८२

ज्ञानं चानन्दश्च, तथाऽपि अनाद्यविद्यातमःसमावृतं तेषु प्राणभृद्भेदेषु क्वचिदसदिव, क्वचिदत्यन्तापकृष्टमिव, क्वचिदपकृष्टमिव, क्वचिदसत्, क्वचित् प्रकर्षवत्, क्वचिदत्यन्तप्रकर्षवदिव भासते।'

इति। एवं चानया श्रुत्या अत्र उपासनाप्रभेदेन आत्मा तत्तदुपाधिना भिन्नो भवति, वस्तुतस्तु आत्मा एक एवेति सिध्यति।

सर्वभूतेषु निरतिशयात्मनः एकत्वात् उपास्योपासकयोस्तारतम्यश्रुतयः कथं संगच्छन्त इत्याशंकायां औपाधिकं तारतम्यमविरुद्धमिति प्रतिपादनार्थमिदं वाक्यमुदाहृतम्। रत्नप्रभायामेवमस्य वाक्यस्य विवरणं कृतम्[१] -

'तस्यात्मनः आत्मानं स्वरूपमाविस्तरां प्रकटतरं यो वेद उपास्ते सोऽश्नुते तत्। तथा च निकृष्टोपाधिरात्मैवोपासकः, उत्कृष्टोपाधिरीश्वरः उपास्यः इत्यौपाधिकं तारतम्यम्'

इति।

'अग्निर्वाग्भूत्वा मुखं प्राविशत्'

(ऐ० आ० २-४-२-४) इति। अत्र पूर्वस्मिन् प्रथमखण्डे इन्द्रियाणां तत्तदभिमानिदेवतानां च सृष्टिः प्रतिपादिता अत्रेदानीं पूर्वोदाहृतानां देवतानां भोगभोग्यालयशरीरसृष्टिः, अनुज्ञातानां देवतानां शरीरे प्रवेशं च उदाहृतमन्त्रप्रकरणे वक्ष्यते।

सायणाचार्यभाष्यरीत्या[२] श्रुत्यर्थविवरणम् - सः परमेश्वरः विराड्देहं सृष्ट्वा तस्य तत्तदिन्द्रियाभिमानिनां देवानां सृष्टिं चकार। तं देहं प्रविष्टाः ताः देवताः तत्र भोगक्षेमकारणमलभमानाः स्रष्टारं परमेश्वरं प्रति एवमुक्तवन्तः - भो देव! अयं विराड्देहःअस्माकं भोगोपभोगाय न समीचीनम्, यतः अस्माकं कृते यावदावश्यकं तावदन्नमत्तुं वयमसमर्थाः भवामः। अतः देहान्तरस्य सृष्टिं कुरु इति। सोऽपि परमेश्वरः तेषां कार्पण्यं श्रुत्वा तेषामर्थे गां ससर्ज। तत्रापि तेषां गवि उपरितनानां दन्तानामभावेन दूर्वादिमूलोत्खननस्यासमर्थत्वं

---

१ भा० र० पृ० १८२-१८३
२ ऐ० आ० सा० भा० १६१

ज्ञात्वा अनन्तरमश्वमसृजत् । अस्मिन्नपि देहे प्रविष्टा: देवा: प्राब्रुवन् - हे देव ! यद्यपि सृष्टिंगतेनानेनाश्वेन पूर्वोक्तासमर्थत्वमपगतं भवति, तथाऽपि अयमश्व: विवेकादिज्ञानशून्य: । यदि विवेकादिज्ञानयुक्त: अन्य: पदार्थ: अस्माकमर्थं त्वया सृज्यते चेत् तेन वयमुपकृतो भवाम:इति । एवं तेषामसन्तुष्टिं दृष्ट्वा स: देव: अनन्तरं विवेकादिज्ञानसंपन्नं पुरुषशरीरमसृजत् । तद्दृष्ट्वा ता: देवता: महतीं तृप्तिं गता: तमीश्वरं श्लाघितवन्तश्च । एवं परमेश्वरेण सृष्ट्या कल्पिते पुरुषशरीरे छिद्रद्वारेण अन्त:प्रविष्टुं ता: देवता:तेन आज्ञप्ता: अभवन् । अपिच स ईश्वर: देवानवदत् - येन प्रकारेण भवन्त:विराड्देहे यस्मिन् छिद्रे यदिन्द्रियमुत्पन्नं या चाभिमानिनी देवतात्वेनोत्पन्ना तन्न्याय्यमनतिक्रम्य अस्मिन् पुरुषशरीरे प्रविशतेतिब्रूत । एवमनुज्ञाता: ता: देवता: पुरुषशरीरमेवं प्राविशन् । तथा च दर्शयति श्रुति: -

'अग्निर्वाग्भूत्वा मुखं प्राविशत् , वायु: प्राणो
भूत्वा नासिके प्राविशत्'

एवमादि । यो देव: वागिन्द्रियाभिमानिनी भवति, सोऽग्नि: पुरुषशरीरे वाग्भूत्वा तस्मिन् वागिन्द्रिये एवान्तर्भूय पुरुषशरीरस्य मुखं प्राविशत् । एवं तत्तदभिमानिन: वाय्वादय: तस्मिन् द्रष्टव्या: । एवं पुरुषशरीरं संपन्नं भवति ।

सूत्रभाष्ये द्वितीयाध्यायस्य प्रथमे पादे न विलक्षणत्वाद्यधिकरणस्य द्वितीये सूत्रे (ब्र० सू० २-१-५) श्रुतिरियमुदाहृता वर्तते । अस्याधिकरणस्य सारभूतो विचारविमर्श: 'को अद्धा वेद, इयं विसृष्टि:' इति मन्त्रद्वयलेखनावसरे प्रतिपादितो भवति । स इह न प्रस्तूयते ।

अत्रोदाहृतारण्यकश्रुति: पूर्वपक्षे पठितत्वात् स: पूर्वपक्ष: किंचिद्विशदीक्रियते । पूर्वपक्षी सांख्य: तर्केण 'जगत्कारणं ब्रह्म' न भवति इति स्थापयति । तथा हि - जगत् न ब्रह्मप्रकृतिकं, तद्विलक्षणत्वात् यद्विलक्षणं तन्न तत्प्रकृतिकं यथा मृद्विलक्षणा रुचकादय: इति व्यतिरेकदृष्टान्तेन स्वमतोत्थापनपूर्वकं परमतं दूरीकरोति । एवं युक्तिप्रतियुक्तिभि: अचेतनं कार्यकारणम् इति स्वमतस्थापनावसरे सिद्धान्ती पृच्छति - चेतनत्वमपि क्वचिदचेतनत्वाभिमतानां भूतेन्द्रियाणां श्रूयते,

'मृदो ब्रवीत्' (शत० ब्रा० ६-१-३) इत्यादि श्रुतिषु इति। अत्र पूर्वपक्षमतसूचकं शांकरभाष्यवचनम्[1] -

'न खलु 'मृदो ब्रवीत्' इत्येवंजातीयकया श्रुत्या भूतेन्द्रियाणां चेतनत्वमाशंकनीयम् । यत:
अभिमानिव्यपदेश एष:,- मृदाद्यभिमानिन्यो वागाद्यभिमानिन्यश्च चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते'

इति । एवं प्रतिपाद्य मन्त्रार्थवादेतिहासपुराणादिभ्य: सर्वत्र अभिमानिन्य: चेतनरूपा: देवादय: तत्तत्स्थानेषु अवगम्यन्ते । तथा हि -

'अग्निर्वाग्भूत्वा मुखं प्राविशत्'

इत्यत्र । इयं श्रुतिरत्र करणेष्विन्द्रियेषु मध्ये वागिन्द्रियस्यानुग्राहिकां देवतामग्निमनुग्राहकत्वरूपेण दर्शयति । अस्यां श्रुतौ इन्द्रियविशेषगतो देव: प्रतिपाद्यते ।

श्रुतेरस्या: सायणाचार्यै: यो अर्थोऽभिप्रेत: स एवार्थ: सूत्रभाष्येऽस्मिन् प्रकरणे शंकराचार्यै: प्रोक्तो भवति ।

अनया श्रुत्या विशेषत: अद्वैतावगमो नावबुध्यते । केवलं शरीरे तत्तदिन्द्रियेषु तत्तदभिमानिनो देवा: वसन्ति । तत्र उषित्वा तं शरीरं कृतकृत्यं कारयन्ति । एतेन शरीरं नश्वरमिति सिध्यति । अनेन सिद्धान्तेनात्र देहात्मवादो निरस्तो भवति । अत: अनया ऐतरेयारण्यकश्रुत्या शरीरि-शरीरभेदेन आत्मन: अस्तित्वमवस्थाप्यते इति ।

'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा:'

(ऐ० आ० ३-२-३-१२) इति । अस्या: श्रुते: सायणाचार्यभाष्यदिशा पर्यालोचनं क्रियते - एषां होतॄणां यागप्रयोगे बहव: ऋच: भवन्ति, ते एव होतार: बह्वृचा: इत्याम्नायन्ते । इमे होतार: एतमध्यात्ममधिदैवतं तेन रूपेण सन्तं एकमेव परमात्मानं प्रौढे शास्त्रे विचारपूर्वकं ध्यायन्ति । एतमेव

---

१ ब्र० सू० शां० भा० पृ० ५४४-५४५

परमात्मानं अध्वर्यव इष्टकाचयनेन संपादिते अग्नौ उपासते । छन्दोगास्तु महाव्रताख्ये कर्मणि अध्यात्ममधिदेवतभूतमेकमेव परमात्मानं मीमांसन्त । एवमत्र तत्तद्वेदशाखासु प्रप्रतिपादितेषु कर्म-तदंगेषु तत्तच्छाखीयैः परमात्मन उपास्यत्व-मुक्तं भवति । श्रुतेरस्याः एतावता एव अस्माकं मन्तावश्यकत्वात् उपरितनीया श्रुतिः न विचार्यते । एवं चानेन वेद-वेदान्ताभिज्ञाः एनं चिदात्मानं परमात्मानमेव जगत्कारणं ब्रह्म इति प्रकर्षेण वदन्ति । प्रथमतः वेदे एव जगदुत्पत्तिमत्त्वश्रवणात् इति ।

शंकराचार्याः ब्रह्मसूत्रभाष्यस्य प्रथमाध्यायस्य प्रथमे पादे ज्योतिश्चरणा-धिकरणे 'छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनम्' (ब्र० सू० १-१-२५) इति सूत्रव्याख्यानावसरे आरण्यकश्रुतिमिमामुपपादयांबभूवुः

अधिकारेऽस्मिन् विकारद्वारेणापि ब्रह्मणः उपासनं भवतीति प्रतिपादयितुं भाष्यकारः आरण्यकश्रुतिमिमामुदाहरति - 'एतं ह्येव बह्वृचा इति' इति[1]

अत्र रत्नप्रभाकाराः श्रुत्यर्थमेवं प्रतिपादयन्ति -

> 'एतं परमात्मानं ब्रह्म ऋग्वेदिनः महत्युक्थे शास्त्रे तदनुगत-मुपासते । एतमेव अग्निरहस्ये - 'तमेवमग्निरित्यध्वर्यव उपासते' इति श्रुतेः यजुर्वेदिनः अग्नौ उपासते ।
> एतमेव छन्दोगाः सामवेदिनो महव्रते क्रतौ उपासते,
> इति ऐतरेयारण्यके दृष्टमित्यर्थः ।'

इति । अनेन भाष्यकाराणामाशयोऽपि स्पष्टोभवति । एकस्यैव ब्रह्मणः उपासनं विभिन्नस्थलेषूक्तत्वात् । अतः छन्दोभिधानेऽपि 'तावानस्य महिमा' इत्यादिवाक्ये चतुष्पाद् ब्रह्म एव निर्दिष्टं भवति, तदेव ब्रह्म ज्योतिर्वाक्ये परामृश्यत इति परमसिद्धान्तमस्थापयत् ।

अत्र अनया आरण्यकश्रुत्या विभिन्नस्थलेष्वपि ब्रह्मणः तेन रूपेण उपासनमेकमेव भवतीत्युच्यत इति । अनेन सत्स्वपि बहुप्रकारेषु उपासनेषु उपास्यं ब्रह्म न भिद्यते, तस्य एकत्वप्रतिपादनात् इति ब्रह्मणः एकत्वम् अभेदः च सिध्यतः ।

---

१ ब्र० सू० शां० भा० पृ० २२६ २२८

'अहमुक्थमस्मीति विद्यात्' (ऐ० आ० २-१-२-६)

इति । काण्डं द्विविधम् + पूर्वकाण्डमुत्तरकाण्डं चेति । तत्र पूर्वकाण्डस्य कर्मकाण्डमिति नाम । उत्तरकाण्डं ज्ञानकाण्डमिति भण्यते । केचन काण्डत्रयमिति वदन्ति । गीतायामपि षड्भि: षड्भि: अध्यायै: त्रीणि काण्डानि विभक्तानि भवन्ति । प्रथमं कर्मकाण्डम्, द्वितीयं भक्तिकाण्डम्, तृतीयं ज्ञानकाण्डमिति । एवमत्रापि काण्डद्वयषु मध्ये द्वितीयं काण्डमुपासनाकाण्डमिति । काण्डद्वयेनैव सर्वत्र व्यवहारे वर्तमानत्वात् अस्योपासनाकाण्डस्य तथा प्राथम्यं नास्ति । अत एवोपासनाकाण्डं ज्ञानकाण्डस्वैस्य उपायत्वेन पठ्यते । उपायसिध्यनन्तरं हि उपेयसिद्धिर्भवति । अत: निष्कैवल्यब्रह्मण: आत्मसाक्षात्कारार्थं प्रथम: उपाय: उपासनमनुष्ठेयम् । तच्च उपासनं द्विविधम्- ब्रह्मोपासनं प्रतीकोपासनं, अथवा ब्रह्मण: सगुणोपासनं निर्गुणोपासनं चेति । ब्रह्मदृष्ट्या तद्बुध्या तद्गुणविशिष्टत्वेन क्रियमाणमुपासनं ब्रह्मोपासनं भवति । प्रबल-लौकिकवासनोपेतस्य अहं प्रत्ययस्य वासनापरित्यागेन ब्रह्मणि चित्तस्य प्रवेशात् , वासनासहितब्रह्मभावनया लौकिकपदार्थचिन्तनं प्रतीकोपासनमिति गीयते ।

तत्र प्रतीकोपासनं द्विविधं भवति - यज्ञाद्बहिर्भूतं यज्ञांगं चेति । अनयो: यज्ञांगं महावृतान्तबहुविधयज्ञरूपकर्मणां वासनावासितस्य पुरुषस्य चित्तमाविष्करोति इति कृत्वा 'उक्थम् उक्थम्' इति अंगावबद्धमुपासनमित्युच्यते । यज्ञाद्बहिर्भूतमुपासनं देवताराधनमिति कथ्यते । एवमंगावबद्धेषु उपासनेषु उत्तरमीमांसका: पंचभि: प्रकारै: विचारयन्ति । तेषां स्वरूपभेदा: -

१ मुख्यभूते यागे तत्कर्मणि ऋत्विजामेवाधिकार: न यजमानस्य इत्येक: प्रकार: ।

२ कर्मांगभूतेषु प्रतीकेष्वेव पृथिव्यादीनां देवानां दृष्टि: न तु देवतायामंगदृष्टिरिति द्वितीय: प्रकार: ।

३ तृतीय: प्रकारस्तु यस्यां शाखायां यस्य ध्यानं विहितं भवति तच्छाखागते अंगे एव तस्य विनियोग इति न नियम:, शाखान्तरेष्वपि तस्यांगस्य विनियोगो भवति।

४ तच्छाखासु यावन्ति अंगावबद्धानि उपासनानि भवन्ति तावन्ति सर्वाण्यपि उपासनानि अनुष्ठातव्यानीति न नियम: किन्तु स्वेच्छया एकं वा

१ ३ ऐतरेय-ब्राह्मणवाक्यानि — पृ. १०१

बहूनि कर्माणि वा अनुष्ठातुं शक्यन्त इति ।

५ कर्मानुष्ठानकालेऽपि तस्यांगावबद्धोपासनाऽपि अवश्यमनुष्ठेयानि इत्यपि नास्ति नियमः, यथेच्छया तेषां कर्मांगबद्धानामुपासनमिति पंचमः प्रकारः ।

एतेषु प्रथमः प्रकारः मीमांसायां तृतीयाध्यायस्य चतुर्थपादे अभिहितः । द्वितीयो विचारः तत्रैव चतुर्थाध्यायस्य प्रथमपादे निरुक्तं भवति । तृतीयाध्यायस्य तृतीयपादे तृतीयो विचारः विचारितः । चतुर्थोऽपि विचारः तृतीयाध्यायस्य तृतीयपादे एव दर्शितः । पंचमो विचारः तत्रैव दर्शितः इति निरुक्तानामेतेषां स्थानसमालोचनं भवति । एतैः पंचभिः प्रकारैः निर्णीतमंगावबद्धोपासनमेव नानाविधविशेषणाविशिष्टं भवति । एवंनिरुक्ता यज्ञांगरूपा प्रतीकोपासना अस्मिन् द्वितीयारण्यके 'उक्थमुक्थम्' इत्यारभ्य तृतीयारण्यकस्य 'आत्मा वा इदम्' इत्यन्तं वर्तमानग्रन्थेन प्रतिपाद्यते । एवं प्रतिपादनावसरे षष्ठे उपासनाप्रकरणे शास्त्रे शरीरदृष्टिं विदधाति इयं श्रुतिः, 'पुरुष एवोक्थमयमेव महान् प्रजापतिरहमुक्थमस्मीति विद्यात्' इति ।

सायणाचार्यभाष्यरीत्या श्रुतेरर्थः - अस्यां श्रुतौ शिरःपाण्यादिमतः देहस्य पुरुषरूपस्योपासनं विधीयते । पुरुषस्य महत्वं श्रेष्ठत्वं च वक्ष्यते - 'अयं पुरुषो ब्रह्मणो लोकः' (ऐ० आ० २-१-३) इत्यत्र । तस्मादुत्कर्षहेतुत्वात् देहस्य उक्थत्वमिति आम्नायते । अस्मिन् उक्थस्वरूपे शरीरे अहं चित्स्वरूपेण अस्मि इति ध्यायेत् । अत्र वर्तमानस्य विद्यात् इति पदे विदि धातुना प्रमाणजन्यं ज्ञानं नाभिधीयते, अपितु पुरुषतन्त्राः ध्यानक्रिया उच्यते । यद्यप्युच्येत 'विद ज्ञाने' इति अदादिगणस्य परस्मैपदि धातुः इति तथाऽपि ज्ञानस्य ध्यानस्य च मानसिकक्रियात्वात् अत्र ध्यानं विवक्षितं भवति । एवमेवात्र निश्चीयते यतो हि उपासनाप्रकरणत्वात् । तथा च उक्थभूते शरीरे अहमस्मि इति अहमाकारकध्यानं कुर्यात् इत्यनया श्रुत्या सिध्यति ।

ननु विचार्यमाणे सति अहमुक्थमस्मि इति न संगच्छते इति चेत् नात्र दोषः । प्रतिपादितं च ब्रह्मसूत्रस्य चतुर्थाध्याये 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' (ब्र० सू० ४-१-३) इत्यत्र तत्त्वज्ञानार्थं [illegible] ध्यानस्यावृत्तिकाले किमहं ब्रह्म इति ध्यानं

अथवा मत्स्वामी ईश्वर: इति ध्यातव्यम् इति सन्दिह्य ~~(त्वं-वा-अहमस्मि-भगवो देवते-अहं-वै-त्वमसि-देवते)~~ 'एष त आत्मा सर्वान्तर:' (बृ० उ० ३-४-१) इत्यादिश्रुत्या ~~न~~ तत्वविद्यायां ब्रह्मोपासनेषु आत्मेति अहंग्रहोपासनमभिधीयत इति सिद्धान्तं कृत्वा 'न प्रतीके न हि स:' (ब्र० सू० ४-१-४) इति समनन्तरसूत्रेण प्रतीकोपासनेषु आत्ममतिं न बध्नीयात् इति अहंग्रहोपासनं निवारितं भवति ।

नन्वेवं सति अस्यां श्रुतौ प्रतिपाद्यमानमुक्तमेव प्रतीकोपासनं भवति । अत: अत्र अहमुक्थमस्मीति अहंग्रहोपासनं न युक्तमिति चेत् -न । अयं हेतु: न दोषाय कल्पते कुत: ? तस्मिन् चतुर्थाध्यायस्थ ब्रह्मसूत्रे भाष्ये च न्यायबलादेव अहंग्रहोपासनं निषिद्धं भवति । इह तु श्रुतिरूपवचनबलात् अहंग्रहोपासनं विधीयते । अत एव शास्त्रकाराणां डिण्डिम: एवं भवति - 'किमिव हि वचनं न कुर्यान्नास्ति वचनस्यातिभार:' इति । यद्यप्यत्र कृत्स्नं उपास्यस्वरूपमभिधायान्ते अहंगृहोपासनं वक्तव्यं भवति तथाऽपि अत्र उपरि वक्ष्यमाणेषु उपास्यावयवविशेषेषु प्रत्येकं अहंग्रहोपासनस्य सिध्यर्थं आदावेव एतदुपासनमत्र विधीयत इति । इत्यवसित: श्रुतेरर्थ: प्रयोजनश्च ।

ब्रह्मसूत्रभाष्ये शंकराचार्यै: प्रथमाध्यायस्य प्रथमे पादे वर्तमानसप्तमसूत्रस्य व्याख्यानावसरे इयं श्रुति: उदाहृता भवति । अस्याधिकरणस्य विषयविशेषस्तु 'आत्मा वाइदम्' इति ऐतरेयोपनिषच्छ्रुतिव्याख्यानावसरे सम्यक् प्रतिपादयिष्यते । अत: यदत्र वक्तव्यं भवति तत् किंचिदेव । ईक्षत्यधिकरणस्य तृतीये सूत्रे 'तन्निष्ठस्य मोक्षोपदेशात्' (ब्र० सू० १-१-७) इत्यत्र आत्मशब्दस्यालम्बनमचेतनं प्रधानं न भवति, प्रधानस्य मोक्षस्यानुपदेशात् । अत: तन्निष्ठस्य शरीरनिष्ठस्य अहमिति प्रतीतिविषयस्य चित्स्वरूपस्य जीवात्मन: मोक्षस्योपदेश: श्रुत्यादिषु प्रसिद्ध इति वक्तुकाम: भाष्यकार:[1] श्रुतिमिमामत्र उदाहरिष्यति, -'अहमुक्थमस्मीति । तथा च शांकरं भाष्यम् -

'अन्यथा हि अमुख्ये सदात्मतत्वोपदेशे अहमुक्थमस्मीति विद्यात् इति वत् संपन्नमात्रमिदमनित्यफलं स्यात् ।

---

१ ब्र० सू० शां० भा० पृ० १७२

तत्र मोक्षोपदेशो नोपपद्येत ।'

इति । अत्र भाष्यपर्यालोचनया भाष्यकारैरपि अनया आरण्यकश्रुत्या उपासनमेवा-भिधीयत इत्युक्तं भवति । अतः सायणाचार्यैः यो अर्थः अस्याः श्रुतेः निगदितः सः स एवार्थो शंकराचार्यैरपि अभिप्रेतो भवेदिति ऊह्यते । एवं चेयं श्रुतिः शरीरे अहं सत्ताकध्यानरूपोपासनं विधत्ते इति ।। इति शम् ।।

००००००००००००००००००००

१ ३ ऐतरेय-ब्राह्मणवाक्यानि

ऐतरेय-ब्राह्मणवाक्येषु यस्मै एकमेव वाक्यं भगवता शंकराचार्येण ब्रह्मसूत्रभाष्ये प्रकरणद्वये प्रतिपादितं भवति । तत्र निरुक्ता ऐतरेयब्राह्मणश्रुति: -

'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्व-
षट्करिष्यन् साक्षादेव तद्देवतां प्रीणाति
प्रत्यक्षाद्देवतां यजति ।'

(ऐ० ब्रा० ११-८-३) इति । श्रुतिरियम् ऐतरेयब्राह्मणस्यैकादशाध्याये अष्टमखण्डे प्रथमा भवति । श्रुतेरर्थ: -

अध्वर्यु: यां देवतामुद्दिश्य हवि: गृह्णाति तां देवतामयं होता वषट्करिष्यन् वषट्कारायोद्युक्त: सन् ध्यायेत् मनसा शास्त्रीयां देवतामूर्तिं सम्यगनुसन्धाय पश्चात् वषट्कुर्यात् इत्यर्थ: । एवं सति साक्षादेव प्रत्यक्षेणैव देवतां तर्पयति । न केवलं स्तुत्यर्थमेव देवताया: साक्षात्कार: किन्तु प्रत्यक्षात् प्रत्यक्षेणैव देवतां यजति यागकाले प्रत्यक्षेण पश्यतीत्यर्थ: ।

ननु देवता चक्षुषा न दृश्यते, कथं अस्या: प्रत्यक्षत्वमिति चेत्- नायं दोष: । मानसप्रत्यक्षस्य विवक्षितत्वात् । यथा पुरावर्तिनी देवता चक्षुषा दृश्यते तथैव चिन्त्यमानाऽपि मनसा दृश्यत इव इति ।

श्रुतिरियं भगवता भाष्यकारेण शंकरेण ब्रह्मसूत्रभाष्ये प्रथमाध्यायस्य प्रथमपादे चतुर्थे सूत्रे समन्वयाधिकरणे उद्धृता भवति । अत्र अस्यां श्रुतिप्रकरणे पूर्वपक्षी आक्षिपति - यदुक्तं भवता उत्पत्त्याप्तिविकारसंस्कारेभ्य: अन्यत्पंचमं क्रियाफलं नास्ति, यन्मोक्षस्य क्रियासाध्यत्वे द्वारं भवेत् । तथा च मोक्षे क्रियानुप्रवेशो नास्तीति, तन्न, यत: ज्ञानं नाम मानसी क्रिया भवति । इयं मानसी कस्मात् विधिगोचरो न भवति, कस्माच्च अस्या: फलं निर्वर्त्यादिषु अन्यतम: न भवेत् । अत: ज्ञानेन न मोक्ष इति । एवं प्राप्ते पक्षे सिद्धान्ती आह - मानसमपि ब्रह्मज्ञानं न विधियोग्या क्रिया वस्तुतन्त्रत्वात् वैलक्षण्याच्च । ज्ञानं नाम मानसी क्रिया अपि ब्रह्मणि फलं जनयितुं नार्हति । तस्य ब्रह्मण:

स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्ते: । अपि च यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते सा क्रिया इत्युच्यते । यत: तत्र सा पुरुषचित्तव्यापाराधीना भवति । तथा चोक्तम् ऐतरेयब्राह्मणे - 'यस्यै देवतायै' इति । अत्र शांकरं वचनम्[1] -

'ध्यानं चिन्तनं यद्यपि मानसं तथाऽपि पुरुषेण
कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात् ।
ज्ञानं तु प्रमाणजन्यम् ।'

इति । तथा च एवमादि ऐतरेयब्राह्मणवाक्येषु यथा यादृशी वस्त्वनपेक्षा ध्यानक्रिया पुंतन्त्रा च चोद्यते तादृशी क्रिया इति । - यथाभूतवस्तुविषयं प्रमाणमित्यत: ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्, यत: तत्केवलं वस्तुतन्त्रमेव । तस्मात् ज्ञानं न चोदनातन्त्रम्, नापि पुरुषतन्त्रम् । अत: ज्ञानं उत्पत्त्या-दिफलकक्रियासु अन्यतमं न भवति इति सिद्धम् । तस्मात् मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यमिति राद्धान्त: ।

इयमेव ब्राह्मणश्रुति: प्रथमाध्यायस्य तृतीयपादे त्रयोविंशतमे सूत्रे सूत्रभाष्यस्य देवताधिकरणे प्रतिपादिता भवति ।

अस्मिन् अधिकरणे देवादीनामपि ब्रह्मशास्त्राध्ययने अधिकारो वर्तते उत न इति विचार्यते । अधिकरणस्यास्य विचार: पूर्वमेवोपपादित: - 'यज्ञेन वाच: पदवीयमायन्' (ऋ०-सं०-१०-७१-३ इति मन्त्रव्याख्याने । अत्रेयं श्रुति: अधिकरणस्यास्याष्टमे भावं तु बादरायणो अस्ति हि' (ब्र० सू० १-३-३३) इति सूत्रव्याख्याने प्रतिपादिता । पूर्वस्मिन् सूत्रे पूर्वपक्षी आक्षिपति -

प्रत्यक्षादिव्यतिरिक्तो लोक: न प्रमाणान्तरत्वेन अस्ति, किन्तु प्रत्यक्षादिमूला लोकप्रसिद्धि: सत्यतामश्नुते, तदभावे तु अन्धपरंपरावत् मूलाभावात् विप्लवते । न च विग्रहादौ प्रत्यक्षादीनामन्यतममस्ति प्रमाणम् । न चेतिहासादिमूलं भवितुमर्हति, तस्यापि पौरुषेयत्वेन प्रत्यक्षाद्यपेक्षणात् । प्रत्यक्षादीनां चाभावात् इतिहासपुराणमपि प्रमाणान्तरमूलमाकांक्षति ।

---

१ ब्र० सू० शां० भा० पृ० ८३

तस्मात् देवादीनां ब्रह्मशास्त्रे नाधिकार इति । अनेन सूत्रेण सिद्धान्तमुच्यते - तेषां देवादीनां विद्यायामधिकारस्य भावं मन्यते आचार्यो बादरायण इति । यद्यपि तेषां मधुविद्यासु नाधिकार: तथाऽपि तेषां ब्रह्मविद्यायामधिकार: भवत्येव, यत: तेऽपि ब्रह्मविद्याया: अर्थिन: भवन्ति । क्वचित् स्थलेषु तेषां नाधिकार इत्येवता सर्वत्र नाधिकार इति न प्रत्येतव्यम् । यथा ब्राह्मणा: राजसूये नाधिकारिण: तथाऽपि ब्रह्मविद्यायामधिकारिण एव इति ।

अपि च विधिभिरेव इन्द्रादिदैवत्यानि हवींषि चोदयद्भि: इन्द्रादीनां स्वरूपमपेक्षितम् । अत: विध्यनुपपत्त्यापि स्वर्गवत् देवताविग्रह: अंगीकार्य इति । स्वरूपरहिता: ते देवादय: बुद्धावारोपयितुं न शक्यन्ते । अपि च यागे चेतसि अनारूढायै तस्यै देवतायै हवि:प्रदानादिकं कर्तुं न शक्यते । अयमेवार्थं दृढीकरिष्यते अनया श्रुत्या - 'यस्यै देवतायै' इति । श्रुत्यर्थ: विवृत: । तस्मादनया श्रुत्या देवादीन् चेतसि आरोहार्थं तेषां विग्रह? एष्टव्य: इत्यत: देवानां विग्रहवत्त्वमुक्तं भवति । तस्मात् उपपन्न: मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वावगम इति । विग्रहवतामेतेषां देवादीनां ब्रह्मविद्यायामधिकार वर्तत एवेति सिध्यति इति ।। इति शम् ।।

:o:o:o:o:o:o:o:o:

१४ ऐतरेयोपनिषद्व्याख्यानि

१४ ऐतरेयोपनिषद्वाक्यानि

पूर्वस्मिन् ऐतरेय-आरण्यकप्रकरणे विद धातोः अनेकार्थनिरूपणावसरे तस्य धातोः विद सत्तायाम् इत्यप्यर्थो उपवर्णितः। विदसत्तायामित्यत्र सत्तापदेन- सत्ता, सत्तासाधनं, सत्ताकर्म, सत्ताधिकरणमित्यर्थाः उच्यन्ते। अत्र सत्ता- ब्रह्म, सत्तासाधनं- ब्रह्मविषयकज्ञानसाधनं, सत्ताकर्म- ब्रह्मणः सृष्टिस्थितिप्रलयाः सहेतुकं कर्म, सत्ताधिकरणं- सृष्टिगतेषु सकलपदार्थेषु ब्रह्मणो अवस्थितिरिति प्रतिपादनात् ब्रह्मविषयकविचारसमूहस्य वेदः इति नाम। ऋग्वेदोपनिबद्धत्वात् ऐतरेयश्रुतयः विचारार्थमत्र प्रस्तूयन्ते। तथा हि -

ब्रह्मसूत्रभाष्ये भगवता शंकरेण प्रथमाध्यायस्य प्रथमपादे समन्वयाधिकरणे निगदिता वर्तते इयं ऐतरेयोपनिषच्छ्रुतिः -

'आत्मा वा इदमेक एवाग्र आसीत्'

(ऋ ऐ० उ० १-१-१) इति। श्रुतिपादितश्रुतेरर्थः -

आत्मशब्दार्थः पुराणे एवं प्रतिपादितः -

'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य सन्ततो भावः तस्मादात्मेति कीर्त्यते॥'

(लिंगपु० ७-९६) इति लिंगपुराणे। अस्मिन् श्लोके उक्तः आत्मा द्विविधः - व्यवहारविशिष्टः केवलात्मा चेति। तथा चोच्यते -

'आत्मानं द्विविधं प्राहुः परापरविभेदतः।
परस्तु निर्गुणः प्रोक्तः ह्यहंकारयुतो परः॥'

इत्यत्र। आप्नोतेः, अदेः अततेः वा धातोः आत्मा इति शब्दोत्पत्तिः। ~~स-आत्मा-सर्वज्ञ-~~ श्रुतेरस्याः शंकराचार्यभाष्यरीत्या अर्थविवरणम् - एवं लक्षणकः स आत्मा सर्वज्ञवित्तरशनायादिधर्मवर्जितः। अयमेव केवलः आत्मा इत्युच्यते। सर्वज्ञत्वादिगुणोपेतः अथवा भोक्ता जीवश्चात्मा व्यवहारात्मा इति परिगण्यते। केवलस्यात्मनः लक्षणं तु नित्य-शुद्ध-बुद्ध-मुक्तस्वभावत्वं

अजत्वं, निर्विकारत्वं चेत्यादि । उक्तधर्मविपरीतत्वं अन्यस्य लक्षणं भवति ।
तथा च श्रुतयः -

'नेह नानास्ति किंचन' (बृ० उ० ४-४-१९)
'नेति नेति' (बृ० उ० २-३-६)
'अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा:' (बृ० उ० ४-५-१४)
'असंगो ह्ययं पुरुष:' (बृ० उ० ४-३-१५)

इत्याद्याः श्रुतयः ब्रह्मणः स्वरूपं धर्मप्रतिषेधेनैव उच्यन्ते, न धर्मविशेषेण ।

नन्वेवं सति ब्रह्मसूत्रे भगवता व्यासेन कृतं 'जन्माद्यस्य यतः' (ब्र० सू० १-१-२) इति सूत्रं व्यर्थं भवति । तत्र ब्रह्मणः सृष्ट्यादिविधिमुखेनैव ब्रह्मणः लक्षणमाम्नातमिति चेत्-उच्यते । तत्र मध्ये धर्म-धर्मिभावमवलम्ब्य लक्षणप्रतिपादकत्वेन सूत्रमुदाहृतं वर्तते । सृष्टिस्थितिप्रलयादीनां ब्रह्म कारणमिति वक्तुं सृष्ट्यादयः तस्य कार्यत्वेन रूपेण तस्य समाम्नातं लक्षणम् । तत्रापि कार्यपूर्वं कारणसत्त्वस्य नियमात् तत् कारणरूपं ब्रह्म निरुपाधिकमेव । तत्र पूर्वस्मिन् सूत्रे जिज्ञासितुं योग्यं ब्रह्म इति प्रतिपाद्य निदिध्यासने लक्ष्यरूपं ब्रह्म किमिति सन्देहे प्राप्ते सृष्टिस्थितिप्रलयहेतुः तद्ब्रह्म इति तन्निवृत्तिं करोति 'जन्माद्यस्य यतः' इति सूत्रम् । अतो न व्यर्थं इति ।

श्रुतौ प्रसिद्धार्थको वाक्प्रयोगः । नामरूपकर्मभेदभिन्नमिदं जगत् तद्रूपेण तदभिन्नेन च सः एक एव आत्मा । अत्र प्रकृते एवकारेण आत्मभिन्नमन्यत्सर्वं व्यावर्त्यते । स आत्मा जगतः सृष्टेः प्रागेव आसीत् । एवकारस्योभयत्रापि अनुयोगः । कश्चन सन्देहो उदेति - किमिदानीं स एवैको न ? इति । इदानीं स एको नास्ति इति तत्सन्देहपरिहारे कृते सति, अस्तु कथं तर्हि श्रुत्या आसीदित्युच्यते ? इति पुनः प्रश्नः जाते इदमुत्तरं भवति यत् पूर्वमिदानीमपि स आत्मा एक एव । पूर्वोत्तरप्रतिपादितयोरात्मनोः अस्ति कश्चन विशेषः । यथा सलिलैकशब्दप्रत्ययगोचर एव फेनबुद्बुदादीनां व्यवहारः तथा आत्मभिन्नं जगत् नामरूपव्याकरणात् प्राक् ब्रह्मशब्दप्रत्ययगोचरं भवति । यदा सलिलात् पृथक् नामरूपभेदेन फेनादयः व्याकृताः भवन्ति तदाऽपि फेनबुद्बुदाद्यनेकशब्दप्रत्ययभाजः

तान् सर्वान् विवेकी पुरुष: सलिलविशेष एवेति सलिलाभिन्नत्वरूपैकत्वेन सलिलमेवेति परिगणयति,+ एवं नामरूपादिविशिष्टे प्रपंचे वर्तमानान् भूत-भौतिकादीन् पृथक् प्रत्यगात्मत्वेन संभाव्यानन्तरं वेदान्तवाक्यै: सुष्ठु विचार्य एक एव आत्मा प्रपंचाकारेण विवृत: प्रपंचस्य अधिष्ठानं ब्रह्म, प्रपंचेप्यधिष्ठितं ब्रह्म इति पूर्वापरत्वेन एकमेवात्मानं पश्यति इति श्रुतेरस्या: पर्यवसितार्थ: ।

परमर्षिणा भगवता वेदव्यासेन रचितानां ब्रह्मसूत्राणां मध्ये 'तत्तु समन्वयात्' (ब्र० सू० १-१-४) इति सूत्रस्य भाष्ये शंकराचार्यै: ऐतरेयेयं श्रुति: आम्नाता वर्तते । इदं 'तत्तु समन्वयात्' इति सिद्धान्तसूत्रं भाट्टमतं पूर्वपक्षमवलम्ब्य अवतरति ।

पूर्वस्मिन् शास्त्रयोनित्वाधिकरणे तत्पूर्वतनब्रह्मलक्षणसूत्रेण च विचित्रगुण-मायासहाय: अनावृतानन्तस्वप्रकाशरूप: परमेश्वर: स्वकृतपूर्वकल्पीयक्रमैतत्सजातीय-क्रमवन्तं वेदराशिं तदर्थांश्च युगपज्ज्ञानन्नेव करोति यथा अध्येतार: पूर्वक्रमं ज्ञात्वा वेदोच्चारणं कुर्वन्ति तद्वत् । तस्मात् वेदकर्ता परमेश्वर: वेदमिव तदर्थमपि स्वसंबद्धं नान्तरीयकतया जानाति । अत: स: शास्त्रं प्रति हेतुत्वात् सर्वज्ञ इति प्रपंचितम् । भामतीकारो वाचस्पति: ऋग्वेदस्य शास्त्रत्वं महत्त्वं चैवं कथयति[१] -

'चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादि-श्मशानान्तासु ब्राह्ममुहूर्तोपक्रमप्रदोषपरिसमापनीयासु नित्य-नैमित्तिक-काम्यकर्मपद्धतिषु च ब्रह्मतत्वे च शिष्याणां शासनात् शास्त्रम् ऋग्वेदम्, अत एव महाविषयत्वात् महत् ।'

इति । एवंरूपस्य शास्त्रस्य कारणं ब्रह्म । शास्त्रस्य महाविषयकत्वात् तस्य कारणरूपं ब्रह्म अपि महत्तर इति कैमुतिकन्यायेन सिध्यति । एकमस्मिन्नधिकरणे ब्रह्मण: शास्त्रप्रमाणकत्वं तद्धेतुनैव सर्वज्ञत्वं च प्रतिपाद्यते । अत्रैव विविच्य शास्त्रप्रमाणकत्वेन निर्गुणब्रह्म अभिधीयते, सर्वज्ञत्वेन सगुणब्रह्म इति । एवमत्र सगुण-निर्गुणोभयविधब्रह्मणो: लक्षणमाम्नातमिति । एवं स्थिते सत्यत्र प्राभाकर: आदिापति - सर्वस्य शास्त्रतद्गतवाक्यानां क्रियापरत्वं शाबरभाष्ये उपवर्णितम् ।

---

१ भा० पृ० ८६

तथा च जैमिनीसूत्रम् -

'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै० सू० १-२-१)

इति । अत्र तु विधि-निषेध-अर्थवाद-मन्त्र-नामधेयात्मकस्य सर्वस्य वेदस्य तत्तन्मन्त्रेषु विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरतयैव क्रियार्थत्वमभ्युपगम्यत इति सिद्धान्तित: । भवद्भिस्तु 'शास्त्रप्रमाणकं ब्रह्म' इत्युच्यते । तथा च ब्रह्मण: ज्ञाने क्रियात्वापत्ति: । एवमभ्युपगमे 'निर्गुणं निष्क्रियं शान्तं निरवद्यं निरंजनम्' (श्वे०उ० ६-१९) इत्याद्या: श्रुतय: भज्येरन् । अत: वेदान्तवाक्यैरेव ब्रह्मण: ज्ञातव्यत्वात् एवं वक्तुं न शक्यते । ब्रह्मण: क्रियात्वापत्त्यनभ्युपगमे अतदर्थानां वेदान्तवाक्यानां आनर्थक्यरूपाप्रामाण्यापत्ति: । सर्वे अपि वेदमन्त्रा: विधिसंस्पर्शमन्तरेणैव अर्थवत्त्वं भजन्ते, एवमुपपन्नाश्च ।

किं च वेदान्तवाक्यै: अज्ञातं सत् ब्रह्म ज्ञाप्यते, न तत्र ब्रह्मण: विधि: विधिसंस्पर्शो वा क्रियाविषयत्वं हि विधिरित्युत्युच्यते । अक्रिये वस्तुस्वरूपे ब्रह्मणि कथं विधे: प्रसक्तिर्भवितुमर्हति । अत: ऋग्वेदादिशास्त्रप्रमाणकं ब्रह्म इत्युक्तत्वात् वेदमन्त्रेषु कर्मापेक्षितकर्तृदेवतादिस्वरूपप्रकाशनेन च सिद्धे वस्तुनि विधि: न प्रसजतीति हेतो: वेदान्तानां क्रियाविधिशेषत्वं पर्यवसितमिति चेत्-

अत्रोच्यते । ब्रह्म शास्त्रप्रमाणकम् । तस्य सृष्ट्यादय: आगमादेवावगम्यते, एवं ब्रह्मण: ज्ञाने तस्य कार्यज्ञाने च विधिर्नास्ति । संपादितसुकृतपुण्यवशेन आगमादिवाक्यज्ञानेन ब्रह्मविषयकाखण्डार्थवृत्ति: जायते । तया वृत्त्या सोऽहमस्मि, अहं ब्रह्मास्मि इति एकाकारमनुसन्धीयते । अयमेव ब्रह्मसाक्षात्कार इत्युच्यते । अत: ब्रह्मण: ज्ञाने विधे: नावसर इति । अयमर्थ एव प्रपंचितो भाष्ये समन्वयादिति हेतुना । यथा प्रकृष्टप्रकाशादिवाक्ये अपर्यायानेकशब्दानामखण्डार्थत्वं दृष्टम् एवं अखण्डार्थैकरसे अद्वितीये ब्रह्मणि सकलवेदान्तवाक्यानां तात्पर्यविषयत्वं वर्तते । वेदान्तवाक्यानां तात्पर्यविषयभूते ब्रह्मणि क्रिया वा तद्विधिशेषत्वं वा न संभवति । अपि च वेदान्तवाक्यानि सिद्धं तु वस्तु प्रतिपादयन्ति न स्वपदेन कल्पितं नूतनं वस्तु । एवमागमेषु न क्वचिदपि स्थले पूर्वसिद्धं कर्म प्रतिपाद्यते । अत एव तत्र कर्मणां क्रियाविधिपरत्वं वा क्रियाविधिशेषत्वं वा अवश्यं वक्तव्यं

भवति । एवं चानेन अत्रोक्त: प्राभाकरपक्ष: निराकृतो भवति । वेदान्तवाक्यै: ब्रह्मण: तात्पर्यविषयत्वाधिगमावसरे एकतात्पर्यविषयीभूतेषु बह्वीषु श्रुतिषु मध्ये ऐतरेयवाक्यं 'आत्मा वा इदमेक एवाग्र आसीत्' इति अत्र पठितम् । सर्वा अपि उपनिषच्छ्रुतय: ब्रह्मणि तात्पर्यं लब्ध्वा तत्रैव स्वात्मानं कृतार्थं करिष्यन्तीति यावत् ।

अनया ऐतरेयश्रुत्या ब्रह्मण: एकत्वं, जीव-प्रपंचयो: आत्मन: अभिन्नत्वं, तस्यात्मन: सत्त्वं, अद्वितीयत्वं च इत्येतानि अद्वैततत्त्वानि प्रतिपादितानि भवन्ति ।

इयमेव एतरेयश्रुति: (ब्र० सू० १-१-५) इत्यत्र पठिता भवति । अस्मिन् ईक्षत्यधिकरणे जगत्सृष्टिविचार:, तत्र जगत्कारणं प्रधानं उत ब्रह्म इति सन्दिह्य पूर्वपक्षिण: सांख्या: प्रत्यवतिष्ठन्ते - जन्मादिसूत्रे शास्त्रयोनित्वाधिकरणे च ब्रह्म जगत्कारणमित्यत्र ये हेतव: प्रदर्शिता: ते एव हेतव: जगत्कारणं प्रधानम् इत्यत्रापि समाना एव । भवद्भिरेतावताकृतयुक्तिप्रत्युक्तिभि: मत्सिद्धान्त: साधित: । मदर्थे कृतपरिश्रमेण भवत्पक्ष: नदीमध्ये द्वयोर्नावो: पादसंबन्धवत् डोलायमानो वर्तते । ब्रह्मण: सर्वज्ञत्वसर्वशक्तिमत्त्वादीनि यानि लक्षणानि प्रोच्यन्ते तानि सर्वाणि लक्षणानि प्रधाने संभवन्ति । अत: मन्ये प्रधानस्थाने भवद्भि: केवलं ब्रह्म इति नामविशेष: व्यवह्रियत इति । ब्रह्मणि निरुच्यमाना: सर्वज्ञत्वादयो धर्मा: प्रधानेप्युपपद्यन्त इत्यत: आवयो: समानयोगक्षेम इति चेत्-न । अत्राह भाष्यकार: यदि प्रधानं पुरुषस्यापि स्वयमेव कारणं भविष्यति तर्हि आवाभ्यां समान एव योगक्षेम: कथनीय:, एवं न संभवति । अत: भवत्पक्ष: गगनपुष्पं भवति । प्रधान-ब्रह्मणो: अस्त्यत्र कश्चन विशेष: यद्ब्रह्मणि ईक्षितृत्वं वर्तते, प्रधाने ईक्षितृत्वं न संभवति । अशब्दं हि तत्प्रधानम् । अशब्दस्य कथमीक्षितृत्वं संभवेत् । यथा सारथिना अधिष्ठित: सन् रथ: प्रवर्तते, तद्वत् इदं प्रधानमपि पुरुषाधिष्ठितं प्रवर्तते । अत: त्रिगुणात्मकरूपप्रधानाधिष्ठातृतया अन्य: एक: पुरुषोऽस्ति । तस्यैव द्रष्टृत्वमीक्षितृत्वादयश्च संभवन्ति । तथा चोक्तं सांख्यकारिकायाम् -

'तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।

केवल्यं माध्यस्थं द्रष्टृत्वमकर्तृभावश्च ।।'

(सांख्य० का० १६) इति । प्रधाने ईक्षितृत्वाभावेन इदानीं स्वपक्षस्यात्र स्थितिरेव अपहृता भवति । प्रधानस्य द्रष्टा एकः भवति, एवं ब्रह्मणः द्रष्टा एको स्वयमेव । स्वयं ज्योतिःस्वरूपात्, ज्वलति प्रकाशे प्रकाशान्तरस्यापेक्षा नास्ति । अत एव श्रुत्यादिषु ब्रह्म एकं अद्वितीयमिति उद्घोष्यते । अतः शास्त्रप्रमाणकं ब्रह्मेति ।

एवं ब्रह्मणः ईक्षितृत्वनिरूपणावसरे एव तस्येदार्ण्यं दृढीभावेन निरूपयितुं उपनिषदां अनेकाः श्रुतयः उदाहृताः । तास्वन्यतमा इयं श्रुतिः -

'आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन
मिषत् स ईक्षत लोकान्नुसृजा इति । स इमान्
लोकानसृजत ।'

(ऐ० उ० १-१-१,२)इति । अत्र सांख्यकृतपूर्वपक्षनिरासाय 'स ईक्षत लोकान्नुसृजा' इति ग्रन्थः पर्याप्तः । कस्य ईक्षणमिति जिज्ञासायां आत्मन ईक्षणमिति निर्वक्तुं संपूर्णेयं श्रुतिः परिगृहीता । श्रुतिरियं सांख्याभिप्रेतस्य प्रधानस्य विरुद्धं ब्रूते । आत्मा एकः, सृष्टेः पूर्वापरं च स एव , तस्यान्यद् सर्वं मिथ्या, सृष्टेः कारणमपि स एव, सृष्टिंगतस्य प्रपंचस्य अधिष्ठानमपि स एव इत्यनयोक्तं भवति । अस्याः श्रुतेरर्थः सुगमः ।

विज्ञानामृताख्ये सूत्रभाष्ये विज्ञाभिक्षवः अत्रैवमभिप्रयन्ति[1] -

'ये तु वेदान्तदर्शने सांख्यादिभिः सह पारमार्थिकं
विरोधं मन्यन्ते तेषां सांख्याद्यनुसारिश्रुतिभिः
सहापि विरोधो दुर्निवार इति '

इति । अनन्तरं तैरेव 'तत्रैते संग्रहश्लोकाः' इत्यारभ्य केचन श्लोकाः निगदिताः -

'वेदान्तोक्तविचारे तु वयं जैमिनिपक्षगाः ।
पंचविंशतितत्त्वानां षड्विंशे प्रविलापनात् ।।
महाप्रलयकालीनं ब्रह्माऽद्वैतं तदात्मता ।
ब्रह्मणः सृष्टिरित्यादि चास्माकमधिकं मतम् ।।'

---

१ वि० भा० पृ० ८६ - ६०

इति । (ब्रह्म-ब्रह्म) अनेन ग्रन्थेन उपनिषत्सु ब्रह्म एव प्रतिपाद्यते, तस्य नित्यत्वं चेति सिद्धान्ताः भवन्ति इति ।।

अनन्तरं च सूत्रभाष्यस्थात्मगृहीतयधिकरणे (ब्र० सू० ३-३-१६) इत्यत्र श्रुतिरियं प्रतिपादिता । अस्याधिकरणस्य विषयवाक्यमियमेव ऐतरेयश्रुतिः भवति । श्रुतावत्र पठितात्मशब्देन परमात्मा गृह्यते, उत अन्यः कश्चन इति सन्दिह्य अनेनात्मशब्देन अन्यः कश्चन एव गृह्यते इति पूर्वपक्षं करोति पूर्वपक्षी । तस्याशयः - श्रुतौ आत्मा- पूर्वमेकः स आसीदिति प्रतिपाद्य अनन्तरं सृष्टिं चकार इत्युच्यते । अन्यत्र श्रुतिषु परमात्मा अकर्ता अभोक्ता निर्गुणः कूटस्थ इति प्रतिपाद्यते । सत्येवं सः कथं सृष्टिकर्ता भवितुमर्हति ? यदि भवेत् तर्हि गत्यन्तरेण सः सृष्टेः निमित्तकारणमेव भवति । सृष्टेः तस्मिन् निमित्तकारणे सति तस्यैव सृष्टिः, सर्वं पदार्थजातं ब्रह्म, प्रपंचः ब्रह्मणि अध्यस्तः, इति वक्तुं न शक्यते । इयं श्रुतिस्तु प्रतिपादित आत्मा एव सृष्टिकर्ता इति वक्ति । तस्मात् अयमात्मा अन्यः, जीवो वा भवतु उत ईश्वर इति । वाक्यान्वयदर्शनाच्च अनेन आत्मशब्देन परमात्मा नोच्यत इति ।

अत्र सिद्धान्तेराशयः - श्रुतौ प्रतिपादितात्मशब्देन परमात्मा एव गृह्यते । आत्मशब्दः सर्वत्र समानत्वात् । तस्मिन् भेदाभावाच्च । आत्मनि उत्कृष्ट-निकृष्ट, पूर्वापरधर्मा न सन्ति । अतः आत्मा एकः, स एव परमात्मा ब्रह्म इति । यद्यपि स आत्मा निष्क्रियः तथाऽपि अविद्यायाः सहयोगेन नामरूपकर्मवशेन च जगत्सृष्टिं करोति, यथा राज्ञः मृगक्रीडावत् । अत एव तस्येच्छापूर्विका सृष्टिः भवति । स्वसन्तोषोपशमनाय निष्क्रियोऽपि सः अविद्यया सक्रियो भूत्वा लीलया लोकसृष्टिं करोति । एवं च सति सः सृष्टेः उपादानकारणमेव न निमित्तकारणम् । यथा मृत्सत्वे घटः, मृदभावे घटाभाव इति तद्वदत्रापि । पूर्वपक्षिणा यदुक्तं ब्रह्म जगत्सृष्टेः निमित्तकारणमिति, तदपि साधु एव । यथा घटपदार्थदृग्गोचरत्वे उपादानकारणभूता मृत्, निमित्तकारणभूतः कुलालश्च इति कारणद्वयमपि अपेक्षितौ भवतः एवं जगत्सृष्टावपि । अत्र ब्रह्मभिन्नस्यान्यस्यासत्त्वात् ब्रह्म एव सृष्टेः निमित्तोपादानकारणमुभयमपि भवति । इति ।

संभवति परमात्मकर्तृका सृष्टि: तदर्थं ईश्वरस्य जीवस्य च कल्पना अन्यायुया भवति ।

यदुक्तं पूर्वपक्षिणा - महाभूतसृष्ट्यनन्तरं लोकसृष्टि:, अनया श्रुत्या केवलं केवलं लोकसृष्टिरेव श्रूयते, अतोऽयमात्मा परमात्मभिन्न इति । एतदप्यसमंजसम् । यत: महाभूतसृष्टि: परमात्मना कृता, लोकसृष्टि: आत्मना क्रियत इति वक्तुं युक्तियुक्तं कारणं नास्ति । किंच तस्मिन् उत्कृष्टनिकृष्टभाव: गुणत: कर्मतो वा यदस्ति तर्हि त्वदुक्ति: आलोचनार्हो भवेत् । तस्मात् स: परमात्मा तैत्तिरीयश्रुत्युक्तरीत्या अनन्तरं महाभूतानि सृष्ट्वा अनन्तरं लोकसृष्टिं करोति इत्यस्माकं राद्धान्त: । यदप्युक्तं अस्या: श्रुते: वाक्यान्वयदर्शनेन अयं परमात्मभिन्न इति, एतदपि न मनोहरम् । त्वया वाक्यान्वयादित्युच्यते, मया तु वाक्यावधारणात् इति । यथा त्वया वाक्यान्वयो त्र प्रदर्श्यते तथा मया आंजसरूपावधारणमत्र प्र निरुच्यते इति । तस्मात् 'आत्मा वा इदमग्र आसीत्' इत्यत्र परमात्मा एव गृह्यते, तस्यानुगुणमेव विशेषणमप्युत्तरं समनन्तरैतरेयश्रुत्या बोध्यत इति आत्मशब्दविचार: ।।

अथ च ब्रह्मसूत्रशांकरभाष्ये प्रथमाध्यायस्य चतुर्थे पादे चतुर्दशे सूक्ते कारणत्वाधिकरणे भाष्यकारै: इमे ऐतरेयश्रुती पठिते वर्तेते -

'स इमांल्लोकानसृजताम्भोमरीचीमरमाप:'

'आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन

मिषत् स ईक्षत लोकानुसृजे'

(ऐ० उ० १-१,१) इति । श्रुत्यर्थ: सुगम: इति कृत्वा अधिकरणसारांश: निगद्यते । तथा हि -

अस्मिन्नधिकरणे कारणे ब्रह्मणि अन्वयपर्यवसानाय, कारणविषयवाक्यानामविरोधनिरूपणाय च परस्परं विप्रतिपन्नानि जगत्कारणप्रतिपादकवाक्यानि ब्रह्मणि मानं न वा इति विप्रतिपत्तिविषये विरोधं प्रकटयति पूर्वपक्षी - कारणीभूतेषु एतेषु श्रुतिवाक्येषु कारणभूत: सत् उत असदिति । श्रुतानां विप्रतिपत्त्या

सृष्टिकारणं ईश्वर: तदन्य:, सोपाधिको निरुपाधिको वा सगुण: उत निर्गुण: इत्यादयो विप्रतिपत्तय: प्रादुर्भवन्ति । तथा हि -

तैत्तिरीयश्रुतौ आकाशस्योत्पत्ति: श्रूयते । छान्दोग्यश्रुतौ तेजस: उत्पत्ति: । ऐतरेयोपनिषदि लोकानामुत्पत्ति: । एवमेकस्मादात्मन: सकाशात् सृष्टिक्रम: विचित्ररूपो भवति । एवं सृष्टौ विरोध: कार्यरूपसृष्टे: कारणभूते ब्रह्मण्यपि विरोध इति । विप्रतिपत्तेर्वस्तुनि विकल्पस्यासंभवात् । तस्मात् सृष्टौ स्मृतिन्यायप्रसिद्धाभ्यां कारणान्तरपरिग्रह: स्वीकर्तुं योग्य इति । ननु कारणान्तरं प्रधानं भवतीति चेत्-न । विभिन्नासु श्रुतिषु सृष्टिक्रम: विभिन्नरीत्या वर्तते ।तथाऽपि स्रष्टरि एकस्मिन् परमात्मनि विगानं नास्ति । सर्वत्र च सृष्टिरूपकार्यस्य कारणभूत: सर्वज्ञ इत्यादिगुणविशिष्ट: एकोऽद्वितीय: स परमात्मा इति वेदान्तशास्त्रोपनिषदां डिण्डिम: । तैत्तिरीयश्रुतौ यद्यपि आकाशादिक्रमेणैव सृष्टि: प्रतिपाद्यते तथाऽपि आकाशवाय्वनलादौ तत्र तत्र परमेश्वरस्य साक्षात्कर्तृत्वात् युज्यत एव आत्मन आकाशस्संभूत इति ।एवं वक्तुं शक्यत एव परमेश्वरादनलस्संभूत इति । तैत्तिरीयश्रुतौ आकाशाद्वायुर्वायोरग्नेस्तेज इति यथा तथा छान्दोग्यश्रुतौ तेजसो वायु: वायोराकाश: इति वर्तमाने सति परस्परश्रुत्योर्विरोध: स्यादेव । न तु, तथा वर्तते । एवं प्रश्नोपनिषदि प्राणस्योत्पत्तिरिति प्रतिपादितायां श्रुतावपि नास्ति विप्रतिपत्ति: । उपक्रमाभिधायिनी ऐतरेयश्रुतिरपि सृष्टिक्रमविषये नाविरुद्धा भवति । अत: पूर्वपक्षिणा कार्यविषयकविप्रतिपत्त्या तत्कारणभूते ब्रह्मणि सन्देहो सर्वथा न कार्य इति । तथा चात्र शांकरभाष्यम्[१] -

'न च कार्यविषयेण विगानेन कारणमपि ब्रह्म
सर्ववेदान्तेष्वविगीतमधिगम्यमानमविवक्षितं
भवितुमर्हतीति शक्यते वक्तुम् । अतिप्रसंगात् ।'

इति । तथा चास्याम् ऐतरेयश्रुतावपि कारणरूपेणावस्थिताद्वितीयात्मना एव सृष्टिमाचष्टे । 'स इमांल्लोकानसृजत' इति लोकानां सृष्टिमाचक्षाणा उपक्रमाभिधायिनी इयं श्रुतिरपि अविरुद्धा भवतीति । इति शम् ।

---

१ ब्र० सू० शां० भा० पृ० ४८६

अस्मिन् आत्मगृहीत्यधिकरणे (ब्र० सू० ३-३-१६) पूर्वपक्षप्रस्तावेन 'अदोऽम्भः परेण दिवम्' इति ऐतरेयश्रुतिरुदाहृता वर्तते । अनया श्रुत्या अत्र पूर्वपक्षी स्वसिद्धान्तं स्थापयितुं प्रयतते । 'आत्मा वा' इति श्रुत्या परमात्मा न बोध्यते, लोकसृष्टिकथनात् । कथं लोकसृष्टिः अवगम्यत इत्यत्र श्रुतिमिमामुदाजहार । अनया लोकसृष्टिः प्रतिज्ञायत इत्यर्थः । अम्भः शब्देन पृथिवीतः उपरितनलोकाः चन्द्रमसादयः गृह्यन्ते । अतः अयमात्मा परमात्मभिन्न इति तस्याशयः । अनया श्रुत्या जगत्सृष्टिराम्नायत इति शम् ।।

अत्र एताः भवन्ति ऐतरेयोपनिषच्छ्रुतयः -

'कथं न्विदं मदृते स्यात्' (ऐ० उ० १-३-११)

'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' (ऐ० उ० १-३-१२)

'यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितम्' १-३-११

'अथ को ऽहम्' (ऐ० उ० १-३-११)

'स एतमेव पुरुषं ब्रह्म ततममपश्यत्' (ऐ० उ० १-३-१३)

'एष ब्रह्मैष इन्द्रः' (ऐ० उ० ३-१-३)

'सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' (ऐ० उ० ३-१-३)

इति । इमाः श्रुतयः आत्मगृहीत्यधिकरणे 'आत्मा एकः' इति सिद्धान्तयितुं सिद्धान्तिना आचार्येण उदाहृताः वर्तन्ते । अधिकरणस्यास्य विषयविशेषः पूर्वमेवात्र प्रतिपादितः ।

'आत्मा वा' इत्यत्र आत्मनः लोकसृष्टेश्च अनुस्यूतवाक्यान्वयदर्शनेन अत्रोक्तः आत्मा परमात्मभिन्नः, अन्यः यः कश्चित् इति पूर्वपक्षिणा कृतादोपस्य समाधानत्वेन सिद्धान्ती प्रतिद्वन्द्विहेतुयुक्तं सूत्रं व्याचष्टे -

'अन्वयादिति चेत् स्यादवधारणात्' (ब्र० सू० ३-३-१७)

इति । अत्र पूर्वपक्षिणा कृताक्षेपस्य सांप्रतिकं समाधानं अनेनैव भवति । अत्र सिद्धान्तिना हेत्वन्तरं निगद्यते । अत्र आचार्यः द्वयोरपि हेत्वोः बलाबले परीक्ष्यमाणे तात्पर्यस्य बलीयस्त्वात् हेत्वन्तरोपन्यासमुखेन पूर्वपक्षनिरासो भवतीति

मनसि विचिन्त्य हेत्वन्तरोपन्यासमुखेन सूत्रं निजगाद इति प्रतिभाति । अत्र वाक्यान्वयापेक्षया तात्पर्यान्वय एव बलीयान्, यत: वाक्यान्वयेन पदानामर्थो ज्ञायते किन्तु तात्पर्यान्वयेन वाक्यान्वय एव ज्ञातो भवति इति सिद्धान्ते: स्वाभिलषितसिद्धि: । एवं प्रतिपादनावसरे एव आचार्यै: इमा: ऐतरेयश्रुतय: निबद्धा: वर्तन्ते । आसां सर्वासां श्रुतीनां आत्मैक्ये तत्तादात्म्ये च तात्पर्य पर्यवसितं भवति । तदर्थं च प्रारभ्यते इयं श्रुति: - 'कथं न्विदं मदृते स्यात्' इति । अनया श्रुत्या सृष्टा: मद्विना मया सृष्टा: एते पदार्था: जीवाश्च कथं स्थास्यन्ति ? इति ब्रह्मण: चिन्तनरूपार्थो लभ्यते । तथा च भाष्यम्[1]

'ब्रह्मात्मत्वं त्विह विवक्षितम् । तथा हि -
अम्भ: प्रभृतीनां लोकानां लोकपालानां चाग्न्यादीनां
सृष्टिं शिष्ट्वा करणानि, करणायतनं च शरीरमु-
द्दिश्य स एव स्रष्टा कथं न्विदं मदृते स्यात् इति
वीक्ष्येदं शरीरं प्रविवेशेति ।'

इति ।

उक्तार्थस्य सम्यग्विवेचनार्थं अनन्तरं पपाठ भाष्यकार: -'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' इति । अनया श्रुत्या तद्ब्रह्म एतमेव मूर्ध्न: केश-विभागावसानं सीमानं छिद्रं कृत्वा एतया ब्रह्मरंध्रसंज्ञया द्वारा शरीरं प्राप्तवत्, अथवा शरीरं प्रविष्टम् इत्युक्तं भवति । अथ उक्तार्थस्य दृढीकरणे श्रुतिमिमामाह - 'यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितम्' इति । इयमपि श्रुति: शरीरान्त:करणवाक्प्राणादीनां ब्रह्मपरत्वमुपदिशति । तस्य तस्य इन्द्रियस्य अधिष्ठाता तद् ब्रह्म इत्यर्थ: । उक्तमर्थं सन्देह-विपर्यासनिरासपूर्वकं प्रश्नप्रतिवचन-रूपेण दृढीकरोतीयं श्रुति: - अथ कोऽहमिति । अनया शरीरे विद्यमानवाक्-प्राणादिव्यापारेषु अधिष्ठानभूत: कोऽहं भवितुमर्हसि ? इति स्वयमेव प्रश्नमेक-मुपस्थाप्य समाधानत्वेन ब्रूते - 'स एतमेव पुरुषं ततममपश्यत्' इति । श्रुत्या अनया स ब्रह्म शरीरव्यापारभूतस्य तस्य अधिष्ठानं स्वात्मत्वेनापश्यत् । अत्रायं

---

१ ब्र० सू० शां० भा० पृ० ६६७ - ६६८

भाव: - शरीरे प्रविष्ट: स परमात्मा शरीरान्तर्गतं तमेव परमात्मानं ब्रह्म, आकाशवद्व्याप्ततमं यद्ब्रह्म तद्रूपेण अमुमात्मानमपश्यत् इति । एवं चानया श्रुत्या जीव-परमात्मनो: तादात्म्यरूपमैक्यं बुध्यते इति मन्तव्यं विपश्चिद्भि: । तथा च शांकरं भाष्यम्[1] -

> 'तथा उपरिष्टादपि - 'एष ब्रह्मैष इन्द्र:'
> इत्यादिना समस्तं भेदजातं सह महाभूतैरनुक्रम्य 'सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोक: प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' इति ब्रह्मात्मत्वदर्शनमेवावधारयति । तस्मादिहात्मगृहितिरित्यनपवादम् ।'

इति ।

इदानीमनन्तरं विद्यमानाया: श्रुतेरर्थो व्याख्यायते - प्रज्ञानेत्रमित्यादि । शरीरे प्रविष्ट: परमेश्वर एव परब्रह्म, स एव परमात्मा, प्रजापति: सूत्रात्मा इत्यादिना व्यपदिश्यते । ब्रह्मचैतन्यमेव प्रज्ञा इत्युच्यते । नीयते अनेनेति नेत्रम् । तथा च यस्य वस्तुन: नियन्तृ भवति स: प्रज्ञानेत्रमिति भण्यते । तस्मिन्नेव ब्रह्मचैतन्यस्वरूपाधिष्ठाने प्रतिष्ठित: लोकरूप: भूत-भौतिकप्रपंच: 'प्रज्ञानेत्र:' ब्रह्मनियन्तृक: । अनेन ब्रह्मणि पंपंच: अध्यस्यतया वर्तते इत्युक्तं भवति । य: ब्रह्म प्रज्ञा, स एव सर्वस्य लोकस्य प्रतिष्ठा अधिष्ठानरूपत्वेन वर्तमानो भवति । तेनाधिष्ठितं सर्वं जगत् । अन्यत्सर्वं सविस्तरं अधिकरणस्यास्य शांकरभाष्ये एव द्रष्टव्य: इति ।

अपि च 'प्रज्ञानं ब्रह्म' इति श्रुतिरेव ऐतरेयोपनिषद: सर सारसिद्धान्तभूतं शिरोवाक्यं भवति । अत: साम्प्रदायिका: ~~अस्या: उपनिषद:~~ ऋक्शाखाध्यायिन: अस्या: उपनिषद: अमुं वाक्यमेव महावाक्यमिति व्यवहरन्ति ।

एवं च एभि: ऐतरेयश्रुतिभि: - जीव-ब्रह्मणो: ऐक्यम्, प्रपंचस्य मिथ्यात्वम्, ब्रह्मण: सतस्त्वम्, कार्यरूपे प्रपंचे तस्याधिष्ठानत्वम्, नियन्तृत्वेन रूपेण स एव सर्वज्ञ: इत्यादय: शिरोभूता: अद्वैतसिद्धान्ता: प्रतिपादिता: भवन्ति । भाष्यकारा अपि एतान् अर्थान् मनसिकृत्यैवोचु: - तस्मादिह आत्मगृहीतिरिति अनपवादमिति ।

---

१ ब्र० सू० शां० भा० पृ० ६६८

'अग्नि: वाग्भूत्वा मुखं प्राविशत्'

'वायु प्राणो भूत्वा नासिके प्राविशत्'

(ऐ० उ० १-२-४) इति । इयं प्रथमाध्यायस्य द्वितीयखण्डे चतुर्थी भवति । श्रुत्यर्थः -

पूर्वं पूर्वस्मिन् प्रथमे खण्डे पुरुषाशरीरजीवस्योत्पत्तिः प्रतिपादितः । स जीवः आदिजीवत्वेन हिरण्यगर्भो वा भवतु उत अन्यो वा तत्र नास्ति विप्रतिपत्तिः । एवं पुरुषं सृष्ट्वा तेन ब्रह्मणा तस्य संरक्षणाय अथवा संहाराय लोकपालादीनां सृष्टिः द्वितीयखण्डारम्भे श्रूयते । तथा च श्रुतिः -

'ता एताः देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन्'

(ऐ० उ० १-२-१) इति । अत्र अग्न्यादीन् लोकपालत्वेन संकल्प्य सृष्ट्वा तेषां अविद्याकामकर्मरूपमहासंसारं प्रकल्पितवान् इति अनेन सिध्यति । इन्द्राग्न्यादिदेवादयोऽपि संसारे बद्धा एव । तेषामपि ब्रह्मशास्त्रविचारेणैव मोक्ष इति निरूपणार्थं ब्रह्मसूत्रेषु एतत्सूत्रं निबद्धं भवति बादरायणेन -

'तदुपर्यपि बादरायणः संभवात्' (ब्र० सू० १-३-२६)

इति । एवं महाभौतिकप्रपंचे सृष्टान् अग्न्यादिलोकपालादीन् अध्यात्मे जीवे तत्तत्करणविशिष्टाधिदैविकरूपेण वक्तुमुपक्रमते इयं श्रुतिः - 'अग्निर्वाग्भूत्वा' इति । श्रुत्यर्थः स्पष्ट एव । यथा राज्ञः अनुज्ञां प्रविलम्ब्य बलाधिकृतादयः सेनापत्यादयः नगर्यां प्रविशन्ति तथा ईश्वरस्यानुज्ञां प्राप्य अग्न्यादयो देवाः देहस्थसमानरूपं तत्तत्स्थानं प्रविष्टवन्त इति । एवं वायोरपि द्रष्टव्यः ।

सूत्रभाष्ये इयं श्रुतिः द्वितीयाध्यायस्य तुरीयपादे 'ज्योतिराद्यधिष्ठानं तु तदामननात्' (ब्र० सू० २-४-१४) इति सूत्रव्याख्यानावसरे भाष्यकारैः शंकराचार्यैः उद्धृता वर्तते ।

अधिकरणेऽस्मिन् किं प्राणादयः देवताधिष्ठिताः सन्तः प्रभवन्ति, उत न इति विचार्यते । तत्र तावत्प्राप्तः पूर्वपक्षः - प्राणादयः देवताधिष्ठिताः सन्तः न प्रभवन्ति । कुत इति चेत् यदि प्राणानां देवताधिष्ठातृत्वरूपप्रवृत्तिः अभ्युपगम्यते तर्हि अधिष्ठात्रीणां तासां देवतानां भोक्तृत्वप्रसंगः । यद्येवं स्वीक्रियते तर्हि शारीरस्यैव भोक्तृत्वमिति नियमस्य भंगः प्रसज्येत, उभयोरपि

समानफलके उपविष्टत्वात् । अत: एवं न वक्तव्यम् । तस्मात् प्राणादय: स्वस्मै स्वस्मै कार्याय स्वमहिम्नैव प्रभवन्तीति । अत्राह भाष्यकार: - ज्योतिराद्यधिष्ठानमिति । तथा चात्र शांकरं भाष्यम् [1] -

'ज्योतिरादिभिरग्न्याद्यभिमानिनीभि: देवताभिरधिष्ठितं वागादि करणजातं स्वकार्येषु प्रवर्तत इति प्रतिजानीते ।'

इति । उक्तार्थमेव श्रुत्यामननेन दृढीकरोति - 'अग्निर्वाग्भूत्वा' इत्यादिना । तथा स्मृतिरपि -

'वागध्यात्ममिति प्राहु: ब्राह्मणास्तत्त्वदर्शिन: ।
वक्तव्यमधिभूतं तु वह्निस्तत्राधिदैवतम् ।।'

इति । तथा चात्र न्यायनिर्णयपंक्ति: [2] -

'तद्भावकत्र एवात्र भाति न च तदधिष्ठातृत्वमित्याशंक्य चेतनानामचेतनत्वासिद्धे: अधिष्ठातृत्वमेवात्रेष्टमिति'

इति । प्रकरणेऽस्मिन् भामतीग्रन्थोऽपि [3] -

संभवति तु देवतानामिन्द्रियाधाकर्मणा ज्ञानेन साक्षात्कृतवतीनां तत्स्वरूपभेदतदुपयोगभेदविज्ञानम् । तस्माद्यास्ता: एव देवतास्तत्तत्करणाधिष्ठात्र्य इति युक्तम् ।'

इति । एवं चात्र प्रतिपादितै: ग्रन्थै: वागादीनां अग्न्यादिदेवताधिष्ठितत्वं सिद्धं भवति ।

एवमन्यत्रापि 'प्रदानवदेव तदुक्तम्' (ब्र० सू० ३-३-४३) इति ब्रह्मसूत्रशांकरभाष्ये तत्त्वाभेदेन अध्यात्ममधिदैवतं चोच्यते इति निरूपणार्थं श्रुतिरियं प्रतिपादिता भवति । तथा च तत्रत्यं शांकरं वचनम् [4] -

'दर्शयति च श्रुतिरध्यात्ममधिदैवतं च तत्त्वाभेदम् -
'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इत्यारभ्य ।'

इति । तस्मादनया श्रुत्या सकलभूत-भौतिकपदार्थानां अधिष्ठाता एको वर्तते स एव नित्य: परमात्मा इत्यत: तस्याधिष्ठानाधिष्ठातृत्वभेदेन स्वरूपं प्रदर्शितमिति ।

---

१ ब्र० सू० शां० भा० पृ० ५८३ ४ ब्र० सू० शां० भा० पृ० ७५३
२ न्या० नि० पृ० ५८३
३ भा० पृ० ५८३

१५ कौषीतकि-ब्राह्मणोपनिषद्व्याख्यानि

१ सू कौषीतकि-ब्राह्मणोपनिषद्वाक्यानि

श्रीमच्छंकराचार्यैः ब्रह्मसूत्रभाष्ये प्रतिपादितानां ऐतरेय-आरण्यकब्राह्मणोपनिषद्वाक्यानि एतावता प्रकरणत्रयेण प्रतिपादितानि स्युः । इदानीं सूत्रभाष्ये उदाहृतानि ऋक्शाखानुविद्धानि कौषीतकि-ब्राह्मणोपनिषद्वाक्यानि लेखनार्थं स्वीक्रियन्ते । तथा हि -

कौषीतकिब्राह्मणोपनिषदः तृतीयाध्याये तृतीयखण्डिकायां पठिता इयं श्रुतिः -

> 'यथा ग्नेर्ज्वलतः सर्वा विस्फुलिंगा विप्रतिष्ठेरन्नेवमेव
> एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो
> देवा देवेभ्यो लोकाः ।'

(कौ० ३-३) इति । सूत्रभाष्ये इयं श्रुतिः -

> 'यथाग्नेर्ज्वलतः सर्वा दिशः विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथा यतनं विप्रतिष्ठन्ते
> प्राणेभ्यो देवाः देवेभ्यो लोकाः'

इति आम्नाता भवति । अत्र किंचित् पाठभेदो दरीदृश्यते । श्रुत्यर्थः सुगमः । यथा अग्नेः कणाः सर्वत्र प्रतिभासन्ते तथा परस्मात् ब्रह्मणः कणभूताः एते प्राणादयः इति ।

ब्रह्मसूत्रभाष्ये श्रुतिरियं प्रथमाध्यायस्य प्रथमपादे ईक्षत्यधिकरणे 'गतिसामान्यात्' (ब्र० सू० १-१-१०) इति सूत्रव्याख्याने पठिता भवति । सूत्रेऽस्मिन् यदि अभविष्यत् क्वचिच्चेतनं ब्रह्म जगतः कारणं, क्वचिदचेतनं प्रधानं कारणं, क्वचिदन्यदिति तर्हि वेदान्तेष्वपि भिन्ना कारणावगति उच्यते । न तु तथा । सर्वत्र वेदान्तश्रुतिवाक्येषु समानेव चेतनकारणावगतिरिति उच्यते । तथा च श्रुतिः - यथाग्नेः इति । एवं च तत्तद्वेदान्तजन्यानामवगतीनां चेतनकारणविषयकत्वेन सामान्यात् न अचेतनं जगतः कारणमिति व्यतिरेकमुखेन सूत्रार्थः । तस्मात् गतिसामान्यात् जगतः कारणं ब्रह्मेति ।

ब्रह्मसूत्रशांकरभाष्ये प्रथमाध्यायस्य प्रथमपादे एकादशं प्रतर्दनाधिकरणं कौषीतकिश्रुतिमवलम्ब्य प्रवृत्तं भवति । सूत्रचतुष्टयेऽस्मिन्नधिकरणे प्रथमसूत्रं

'प्राणस्तथा नुगमात्' (ब्र० सू० १-१-२८)

इति । अस्मिन्नधिकरणे कौषीतकिब्राह्मणोपनिषदः तृतीयाध्यायस्य प्रतर्दनाख्यायिका विषयवाक्यत्वेन स्वीक्रियते -

'प्रतर्दनो ह वै -------- प्रज्ञात्मेदं शरीरं
परिगृह्योत्थापयति ।'

(कौ० ३-१,२) इति । प्राणो स्मि प्रज्ञात्मा इत्यत्र -

'न वाचं विजिज्ञासीत ----- अजरो मृतः'

(कौ० ३-८) इति श्रुतिः आम्नाता । प्रायः अत्र तृतीयाध्यायस्य भावो विचारितः । अत्र प्राणशब्देन वायुरभिधीयते, उत तद्देवतात्मा, अथवा जीवः किं वा परं ब्रह्म इति । अनेकलिंगदर्शनात् संशयोत्थापनेन विचारस्यावसर इति । तत्र पूर्वपक्षी आक्षिपति - पूर्वस्मिन्नधिकरणे प्रकृतब्रह्मवाचकयच्छब्दबलात् ज्योतिश्श्रुतिः ब्रह्मपरा इत्यभिहितम् । तथा नेह प्राणश्रुतिमंगे किंचिद्बलमस्ति, मिथो विरुद्धानेकलिंगानामनिश्चायकत्वात् प्रसिद्धेः वायुः प्राणमिति । एवं प्राप्ते अभिधीयते सिद्धान्तिना - प्राणशब्दं ब्रह्मेति । कौषीतकिश्रुतेः पूर्वापरपर्यालोचने वाक्ये पदानां समन्वयः ब्रह्मप्रतिपादनपरः प्रतीयते । तथा हि - तत्र तावदुपक्रमे इन्द्रेण 'वरं वृणीष्व' इति अनुगृहीता राजा प्रतर्दनः पप्रच्छ - मनुष्याणां हिततमं यन्मन्यसे त्वं तद्देहीति । एवमिन्द्रेणोपदिश्यमानः प्राणः परमात्मा भवति, यतः परमात्मज्ञानात् हिततममन्यन्नास्ति । अपिच तत्रैव स इन्द्रः वदति - हे प्रतर्दन । 'मामेव विजानीहि एतदेवाहं मनुष्याय हिततमं मन्ये' (कौ० ३-१) इति । एतस्मादपि यदि प्राणः प्रसिद्धवायुर्भवति तर्हि इन्द्रः मामेव विजानीहि इति न भाषेत । अतः प्राणः परमात्मा एव भवति । विस्तरभिया अधिकरणस्यास्य प्रतिपादनं नेह क्रियते । ब्रह्मसूत्रभाष्ये (१-१-२८) इत्यत्र द्रष्टव्यः । एवं चाधिकरणेऽस्मिन् प्राधान्येन कौषीतकिब्राह्मणोपनिषच्छ्रुतिरेव प्रतिपादिता । अस्यामुपनिषच्छ्रुतौ प्रतिपाद्यमानः प्राणः परं ब्रह्म इति सूत्रभाष्ये आचार्यैः सिद्धान्तितं भवति इति ।।

सूत्रभाष्ये प्रथमाध्यायस्य प्रथमपादे भू (ब्र० सू० १-३-८) भूमाधिकरणस्य प्रथमसूत्रस्यान्ते - 'यच्च यो वै भूमा तदमृतम्' (छा० उ० ७-२४-१)

इति तदपि प्राणस्याविरुद्धम्, 'प्राणो वा अमृतम्' (कौ० ३-२) इति श्रुतेः ।'

इति पठितं भाष्यकारैः । अनया कौषीतकिश्रुत्या अत्र अमृतरूपं परं ब्रह्म प्राण इत्युक्तं भवति इति ।।

'यत्रैतत् पुरुषः सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येति'

(कौ० ३३ ३) इति । अस्याः कौषीतकिब्राह्मणोपनिषदः तृतीयाध्यायस्य प्रतर्दनोपाख्यानप्रकरणमिति नाम । अत्र इन्द्रः अध्यायस्य प्रथमश्रुत्या मनुष्यहिततमं प्रज्ञात्मप्राणोपासनं प्रतर्दनायोपदिशति । अत्र इन्द्रप्रतर्दनप्रश्नप्रतिवचनरूपेण निर्विशेषब्रह्मणः आख्यायिका प्रस्तूयते । अत्र उपनिषदोऽस्याः चतुर्षु अध्यायेषु अस्मिन् तृतीयाध्याये बहूनि अद्वैततत्त्वानि प्रतिपादितानि इति कृत्वा अयमध्यायः प्रशस्यतर इत्युच्यते ।

श्रुत्यर्थः - अनया श्रुत्या प्राणस्य उक्थत्वोपासने सर्वोज्जीवनहेतुत्वमाम्नायते । तथा हि - यत्र सुप्तिधाम्न्या प्रज्ञोपाधिकः कूटस्थात्मा एतत्पुरुषः करणग्रामोपरमलक्षणां सुप्तिं यतः प्राप्वानत एव न कंचन आभ्यन्तरस्वप्नं पश्यति मुख्यप्राणैकीभूतत्वात् । अतः प्राण एव एकधा इत्युच्यते । यदा विज्ञानोपाधिः विलीयते, तदा एनं प्राणं वागिन्द्रियं सर्वैः प्रज्ञानप्रभवनामभिः सह अप्येति इति ।

इयं श्रुतिः सूत्रभाष्ये प्रथमाध्यायस्य प्रथमे पादे त्रयोविंशतिसूत्रव्याख्यानावसरे शंकराचार्यैः उदाहृता वर्तते । अस्मिन् प्राणाधिकरणे 'प्राणस्य प्राणम्' (बृ० उ० ४-४-१८) इत्यादिश्रुतिषु प्रतिपाद्यमानस्य प्राणशब्दस्य कस्योपादानं युक्तमिति विचार्यते । वायुविकारस्य पंचवृत्तेः[1] प्राणस्योपादानं युक्तमिति पूर्वपक्षः । अत्र पूर्वपक्षीयं शांकरं भाष्यम् -

'प्रत्यक्षं चैतत् - स्वापकाले प्राणवृत्तावपरिलुप्यमानया-

---

१ ब्र० सू० शां० भा० पृ० १३८ - १३६

निर्क्   मिन्द्रियवृत्तय: परिलुप्यन्ते । प्रबोधकाले च पुन:
प्रादुर्भवन्तीति इन्द्रियसारत्त्वाच्च (मुलाना) भूतानामविरुद्धो
मुख्ये प्राणेऽपि भूतसंवेशनोद्गमनवादी वाक्यशेष:'

इति । एवं पंचविकारात्मकप्राणस्यैवात्र उपासनमिति प्राप्ते पूर्वपक्षे सिद्धान्ती आह - प्राणशब्दमपि परं ब्रह्म भवितुमर्हति इति । 'प्राणस्य प्राणम्' इत्यत्र पूर्वपक्षरीत्या वागादिप्राणस्य प्राणमिति, सिद्धान्तरीत्या प्राणस्य पंचवृत्ते: प्राणस्य प्राणं ब्रह्म इति अत्र विवेचयितव्यम् । कौषीतकिश्रुतावपि प्रतिपाद्यमानस्य प्राणशब्दस्य ब्रह्मैवार्थ: इति निश्चाययितुं कौषीतकिश्रुतिमिमामुदाहरिष्यति भाष्यकार: । प्राणशब्दलक्ष्ये चिदात्मनि जीवैक्यापत्तौ भेदकवागाद्युपाधीनां जडं प्राणमुद्दिश्य लय: संभवति इति श्रुते: संक्षिप्तो अर्थ: । अत्र रत्नप्रभाकारा[1]:-

'अथ यदा सुषुप्तौ जीव: प्राणे ब्रह्मणि एकीभवति,
तदा एनं प्राणं सविषया वागादयोऽपि यन्तीत्यर्थ:'

इति । अत: श्रुत्यर्थ: उभयत्र समान इति ।

अन्या कौषीतकिश्रुति: -

'यदा सुप्त: स्वप्न स्वप्नं -------------देवेभ्यो लोका:'

(क्षकौ० ३-३) इति । इयं श्रुति: सूत्रभाष्ये प्रथमाध्यायस्य तृतीयपादे नवमे देवताधिकरणे (ब्र०-सू० समाननामरूपत्वाच्चावृ

'समाननामरूपत्वाच्चावृतावप्यविरोधो दर्शनात्स्मृतेश्च'

(ब्र० सू० १-३-३०) इति सूत्रव्याख्यानावसरे भाष्यकारैरुदाहृता ।

अस्याधिकरणस्य विषयरूप: सारांश: 'यज्ञेन वाच:' (ऋ० सं० १०-७१-१) इति मन्त्रव्याख्यानावसर निरूपित: । अस्मिन् सूत्रे जगत: निरन्वयनाशे अत्यन्तापूर्वस्य चोत्पत्तौ संबन्धनित्यत्वासिद्धिरापद्येत । संबन्धिनोरभावे उत्पत्त्यभावात् अध्यापकाद्यभावे वा आश्रयाभावात् केवलस्य ब्रह्मण: ज्ञानस्य तदाश्रयत्वात् महाप्रलये विरोधस्य तादवस्थ्यं भवत्येव इति पूर्वपक्षीकृत्य सिद्धान्तयति आचार्य: - अस्माभि: संसारस्यानादित्वमभ्युपगम्यते इति ।

---

१ भा० र० पृ० १३६

अत: नास्ति विरोध: । अत्र शांकरभाष्यवचनम्[1] -

'अनादौ च संसारे यथा - स्वापप्रबोधयो: प्रलय-
प्रभावश्रवणेऽपि पूर्वप्रबोधवदुत्तरप्रबोधेऽपि व्यवहारान्न
कश्चिद्विरोध:, एवं कल्पान्तरप्रभवप्रलययोरपीति द्रष्टव्यम्'

इति । एवं 'श्रुतौ दर्शनात्' इत्युक्त्वा तां श्रुतिं निर्दिशति - यदा सुप्त: स्वप्नमिति । अनया श्रुत्या स्वाप-प्रबोधयो: प्रलय-प्रभवौ श्रूयेते । तथा चात्र इयं श्रुति: संसारस्यानादित्वस्थापनाय भाष्यकारै: उदाहृता स्यादिति भाति । यद्यप्यस्या: श्रुतेरर्थ: स्पष्ट:, तथाऽपि निश्चयज्ञानार्थं पुनश्चोच्यते - प्राण: एव परमात्मा । अत: सुषुप्तस्य पुरुषस्य परस्मिन् ब्रह्मणि एकीभावावस्था इत्युच्यते । प्रकृतं प्राणं परमात्मानं सविषयाणि अन्तर्बहिरिन्द्रियाणि स्वापे परमात्मनि लीनानि भवन्ति इति । अन्यत्सर्वं सुगमम् इति ।।

अन्या कौषीतकिश्रुति: -

'यो वैबालाक एतेषां पुरुषाणां कर्ता यस्य
वैतत्कर्म स वै वेदितव्य:'

(कौ० ४-१८) इति । अयं चतुर्थाध्याय: परापरविद्याया: दुरवगमत्वेन मन्दबुद्धिविशदार्थं विद्याद्वयप्रकाशनेन उपसंह्रियते । अस्मिन् अध्याये गार्ग्य-अजातशत्रु-संवादरूपेयमाख्यायिका वक्ष्यमाणाया: परापरविद्याया: स्तुतिं द्योतयति । अयमेव विषय: बृहदारण्यकस्य द्वितीयाध्याये दृप्तबालाकिब्राह्मणेऽपि उक्तो भवति । तत्रापि वक्तृ-श्रोतृप्रश्नप्रतिवचनयो: समानत्वं दृश्यते । अनया श्रुत्या अनात्मज्ञं प्रति आत्मबोधनप्रकार: प्रतिपाद्यते । तथा हि - अजातशत्रुणा राज्ञा पृष्ट: बालाकि: मुनि:स्वेन यावदधीतं तत्सर्वमाभासत: उपन्यस्यानन्तरं अमावास्याया: चन्द्रवत् निष्प्रभ: तूष्णीमुपरराम । तूष्णीमुपतिष्ठन्तं तं राजा अजातशत्रु: उवाच - त्वया यदुक्त: अपरब्रह्मविषय: सोऽपि न समीचीनतया उक्त:, अत: मया यथाविदितं तच्छृणु इति । अजातशत्रु: स्वयं परापर-ब्रह्मयाथात्म्यविद्वत्वात् तं मुनिं प्रतिषेधयितुं शक्तो भवति । अपि च अमुष्य-

---

१ ब्र० सू० शां० भा० पृ० २६१ - २६२

ब्रह्मविज्ञानमपि यदि प्रत्याख्यायेत तदा नैतावदेति न हि ब्रूयात् । न किंचिदपि त्वया विज्ञातमिति न मयोक्तमिति राजा मुनिना भणितापरविद्याया: प्रशंसां करोति । अत: अपरब्रह्मापि अस्त्येव, तस्यापरब्रह्मण: परब्रह्माधिगमद्वारभूतत्वात् । एवमभिधाय स राजा बालाकिं संबोधयति - हे बालाके ! इति । य: परमात्मा एतेषां पुरुषाणां वागादिकरणग्रामप्रवृत्तिनिमित्ततया कर्तृरूपेणावतिष्ठते, वागादिकरणग्रामप्रवृत्तिनिमित्तस्य तत्सर्वासंस्पृष्टतया स्वयं स्थित्वा तत्प्रवृत्तिनिवृत्तिनिर्वाहकत्वरूपेणापि तिष्ठति स: अयमात्मा स्वोपलब्धे: उपायभूतै: वागादिकरणसंघै: तत्प्रवृत्तिनिमित्ततया तद्वृत्तिसद्भावाभावप्रकाशकतया तदारोपापवादाधिकरणतया निरधिकरणकनिष्प्रतियोगिकस्वमात्रतया च त्वया वेदितव्य इति उपदिशति । अनया उदाहृतश्रुत्या वागादय: अस्वतन्त्रा:, तेषां कर्ता परं ब्रह्म एवेति, +शरीरे ब्रह्मण: कर्तृत्वं उपदिष्टं भवतीति च ।

सूत्रभाष्ये प्रथमाध्यायस्य च चतुर्थपादे पंचमे जगद्वाचित्वाधिकरणे इयं कौषीतकिश्रुति: भाष्यकारै: विषयवाक्यत्वेन म आम्नाता भवति ।

अस्मिन् चतुर्थपादे अव्यक्तार्थकश्रुतीनां मुख्यतात्पर्यभूते ब्रह्मणि समन्वय: क्रियते । अस्मिन्नधिकरणे विषयवाक्यत्वेन पठितायां कौषीतकिश्रुत्यां वर्तमानेन वेदितव्य इति शब्देन जीव: उपदिश्यते अथवा मुख्यप्राण: उत परमात्मा इति संशये प्रथम: पूर्वपक्ष: 'यस्य वैतत्कर्म' इति श्रुतौ दर्शनात् प्राणापानादिभेदेन तस्य तस्य तत्तत्कर्मण: विहितत्वात् प्राणस्य श्वासोच्छ्वासरूपस्य अविरतकर्मण: दर्शनाच्च अस्यां श्रुतौ वेदितव्यत्वेन प्राण एव उपदिश्यत इति ।

अथवा वेदितव्यत्वेन जीवो वा भवतु । तस्य जीवस्य धर्माधर्मलक्षणं कर्म भवति । अपि च जीवप्रयुक्तानां देहेन्द्रियादीनां कर्म जीवस्य भवति । तस्मात् मुख्यप्राणो वा जीवो वा वेदितव्यत्वेन भवतु इति प्राप्ते पूर्वपक्षे भाष्यकार: प्राह - अस्यां कौषीतकिश्रुत्यां वर्तमानेन वेदितव्येति पदेन परमात्मा एव वेदितव्य इति । अयं परमात्मा न केवलमादित्यादीनां कर्ता भवति, किन्तु सर्वस्य जगत: स: कर्ता । सृष्टिरूपाख्या इयं जगत्सृष्टि:

तस्यैव कर्म भवति । क्रियते इति व्युत्पत्त्या तस्य कार्यं भवति । अत: सामान्य-विशेषार्थवाक्याभ्यां जगत्कर्ता ततो निकृष्ट इति हे बालाके त्वया द्रष्टव्य इति श्रुत्यर्थ: । अस्या: कौषीतकिश्रुते: अजातशत्रोर्वाक्यसंदर्भपौर्वापर्यपर्यालोचनया योऽर्थ: प्रतिभाति स एवार्थ: अत्र ग्राह्य इति सिद्धान्तिनामाशय: । तथा च शांकरं भाष्यम्[1] -

> 'य एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता, किमनेन विशेषेण, यस्य कृत्स्नमेव जगदविशेषितं कर्मेति । वा शब्द एकदेशावच्छिन्नकर्तृत्वव्यावृत्त्यर्थ: । ये बालाकिना ब्रह्मत्वाभिमता: पुरुषा: कीर्तिता: तेषामब्रह्मत्व-ख्यापनाय विशेषोपादानम् ।'

इति । सर्वजगतां कर्ता परमेश्वर इति सर्ववेदान्तेषु अवधारितो भवति ।

अपि चात्र उपक्रमे एव 'ब्रह्म ते ब्रवाणि' इत्युक्तत्वात् अनन्तरं कथं वा तेन अमुख्यं ब्रह्म बालाकये उपदिष्टं स्यात् ? सोऽपि बालाकि: राजोक्तेरनन्तरं तूष्णीं बभूव । यदि राजा ब्रह्मण: अन्य: उपदिष्ट: स्यात् तर्हि तेन बालाकिना अनन्तरमपि प्रश्न: अवश्यं कृत: स्यात् । न तथा दृश्यते । राज्ञा एव अपरब्रह्मविद्या त्वया ज्ञाता भवति इत्युक्तत्वात् बालाकिरपि विद्वानेव भवति । भवति च वाचस्पतिमिश्राणां संग्रहश्लोक: -

> '[2]मृषावादिनमापोद्य बालाकिं ब्रह्मवादिनम् ।
> राजा कथमसंबद्धं मिथ्या वा वक्तुमर्हति ।।'

इति । तस्मात् उपक्रमसामर्थ्यात् अनया श्रुत्या वेदितव्यत्वेन उक्त: परमेश्वर एव भवतीति सिद्धम् ।।

अन्या कौषीतकिश्रुति: -

> 'तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा श्वा: श्रेष्ठिनं भुंजन्ति एवमेवैष प्रज्ञात्मा एतैरात्मभि: भुंक्ते एवमेवैत आत्मानं: : एतमात्मानं भुंजन्ति ।'

---

१ ब्र० सू० शां० भा० पृ० ३२५ - ३२६
२ भा० पृ० ३२४

इतीयमपि श्रुति: अस्मिन्नेव जगद्वाचित्वाधिकरणे भाष्यकारैरुद्धृता पठ्यते । कौषीतकिब्राह्मणोपनिषदि श्रुतिरियमेवं प्रतिपाद्यते -

'तमेतमात्मानमेतमात्मनो न्वपश्यन्ति । यथा वा
श्रेष्ठिनं स्वास्तथथा श्रेष्ठैस्स्वैर्भुंक्ते तद्यथा वा श्रेष्ठिनं
स्वा भुंजन्त एवं श्रेष्ठिनं स्वास्त एवार्वर्षया: ।'

(कौ० ४-२०) इति । एवमत्र पाठभेदो द्रष्टव्य: ।

विषयवाक्यत्वेन पठितायां कौषीतकिश्रुत्यां वर्तमानेन वेदितव्य इति पदेन प्राण: जीव: परमात्मा वा उच्यत इति विकल्प्य, तत्र जीव इति वेदितव्य: इति प्रतिपादयितुं पूर्वपक्षमुखेन स्वबलोपोद्बलकत्वेन श्रुतिरियमाम्नाता भवति । अत्र पूर्वपक्षस्याशय: - अत्र वेदितव्येन ब्रह्म नाभिधीयते, पूर्वापरश्रुति-पर्यालोचनेन जीवाभिधानमेव भवति । अधिकरणविषयवाक्यस्थश्रुतेरर्थ: एवं भवति :-- यत्कारणं वेदितव्यतया उपन्यस्तं भवति तत् पुरुषाणां कर्तृ: वेदनायोपेतं बालाकिं बुबोधयिषु: अजातशत्रु: सुप्तं पुरुषमामन्त्रयति । तस्य सुप्तपुरुषस्य अस्यामन्त्रणशब्दाश्रवणात् प्राणादीनामभोक्तृत्वमस्वामित्वं तस्य बालाके: प्रतिबोध्य अनन्तरं यष्टिघातोत्थानात् उत्थितं प्राणादिव्यतिरिक्तं जीवं भोक्तारं स्वामिनं प्रतिबोधयति : इति । अनन्तरं वर्तमाना इयं कौषीतकि-श्रुतिरपि मामुपकरोति इति पूर्वपक्षी उदाहृतश्रुतिं पठति । अस्या: श्रुतेरर्थ: -

यथा श्रेष्ठ: प्रधान: पुरुष: स्वैभृत्यै: करणभूतैर्विषयान् भुंक्ते, यथा वा स्वा भृत्या: श्रेष्ठिनं भुंजन्ति । ते हि श्रेष्ठिनमशनाच्छादनादिग्रहणेन भुंजन्ति, एवमेव एष: प्रज्ञात्मा जीव: एतै: आदित्यादिगतै: आत्मभिर्विषयान् भुंक्ते । ते हि आदित्यादय: आलोकवृष्ट्यादिना साचिव्यमाचरन्त: जीवात्मानं भोजयन्ति । जीवात्मना यजमानेन उत्सृष्टहविष: आदानात् आदित्यादयो भुंजन्ति । तस्मात् जीवात्मैव ब्रह्मण: अभेदात् ब्रह्म इह वेदितव्यतया उपदिश्यत इति, अर्थात् जीव इत्यर्थ: । उदाहृतश्रुति: वेदितव्यत्वेन जीव एव विषयीकरोति न परमात्मानमिति । लिंगबलात् जीव एव वेदितव्यत्वेन उपदिश्यत इति पूर्वपक्षिण: आशय: : इति ।।

'एष एतद्बालाके पुरुषो शयिष्ट यत्रैतदभूयत एतदगात्'

(कौ० ४-१९) इति । श्रुतिरियं चतुर्थाध्यायस्य एकोनविंशतितमा भवति । अस्मिन् अध्याये गार्ग्यबालाक्योः संवादपुरस्सरेण ब्रह्मनिरूपणं तस्य स्वरूपं च प्रतिपाद्यते । एवं प्रतिपाद्यमानावसरे श्रुत्या अनया एवमुच्यते -

अजातशत्रुः बालाकिं प्रति वदति - यत्रैतस्मिन् शरीरे सुषुप्तिकाले यं पुरुषः स्वपति, सा अवस्था ब्रह्मावस्था । कुत इति चेत् प्रतिदिनमयं जीवः तस्या एव ब्रह्मावस्थायाः उदेति, तत्रैव कार्यकरणसंघातः तस्यामेव ~~ब्र~~ ब्रह्मावस्थायां गमिष्यति च । अतः एतस्मात्सिध्यति यत् जीवः प्रतिदिनं सुषुप्तौ ब्रह्मभावमाप्नोति, तथाऽपि अविद्यावशात् कर्तृत्व-कर्मत्वादिना पुनरपि जागरितः सन् संसारी भवति । वस्तुतः कर्तृत्व-कर्मत्वादि जीवस्य नास्तीति यः विचा~~र~~रं करोति सः अन्ते अनिवर्तः सन् कैवल्यं ब्रह्मभावमाप्नोतीति ।

सूत्रभाष्ये प्रथमाध्यायस्य चतुर्थपादे अष्टादशसूत्रव्याख्यानावसरे भाष्यकारैः प्रतिपादिता भवति । अस्मिन् जगद्वाचित्वाधिकरणे जगतः सृष्टिकर्ता क इति विकल्प्य तत्र परमात्मा एव जगत्स्रष्टा इति एतावता प्रतिपादितम् । अस्मिन् सूत्रे तु शाखान्तर~~मेक~~संवादः क्रियते । अधिकरणेऽस्मिन् प्रतिपादितकौषीतकिश्रुतिः किं जीवप्रधानं स्याद्वा ब्रह्मप्रधानमिति विचिकित्सा भवति । भवति चात्र सूत्रम् -

'अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके'

(ब्र० सू० १-४-१८) इति । अत्र आचार्यो जैमिनिः मन्यते जीवलिंगेन जीवोवितद्वारा ब्रह्म ग्राह्यमिति, यतः ब्रह्मणः प्रतिपत्त्यर्थमेव हि जीवपरामर्शः । दृश्यते च प्रश्नप्रतिवचनाभ्यामिति निरूपयितुं श्रुतिमिमां कौषीतकीं स्वीतकार +-'क्वैष' इति । प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते सति सुप्तपुरुषप्रतिबोधितः जीवव्यतिरिक्तविषयः दृश्यते इत्यत्र प्रश्नमुत्थाप्यते । ~~म~~ सूत्रभाष्ये श्रुतिरियमित्थं वर्तते -

'क्वैष एतद्बालाके पुरुषो शयिष्ट क्व वा एतदभूत्
कुत एतदागात् ।'

इति । अस्याः भावः - हे बालाके एतच्छयनं विशेषज्ञानाभावरूपं यथा स्यात्तथैव पुरुषः क्व अशयिष्ट ? कस्मिन् अधिकरणे शयनं कृतवान् ? इति । एतद्भवनमेकीभावरूपं यथास्यात्तथा एषः पुरुषः सुप्तः सन् क्वाभूत् । केन सहैक्यं

~~प्राप्नोतीति । एतदागमनमेवच~~

प्राप्नोतीति । एतदागमनमैक्यप्रश्नरूपं यथा स्यात्तथा पुरुष: कुत: आगत: इति श्रुतिरियं प्रश्नत्रयमुत्थापयति । तथा च अनया श्रुत्या शरीरे आत्मा क्व तिष्ठति ? इति विचिकित्सा क्रियत इति सिध्यति ।

चोक्तप्रश्नस्य प्रतिवचनं भवति अन्या कौषीतकिश्रुति: -

'यदा सुप्त: स्वप्नं न कंचन पश्यति, अथा स्मिन्
प्राण एवैकधा भवति'

इत्यारभ्य,

'एतस्मादात्मन: प्राणा यथायतनं विप्रतिष्ठन्ते
प्राणेभ्यो देवा देवेभ्यो लोका:'

(कौ० ३-३) इति । प्रतिवचनावसरे प्राणस्योक्त: प्रश्नोऽपि प्राणविषयक इति भवति । तथा च शयनभवनयोराधार: उत्थानापादानं च प्राणशब्दितं ब्रह्मैवेति । भवति चात्र शांकरं वचनम्[१] -

'सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति ।
परस्माच्च ब्रह्मण: प्राणादिकं जगज्जायत इति वेदान्तमर्यादा ।'

इति । तथा च प्रश्नप्रतिवचनाभ्यामस्मिन् सूत्रे ब्रह्मण: सकाशादेव सर्वे प्राणादय: प्रादुर्भवन्ति इत्यत: परमेश्वर एव जगत्कर्ता इति सिद्धान्तितो भवति । अस्या: श्रुते: अर्थ: पूर्वमेवोपपादित: ।।

अन्या कौषीतकिश्रुति: -

'एष ह्येवैनं साधु कर्म कारयति तं यमेभ्यो --
--------- तं यमधो लोकेभ्य: अनुदत्सते ।'

(कौ० ३-६) इति । श्रुतिरियं तृतीयाध्यायस्य नवमी भवति ।

'न ह्यन्यतरतो रूपं किंचन सिध्येत्' इत्यादिकायां 'स म आत्मेति विद्यात्' इत्यन्तायां श्रुतौ सर्वभेदरहितप्रज्ञात्मावेदनं प्रतिपाद्यते । प्रतिपादितश्रुतेरर्थ: - स परमात्मा अश्वमेधादिकर्मणा न भूयान् भवति, नापि कनीयान् । एषह्येव ईश्वर: स्वांशजप्राणिपटलकर्मसापेक्षमेनं स्वभक्तजनं साधुकर्म स्वयाथात्म्यदर्शनं हेतुश्रवणादिलक्षणं कारयतीव कारयति । यमनेकजन्मसिद्धं एभ्यो लोकेभ्य:

---

१ ब्र० सू० शां० भा० पृ० ३२७

ऊर्ध्वं ब्रह्मलोकं नेतुमिच्छति तमेव तादृशसाधनानुष्ठाने नियोजयति। एषा उ एवैनं प्राचीनवासनानुरोधेन असाधु कर्म कारयति। धर्मोश्वर: एभ्यो लोकेभ्य: अनुदत्सते इति।

ननु सत्येवं ईश्वरस्य साध्वसाधुकारकत्वे वैषम्यादिदोष: प्रसज्येत इति चेत्-न। जीवगतकर्तृतानिरसनहेतुत्वात्। जीवस्य सर्वकर्ता ईश्वर: सोऽहमस्मीत्युपासनात: ईश्वरज्ञानं जायते। एवं जाते निरावृते ईश्वरज्ञाने स्वस्येश्वरस्य वा कर्तृत्व-कारयितृत्वादिदोषो न हि सेद्धुं पारयति। यस्मादेवं तस्मात् परमेश्वरे कारयितृत्वाद्यारोपो जीवगतकर्तृत्वादिनिरासहेतुरित्यत: तस्मिन् न वैषम्यदोष:।

सूत्रभाष्ये अपीयं श्रुति: द्वितीयाध्यायस्य प्रथमे पादे -

'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति (ब्र० सू० २-१-३४)

इति सूत्रव्याख्यानावसरे भाष्यकारैरुदाहृता भवति।

अधिकरणेऽस्मिन् पुनश्च पूर्वपक्षिणा आक्षिप्यते - जगत: कारणमीश्वरो नोपपद्यते, यत: कश्चिदत्यन्तसुखभाज: देवादीन्, कंश्चिदत्यन्तदु:खभाज: पश्वादीन् तथा मध्यमदु:खभाज: मनुष्यादीन् इत्येवं विषमां सृष्टिं स: करोति, अत: तस्य वैषम्य-नैर्घृण्यप्रसंगादिति चेत्- उच्यते। यदि हि निरपेक्ष: केवल: ईश्वर: विषमां सृष्टिं सृजति तर्हि तर्हि भवेतां तस्य दोषौ वैषम्यं नैघृण्यं चेति। श्रुत्यादौ निरपेक्षस्य तस्य निर्मातृत्वं न श्रूयते। स ईश्वर: सर्वेषां धर्माधर्मरूपतत्कर्मसापेक्ष एव विषमां सृष्टिं करोति। साक्षाद्वदति श्रुतिरियमित्यत्र कौषीतकिश्रुतिमिमांमुदाजह्रु: भाष्यकारा:। श्रुत्यर्थ: उभयत्र समान:। तथा चानया श्रुत्या ईश्वरस्य वैषम्य-नैर्घृण्यदोषवत्त्वं न प्रसजति इत्युक्तं भवति। अधिकरणस्यास्य विचार: 'सूर्याचन्द्रमसौ धाता' (ऋ० सं० १०-१९०-३) इत्यत्र पूर्वमेव निगदितो भवति।

इयमेव कौषीतकिश्रुति: सूत्रभाष्ये द्वितीयाध्यायस्य तृतीये पादे

'परात्तु तच्छ्रुते: (ब्र० सू० २-३-४१)

इति सूत्रव्याख्यानावसरे भाष्यकारैरुद्धृता भवति। अस्मिन्नधिकरणे किं जीवस्य कर्तृत्वमनपेक्षं भवति, उत ईश्वरसापेक्षमिति विचार्यते। अत्र पूर्वपक्षस्तावत् -

जीवोऽयं रागद्वेषादिप्रयुक्त: कारकान्तरसामग्रीसंपन्न: कर्तृत्वमनुभवितुं स्वयमेव शक्नोतीत्यत: ईश्वरमनपेक्ष्यैव जीवस्य कर्तृत्वमिति । एवं प्राप्ते पक्षे सिद्धान्ती आह - ईश्वरसापेक्ष एव जीवस्य कर्तृत्वमिति । अविद्यावस्थायां कार्यकारणसंघाताविवेकदर्शिन: जीवस्य अविद्यातिमिरान्धस्य परस्मात् सत: आत्मन: कर्माध्यक्षात् साक्षिण: चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धि: । तस्येश्वरस्य अनुग्रहहेतुकेन विज्ञानेनैव मोक्षसिद्धिर्भवति । तस्मात् जीवस्य सर्वास्वपि प्रवृत्तिषु ईश्वर: हेतु: कर्ता इति । तथा चाम्नायते श्रुति: -'एष ह्येव' इति । श्रुत्यर्थ: स्पष्ट एव । अधिकरणेऽस्मिन् इयं श्रुति: जीवानां पुण्यापुण्य-फलदाता, तत्कर्मकारयिता चेश्वर: इत्युक्तं भवति । सत्येवमीश्वरस्य पूर्वोक्तदोष: प्रसजति इति मनसिकृत्यैव समनन्तरसूत्रे -

'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य:'

(ब्र० सू० २-३-४२) इत्यत्र तन्निरस्यते । तथा चानया श्रुत्या सिद्धान्तद्वयं प्रतिपादितं भवतीति ।।

अन्ये कौषीतकिश्रुती भवत: -

'स यदा अस्माच्छरीरादुत्क्रामति' (कौ० ३-४)

'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति'

(कौ० १-२) इति च । तत्र प्रथमा श्रुति: तृतीयाध्यायस्य चतुर्थे पुरुषस्यो-त्क्रमणावस्थां प्रतिपादयति । श्रुत्यर्थ: - मुमूर्षु: स: शरीरादस्मात् स्वकर्मा-नुरूपं शरीरान्तरं उत्क्रामति- प्रविशति + इति । द्वितीयाश्रुति: प्रथमाध्यायस्य द्वितीया भवति । श्रुतिरियं कर्मण: गौणफलं स्वर्गफलं पुनरावृत्तिं च ब्रूते । श्रुतेरर्थ: - गौतमेन प्रतिज्ञापितो मुनि: प्रत्युवाच - गौणमुख्यफलयो: आदौ गौणफलप्रकाशकविद्यां तव ज्ञापयिष्यामि । तथा हि -

'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समा: ।'

इति वचनानुसारेण लोकेऽस्मिन् ये वै केवलकर्मिण: श्रुत्याद्यर्थपर्यालोचनया सकामा: सन्त: यथोक्तकर्म कृत्वा चरमदशायां लोकादस्मात् ते सर्वे सकामकर्मिण: चन्द्रमसं स्वर्गाख्यं धामं गच्छन्ति । यावत्कर्मफलक्षतिस्तावत् पर्यन्तं तत्र वसन्ति ।

फलदायादनन्तरं पुनरपि कर्मफलसंपादनार्थं जीवभावमापद्यन्ते लोकेऽस्मिन्निति इति ।

सूत्रभाष्ये द्वितीयाध्यायस्य तृतीयपादे 'उत्क्रान्तिगत्यागतीनाम्' (ब्र०सू० २-३-२८) इति इति सूत्रव्याख्यानावसरे इमे श्रुती भाष्यकारैः प्रतिपादिते भवतः । अस्मिन्नधिकरणे जीवः किं परिमाणकः अणुपरिमाणकः उत मध्यमपरिमाणः आहोस्वित् महापरिमाण इति चिन्त्यते । अत्र पूर्वपक्षस्तु किं परिमाणकः जीव इति विषयः विचारविषय एव न भवति, यतः पर एवात्मा जीव इत्युच्यते । तस्य चानन्तत्वमाम्नातं श्रुत्यादिषु । आत्मनः अनन्तत्वादेव जीवोऽपि अनन्त इति सिध्यति । अतः कुतो चिन्तावतार इति । अत्र समाधानम् - यद्यपि भवदुक्तं यत् तत्सत्यमेव, तथाऽपि उत्क्रान्तिगत्यागतिश्रुतयः तस्य परिच्छेदमामनन्ति । तथा चेमे श्रुती -

'स यदा ------- सहैवैतैः सर्वैरुत्क्रमति'

'ये वै के चास्मा ------ ते सर्वे गच्छन्ति'

इति । तथा च एताभ्यां श्रुतिभ्यां परिच्छिन्नः अणुपरिमाणः जीव इति सिध्यति ॥

'ये वै के चास्मा -------- सर्वे गच्छन्ति' (कौ० १-२)

इति श्रुतिः सूत्रभाष्ये तृतीयाध्यायस्य प्रथमपादे -

'अनिष्टादिकारिणामपि च श्रुतम्' (ब्र० सू० ३-१-१२)

इत्यत्र प्रतिपादिता भाष्यकारैः । अधिकरणेऽस्मिन् यथा इष्टादिकारिणः चन्द्रमसं गच्छन्ति तथा अनिष्टादिकारिणः चन्द्रमसं गच्छन्ति उत नेति चिन्त्यते । अत्र पूर्वपक्षो भवति यत् चन्द्रमण्डलगमने अविशेषेणोक्तत्वात् अनिष्टादिकारिणामपि गन्तव्यत्वेन चन्द्रमण्डलं श्रुतं भवति । दर्शयति च कौषीतकिश्रुतिः - 'ये वै के चास्मात्' इति । तस्मात् विशेषाभावात् इष्टानिष्टादिकारिणः सर्वे एव चन्द्रमसं गच्छन्ति इति । तथा चेयं श्रुतिरत्र पूर्वपक्षसाधिका भवति ॥

अन्या भवति कौषीतकिश्रुतिः -

'प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति'

(कौ० ३-६) इति । इयं श्रुतिः तृतीयाध्याये षष्ठप्रकरणे प्रज्ञाधिष्ठितैरेव

वागादिभि: नामाथाप्ति: इति प्रतिपाद्यते । तत्र भवतीयं श्रुति: । स आत्मा प्रज्ञया बुध्या शरीरं- भूतभौतिकात्मकं सुखदु:खभाजं शरीरं समारुह्य तेन शरीरेण सुखदु:खे आप्नोति, सुखदु:खभाक् भवतीति ।

सूत्रभाष्ये श्रुतिरियं द्वितीयाध्यायस्य तृतीयपादे अष्टाविंशतिसूत्रस्य उत्क्रान्त्यधिकरणे ~~प्रतिपादिता भवति ।~~ 'पृथगुपदेशात्' (ब्र० सू० २-३-२८) इत्यत्र आम्नाता भवति । अनया कौषीतकिश्रुत्या अत्र आत्मप्रज्ञयो: कर्तृकरणभावेन पृथगुपदेशात् चैतन्यगुणेनैवास्यशरीरव्यापिता गम्यत इति श्रुतिपुरस्सरं भवति पूर्वपक्ष: अणुरात्मा इति ।

इयमेव श्रुति: - 'तद्गुणसारत्वात्तु तद्व्यपदेश: प्राज्ञवत्' (ब्र० सू० २-३-२९) इति सिद्धान्तसूत्रे पठिता भाष्यकारै: । अत्र पूर्वपक्षं भेदयति सिद्धान्ती - यदुक्तं पृथगुपदेशात् चैतन्यगुणेनैवात्मन: देहव्याप्तिरिति अत्रोच्यते - प्रज्ञया शरीरमिति । अस्यां भेदोपदेशे श्रुतौ बुध्या एवोपाधिभूत: जीव: शरीरं समारुह्य उपभोगान् सुखदु:खादीन् भुनक्ति । अतस्तत्र गुणगुणिविभागो न विद्यते । बुद्धिरेव तस्यायतनं भवति । अपि च ब्रह्मस्वभावस्य कूटस्थनित्यस्य जीवात्मन: स्वत: इच्छाद्वेषानुषंगसंभव: न भवति इत्यत: बुद्धिगुणानां तेषां तदभेदाध्यासेन तद्धर्मत्वाध्यास इति । तथा च बुद्धिरूपोपाधिगुणत्वात् जीवस्याणुत्वादिव्यपदेश:, न तु सत्येनाणुत्वेन आत्मन: अणुत्वव्यपदेश इति ।

अन्या भवति कौषीतकिश्रुति: -

'तासु तदा भवति यदा सुप्त: स्वप्नं न कंचन पश्यति,
अथास्मिन् प्राण एवैकधा भवति ।'

(कौ० ४-१९) इति । श्रुतिरियं चतुर्थाध्यायस्य एकोनविंशतितमा भवति ।

श्रुत्यर्थ: - शुक्लकृष्णपीतेत्यादि नानावर्णेषु तासु नाडीषु तदा अयमात्मा अवतिष्ठितो भवति यदा विज्ञानात्मा सुप्त: न कंचन स्वप्नं पश्यति । अथास्मिन्नयं विज्ञानात्मा प्राण एव एकधा भवति, आत्मनि एकत्वमुपैतीति भाव: ।

सूत्रभाष्ये तृतीयाध्यायस्य द्वितीयपादे 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च'
(ब्र०सू०३-२-७) इति सूत्रव्याख्याने श्रुतिरियमाम्नाता भवति । अस्मिन्नधिकरणे सुषुप्तावस्था

इति
का परीक्ष्य निर्णीयते । तत्र सुषुप्तिप्रतिपादकानां श्रुतीनां निरूपणावसरे कौषीतकिश्रुतिः प्रतिपादिता । इयं श्रुतिः आत्मनः सुषुप्तिनाड्यां स्थायित्वमेव सुषुप्त्यवस्था इति ब्रूते । एवं परस्परभिन्नार्थेषु श्रुत्यर्थेषु संशयः क्रियते - किमेतानि नाड्यादीनि परस्परनिरपेक्षाणि सन्तः भिन्नानि सुषुप्तिस्थानानि भवन्ति उत परस्परापेक्षया एकं सुषुप्तिस्थानमिति । तत्र सर्वासां श्रुतीनामे-कार्थत्वात् भिन्नानि सुषुप्तिस्थानानि इति पूर्व पूर्वपक्षः । सिद्धान्ते तु स्वप्नदर्शनस्याभाव एव सुषुप्तमिति । नाडीषु आत्मनि चेति समुच्चयेन नाड्यादीनि स्वापाय उपैति न विकल्पेन इति ।नाड्यादीनां सर्वेषामेव तत्र तत्र सुषुप्तिस्थानत्वं श्रूयते, तच्च समुच्चये संगृहीतं भवति । नाड्यादीनां सुप्तिस्थानत्वश्रुतिविकल्पे हि तेषामन्यतमस्य सुप्तिस्थानत्वे नान्यतमस्य तदिति पक्षे बाधः, स चायुक्तः बाधस्य अगतिकत्वात् । यथा प्रासादे शेते पर्यङ्के शेते इत्येवमादिषु एकविभक्ति-निर्देशदर्शनं, तथा अयं जीवात्मा नाडीषु पुरीतति ब्रह्मणि च स्वपितीति श्रुतीनां समुच्चय उपपद्यते । तथा चोक्तं कौषीतकिश्रुत्या - 'तासु तदा ' इति । श्रुतावस्यां प्राणस्य नाडीषु च सुषुप्तौ समुच्चयः श्राव्यते । उभयोः (एकवाक्योपादानात् इति । नाडीनां (प्रकर्णान्तरं) प्राणस्य चैकेन उपादानात् समुच्चय इति । प्राणस्य ब्रह्मत्वं पूर्वमेवोपपादितं भवति । तथा च अनया श्रुत्या प्राणः नाड्यां शेते इत्युक्तं भवति ।

अन्या कौषीतकिश्रुतिः -

'अथातो निःश्रेयसादानम्, सर्वा ह वै देवता अहं
श्रेयसे विवदमानाः अस्माच्छरीरादुच्चक्रमुः ।'

(कौ० २-६) इति । द्वितीयाध्याये नवमी भवतीयं श्रुतिः । अनया निःश्रेयसादानं नाम मुख्यप्राणविद्या निरुच्यते । श्रुत्यर्थः - वागादिप्राणापेक्षया मुख्यप्राणस्य विशिष्टत्वद्योतनार्थं अथेति । स्वकतार्थताप्रकटनं नाम निःश्रेयसादानं कर्तुं सर्वा ह वै वागादिदेवताः अहं श्रेयानहं श्रेयान् इति मिथः विवदमानाः सत्यः अस्मात् शरीरात् ऊर्ध्वं उत्क्रमणं कृतवत्य इति ।

श्रुतिरियं सूत्रभाष्यस्य तृतीयाध्यायस्य तृतीयपादे ~~(दशमे समानाधिकरणे)~~

'सर्वभेदादन्यत्रेमे' (ब्र० सू० ३-३-१०)

इत्यत्र भाष्यकारैरुक्ता भवति। अस्मिन्नधिकरणे वाजसनेयिनां छन्दोगानां च प्राणसंवादे श्रेष्ठस्य प्राणस्योपास्यत्वमुक्तम्। तत्र वागादयः वसिष्ठादिगुणान्विताः इति निरूपिताः सन्ति। तथा हि श्रुतिः -

'यदहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसि' (बृ० उ० ६-१-१४)

इति। इदानीं विचार्यते - शाखान्तरेषु केवलस्य प्राणस्यैव श्रैष्ठ्यमुक्तं न इमे वसिष्ठादयो गुणाः इति। तत्र कौषीतकिश्रुतिः - 'अथातो' इति। अतः संशयः उत्पन्नः इमे वसिष्ठादयो गुणाः क्वचिदुक्ताः किमन्यत्रास्येरन् उत नेति। श्रुतौ तत्र तत्र एवंशब्देन वेद्यं वस्तु निवेद्यत्वात् वसिष्ठादयो गुणाः नास्येरन्निति प्राप्ते पूर्वपक्षे सिद्धान्ती आह - क्वचिदुक्ताः वसिष्ठत्वादयो इमे गुणाः अन्यत्रापि अस्येरन्नेवेति। सर्वत्रैव हि तदेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते, प्राणसंवादादिसारूप्यात्। प्राणविज्ञानस्याभेदे सति कथमिमे गुणाः क्वचिदुक्ताः अन्यत्र नास्येरन्? एवं शाखान्तरेऽप्युपास्याः गुणाः शाखान्तरेऽपि उपास्यन्ते इत्यतः कौषीतकिशाखायामपि ते उपसंहर्तव्या इति सिद्धम्। तथा चानया श्रुत्या प्राणस्य श्रेष्ठत्वमितरेषां वागादीनाममुख्यत्वं चोक्तं भवति॥

अन्या कौषीतकिश्रुतिः -

'तत्सुकृत-दुष्कृते धुनुते तस्य प्रिया ज्ञातयः
सुकृतमुपयन्त्यप्रिया दुष्कृतम्।'

(कौ० १-४) इति। इयं प्रथमाध्यायस्य चतुर्थखण्डिकायां पठिता। अनया खण्डिकया ब्रह्मविदुषः ब्रह्मैश्वर्यप्राप्तिराम्नायते। श्रुत्यर्थः - ब्रह्मविदुषं तं ब्रह्मालंकारेणाप्सरसः अलंकुर्वन्ति। एवमलंकृतः सः ब्रह्मैवेति स्वं मनुते। एवंरूपस्य ब्रह्मविदः तस्य पुरातनसुकृत-दुष्कृते दोधूयेते इति।

ननु प्राणिमात्रस्य यदृच्छया पुण्यमपि संभवतः, तेन पुण्येन पापेन च अस्य ब्रह्मभावापत्तिः कुतो सेत्स्यतीति चेत्-उच्यते। तस्य ब्रह्मविदुषः प्रियाः ज्ञातयः ईश्वरधिया तमेव समर्चयन्तः ते तत्कृतसुकृतभागं गृह्णन्ति। तस्याप्रियकारिणस्तु तदेहकृतदुष्कृतमुपयन्तीति। एतेन ब्रह्मविदं सन्यासिनं पूजयेत् न तु दूषयेत् इत्युक्तं

भवति ।

सूत्रभाष्ये तृतीयाध्यायस्य तृतीयपादे षड्विंशतितमे सूत्रे -

'हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम्'

(ब्र० सू० ३-३-२६) इत्यत्र श्रुतिरियं पठिता भवति । अस्मिन् हानोपानाधिकरणे विषयवाक्यत्वेन ताण्ड्याथर्वणिककौषीतकीनां श्रुतयः संगृह्यन्ते । यस्यां श्रुतौ हानोपायने श्रूयते तत्र अविवादः संनिपाते, यत्रापि उपायनमात्रश्रवणं तत्रापि नान्तरीयकतया हानमाक्षिप्तमिति भवति संनिपातः । यत्र तु सुकृतदुष्कृतयोः हानमात्रं श्रुतं भवति उपायनं न श्रूयते तत्र तु किमुपायनमुपादानं संनिपतेत् न वा इति अत्र सन्देहः । अत्र पूर्वपक्षः यथा एकत्र शाखायां श्रूयमाणमुपासनांगं तस्मिन्नेवोपासने शाखान्तरेऽश्रूयमाणमुपसंह्रियते, तथा शाखान्तरश्रुतमुपायनमुपसंहरिष्यत इति स्याद्यपि तथाऽपि कौषीतकिश्रुतौ पर्यंकस्थसगुणब्रह्मविद्यायामुपायनं श्रुतमत्रोपसंहर्तव्यं भवतीत्यतः विद्याभेदात् नोपसंहार इति ।तस्मात् असंनिपातः हानौ उपायनस्येति प्राप्ते पक्षे सिद्धान्ती आह - केवलायामपि श्रूयमाणायामेतस्यां हानावुपायनं संनिपतितुमर्हति । उपायनशब्दस्य शेषत्वात् हानशब्देनापेक्षितत्वादिति । कर्मान्तरे विहितं यत् तत् कर्मान्तरे नोपसंह्रियते, प्रमाणाभावात् । यत्पुनः न विधीयते किन्तु स्तुत्यर्थं सिद्धतया संकीर्त्यते चेत् असतिबाधके शब्दतः प्रतीयमानं तत् परित्यक्तुमशक्यं इति । विद्याभेदे गुणानुपसंहार इति तु व्यवस्था अनुष्ठानविषया भवति, न तु स्तुतिविषया इति । तथा चास्यां श्रुतौ विद्वत्सेवाद्वेषाभ्यां विद्वन्निष्ठपुण्यपापतुल्ये सेवकद्वेषिणोः जायेते, जातयोः तयोः फलतः स्वीकार उपायनमिति चोक्तदूषणस्य परिहारः सुलभः + इति ।।

अन्या अपि [?] कौषीतकिश्रुतिः [?] सूत्रभाष्यस्य सांपरायाधिकरणे

'सांप्रदाये तर्तव्याभावात्तथा ह्यन्ये' (ब्र० सू० ३-३-२७)

इत्यत्र आम्नाता भवति । तथा हि -

'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति'

इत्युपक्रम्य 'स आगच्छति विरजां नदीं तां मनसैवात्येति,

तत्सुकृतदुष्कृते विधूनुते' (कौ० १-३,४)

इति । स एतं देवयानमित्यत्र कौषीतकिब्राह्मणोपनिषदि 'तमेतम्' इति वर्तते । अधिकरणस्यास्य विषयवाक्यं भवतीयं श्रुतिः । श्रुतावस्यां कौषीतकिनः देवयानेन पथा पर्यंकस्थं ब्रह्माभिप्रस्थितस्य व्यध्वनि तु सुकृत-दुष्कृतयोः वियोगमभिप्रयन्ति । अत्र संशयः - यथाश्रुतं वियोगवचनं व्यध्वन्येव प्रतिपत्तव्यमुत आदौ देहादपसर्पणे इति । श्रुतिप्रामाण्यात् यथाश्रुतार्थ एव गृहीतव्य इति प्राप्ते पूर्वपक्षे सिद्धान्तं भवति - विद्यासामर्थ्यविधूतकल्मषस्य ज्ञानवतः उत्तरेण पथा गच्छतः ब्रह्मप्राप्तिः न चाप्रक्षीणकल्मषचित्तस्य उत्तरमार्गगमनमिति । सवैव तादृशी कल्मषं क्षापयति, क्षापितकल्मषं जीवरमार्गं प्रापयतीति कथमर्धपथे कल्मषक्षयो भवति ? तस्मात् पाठक्रमबाधेन अर्थक्रमो नुसर्तव्य इति । प्रतिपादिताया अस्याः श्रुतेरर्थः स्पष्ट एव भवति इति ।।

अन्या कौषीतकिश्रुतिः -

'प्राणं तदा वाचि जुहोति वाचं तदा प्राणे जुहोति'

'एते अनन्ते अमृते आहुती जाग्रच्च स्वपंश्च सन्ततमव्यवच्छिन्नं जुहोति ।'

(कौ० २-४) इति भवति । श्रुत्यर्थः - यः अग्निहोत्रनिर्वर्तयिता पुरुषः आत्मा अहमेवेदं सर्वमिदं भासते, तदतिरेकेण तावत् चेष्टितुं न शक्नोति । तदा स पुरुषः प्राणं वाचि जुहोति । यावद्धे पुरुषः प्राणावष्टम्भतः चेष्टाविशिष्टो भवति, पुरुषातिरेकेण तावत् वागादि भातुं न समर्थ भवति । तदानीं प्राणो वाचं प्राणे जुहोतीति । जाग्रदवस्थायां वागादिनिर्वर्त्यत्वात् वागाद्यग्नौ प्राणाख्यं हविः जुहोति । तथा स्वापावस्थायाः प्राणनिर्वर्त्यत्वेन वागादि-करणजातं प्राणे जुहोति, वागादिकरणानाम् परमात् + इति । अहरहः कर्तव्यतया एते अनन्ते मृताहुती जाग्रत् स्वापंश्च अहरहः सन्ततमव्यवच्छिन्नं जुहोतीति ।

इयं सूत्रभाष्ये - 'श्रुत्यादिबलीयस्त्वाच्च न बाधः'

(ब्र० सू० ३-३-४६) इत्यस्मिन् सूत्रव्याख्याने भाष्यकारैरुदाहृता भवति । अस्मिन्नधिकरणे मनश्चिदादयः क्रियानुप्रवेशिनः तच्छेषभूताः उत केवलविद्यात्मकाः

स्वतन्त्राः इति विचार्यन्ते । एवं क्रियमाणे विचारे सिद्धान्त्यभिमतं स्वातन्त्र्य-पक्षमवलम्ब्य श्रुतिरियं निदर्शिता भवति । यथा अस्यां श्रुतौ होमे स्वातन्त्र्य-मुच्यते तद्वदग्नीनां स्वातन्त्र्यदर्शनमिति ।

भवत्यन्या कौषीतकिश्रुतिः -

'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम'

(कौ० ३-१) इति । श्रुत्यर्थः - नामतः प्रतर्दन इति राजा । ह वा इति शब्दद्वयं ऐतिह्यार्थकम् । दिवोदासस्यापत्यं दैवोदासिः । युद्धेन तत्साधनबलेन इक्ष्वाकुवत् पौरुषेण च इन्द्रस्य प्रियं धाम स्वर्गं जगाम । तत्र स गत्वा इन्द्रस्य तुष्ट्यै तस्य शत्रुवर्गं जितवान् इति ।

इयं सूत्रभाष्ये - 'पारिप्लवार्था इति चेन्न विशेषितत्वात्'

(ब्र० सू० ३-४-२३) इत्यत्र भाष्यकारैराम्नाता भवति । अस्मिन् पारिप्लवा-धिकरणे वेदान्ते कथनमाख्यानं किं परिप्लवार्थकं उत विद्याप्राप्त्यर्थकम् इति विचार्यते । परिप्लवो नाम अश्वमेधे पुत्रादिपरिवृताय राज्ञे 'परिप्लवमाचक्षीत' इति उक्तत्वात् नानाविधाख्यानकथनात्मकोभवति । एवमस्मिन् कौषीतक्यां इन्द्रप्रतर्दनाख्यायिका श्रूयते । अत्र पूर्वपक्षः आख्यानसामान्यात् इमाः आख्यान-श्रुतयः परिप्लवार्थकाः इति । सत्येवं वेदान्तश्रुतीनां विद्याप्रधानत्वं न स्यादिति चेत्- उच्यते । श्रुतौ तत्र विशेषितत्वात् इमाः श्रुतयः विद्यायां प्रधानत्वं भजन्त इति । अस्यां कौषीतकिश्रुतौ अनन्तरं प्राणरूपब्रह्मस्वरूपस्य विशेषेण दर्शितत्वात् इयमपि श्रुतिः विद्यायामंगत्वं भजते इति सिद्धम् । तस्मात् आख्यान-श्रुतयः न परिप्लवार्था इति ।।

कौषीतकिब्राह्मणोपनिषदः प्रथमाध्यायस्य तृतीयखण्डिकायाः श्रुतयः सूत्रभाष्ये अधिकरणत्रये प्रतिपादिताः भवन्ति । तथा हि -

सूत्रभाष्यस्य चतुर्थाध्यायस्य तृतीयपादे 'अर्चिरादिना तत्प्रथितेः'

(ब्र० सू० ४-३-१) इति सूत्रव्याख्याने -

'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति'

(कौ० १-३) इति श्रुतिः पठिता । अधिकरणस्यास्य सारांशः - विभिन्नश्रुतिषु

अनेकधा श्रुति: प्रतिपाद्यते । तत्रानया श्रुत्या एवं प्रतिपाद्यते । तथा च पूर्वस्मिन्नधिकरणे यदाकदाचिन्मृतस्यापि फलप्राप्तिरुक्ता, तद्वेन केनचिन्मार्गेण गतिरिति पूर्वपक्ष:, तत्र फलं विकल्प इति । सिद्धान्ते तु मार्गैक्यमिति । उपासनाभेदात् तच्छेषत्वेन ध्येयानामार्गाणामपि भेद: । किं च मार्गभेदे सति अस्मादयं मार्ग: त्वरया प्रापक इति युक्तं न मार्गैक्य इति । अत्र उपासनाभेदेऽपि उपास्यब्रह्मैक्यवत् मार्गैक्यमविरुद्धमिति निष्कृष्टं फलं भवति इति ।

अस्मिन्नेवाधिकरणे अन्या श्रुति: पठिता -

'सा या ब्रह्मणि चिति या व्यष्टिस्तां चितिं जयति
तां व्यष्टिं व्यश्नुते ।'

(कौ० १-६) इति । श्रुत्यर्थ: - या प्रज्ञा सा ब्रह्मणि चिन्मात्रे ब्रह्मणि या व्यष्टि: समष्टिश्च स्वाज्ञकल्पिता स्वज्ञानबाधिता, यत एवं तत: ब्रह्मातिरिक्तं न किंचिदिति य: वेद सोऽयं विद्वान् तां चितिं व्यष्टिसमष्ट्यात्मकस्वाविद्यातत्कार्यारोपापवादाधिकरणरूपां वस्तुतो निरधिकरणात्मिकां चिन्मात्रां स्वाविशेषतया जयति- आप्नोतीति । या चिन्मात्रविकल्पिता व्यष्टि: तदपलक्षिता स्वाविद्यातत्कार्यजातं तां व्यष्ट्यादिकलनां शशविषाणवत् अत्यन्तासत्तया व्यश्नुते । एवं ज्ञानसमकालं ब्रह्ममात्रतया स्वयमेवावशिष्यत इति ।

सूत्रभाष्येऽपि विभिन्नश्रुतिषु प्रतिपाद्यमानं ब्रह्मलोकप्राप्तिलक्षणं फलं एकमेव इति निरूपणार्थं श्रुतिरियमुद्धृता । तस्मात् प्रकरणभेदेऽपि विद्यैकत्वे भवति इतरेतरविशेषणोपसंहारवत् गतिविशेषणानामपि उपसंहार: । विद्याभेदेऽपि तु गत्यैकदेशप्रत्यभिज्ञानात् गन्तव्याभेदाच्च गत्यभेद एव इति सिद्धम् ।

सूत्रभाष्ये चतुर्थाध्यायस्य तृतीयपादे द्वितीये वाय्वधिकरणे -

'वायुमब्दादविशेषविशेषाभ्याम्' (ब्र० सू० ४-३-२)

इति सूत्रव्याख्याने प्रतिपादिता इयं श्रुति: -

'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति,
स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं
स प्रजापतिलोकं स ब्रह्मलोकम्' (कौ० १-३)

इति । एवमियं श्रुतिरत्र त्रिवारं पठिता भवति । श्रुत्यर्थः स्पष्ट एव ।
सर्वत्र अर्चिरादिमार्गपर्वप्रत्यभिज्ञानात् गत्यैक्यमित्युक्तम् । सम्प्रत्यस्मिन् अधिकरणे पठितश्रुत्या देवयानं पन्थानमासाद्यानन्तरं स वायुलोकं गच्छतीत्यतः अर्चिरात्मक-अग्न्यानन्तर्यप्रत्यभिज्ञानात् अर्चिषो अनन्तरं वायुरिति निवेशनीय इत्यतः स्वयमेव सन्निवेशविशेषसिद्धेः अनर्थकं तन्निरूपणं भवतीति संदीपतो अधिकरणस्यास्य तात्पर्यम् । एवं स्थिते तत्र प्रथमश्रुताग्निलोकमतिक्रम्य किमिति वायोः सन्निवेश इति विचार्यते । अर्चिरादौ वर्त्मनि वायुलोकः न श्रुतं, कथमस्मिन् स्थाने निवेश्यत इति प्राप्ते पूर्वपक्षे आह सिद्धान्ती - पाठक्रमात् अग्नेरनन्तरं निवेशनीयो वायुरिति । विशेषदर्शनस्यैव स्थानविशेषसन्निवेशहेतुत्वेऽपि वायोः अर्चिरादिके पथि सामान्यप्राप्तौ अविशेषोक्तिरपि हेतुर्भवति । कौषीतकि-श्रुतेः वाजसनेयश्रुतिः श्रुत्यन्तरम् । तथा हि -

'यदा वै पुरुषोऽस्मात् लोकात्प्रैति स वायुमागच्छति'
---------- स आदित्यमागच्छति'

(बृ० उ० ५-१०-१) इति । तथा च तस्मै प्राप्तायोपासकाय तत्र वायुः स्वात्मनि विजिहीते द्वारं प्रायच्छतीति यावत् । अथ पुनः आक्षिपति पूर्वपक्षी - अग्नेः परत्वदर्शनात् विशेषात् अर्चिषो नन्तरं किमिति वायुर्न निवेश्यते इति । श्रुतावपि - 'अग्निलोकमागच्छति, स वायुलोकम्' (कौ० १-३) इति पठितत्वात् । सिद्धान्ती आह - श्रुतावस्यां पाठबलादर्चिषः अनन्तरो वायुः, कौषीतकीनां पाठमात्रम्, न क्रमविशेषवाची कश्चित् शब्दो अस्ति । वाजसनेयश्रुतौ तु तेनेति ऊर्ध्वमिति च शब्दाभ्यां क्रमनिश्चयात् पाठबाध इति । तस्मात् श्रुतिषु अविशेषविशेषाभ्यां क्रमो नेतव्य इति ।

अनन्तरमियं श्रुतिः अस्मिन्नेवपादे आतिवाहिकाधिकरणे -

'आतिवाहिकस्तल्लिंगात्' (ब्र० सू० ४-३-४)

इति सूत्रव्याख्याने आम्नाता भवति - 'अग्निलोकमागच्छति' (कौ० १-३) इति अस्मिन्नधिकरणे किमेतानि अर्चिरादीनि, उत स्थानानि उत भोगभूमयः, अथवा गन्तॄणां नेतार इति चिन्त्यते । तत्र पूर्वपक्षः - लोके यथा यः कश्चिज्जनः

ग्रामान्तरं गन्तुकाम: अन्यं पृच्छति - केन पथा तत्र गन्तव्यम्, तदा तेनानुशिष्यमाण: स: गिरि-नद्यादीनतिक्रम्यानन्तरं स्वामीष्टं स्थलं प्राप्नोति, तथा उपासक: अर्चिरादिमार्गेण ब्रह्मलोकं गच्छति इति । अथवा एते अर्चिरादय: उपासकस्य भूते भोगभूमय: भवन्ति । अत एवोच्यते - 'अग्निलोकमागच्छतीति' आगच्छतीत्यनेन भोगार्थमागच्छतीति उपलक्ष्यते इति प्राप्ते सिद्धान्त: - अर्चिरादयो विद्युदन्ता: चेतना: नेतार: अमानुषपुरुषेण नेत्रा सह पठितत्वात् । अत: एते अर्चिरादय: आतिवाहिका: इति ।। इति शम् ।।

:o:o:o:o:o:o:o:o:o:

२ द्वितीयोऽध्यायः

ऋङ्-मन्त्रेषु अद्वैतसिद्धान्ताः

२० ऋङ्मन्त्रेषु उपलभ्यमानानामद्वैतसिद्धान्तानां समीक्षणम्

अनेकै: परिकरबन्धै: साम्प्रतमतिशयेनारब्धो वेदार्थविमर्श: सुबहून् सन्देहग्रस्तांशान् इदानीमपि आश्चर्यमावहति । एतावता अनेकै: विमर्शै: सुष्ठु प्रकाशितोऽपि ऋग्वेदे इदानीमपि रहस्यार्था: परमार्थतत्त्वावबोधकाश्च मन्त्रा: वर्तन्त एवेति सिध्यति ।

श्रीमान् रोठाचार्य: ऋग्वेदस्यास्य व्याख्यातॄणां भारतीयानामिदानीं अनुसरणमयुक्तमिति स्वयमेकं नवीनं पन्थानं प्रवर्तयामास । तन्मतानुसारिणा अतिगहनानामप्रसिद्धानां वाक्यानामपि स्वत:सिद्धार्थ: तात्त्विक इति अस्मत्पूर्वाचार्या: केचन अभिप्रयन्ति । तथाचोक्तं केनचिदाचार्येण -

'स्वयं प्रकाशा: स्वत:सिद्धार्था: भवन्ति वेदार्था:'

इति । वेदार्थविचारणाय प्रवृत्त: स: रोठाचार्य: पूर्वतनीयानामाचार्याणां व्याख्यामार्गेषु संचरन्नपि मन्त्रप्रकरणं, व्याकरणं, निरुक्तं च सम्यगनुसन्धाय शब्दत: अर्थतश्च संवादभाजां वाक्यानां सारूप्य-वैरूप्यनिरूपणार्थं प्रववृते । एवमनेन अयमृग्वेद: शास्त्रीयमार्गेण इदंप्रथमतया चर्चाविषयीकृत: । अनन्तरं च अनेके आचार्या: अमुमृग्वेदं स्वस्वप्रतिभानुसारं चर्चासाधनं कृत्वा स्वाशयाविष्करणमकुर्वन् ।

केचन व्याख्यातार: वदन्ति यत् ऋग्वेदार्थप्रकाशनविषये सायणाचार्यस्य अयमेको महान् दोष: यदयं प्रकरणविशेषानपरामृशन् केवलमेकैकस्मिन् मन्त्रे कृतादृति: तान् मुक्तकश्लोकरीत्या विवृणोति । सायणीये भाष्ये यास्कीये निरुक्ते च सम्यग्विमृश्यमाने ताभ्यामनिर्धारितार्था: बहव: शब्दा: मन्त्राश्च ऋग्वेदे समासाद्यन्त इति । अपि चोच्यते -

'युक्त्या प्रकरणेन सिद्धपदसान्निध्यासदना वा दुर्बोधानाम्

ऋचामर्थो निर्णयः, यत्र पुनः तादृग्रीत्या निर्णयः दुरासदः
तत्र केवलमगत्या व्याख्यातृणामुक्तयः शरणीकरणीया'

इति। अनया रीत्या विचार्यमाणे वेदार्थे न क्वापि ऋङ्मन्त्रेषु सन्देहाः संभविष्यन्ति ~~इति~~। तस्मात् सायणाचार्यभाष्यैकमूलकतया क्रियमाणो भाषान्तरावादः न समंजस इति, तथाऽपि मया केचन ऋङ्मन्त्राः तेषां भाष्यानुरोधेनैव सोदाहरणयुक्त्या विशदीकृताः वर्तन्ते। तत्त्वावबोधकार्थाः ऋग्वेदस्य केषुचन मन्त्रेषु वर्तन्त इति मत्वा तान् अद्वैततत्त्वावबोधकार्थान् प्रकाशयितुं यथामति प्रयत्यते।

यद्यपि ऋग्वेदस्य सर्वे मन्त्राः आत्मसाक्षात्काररूपाद्वैततत्त्वप्रतिपादने एव बद्धादराः भविष्यन्ति, अथाऽपि महार्णवे तस्मिन् विविच्य केचन मन्त्रा एव अस्मिन् प्रबन्धे उल्लिख्यन्ते। अद्वैतसिद्धान्तेषु मुख्यभूतेषु तत्त्वेषु कानिचन स्वस्कृत्य तदद्वैततत्त्वं स्वीकृतमन्त्रेण विशदीक्रियते। यत्र सायणाचार्यैरपि अद्वैतसंबन्धितद्विषयकार्थोऽभिप्रेतः सः अर्थोऽपि यथावकाशं प्रतिपाद्यते।

अपि चास्मिन् प्रबन्धे ~~स्वरेण~~ ऋङ्मन्त्राणां स्वरोऽपि दत्तो वर्तते। मन्त्रेषु स्वरे एव देवतानां सान्निध्यमिति श्रुतयः प्रतिपादयिष्यन्ति। तथा हि -

'ते नु विदित्वा ऊर्ध्वा ऋचः साम्ना यजुषः स्वरमेव प्राविशन्'

(छा० उ० १-४-३) इति श्रुत्या स्वरे देवतानां प्रवेशः उक्तो भवति। तत्रैव -

'स य एतदेवं विद्वान् अक्षरं प्रणौत्येतदेवाक्षरं स्वरममृतम-
भयं प्रविशति, तत्प्रविश्य यदमृताः देवाः तदमृतो भवति।'

(छा० उ० १-४-५) इति स्वरस्य महिमाऽपि श्रूयते।

ननु वेदे कोऽधिकारी इति चेत्-उच्यते।

'ब्रह्मविदाप्नोति परम्' (तै० आ० ८-२)
'ब्रह्मवेद ब्रह्मैव भवति' (मु०उ० ३-२-९)
'तरति शोकमात्मवित्' (छा० उ० ७-१-३)

इत्यादिश्रुतिषु ब्रह्मज्ञानयुक्तः पुरुषार्थः प्रसिद्धः। ब्रह्मज्ञान-पुरुषार्थैतदुभयज्ञानार्थी एव वेदे ऽधिकारी भवति इति। स च त्रैवर्णिकः पुरुषः।

स्त्री-शूद्रयोस्तु सत्यामपि ज्ञानापेक्षायामुपनयनाभावेन अध्ययनराहित्यात् वेदेऽधिकार: प्रतिबद्ध: । धर्म-ब्रह्मज्ञानं तु तयो: स्त्री-शूद्रयो:पुराणादिमुखेनोत्पाद्यत इति । तस्मात् त्रैवर्णिकपुरुषाणामेव वेदमुखेनार्थज्ञानेऽधिकार इति सिध्यति । संबन्धस्तु वेदस्य धर्म-ब्रह्मभ्यां सह प्रतिपाद्य-प्रतिपादकभाव इति । तदीयज्ञानेन सह जन्यजनकभावस्संबन्ध: । त्रैवर्णिकपुरुषै: सह उपकार्योपकारकभावस्संबन्ध: इति + वेदस्य अधिकारिणश्च संबन्धो भवति । एवं वेदार्थप्रतिपादनावसरेऽपि विषयाद्यनुबन्धचतुष्टयेन भाष्ये भवितव्यमिति नियम: । एतन्नियममनुसृत्य मयाप्यत्र यावच्छक्यं तावत् प्रयत्न: स्वीक्रियते ।

अस्मिन्नध्याये मुख्यत: पंचविभागा: कृता: सन्ति । एकैकस्मिन् विभागेऽपि बह्व्य: ऋच: विचार्यन्ते । अत: विचारशीला: विमर्शका: सावधानेन समालोचयन्तु इति संप्रार्थ्य निगदितेषु विषयेषु यथाक्रममुपन्यस्यन्ते ।।

२ १ ब्रह्मतत्त्वम्

ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदु: ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ।।

(ऋ० सं० १-१६४-३९) इति । ब्रह्मतत्त्वप्रतिपादिका इयम् ऋक् प्रथमे मण्डले शतोत्तरचतुष्षष्टितमे सूक्ते एकोनचत्वारिंशत्तमा भवति । इयमेव ऋक् अथर्ववेदे ९-१०-१८ इत्यत्र तैत्तिरीयारण्यके २-११-१ इत्यत्र तैत्तिरीयब्राह्मणे ३-१०-९-१४ इत्यस्मिन् स्थले निरुक्ते १३-१० इत्यत्र च प्रतिपादिता । सायणाचार्या: अस्या: ऋच: प्रकारचतुष्टयेनार्थं प्रतिपादयामासु: । एतत्सर्वं पूर्वमेव विशदीकृतं । अर्थचतुष्टयेषु प्रणवमधिकृत्यात्र मन्त्रार्थ: इदानीं विशदीक्रियते । तथा हि -

य: प्रणवस्वरूपं ब्रह्म ज्ञात्वा तस्मिन् एकीभूतो भवति स: अमृतत्वं जरा-मरणेनाभयत्वमपि प्राप्नोति । एतदाशयं मनसि कृत्त्वैव वेदपारायणकाले आदावन्ते च ओंकारपठनं साम्प्रदायिका: कुर्वन्ति । अक्षरशब्दनिर्वचनं यास्काचार्या: एवं कुर्वन्ति -

'अक्षरं न क्षरति न क्षीयते वा क्षाया भवति वा --- ।'

(नि० १३-१२) इति ।

एवंरूपे ऋगादिवेदसंबन्धिनि प्रणवरूपे अविनाशिनि ब्रह्मणि सर्वे देवाः अधिष्ठिताः सन्ति। एतद्ब्रह्म सर्वेषामपेक्षया उत्कृष्टं भवति। अत एवाद्वितीयः। अद्वितीयत्वेन तद्ब्रह्म सर्वान् लोकान् सर्वत्र सर्वदा व्याप्य तिष्ठति। अतः देवा अपि अमरत्वेन तत्र तिष्ठन्ति। प्रणवोऽपि शब्दकारणत्वात् ऋग्- मन्त्रेषु या या देवता प्रतिपाद्यते सा देवता मन्त्रमूलकेन सर्वेष्वपि अक्षरेषु प्रतिष्ठिता भवति। प्रणवादतिशयितं वस्तु अन्यन्नास्ति इति। चोक्तं माण्डूक्योपनिषदि -

'ओमित्येतदक्षरमिदं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति
सर्वमोंकार एव। यच्चान्यत्त्रिकालातीतं तदप्योंकार एव।'

(मा० का- उ० १) इति। तैत्तिरीयेऽपि -

'ओमिति ब्रह्म। ओमितीदं सर्वम्, ओमित्ये -----
ब्रह्मैवोपाप्नोति।'

(तै० उ० १-८) इति आम्नातं भवति। अस्मिन् ओंकारे अकार-उकार-मकाराः त्रयो वर्णाः वर्तन्ते। तत्र अकारमात्रायां पृथिवी, अग्निः, ऋग्वेदः, पृथिवीलोकवासिनश्च अन्तर्भूताः भवन्ति। द्वितीये उकारे अन्तरिक्षं, वायुः, यजुर्वेदः, अन्तरिक्षलोकवासिनश्च वर्तन्ते। तृतीये मकारे द्युलोक, आदित्यः, सामवेदः, द्युलोकवासिनश्च सन्निहिताः भवन्ति। अमुमेवाशयं प्रतिपादयति इयं श्रुतिः -

~~ओंकार एवेदं सर्वम्' (मा० उ०)~~

इति। ऋगुपलक्षितं परमतत्त्वं यो न विजानाति सः ऋगादिमन्त्रैः किं साधयितुं प्रभवति? अत्रायमभिप्रायः - केवलवेदाध्ययनेन अर्थज्ञानेन च तद्वस्तुनः बहिर्मुखो भवति, न अन्तर्मुखः, अन्तर्मुखाभावात् परमात्मवस्तुनः साक्षात्कारो न भवतीत्यर्थः। ये अक्षरस्वरूपस्य ब्रह्मणः ज्ञानं लभन्ते ते अनादिसंसारात् मुक्ताः भवन्ति। पुनरावृत्तिरहिताः ते स्वस्वरूपे प्रकाशन्ते। प्रणवस्वरूपिणमात्मानं प्रविश्य शान्तचित्ताः सन्तः अग्निवत् स्वरूपज्योतिषा विराजन्ते। एवं कठवल्यामाम्नातं भवति -

'अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते।

(कठ० १-३-१५) इति। तस्मात् अक्षरब्रह्मविज्ञानेनैव ध्रुवा विश्रान्ति कृतकृत्यता च

प्राप्यते, न केवलेन लोकरंजकेन वेदुष्येण इत्यनया ऋचा उक्तं भवति । अवसितो ब्रह्मविचार इति ।

एवं निरुक्त: ब्रह्म सर्वसाक्षी सत्यकाम: सत्यसंकल्प इत्युच्यते । अस्य संकल्पादेव जगत्सृष्टि: भवति । अत: अयं जगत्कर्ता भवति । सृष्टे: कर्तृत्वात् अयमीश्वर: सर्वज्ञ: इति ।

ननु यदि तदा जगन्नासीत् तर्हि तस्य जन्म कथम् ? जायमानस्य जनिक्रियायां कर्तृत्वेन कारणकत्वात्, कारणं च क्रियानिमित्ते कारणविशेष: कारणस्य सत: नियतपूर्वक्षणवर्तित्वावश्यंभावात्, इत्यादय: दोषा: संभवन्त्यपि जनिक्रियाया: प्रागपि तस्य जन्म कथं संभवतीति चेत्-उच्यते । अस्य समाधानं बहुसुलभम् । साक्षाद्वेदवाणी एवं भणति -

तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाऽजायतैकम् ।।

(ऋ० सं० १०-१२९-३) इति । इयं ऋक् दशममण्डलस्य शतोत्तरैकोनत्रिंशत्तमे तृतीया भवति । अयं मन्त्र: तैत्तिरीयब्राह्मणे २-८-९-४ इत्यत्र निरुक्ते ७-३ इत्यत्र च प्रतिपादितो भवति । मन्त्रार्थ: -

मन्त्रेऽस्मिन् प्रतिपादिततम:शब्देन मायाविद्याशक्त्यादिशब्दवाच्यं जगद्विकारोपादानमनिर्वचनीयं मूलाज्ञानमुच्यते । यथा नैशं तम: पदार्थानावृणोतीत एवमिदमपि तम: ब्रह्मतत्त्वमावृणोति । अत: अज्ञानस्य तमश्शब्देन व्यवहार: । तेन तमसा, अग्रे- सृष्टे: प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत् गूढं- संवृतं संस्काररूपापन्नया स्ववशीकृतं तम: आसीत् । तम:- भावरूपमज्ञानं मूलकारणं जगद्विकारनिष्पादनक्षमं ब्रह्मण्याश्रितं, तदात्मना तद्रूपत्वात्, यत: सर्वं जगत् कार्यरूपात् प्राक् अव्यक्तं तम आसीत्, अज्ञानाभिन्नं जगत्तदानीमप्यासीदिति भाव: । यथा मृत्पिण्डे घटो गूढो भवति, यथा वा बीजे वृक्ष: तद्वत् कारणभूतेन तेन ईश्वरेण सर्वं कार्यजातं जगत् स्वमायया आच्छादितं भवति । आच्छादकात् तस्मात् तमस: नामरूपाभ्यां यदा आविर्भवनं तदेव तस्य प्रथमजन्म इत्युच्यते । एवं निरुच्यमाणप्रकारेण कारणे पूर्वमविद्यमानमसदेव कार्यमुत्पद्यते इति वदन्तामसत्कार्यवादिनां

काणादादीनां मतं प्रत्याख्यातं भवति । सर्वं कारणरूपेण विद्यमानमेव कार्यम-व्यक्तं तत्कारकव्यापारेण व्यक्तो भवति इत्याचक्षाणां सांख्यमीमांसकादीनां सत्कार्यवादीनां मतमेवात्र समादृतं भवतीति ज्ञेयम् । एवं च जगत: स्थूलारूपापत्तिरेव आविर्भाव:, कारणरूपसंस्कारावस्था एव नाश इत्युच्यते । अत: अत्र स्थूलरूपेण तन्निषिध्यत इति भाव: ।

ननु आवरकत्वादावरकं तम: कर्तृ, आवरणीयत्वाज्जगत्कर्म, कथं तयो: कर्मकर्त्रो: तादात्म्यं भवति ? अत: तमसा गूढं तम इति विरुद्धमिति चेत् - न । इयं वेदवाणी एव समाधास्यति - अप्रकेतमिति । अप्रकेतं- प्रकर्षेण ज्ञातुमशक्यम् । तमस: अत्यन्तभिन्नत्वेन अज्ञायमानां, उक्तकर्मकर्त्रोर्भेदे प्रमाणशून्यमिति यावत् । यद्यपि जगत: तमसश्च कर्मकर्तृभावौ यौक्तिकौ विद्येते, तथाऽपि व्यवहारदशायामिव तस्यां दशायां तन्नामरूपाभ्यां विस्पष्टं न ज्ञायते । अत: कर्म-कर्त्रो: तादात्म्य-वर्णनमविरुद्धमिति । चोक्तं मनुना -

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत: ।।' (मनु० १-५) इति ।

कुतो न प्रज्ञायते इत्यत आह - सलिलम् । सलिलं- संगतम् । 'षल गतौ' इति धातो: औणादिक: इलच्प्रत्यय: । इदं दृश्यमानं सर्वं जगत् तदानीमपि कारणेन अविभागापन्नं सत् तमसि तादात्म्येन संबन्धम् आ:- आसीत् । आसीदित्यत्र अस्तेर्लुङि लङि तिपि 'बहुलं छन्दसि', पा०सू० ७-३-९८ इति सूत्रेण इडभावे 'हल्ङ्याभ्य:' इति तिलोपे 'तिप्यनस्ते:' (पा० सू० ८-२-७३) इति पर्युदासात् दकाराभावो भवति । तथा च आ: इति रूपं भवति । एतदज्ञानं तत्त्वज्ञानमात्रेण निवर्त्यत्वात् तत्कारणस्य मूलाज्ञानस्य तुच्छत्वमभ्युपगम्यते । अमुमेव विशदयति- तुच्छ्येनेति । तुच्छ्येन इत्यत्र छान्दस: यकारोपजन: । तुच्छकल्पेन सदसद्विलक्षणेनादिना भाव-रूपज्ञानेन आभु- आसमन्तात् भवतीति आभु - भवनधर्मकं जगत् अपि हितं- निगूढतया आच्छादितं एकं- एकीभूतं संसाररूपैकावस्थापन्नं, कारणेन तमसा अविभागत्वेन तदा आसीत्, अत्र च तदा इति अध्याहार: कर्तव्य: । तदा तत् कार्यजातं जगत्, तपस:- स्रष्टव्यपर्यालोचनरूपकस्य ईश्वरस्य महिना- महिम्ना

माहात्म्येन अजायत- स्थूलविचित्ररूपेण प्रादुर्भूत इति मन्त्रार्थः । अनेन मन्त्रेण ब्रह्मणः सर्वज्ञत्वं सिद्धं भवति । तपसः पर्यालोचनरूपत्वं श्रुतिषु प्रसिद्धं भवति -

'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।'

(मुण्ड० १-१-६) इति । मन्त्रस्यास्य भावः - महाप्रलये सर्वं जगत् अज्ञानेनावृतमासीत् । सर्वेश्वरसंकल्पात् पुनः इदं जगत् प्रादुरभूत् इति ।

स्वयंभूतः सर्वज्ञः सर्वेश्वरः विश्वरक्षणदीक्षितः दयानिधिर्भगवान् परमेण प्रेम्णा स्थितान् भक्तान् त्वरितमनुगृह्णाति । स्वभक्तान्यथाभावेभ्यः तेभ्यः असौ परमेश्वरः प्रीतः सन् भक्तानामभिरुचिमनुरुध्य सर्वाभरणसंपन्नेन सालंकृतदेहः सन् स्वात्मानं दर्शयति । एवं भक्तानामत्याचारानाचारादिना असौ ईश्वरः कुपितः निरतिशयौजस्वितरो भूत्वा धनःबाणादि आयुधजातं गृहीत्वा तान् दुष्टान् सपदि हिनस्ति । एवं स्वौजसा दुष्टादुष्टयार्निग्रहानुग्रहाभ्यां जीवानां धर्माधर्मान् पुरस्कृत्य लोकरक्षणं विदधाति इति अयं मन्त्रः अनुवदति -

अर्हन् बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥

(ऋ० सं० २-३३-१०) इति । इयम् ऋक् द्वितीये मण्डले त्रयस्त्रिंशत्तमे सूक्ते दशमी भवति । तैत्तिरीयब्राह्मणेऽपि ऋगियं ४-५-७ इत्यत्र पठिता भवति । मन्त्रार्थः -

हे रुद्र त्वं अर्हन्- अर्हः योग्य इति । निस्थूलसामर्थ्यार्पितः परममान्यः सन् सायकानि- बाणान् धन्व- धनुश्च दुष्टनिग्रहाय बिभर्षि- हस्तयोर्धारयसि । एवं अर्हन्नेव यजतं- प्रशंसनीयरूपं यजनीयं विश्वरूपं- बहुविधदिव्यरूपयुक्तं निष्कं- हारं कण्ठे बिभर्षि इति । सौन्दर्यसारसर्वस्वे चेतश्चमत्कारिणि दिव्यविग्रहे दिव्यान्याभरणान्याधाय भक्तानामनुग्रहाय तेषां दृष्टिपथमागच्छसीति यावत् ।

एवमर्हन्नेव इदं- सर्वं विश्वं अभ्वं- महन्नामैतत्, अतिविस्तृतं जगत् दयसे- पालयसि । 'देङ् रक्षणे' इति धातुः । हे भगवन् रुद्रेश्वर त्वत्तो न्यत् किंचिदपि भूतजातं ओजीयः- आजोरूपं बलवत्तरं न वै अस्ति- न खलु विद्यते । तस्मात् उक्तव्यापारेषु त्वमेव योग्या इति । ओजश्शब्दात् मत्वर्थीयो विनिः, ततः आतिशायनिक ईयसुन्, विन्मतोर्लुक्, टेः इति टिलोपो भवति ।

अयमर्हन्निति वैदिको शब्दः जैन- जैनैः स्वतीर्थंकरपरतया संयोजितः। एतेन वैदिकसभ्यता सर्वेषां मतानामार्षं मूलतत्वं भवतीति ज्ञायते। अनेन मन्त्रेण ईश्वरस्य सर्वलोकरक्षणकर्तव्यनिर्वहणमुक्तं भवति।

एवंरूपो ईश्वरः सृष्टेः पूर्वं चिन्मात्ररूपः एक एवासीत्। पश्चात् सर्गस्थित्योरात्ममायया उपात्तसर्वदेवाद्याकारो बभूव, प्रलये तु पुनः अनाकार एवासौ भविष्यति। तस्मात् सर्वात्मा भगवान् सर्वाकारोऽपि वस्तुतः अनाकार इति बवेदितव्यः। अतः तस्य परमात्मनः सकाशात् अनन्तसुखलाभार्थं तस्याभ्यर्थनं कर्तव्यमिति श्रुतिः वदति -

शं नो अजएकपाद्देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः।
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा॥

(ऋ० सं० ७-३५-१३) इति। अयं मन्त्रः सप्तमे मण्डले पंचत्रिंशत्तमे सूक्ते द्वादशो भवति। इयम् ऋक् १९-११-३ इत्यत्र अथर्ववेदेऽपि पठिता वर्तते। मन्त्रार्थः -

अजः- अविनाशी देवः- स्वयंप्रकाशः एकपात्- एकः पादः स्थावरजंगमात्मको यस्य सः। तथा च श्रुतयः -

'पादोऽस्य विश्वा भूतानि' (ऋ० सं० १०-९०-३)

इति। 'पादोऽस्येहाभवत्पुनः' (ऋ० सं० १०-९०-४)

इति च श्रुतौ

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।'

(भग० १०-४२) इति स्मृतिश्च भवन्ति। एवंभूतो भगवान् विश्वात्मा नः- सर्वेषामस्माकं कृते शं- शान्त्यै सुखाय चास्तु। अहिर्बुध्न्यः। अहिः- प्रसिद्धो सर्पः स्थितः, बुध्ने- शरीरे येनासौ अहिर्बुध्न्यः- भुजगभूषणः भूतनाथो भवानीपतिः महादेव इति। तथा चामरकोशे -

'अहिर्बुध्न्यो ष्टमूर्तिश्च गजारिश्च महानटः।'

इति तन्नाम आम्नातं भवति। अयं परमेश्वरः शं नो भवति। समुद्रः। समुद्भवन्ति- समुद्भवन्ति अस्माद्भूतानि सर्वाणि जीवाश्च सर्गसमये, स्थितिसमये अन्ते प्रलयसमये च तानि ते अस्मिन् संद्रवन्ति। एवंरूपो सः समुद्रो भवति।

सर्गस्थितिलयकर्ता उपादानकारणरूप इत्यर्थः । महाकारणस्यैव सतः कार्योत्पादकत्व-तत्स्थितिस्थापकत्व-तल्लयाधिष्ठानत्वं श्रुतिषु दर्शनात् । एवं भूतः सः नः सुखं ददातु ।

अपां नपात्-। नपात्- अविद्यमानं पात इति, पतनं च्युतिः यस्य सः अच्युतो देवः, 'अपां नपात्' इत्यनेनाभिधीयते । नारायण-महादेवसाकारस्वरूपस्यास्य अपांनपात्संज्ञकत्वं ऋगन्तरे प्रसिद्धं भवति । तथा हि -

हिरण्यरूपः स हिरण्यसन्दृगपांनपात्सेदु हिरण्यवर्णः ।

(ऋ० सं० २-३५-१०) इति । अस्यार्थः -

सः अपांनपात् हिरण्यरूपः । हिरण्यं- हितरमणीयं रूप्यत इति रूपं स्वरूपं शरीरं क्रियते यस्य सः, हितरमणीयशरीर इति यावत् । एवं सः हिरण्यसंदृक् । सम्यक् पश्यन्तीति संदृशः । चक्षुरादीनि इन्द्रियाणि यस्य हितरमणीयानि विद्यन्ते सः हितरमणीयेन्द्रियो भवति । हिरण्यवर्णः- हिरण्यसदृशकान्तियुक्तः सेदु- स एव अपांनपात् स्वधाम्नि विराजते इति । स्वरूपो देवो अच्युतः निराकारस्वरूपेण अन्तरिक्षं, तत्र वर्तमाना अपः, अवस्थितं विद्युतं च अधिष्ठाय स्वसत्तया अन्तरिक्षात् अपां वर्षणं कृत्वा श्रेष्ठयाः गंगाद्याः नदीः प्रकटयति । महत्या वृष्ट्या नदीरूपेण प्रकटीभूताः ताः भगवतो विपुलं माहात्म्यं सर्वत्र कृतज्ञतया प्रकटयन्त्यः मधुरध्वनिना गायन्त्य इव समुद्रमभिमुखीकृत्य प्रवहन्ति इति आम्नातं भवति । एवमन्यत्र वेदवाणी साक्षाद्वदति -

अपांनपादाह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीः हिरण्यवर्णाः परियन्ति यह्वीः ।।

(ऋ० सं० २-३५-९) इति । मन्त्रोऽयं द्वितीयमण्डलस्य त्रयस्त्रिंशत्तमे सूक्ते नवमो भवति । मन्त्रार्थः -

अपांनपात्संज्ञकः परमेश्वरः अपामुपस्थानमन्तरिक्षं अधिष्ठितवान्, स्वसत्तया स्फूर्त्या च आरूढवान् इति । उत्कृष्टतरो भगवानसौ कुटिलगतीनामपि मध्येऽपि आस्थितवान् । विद्योतमानं नभसमाच्छादयन् जलवर्षणाय अवस्थितो भुवि । स्वशक्त्या अन्तरिक्षात् जलवर्षितुरपांनपातः प्रशस्यतमं माहात्म्यं वहन्त्यः सर्वत्र प्रकटयन्त्यश्च, यह्व्यः- महत्यः हिरण्यवन्निर्मलरूपाः गंगाद्याः नद्यः

परिगच्छन्ति इति । स: भगवान् भक्तानां निखिलेभ्य: उपद्रवेभ्य: संसारसागराच्च पारयिता । अत: तस्य पेरुरिति नाम । चोक्तं भगवद्गीतायाम् -

'तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।'

(भग० १२-७) इति । एवंरूप: न: शं भवतु । प्रश्नि:- प्रश्नुते इति । यो भगवान् बीजप्रदेन पिता भवति, स एव सर्वेषां माता भगवती च भवति तस्य प्रश्निरित्युच्यते । प्रकर्षेण व्याप्नोति सर्वाणि भूतानि या सा चितिशक्तिरिति यावत् । सा तु एवंरूपा देवगोपा भवति इति । देवान्-दातृन् यजमानान् गोपायति- रक्षति या सा देवगोपा इति । तदुक्तं दुर्गासप्तशत्याम् -

'या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।।'

(दुर्गास० ५-७८) इति । एवंरूपा सा देवी अस्माकं कल्याणमातनोतु इति समाप्तो मन्त्रार्थ: । अनेन मन्त्रेण अनाकारसर्वाकारोभयविधरूपयो: चिच्छक्त्यो: प्रार्थना-पुरस्सरं ताभ्यां सकाशात् शाश्वतसुखामृतत्वस्य अभ्यर्थना क्रियते ।

सकलानन्तगुणगणाकुल: भगवान् स ईश्वर: समस्तनिगमागमस्तोमसंस्तुत: उन्नतमहिम्ना शोभमान: महति शुद्धे भ्राजमान: अपरिमितविमलबलविज्ञानपरिपूर्ण: सन् संसारे स्मिन् पतितानस्मान् विमलबलज्ञानसमर्पणेन पुष्णातु । यत: मिथ: समुच्छिताभ्यां बलविज्ञानाभ्यां सौजन्यं समेधते, वाक्कायमनांसि अप्रत्यूहं सत्पथे प्रवर्तन्ते । राजसा: तामसाश्च भावा: तेषां प्रवृत्तयश्च सद्य: तिरोभवन्ति । तत: प्रादुर्भवन्ति च सहसा सात्त्विका: भावा: प्रवृत्तयश्च । अपिचास्मिन् श्रेयोऽध्वनि भूयांस: कामक्रोधलोभमोहदम्भाहंकारमदमात्सर्यादय: प्रतीपा: स्वान्तरवस्थिता: सहजा: शत्रव: सन्ति । यद्भयात् सप्तसागरानुल्लंघ्य श्रेयस्साधनानि ज्ञानभक्तिवैराग्यादीनि प्रपलायन्ते । तेषां सर्वेषां ज्ञानादिविद्रोहिणां पुन: पुन: दु:खदायिनां शत्रूणां विध्वंसनेन करुणामूर्ति: महादेवस्सोम: न: कल्याणं तनोतु इति अनया ऋचा प्रार्थ्यते -

सनादग्ने मृणीहि ...

(ऋ० सं० ९-४-३) इति । ऋगियं नवमे मण्डले चतुर्थे सूक्ते तृतीया भवति ।

इयं सामवेदेऽपि १०४६ इत्यत्र पठिता दृश्यते । मन्त्रार्थ: -

हे सोम ! महादेव त्वं- दद्दां- बलं सना- अस्मभ्यं देहि उत- अपि च क्रतुं- प्रज्ञारूपं विज्ञानं निश्चयबुद्धिरिति यावत् । सन् प्रयच्छ । वृधा- मारक- रूपान् हिंसान् शत्रून् अपि जहि- मारय । अथ- अनन्तरं न:- अस्माकं वस्यस:- श्रेय: कृधि- कुरु । अस्मभ्यं कल्याणं देहीति । मन्त्रेऽस्मिन् सना- अथा इत्यत्र छान्दसो दीर्घो भवति । एवमेवात्र ऋगन्तराण्यपि अनुसन्धेयानि । तथा हि -

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।

(ऋ० सं० ६-१९-९३) इति । मन्त्रार्थ: -

हे वृषभ- अभीष्टकामानां वर्षित: हे परमात्मन् ते सर्वव्यापकस्य तव शुष्म- बलं पश्चात्- पश्चिमभागात् उत्तरात्- उत्तरभागात् अधरात्- दक्षिणभागात् पुरस्तात्- पूर्वं पूर्वभागात् सर्वस्माद् दिग्भागाद् अस्मासु आ- एतु- आगच्छतु इति । सर्वतो वर्धितं त्वदीयं बलमवाप्य वयं सदा बलिनो विजयिनश्च भवेम इत्यभिप्राय: । अन्यो मन्त्र: -

शतं ते राजन् भिषज: सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।

(ऋ० सं० १-२४-९) इति । मन्त्रार्थ: -

हे राजन् ! वरुण ते परमेश्वरस्य तव शतं- शतसंख्याकानि सहस्रं- सहस्र- संख्याकानि अनन्तानि इत्यर्थ: । भिषज:- अज्ञानादि भवरोगनिवारकाणि विज्ञानलक्षणानि औषधानि सन्ति । तेषु या उर्वी- विस्तीर्णा गभीरा- गाम्भीर्ययुता स्थिता, सुमते--- सुमति- शोभनप्रज्ञा अस्ति । सा अस्मासु अस्तु इति । अपरो मन्त्र: -

जहि शत्रूं रप मृधो नुदस्वाभय कृणुहि विश्वतो न: ।

(ऋ० सं० ३-४७-२) इति । मन्त्रस्य भाव: -

न:- अस्माकं मृध:- पीडयितॄन् बाह्याभ्यन्तरारातीन् अप नुदस्व- अपबाधस्व + विनाशय इति । अथ- अनन्तरं च अस्माकं विश्वत:- सर्वत: अभयं कृणुहि- कुरु सर्वत: भयरहितानस्मान् कुरु इत्यर्थ: ।

एवं प्रतिपादितै: चतुर्भि: मन्त्रै: सर्वशक्तिमान् भगवान् ईश्वर: अस्माकं

शत्रुविध्वंसनेन ज्ञानदानेन च कल्याणं सर्वदा प्रयच्छतु इत्युक्तं भवति + इति ।
भगवदेकनिष्ठाया: कश्चित् पुण्यकर्मा निरतिशयप्रीत्या भक्त्या च अखिललोकशरण्यं जगद्गुरुं विश्वेश्वरं प्रपद्यते । तस्येश्वरस्य निगमागमेषु प्रतिपादितै: गुण-नामादिभि: संकीर्तनं करोति । तस्मै सर्वतोभावेन सर्वात्मना सर्वस्वं च निवेदयति । एवं कृत: स: भवसागराद्विमुक्त: पुनरावृत्तिविवर्जितं तद्विष्णो: परमं पदं प्राप्नोतीत्यत: मोक्षसाधनगणनासु उत्कृष्टस्यात्मनिवेदनस्य जनानां महतीं रुचिं जनयितुं ईश्वरस्य सार्वात्म्यभावकज्ञाननिरूपेण मन्त्रोऽयं वर्णयति -

य: पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत् सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥

(ऋ० सं० १-१५६-२) इति । प्रथममण्डलस्य शतोत्तरषट्पंचाशत्तमे सूक्ते मन्त्रोऽयं द्वितीय: । अयं मन्त्र: तैत्तिरीयब्राह्मणे २-४-३-९ इत्यत्र पठित: । मन्त्रार्थ: -

य:- कश्चित् सुकृती मर्त्य: पूर्व्याय- पूर्वमेव भवाय वेधसे- विविधप्राणिकृतकर्मफलव्यवस्थापयित्रे नवीयसे- नित्यनूतनाय शाश्वतस्वरूपायेति यावत् । सुमज्जानये- स्वयमेवोत्पन्नाय, स्वयमेवात्ममायया प्रकटीभवति स्वयंभुवे इति यावत् । सुमत--स्वयमित् 'सुमत: स्वयमित्यर्थे' इति + यास्क: । जनि- औणादिके इति कृते जानि इति रूपं सिध्यति । एवं विशेषणविशिष्टाय विष्णवे- व्यापनशीलाय भगवते ददाशति- सहात्मना सर्वस्वं समर्पयति । निरन्तरं भगवदेकश्रवणकीर्तनयजनादिकं कुर्वन् ईश्वरे अर्पितजीवित: सन् परमप्रियं सुहृत्तमं भगवन्तं क्षणमात्रमप्यविस्मरन् विषयकारवृत्तिशून्येन चेतस: तमीश्वरमनवरतं भेदभावनाय ध्यायमान: भक्त: आत्मनिवेदक इत्युच्यते ।

किं च य: अस्य विष्णो: महत:- महानुभावस्य निराकारस्य निर्गुणस्य यत् महि- महत् पूज्यं जातं प्रकटीभूतं सगुणं साकारस्वरूपं ब्रवत्- ब्रूयात्, ब्रवीते लेटि अडागमे सति ब्रवदिति रूपम् निष्पद्यते । तदीयकल्याणगुणानुसन्धानेन तस्य दिव्यनामभिश्च भगवन्तं तं संकीर्तयेत् इत्यर्थ: । सेदु इत्यत्र सा इत् उ इति पदत्रयं भवति । तत्र उकार:- अपिशब्दार्थ: । इत्- एवकारार्थ: । सकारस्य भिन्नक्रमेणान्वय: । सोऽपि ज्ञानवान् आत्मनिवेदको भक्त: एव निश्चयेन

श्रवोभि:- श्रवणीयै: विख्यातयशोभि: युक्त: युज्यं चित्- ज्ञानिभि: गन्तव्यं कैवल्यं धाम अभि- आभिमुख्येन असत्- गच्छति + प्राप्नोति इति। एवमनेन मन्त्रेण ईश्वरस्य अभिमुखकिरणेन तस्य सार्वात्म्यं प्रतिपादितं भवति। ईश्वरो सर्वात्मा सिध्यति।

एवं सर्वात्मन: परमात्मन: सर्वे प्राणिन: सर्वत्र सदा सर्वथा सुखमेव समीदान्त इति निर्विवादम्। परं तदविद्या-तत्कार्यविमोहितानामात्मानां विषयेषु समाविष्टानां संसारीणां जीवानां विषयेभ्य: सुखप्राप्तिमाशासनानां तेभ्य: कदा कथमपि तत्सुलभं नाभूत् न भवति न भविष्यतीत्यपि सुनिश्चितं भवति। यत: तस्या: वांछाया: अनन्तत्वात् वांछितानां कृत्स्नानां विषयाणां सुखं संचिते आयुषि प्राप्तुं न शक्यत। अपि च स्वल्पस्य सुखस्य तस्य क्षणिकत्वात् तदनन्तरमापाततो दु:खस्य प्रतीयमानत्वात् दु:खमिश्रितत्वेन हेतुना दु:खस्वरूपत्वं विषसंपृक्तमन्नस्य विषत्वमिव अवगम्यते न सुखरूपत्वम्। तथा च श्रूयते काठके -

'श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेज:।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते॥'
'न वित्तेन तर्पणीयो मनुष्य:'

(कठ० १-१-२६,२७) इति। अत्र तत्त्वबुभुत्सु: ऋषिकुमारो मुमुक्षु: नचिकेता यमं प्रति विषयभोगस्य सर्वथा अनर्थहेतुत्वेन त्याज्यत्वं स्पष्टतरं ब्रूते। अनन्तरं तत्रैव यम: नचिकेतसं प्रति सुखोपभोगान् पदार्थान् वृणीष्व इति वदति। नचिकेता तु तु – 'वरस्तु मे वरणीय: स एव' (कठ० १-१-२७)

इत्यनेन दृढतरमात्माज्ञानरूपं निजाग्रहमेवादर्शयत्। तस्मात् निश्चीयते यत् विषयेभ्य: कथमपि समीहितं सुखं सुलभं न भवतीति। सत्येवं तत्सुखं कस्माल्लभ्यत इति चेत्-उच्यते। अखण्डानन्दनिधे: परमात्मन: ज्ञानेनैव तदन्तं सुखं लभ्यते। यत: सुखमेव चाभीष्टं न सर्वेषां प्राणीनांमात्मज्ञानसुखमेव सदा सर्वत्र धन-पुत्र-पिण्डेन्द्रिय-प्राणापेक्षया निरतिशयप्रेमास्पदत्वात् तज्ज्ञानमेव परमसुखरूपत्वमिति अवगन्तव्यम्। तथा च श्रुतय: -

'आत्मनस्तु कामाय सर्वमिदं प्रियं भवति' (बृ० उ० ४-५-६)

'आनन्दो ब्रह्मेति व्यजानात्, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' (तै० उ० ३-६)

'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' (छा० उ० ७-२३-६)

इत्यादयः भवन्ति ।

किं च सुखरूपस्य तस्येश्वरस्य सर्वत्र परिपूर्णत्वात् वसुत्वं, सर्वस्य चराचरलोकस्य सुखेन पोषकत्वात् पितृत्वं, सुषुप्त्यादौ स्वस्मिन् सुखनिधौ धारकत्वात् तस्य मातृत्वमेवं परमप्रियत्वं च सिध्यन्ति । तस्मात् सांसारिकाः सर्वे जीवाः ऐहिकामुष्मिकविषयभोगेषु नश्वरत्वं कर्तृत्वमेव दुःखरूपस्य हेतुत्वं, दृश्यमाणपदार्थेषु विविधदोषजातत्वं च दृढं पर्यालोच्य तेभ्यो दृढामुपरतिं संपादयितुं केवलस्य परमात्मनः ज्ञानरूपसुखमेव कामयितव्या इति सर्वानुपदिशति इयं वेदवाणी -

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अधा ते सुम्नमीमहे ।।

(ऋ० सं० ८-९८-११) इति । ऋगियं अष्टममण्डलस्याष्टानवतितमे सूक्ते एकादशी भवति । इयमेव सामवेदे ११७० इत्यत्र, अथर्ववेदे २०-१०८-२ इत्यत्र च पठिता ।

मन्त्रार्थः - हे वसो ! सर्वत्र सदा वसतीति वसुः, तस्य संबुद्धौ वसो ! इति रूपम् । परिपूर्णपरात्मन् इत्यर्थः । त्वं नः- सर्वेषामस्माकं जीवात्मनां पिता- पितृवत् सुखपोषकः हि- ननु । हे शतक्रतो- अनन्तपूर्णचैतन्यप्रकाश ! त्वमस्माकं माता- मातृवत् स्वस्मिन् सुखस्वरूपे धारकः बभूविथ- असि । अधा इत्यत्र छान्दसो दीर्घः । अध- अनन्तरं वयं ते-तव सत्यज्ञानानन्ताद्वयानन्द-पूर्णस्य परमात्मनः स्वस्वरूपभूतं सुम्नं- सुखम् ईमहे- कामयामहे । इति मन्त्रार्थः ।

अत्रायं भावः - सर्वं वाक्यं सावधारणम्' इति न्यायेन यदेव तव निर्विषयमखण्डमविकारं समरसं पूर्णं सुखमस्ति तदेव वयमिच्छामहे । नान्यं विषयेन्द्रियसंयोगजमल्पं विनश्वरं सविकारं तुच्छं सुखशब्दवाच्यमपि दुःखरूपं न कामयामहे इति । एवमत्र अन्यान्यपि मन्त्राणि द्रष्टव्यानि ।

अन्यो मन्त्रः -

इहत्वष्टारमग्रियं विश्वरूपमुपह्वये । अस्माकमस्तु केवलः ।।

(ऋ० सं० १-१३-१०) इति । अयं मन्त्रः प्रथममण्डले त्रयोदशे सूक्ते दशमो भवति ।

मन्त्रार्थः - इह- अस्मिन् हृदये त्वष्टारं- त्वष्टा देवो विश्वकर्मा तं अग्रियं- प्रशस्ततमं विश्वरूपं- सर्वात्मानं उपह्वये- आह्वयामि । स्वंरूपो सः अस्माकं हृदये एक एव सत्यज्ञानानन्दनिधिः परमात्माऽकेवलो स्तु । इति ।

अन्या ऋक् -

यच्छा॑ नः॒ शर्म॑ स॒प्रथः॑ (ऋ० सं० १-२२-१५)

इति । मन्त्रार्थः - हे आनन्दनिधे परमेश्वर त्वं सप्रथः- विस्तारयुक्तमखण्डं परिपूर्णं शर्म- अमृतरूपं सुखं नः- अस्मभ्यं शास्त्रदृष्ट्या त्वामुपसन्नेभ्यः यच्छ- प्रयच्छ । वैराग्यसंपन्नाः वयं यत् कामयामहे तत् इत्यर्थः । अपरा ऋक् -

आ॒रे ते॑ गो॒घ्नमु॒त पू॑रुष॒घ्नं क्षय॑द्वीर सु॒म्नम॒स्मे ते॑ अस्तु ।

(ऋ० सं० १-११४-१०) इति । ऋगर्थः - हे क्षयद्वीर- क्षपितसर्वशत्रुजन परमेश्वर ते- त्वदीयं गोघ्नं- गोहननसाधनमायुधम् उत- अपि च पूरुषघ्नं- पुरुषस्य हननरूपमायुधं एतदुभयमपि आरे- अस्मत्तः विप्रकृष्टे दूरे देशे तिष्ठतु । अस्मे- अस्मासु ते- तव सुम्नं- साक्षात्काररूपं सुखं अस्तु- भवतु इति । मन्त्रान्तरमपि-

सखा॑ पि॒ता पि॒तृत॑मः पितॄ॒णाम्

(ऋ० सं० ४-१७-१७) इति । मन्त्रार्थः -

सखा- समानख्यानः सर्वत्र समानस्वरूपप्रतीतिकः पिता- पालकः पितॄणाम्- पालकानां सृष्टिस्थितिलयकर्तॄणां मध्ये अयं पितृतमः- अतिशयेन पालनलालन- पोषणकर्ता परंब्रह्म इति यावत् । अन्यो मन्त्रः -

मा॒तेव॒ यद्भर॑से पप्रथा॒नो जनं॑जनं॒ धाय॑से॒ चक्ष॑से च ।

(५-१५-४) (ऋ० सं० ५-१५-४) इति । मन्त्रार्थः -

पप्रथानः- सर्वत्र सदाऽस्तित्वभातिप्रियरूपेण प्रसिद्धिं प्राप्तः परमेश्वरः यत्- यस्त्वं मातेव- जननीव, यथा जननी स्वोदरे पुत्रान् धारयति तथा त्वं चराचरान् स्वस्मिन् धारयसि । जनंजनं- अत्र वीप्सायां द्वितीयोच्चारणम् । सर्वंजनान् भरसे- बिभर्षि एवं धारयसि, दृष्टिगोचरो भवसि इति । स्वज्ञानरूप- ममृतपदं सः ददातीत्यर्थः । अपरो मन्त्रः -

यस्य॑ ते स्वा॒दु स॒ख्यं स्वा॒द्वी प्रणी॑तिरद्रिवः ।

(ऋ० सं० ८-६८-११) इति । मन्त्रभावः - यस्य- सच्चिदानन्दरूपस्य परमात्मनः

तव मैत्री आह्लादकरत्वात् आनन्दरूपा भवति । परमोत्कृष्टस्य तवानन्यभक्तिरूप: परमप्रेम: परमानन्दप्रदा मधुरतरा भवतु इति ।

अपरा च ऋक् -

पेष्ठंमु प्रियाणां स्तुह्यासावातिथिम् ।

(ऋ० सं० ८-१०३-१०) इति । मन्त्रार्थ: - ऋषि: ब्रूते - त्वं हे अंग । असौ अतिथिम्- अतिथिरूपेणावर्तमानमग्निं, देवानामाहारस्य नयनार्थमागतो ग्निदेव: अस्माकं यागे अतिथि: भवति । अतिथिसेवया सर्वं सिध्यति इत्युच्यते किल । अस्य पूजनेन सर्वे देवा: प्रीणन्ति । प्रीतास्ते अस्माकमावश्यकं सर्वं सुखं दास्यन्तीति यावत् । अयमग्नि: कथंरूप इत्युक्ते प्रियाणां- प्रीतिभाजां धनपुत्रादीनां मध्ये प्रेष्ठं- अतिशयेन प्रियं प्रियतममिति । एवंरूपं प्रत्यगात्मानमग्निं स्तुहि इति । एवमादिरूप: स परमात्मा अस्माकं हृदि सर्वात्मना वर्तमानुस्सन् शास्त्रादीनां श्रवणादिषु प्ररोचनं कृत्वा आत्मसाक्षात्काररूपं सुखं ददातु इति तस्मिन् प्रार्थना क्रियते ।

सकलरूपेणावस्थित: परब्रह्म वस्तुत: एक एव भवति । स: नामरूपाधिना स्वकीय-इच्छानुसारेण च अनेकदेहयुक्तो भूत्वा तेन तेन देहेन अनन्यशरणेन आगतान् भक्तान् स्वज्ञानेनोद्धरति । एवमनेकरूपेण स्थित: स: शास्त्रदृष्ट्या सम्यग्ज्ञानेन च दृश्यमाने एक इत्यत: तस्मिन् भेद एव न संभवति । तस्य केवलं नाम्ना भेदव्यपदेश इतीयं वेदवाणी द्रढीकरिष्यति -

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायु: पूषा सरस्वती सजोषस: ।
आदित्या विष्णुर्मरुत: स्वर्बृहत् सोमो रुद्रो अदितिर्ब्रह्मणस्पति: ।।

(ऋ० सं० १०-६५-१) इति । दशमे मण्डले पंचषष्ठितमे सूक्ते ऋगियं प्रथमा भवति ।

मन्त्रार्थ: - अग्नि:- दिव्यशक्तिसंपन्न: प्रत्यगभिन्न: परमात्मा इति । ननु भूताग्नावेव तस्याग्निपदस्य रूढत्वात् तस्यैव ग्रहणं युक्तं भवति, सत्येवं कथमग्निपदेन परमात्मा गृह्यत इति चेत्- सत्यमेव । यद्यपि भूताग्निरेव अग्निरिति वक्तव्यम्, तथापि प्रकरणात् अध्यात्मनिरूपणप्रसंगे त्र तस्याग्निपदस्य परमात्मा इत्येव ग्रहणं युक्ततरं भवति । सर्वेषां देवानामन्त:स्थित: परमात्मा एक एवेति

किलास्माकं राद्धान्तः। अतो न दोष इति। अपि च अग्निशब्दपर्यायेण वैश्वानर-जातवेदशब्दयोः सद्भावेन, भौतिकाग्नौ वैश्वानरत्वस्य जातवेदत्वस्य चांजस्येन असंभवात् मन्त्रेऽस्मिन् अग्निपदाभिधेयः परमात्मा एवोपादेयो भवति। सूत्रभाष्येऽपि शंकराचार्याः[1] वैश्वानराधिकरणे अग्निपदवाच्यस्य वैश्वानरशब्दस्य परमात्मा इत्यर्थं व्यवृण्वन्। उपपत्तिरपि - न हि केवलं भौतिकाग्नौ - विश्वश्चायं नरश्चेति, विश्वेषां वा अयं नरः, विश्वे वा नरा अस्य, इति सर्वात्मत्व-बोधको व्युत्पत्तियोगः संभवति। केवलादस्मादग्नेः सर्वज्ञकल्पाः वेदाः कथं प्रादुर्भवितुं शक्नुवन्ति। तस्य स्वरूपं मन्त्रान्तरे प्रतिपादितं भवति -

विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्।

(ऋ० सं० १०-८८-१२) इति। मन्त्रस्यास्यार्थः प्रथमाध्याये एव व्याख्यातः।

अन्या ऋक् -

स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः।

(ऋ० सं० १०-८८-४) इति। मन्त्रभावः - वैश्वानररूपः सोऽग्निर्जातवेदाः पतत्रि- पतनशीलं यत् पक्षिसमुदायं इत्वरं- गमनशीलं सरीसृपादिकं स्थाः- स्थावररूपं गिरिवृक्षादिकं जगत्- मनजपश्वादिकं गतिमत्। एवं च स्थावरजंगमात्मकं जगत् इत्यर्थः। श्वात्रि- स्वाद्भुतशक्त्या क्षिप्रमेव अकृणोत्- अजनयत् इति। यास्को पि निरुक्ते एवमाह -

'सपतत्रि चेत्वरं स्थावरं जंगमं च यत्तत् क्षिप्रमग्निरकरोज्जातवेदाः।'

(नि० ५-३) इति। अन्यत्र च -

त्वं ह्यग्ने प्रथमो मनोता (ऋ० सं० ६-१-१)

इति + इति, 'अग्निर्वै देवानां मनोता तस्मिन्हि तेषां मनांस्योतानि'

(ऐ० ब्रा० २-१०) इत्यत्र च अग्निपदवाच्यः परमात्मा इति स्थापितम्।

अन्यो मन्त्रः -

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम।

(ऋ० सं० १-२४-२) इति। मन्त्रार्थः - वयं- भगवदुपासकाः अमृतानां- देवानां मध्ये प्रथमस्य- मुख्यभूतस्य श्रेष्ठतमस्य अग्नेः- ज्योतिस्स्वरूपस्य परमात्मनो

---

१ ब्र० सू० शां० भा० पृ० ११२ - १२१

देवस्य चारु- शोभनं नाम मनामहे- उच्चारयाम । एवंरूपस्य भगवतः आराधने निरताः भवेम इत्यर्थः । अपरा ऋक् -

त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः ।

त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ।।

(ऋ० सं० ५-३-१) इति । मन्त्रार्थः -

हे अग्निरूपपरमात्मन् ! तमसा वारकः रात्र्याभिमानी देवः त्वमेव तद्रूपेण प्रादुर्भवसि । एवं यस्मात् त्वं मित्रः- प्रमीतेस्त्राता सविता अहरभिमानी देवः समिद्धः- सम्यग्दीप्तः त्वमेव लोकानां तमो निवारयन् सर्वेषां सर्वहितकृत् भवसि । एवमुपलक्षतया अग्नेः सर्वदेवतात्वं सिद्धं भवति । तस्मात् हे अनन्तपारबलनिधे ! परमाधिष्ठाने त्वयि सर्वेऽपि देवाः त्वत्त एव प्रादुर्भूताः सन्ति । चोक्तं तैत्तिरीयसंहितायाम् -

ते देवा बिभ्यतोऽग्निं प्राविशन्' (तै० सं० ६-२-२-६)

इति । किंच हे अग्ने त्वमिन्द्रोऽसि विश्वस्वामी च । अत एव दाशुषे- हविरादिदात्रे मनुष्यरूपाय यजमानाय त्वममृतत्वरूपसुखं प्रयच्छसि । अपरो मन्त्रः -

अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।

अयं स जज्ञे ध्रुव आ निषत्तो मर्त्यस्तन्वा३ वर्धमानः ।।

(ऋ० सं० ६-६-४) इति । मन्त्रोऽयं षाष्ठमण्डलस्य नवमे सूक्ते चतुर्थो भवति ।

मन्त्रार्थः - अयं- अग्निः प्रथमः- मुख्यात्मा होता- हवनकर्ता । अत्र हवनं- शब्दादिविषयहरणमेव भवति । मर्त्येषु- मरणस्वभावोपेतेषु शरीरेषु अमृतं- जनन-मननरहितमविनाशि... इदं वैश्वानराख्यं ज्योतिः देहे जाठररूपेणावस्थितममुं पश्यत- अनुभवत । अपिच सोऽयमग्निः ध्रुवः- निश्चलः कूटस्थोऽपि सन् आ- समन्ततः निषत्तः- निषण्णः सर्वव्यापी भवति । अत एव स अमर्त्यः मरणरहितोऽपि सः तन्वा- शरीरसंबन्धात् जज्ञे- प्रादुर्भूत इति प्रतीयते इति ।

मन्त्रान्तरम् -

मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ।

(ऋ० सं० ७-१-२२) इति । मन्त्रार्थः - हे अग्निरूपपरमात्मन् देवेद्धेषु- देवैः

सूर्यादिभिः समिद्धेषु एषु इन्द्रियादिषु दुर्भूतये- दुराचारादिना भरणाय- जीवनाय नः- अस्मान् मा प्रवोचः- न ब्रूहि । एषु दुराचारकर्मसु यथा प्रवृत्तिः न स्यात् तथा अभयप्रदानरक्षणेन त्वं सदा सखा- सहायभूतोऽसि इति ।

एवमादिमन्त्रैः प्रतिपादितः अग्निः परमात्मा एव । श्रुतिस्मृतय अपि -

'शरीरमिति कस्मात् ? अग्नयो ह्यत्र श्रियन्ते, ज्ञानाग्निः, दर्शनाग्निः कोष्ठाग्निरिति ।'

(गर्भो० ५)

'अग्निर्वै सर्वेषां देवानामात्मा' (शत० ब्रा० १४-३-२-५)

एतमेके वदन्त्यग्निम्' (मनु० १२-१२)

इति । तस्मात् अध्यात्मतत्वनिरूपणानुरोधेन अग्निपदाभिधेयः परमात्मा इति ।

इन्द्रः- सकलैश्वर्यसंपन्नः स्वयंप्रकाशः परमात्मा । इन्द्रस्य परमात्मबोधकत्व- निरूपणमग्रे वक्ष्यते । वरुणः- व्रियते श्रेयोर्थिभिरिति । वृणोति- अंगीकरोति परमात्मा । तथा च मन्त्रः -

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।

(ऋ० सं० १-२४-८) इति । मन्त्रार्थः - राजा- स्वयंप्रकाशमानः वरुणः- सर्वदेववरिष्ठः भगवान् सूर्याय- सूर्यस्य पन्थां- मार्गं उरुं- विस्तीर्णं चकार- कृतवान् । प्रसिद्धार्थकः हि शब्दः । उत्तरायण-दक्षिणायनरूपमार्गस्य विस्तारः तस्य शास्त्रेषु प्रसिद्धः । स किमर्थमेवं कृतवान् ? उच्यते । अन्वेतवा उ- अनुक्रमेण उदयास्तमयौ भवितुमेव । अन्यो मन्त्रः -

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि । स यामनि प्रति श्रुधि ।।

(ऋ० सं० १-२५-२०) इति । अयं मन्त्रः प्रथमे मण्डले पंचविंशतिसूक्ते विंशतिः ।

मन्त्रभावः - हे मेधिर ! मेधाविन् वरुण त्वं दिवश्च- द्युलोकस्य ग्मश्च- भूलोकस्य एवमात्मकस्य विश्वस्य- सर्वस्य जगतः मध्ये राजसि- दीप्यसे । सः तादृशः यामनि- योगक्षेमप्रापणे अस्मदीये विषये त्वं प्रति श्रुधि- प्रतिज्ञापनं कुरु । अखिलमभीष्टं दास्यामीति, त्वां सर्वतः रक्षिष्यामीति वचनं देहीति ।

मन्त्रान्तरम् -

आसीदद्विश्वा भुवनानि सम्राट् विश्वेदानि वरुणस्य व्रतानि ।

(ऋ० सं० ८-४२-१) इति । मन्त्रार्थः - सः भगवान् वरुणः सम्राट्- सर्वत्र सम्यक् राजमानः विश्वा- सर्वाणि भुवनानि- भूतभौतिकजातानि आसीदत्- आसीदिति, व्याप्नोतीत्यर्थः । विश्वेतानि- इत् एवकारे निश्चयार्थे प्रयुक्तः, तानि विश्वा- भूतभौतिकात्मकं सर्वाण्येव विश्वानि वरुणस्य- परमेश्वरस्य व्रतानि- दिव्यकर्माणि इति । अन्या ऋक् -

वनेषु व्य१न्तरिक्षं ततान् वाजमर्वत्सु पय उस्रियासु ।

हृत्सु क्रतुं वरुणो अप्स्व१ग्निं दिवि सूर्यमदधात् सोममद्रौ ।।

(ऋ० सं० ५-८५-२) इति । पंचमे मण्डले पंचाशीतितमे सूक्ते द्वितीयोऽयं मन्त्रः ।

मन्त्रार्थः - वरुणः- परमेश्वरः वनेषु- वनवृक्षाग्रेषु अन्तरिक्षं- आकाशं विततान- विस्तारितवान् । अत्र ततान इत्यनेन उपसर्गात्मको वि कारः संबध्यते । एवं सः अर्वत्सु- पुरुषेषु वाजं- वीर्यं विततान । तथा च श्रूयते श्रुतिः -

'वीर्यं वै वाजः पुमांसो र्वन्तः' (शत० ब्रा० ३-३-४-७)

इति । तथा उस्रियासु- गोषु पयः- क्षीरं विततान । उस्रियाशब्दः गोनामसु सनिघण्टौ पठितः । हृत्सु- हृदयेषु क्रतुं- संकल्पं तच्छक्तियुक्तं मनः विततान । अप्सु- जलेषु अग्निं विततान । अत एवोच्यते समुद्रे बडवाग्निरिति । दिवि- द्युलोके सूर्यं विततान । अद्रौ- पर्वते सोमं- वल्लीरूपं सोमं अदधात्- स्थापितवान् । तद्रूपेण सः वरुणपरमात्मा तदस्मिन् स्थले स्वस्वरूपं प्रकाशयामासेति । एवं तस्य वरुणस्य परमात्मवाच्यत्वं सिध्यति ।

मित्रः- मेद्यति, भक्तेषु स्निह्यतीति मित्रः । करुणावरुणालयरूपः भक्तवत्सलो परमेश्वर इति । तथा च मन्त्रः -

वरुणः प्राविता भुवन् मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ।।

(ऋ० सं० १-२३-६) इति । प्रथमे मण्डले त्रयोविंशतिसूक्ते षष्ठोऽयं मन्त्रः ।

मन्त्रार्थः- अयं वरुणः अस्माकं प्रकर्षेण रक्षको भवतु । एवमयं मित्रोऽपि विश्वाभिः- सर्वाभिः ऊतिभिः- रक्षणविधायिनीभिः शक्तिभिः नः- अस्मान् सुराधसः- सकलशोभनसिद्धियुक्तान् करताम्- करोतु इति । अतः मित्रशब्दोऽपि परमात्मप्रतिपादक इति ।

अर्यमा- अर्यं श्रेष्ठं विभूतिमदूर्जितं प्राणिजातं स्वात्मस्वरूपेण मिमीते-

प्रख्यापयति इति अर्यमा- आत्मस्वरूपो परमात्मा इति। मिमीते माङ् माने' इति धातो: कनिन् प्रत्यय:।

वायु:- शब्दाकाशबलानामीश्वर:। सर्वक्रियाफलप्रयाजक: अयं वायु: ब्रह्मेत्युच्यते। तथा च श्रुति: -

'नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि' (तै० उ० १-१)

इति। पूषा- सर्वस्य जगत: पोषणकर्ता, सर्वस्य पोषणकर्तृत्वं परमात्मन एवोपपद्यते नान्यस्य। सरस्वती- ज्ञानप्रदा स्वप्रकाशरूपा चितिशक्ति:। आदित्या:- द्वादशादित्यमण्डलस्थ: हिरण्मय: पुरुष: स परमात्मा। आदित्या इति बहुवचनं मण्डलोपाधिभेदेन। जलसूर्यवत् परमात्मा अनेकेषु शरीरेषु एक एवानेकवत् प्रतिभासत इति। विष्णु:- व्यापक: प्रत्यगभिन्नो आत्मा। तथा च श्रुति: -

'विष्णु: सर्वा: देवता:' (ऐ० ब्रा० २-१-१)

इति। विवेष्टि- व्याप्नोतीति विष्णु:। विषे: व्यप्रत्ययविधायिन: ... प्रत्ययान्तस्य रूपं विष्णुरिति। देशकालपरिच्छेदशून्य: सर्वात्मा भगवानिति। स: सर्वेषु जीवेषु आत्मना प्रविशति इति विशतीति विष्णु:। स: परमात्मेति।

मरुत:- न जीवन्ति प्राणिन: येन चैतन्येन विना स: सर्वप्राणिदेहधारक: परमात्मेति। 'मृङ् प्राणत्यागे' इत्यस्मात् औणादिक: प्रत्यय:। मरुत: इति अकारान्तो यं शब्द:। यस्मिन् सति देहे प्राणादय: स्वस्वव्यापारं कुर्वन्त: वर्तन्ते, अत: सर्वजीवनहेतुभूत: स: प्रत्यगात्मा मरुत्पदाभिधेय इति। स्व:- सर्वै: सुष्ठु ध्रियमाण: निरतिशयानन्दरूप: य: अलौकिकमोक्षसुखात्मक: स्वर्गविशेष: स परमात्मा इति। एवं श्रुतिरपि -

'तेन धीरा अपि यन्ति ब्रह्मविद: स्वर्गं लोकमित ऊर्ध्वं विमुक्ता:।'

(शत० ब्रा० १४-७-२) इति। अथवा स्वपदार्थ: -

'यन्न दु:खेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वपदास्पदम्[१]।।'

इत्यत्रापि प्रसिद्धो भवति। एवं च स्पदवाच्य: सुखवाची परमात्मा इति।

ब्रहत्- महद्ब्रह्म। चोक्तं भगवता शंकराचार्येण सूत्रभाष्ये जिज्ञासाधिकरणे -

---

१ स्मृतिरियमिति केचन। भट्टवार्तिकमित्यपरे। भवतु नाम यत्किमपि, परन्तु प्रामाणिको यं श्लोक:। परिमलादिसर्वतन्त्रेषु प्रमाणत्वेन उपन्यस्तो भवति।

'ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते । बृहतेर्धातोरर्थानुगमात् ।'

(ब्र० सू० १-१-१) इत्यत्र । सोम:- उमया ब्रह्मविद्यास्वरूपिण्या तस्या सह वर्तमानो भगवान् महदेव इति । तथा च मन्त्रान्तरम् -

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ।।

(ऋ० सं० ८-४८-३) इति। मन्त्रोऽयं अष्टममण्डले अष्टचत्वारिंशत्मे सूक्ते तृतीयः ।

मन्त्रार्थः - सोमं- पूर्वोक्तार्थ परमेश्वरं अपाम- पानं कृतवन्त इति । यथा चयनकाले अध्वरमीमांसकानां चमस्थे सोमे मदिते सन्तोषः तथा मन्त्रार्थ-तत्त्वदर्शिनां ब्रह्ममीमांसकानामस्माकं सोमरूपे महादेवे अधिगते अवश्यं सन्तोषः भवति । यतः सोममपाम ततः वयम् अमृता:- मरणहेतुभिः अविद्यातत्कार्यसंस्कारैः विवर्जिताः, अभूम- संपन्नाः भवेम । तद्भवने कारणमाह- ज्योतिः - ~~स्वयंप्रकाशमा~~ स्वयंप्रकाशमानमात्मस्वरूपं अगन्म- अगमाम इत्यर्थः । तत्र हेतुः देवान्-साधिष्ठातॄन् विषयावद्योतनानिन्द्रियलक्षणान् अविदाम- अविद्म । विषया-सक्त्या अनर्थकारिणां बलवतस्तान् विवेकादिसाधनचतुष्टबलेन वशीकृत्य निर्भयं ब्रह्मपद-मवाप्य विषयेषु तुच्छत्वं ज्ञातवन्त इति । अत एव हे अमृत- अविनाशी आत्मस्वरूपभूत नूनं- इदानीमस्मान् अरातिः- कामादिरूपो शत्रुः किं कृणवत्- किं कुर्यात् । स शत्रुः न कमपि अनर्थं कर्तुं न शक्नोतीति । तथा मर्त्यस्य- लोकदृष्ट्या मनुष्यभूतस्य वस्तुतः ब्रह्मीभूतस्य मम धूर्तिः- हिंसको धूर्तः सः मिथ्याज्ञानलक्षणो रिपुः एवंरूपः किमु- किं वा कृणवत्- कुर्यात् इति ।

एवंच आविद्यकसंसारनिवृत्तेः ब्रह्मविद्यासाध्यत्वात् परब्रह्मविद्याधिदेवता पारमेश्वरी चिच्छक्तिरित्युच्यते, तादृशब्रह्मविद्याधिदेवतालंकृतः परमेश्वरो भवति । एवंरूपः संसारदु:खद्रावकः रुद्र इति आम्नायते । ब्रह्मविद्याधिदेवतात्वं पराशक्तेरुमायाः शास्त्रेषु प्रसिद्धं भवति । श्रूयते च उपनिषदि -

'ओं ब्रह्मवादिनो वदन्ति । किं कारणं ब्रह्म कुतः स्म
जाता -------- जीवाम केन क्व च संप्रतिष्ठा ।'

इति प्रस्तुत्य -

ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् ।'

(श्वे० उ० १-१,३) इत्यत्र । रुद्रः- सर्वदुःखनाशकः दारिद्र्यनिवारकः एको द्वितीयः परमात्मा । एवमुपनिषदि आम्नायते -

'देवा रुद्रमपृच्छन् को भवानिति ? सो ब्रवीदहमेकः

प्रथममासीद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः'

(अथर्व० उ० १) इति । अदितिः- अखण्डिता सर्वात्मिका चितिशक्तिः । शक्तिरूपत्वात् तस्याः सर्वात्मता सिध्यति । ब्रह्मणस्पतिः- ब्रह्मस्पतिरूपः देव इति । एवं पूर्वोक्ताः परमात्मनः विविधनामभिः बहुत्वेन प्रतीता अपि वस्तुतः एकात्मनः सजोषसः- संगताः भवन्तु । यद्यप्यात्मा एक एवेति निर्विवादः सिद्धान्तः तथापि तद्दिव्यगुणादिप्रतिपादकानां नाम्नां बहुत्वेन तस्य बहुत्वमुपचर्यते । तस्मात् अनेन मन्त्रेण परमात्मस्वरूपान्तस्सारा अग्न्यादयो एते देवा उपाधिकृतभिन्ना इव, वस्तुतः अखण्डरसः परमात्मा एको द्वितीयश्चेति ।

निरंकुशमहत्वाकांक्षिणः सर्वे मनुजाः निसर्गतो सुखस्य, ज्ञानस्य स्वातन्त्र्यस्य निर्भयत्वस्य चास्य ब्रह्मणः पूर्णज्ञानमेवाभिलषन्ति । तदानीमेव अनन्तसुखं लभ्यते । तथा च श्रूयते -

'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' (छा० उ० ७-२३-१)

इति इत्यनया यावदल्परूपपरिच्छिन्नस्य देहादेरहंत्वममत्वलक्षणः संबन्धस्तिष्ठति, तावदसन्तोषो नापगच्छति । अतः पूर्णस्यापरिच्छिन्नस्य प्रत्यगभिन्नब्रह्मणः अभेदभावनात्पारमार्थिकसंबन्धादेव पूर्णः आनन्दः प्रादुर्भवति । तस्मात् सर्वे आनन्दसान्द्रं परमात्मानं विभिन्नप्रकारैः समाराध्य परमसन्तुष्टाः भूत्वा पूर्णतां स्वामवाप्नुवन्ति । एवं मुमुक्षव अपि नित्यसुखं ब्रह्मानन्दमवाप्तुं सच्छ्रद्धया परमात्मानमेकमेव समाराधनीया इतीयं वेदवाणी उपदिशति -

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।

ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ।।

(ऋ० सं० १-१०-१) इति । अयं मन्त्रः प्रथममण्डलस्य दशमे सूक्ते प्रथमो भवति । अयमेव सामवेदे ३४२, १३४४ इत्यत्र तैत्तिरीयसंहितायां १-६-१२-२ इत्यत्र निरुक्ते

निरुक्ते ५-५ इत्यत्र च पठितः । मन्त्रार्थः -

हे शतक्रतो- अनन्तज्ञानानन्दनिधे परमात्मन् गायत्रिणः- गायत्रीमन्त्रानुष्ठातारः त्वा- त्वामेव गायन्ति- तन्मयतया गायत्रीं गायन्तः गायत्र्यर्थं त्वामेव स्वयंप्रकाशं पूर्णात्मानमनुसन्धानं कुर्वन्ति । तथा च पातंजलसूत्रम् -

'तज्जपस्तदर्थभावनम्' (यो० सू० १-२८)

इति । साम्प्रदायिका अपि एवं कथयन्ति -

'गायत्री सर्वमन्त्राणां शिरोमणितया स्थिता ।
तया तन्मयभावेन गायन्तश्चिन्तयन्ति ये ।
पूर्णमद्वैतमानन्दं स्वप्रकाशं निरंजनम् ।
साधकाश्चतुरो वर्गान् सन्तुष्टाः साधयन्ति ते ।।

इति । अर्क- अर्चनीयं सर्वोत्तमं त्वामेव देवदेवं अर्किणः- अर्चनोपयुक्तमन्त्रपाठकाः तदर्थतत्त्वचिन्तनपरायणाश्च ये सन्ति ते अर्चन्ति- मन्दाधिकारिणः प्रतिमादौ त्वच्चिन्तनेन पूजयन्ति । चोक्तं निरुक्ते -

'अर्को देवो भवति, यस्मादेनं देवमर्चन्ति स्तोतारः ।
अर्को मन्त्रो भवति, यस्मादनेन मन्त्रेणार्चन्ति तस्मादर्कः ।'

(नि० ५-५) इति । उत्तमाधिकारिणस्तु स्वहृदयकमलमध्ये सन्निविष्टं पूर्णात्मलिंगं ब्रह्मचैतन्यज्योतिर्नं विमलशान्तचित्तवृत्त्या एकाग्र्यनिरोधसमाधिकुसुमैः आराधयन्ति । एवं ब्रह्मणः- ब्रह्मनिष्ठाः ब्राह्मणाः इति । ब्राह्मणपर्याये ब्रह्मशब्दः शतपथब्राह्मणे

'ब्रह्मणो वा एतद्रूपं यद्ब्राह्मणः' (शत० ब्रा० १३-१-५-२)

इत्यत्र श्रूयते । त्वा- त्वामेव उद्-येमिरे- उन्नतं प्रापयन्ति । सर्वेभ्यः समुन्नतमानन्दरूपस्य ज्ञानस्य पूर्णतया वर्तमानं तव ज्ञानं ज्ञात्वा ब जीवाः कृतकृत्याः भवन्ति । तत्र दृष्टान्तः वंशमिव । यथा दूरस्थानां देवमन्दिरख्यापनाय ध्वजसंयुक्तं प्रौढं वंशमुन्नतं कुर्वन्ति, यथा वा सन्मार्गवर्तिनः स्वकीयं वंशं-कुलं यशोवितानेन समुन्नतं कुर्वन्ति तथा विद्वांसो ब्राह्मणाः त्वन्महामहित्वं प्रख्यापयितुं विशदवर्णनेन तव पूर्णतां समुन्नतां कुर्वन्ति । अनेन मन्त्रेण पूर्णसन्तोषसुखलब्धये परमात्मा एव समाराधनीय इति सिध्यति ।

एवमानन्दरूपस्य ब्रह्मणः स्वरूपज्ञानेन संसारात् जीवस्य मुक्तिर्भवतीति उक्तम् । यद्यपि परमार्थतस्तु भेदवर्जितः सैन्धवघनवदेकरसः प्रज्ञानानन्दघनः एक एव आत्मा अहमस्मि, तथापि तिमिरदृष्ट्यानेकचन्द्रवत् अविद्यामयीभिर्बुद्धिवृत्तिभिः अनेकवदवभासमाना वर्ते । परमेश्वरस्य शक्तिरेवात्र कारणं भवति । शक्तिर्द्विविधा- सद्रूपा असद्रूपा चेति । तत्र असद्रूपा एव अज्ञानाख्यायिका मायिका इत्युच्यते । सद्रूपा तु विश्वनियन्त्री परमेश्वरी इति । शक्तिरियं परमेश्वरे अन्तर्भवति । एषा सद्रूपा शक्तिरेव सर्वं जगद्व्याप्य तिष्ठति । इयं शक्तिः नामरूपविलक्षणान् कार्यकारणसंघातान् उच्चावचान् जगद्रूपानिमान् सृष्ट्वा जीवात्मना अन्तःप्रविश्य स्वयं सर्वं पश्यन्ती सर्वदा तिष्ठति इति वेदश्रुतिः प्रतिपादयति -

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ।।

(ऋ० सं० १०-१२५-३) इति । ऋगियं दशममण्डलस्य शतोत्तरपंचविंशतितमे सूक्ते तृतीया भवति । अयं मन्त्रः अथर्ववेदे ४-३०-२ इत्यत्र आम्नातः । मन्त्रार्थः -

अहं- अद्वितीयब्रह्मात्मिका वाग्देवी राष्ट्री- कृत्स्नस्य दृश्यप्रपंचस्य राज्ञी नियन्त्री परमेश्वरी अहमस्मीति यावत् । अतः सा वसूनां- धनरूपाणां कर्मफलानां संगमनी- संगमयित्री प्रापयित्री येन यत् शुभाशुभरूपं कर्म कृतं तस्य कर्मिणः तदनुरूपं फलं समर्पयामि इति शेषः । किंचाहं चिकितुषी- यत्साक्षात्कर्तव्यं प्रत्यगात्मभूतं परं ब्रह्म तत् ज्ञातवती, स्वात्मभेदेन साक्षात्कृतवती इति । 'कित ज्ञाने' इत्यस्मात् लिटः क्वसुः तदन्तश्च 'उगितश्च' इति ङीप् । अत एवाहं यज्ञियानां- यज्ञार्हाणां देवानां मध्ये प्रथमा- मुख्या अस्मि । 'यज्ञर्त्विग्भ्यां घख ञौ' इति अहार्थे घप्रत्ययः । एवंगुणविशिष्टनं तां- तादृशीं मा-मां भूरिस्थात्रां- बहुभावेन प्रपंचात्मना वतिष्ठमानां भूरि- बहूनि भूतजातानि आवेशयन्तीम्- जीवभावेनात्मानं प्रवेशयन्तीं मां देवा- देवनात्मिकाः अविद्या-तत्कार्यकामादिविशिष्टाः बुद्धेर्वृत्तयः पुरुत्रा- बहुषु कार्यकारणसंघातेषु शरीरेषु व्यदधुः- अनेकरूपं विविधव्यवहारास्पदं कुर्वन्ति । पुरुत्रा इत्यत्र 'देवमनुष्यपुरुषपुरुमर्त्येभ्यः' इति सप्तम्यर्थे त्रा प्रत्ययः । एवमनेन मन्त्रेण देवाः मनुष्याश्च यत् कुर्वन्ति

तत्सर्वं मर्म मामेव कुर्वन्ति इत्यत: परमात्मन: निश्चयज्ञानेन जीवस्य कर्तृत्व-भोक्तृत्वादय: अपगच्छन्ति ।

एवं रूपो भगवान् परमेश्वर: सर्वत्र सर्वदा चावतिष्ठति । अयं गंगादिनदीषु निराकाररूपेण वर्तते । तथा च अभियुक्तोक्ति: -

नराकारं भजन्त्येके निराकारं तथा परे ।

संसारभय संत्रस्ता नीराकारमुपास्महे ।।

इति । अत: श्रद्धेयानि जंगमतीर्थभुतानि गंगादिदर्शनय: ब्रह्मभावनया अनुसन्धेया: इति वेदवाणी उपदिशति -

इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।

असिक्न्या मरुद्वृधे वितस्तया र्जीकीये शृणुह्या सुषोमया ।।

(ऋ० सं० १०-७५-५) इति । दशमे मण्डले पंचसप्ततितमसूक्तस्य पंचमी भवतीयम् ऋक् । इयं तैत्तिरीयारण्यके (१०-१-१३) इत्यत्र निरुक्ते ६-२६ इत्यत्र च पठिता ।

ऋगर्थ: - हे गंगे- हरिद्वारकाशीसमीपस्थे भागीरथि हे यमुने- आदित्यतनये सरस्वति- नदीरूपेण विद्यमाने ब्रह्मपत्नि शुतुद्रि परुष्णि असिक्न्या नद्यासहिते हे मरुद्वृधे वितस्तया सुषोमया च नद्या सहिते हे आर्जीकीये आहत्य दशमहानद्य: यूयं मे- मम इमं- स्तोमं ब्रह्मभावनामयमिदं सुगानं आ- समन्तत: शृणुहि- व्यत्ययेन शृणुत । तथा आसचत- जले आगत्य तद्वारेण मयि संगता: भवत । अथवा निर्मलया ब्रह्मभावनया स्वस्वरूपत: समधिगता यूयं मयि पूर्णे प्रत्यगात्मनि तादात्म्येन समवेता: भवत इति आसचत पदस्यार्थ: । तथा च श्रूयते -

महि ज्योतिर्निहितं वक्षणासु (ऋ० सं० ३-३०-१४)

इति मन्त्रार्थ:- वक्षणासु- वहन्ति यासु उदकानीति वक्षणा गंगाद्या: नद्य: । नदीनामसु वक्षणाया पाठ: निघण्टौ २-१४ इत्यत्र दरीदृश्यते । तासु वक्षणासु वहनशीलासु नदीषु महि- महत् ज्योति:- परब्रह्मलक्षणज्योति: निहितं- अवस्थितं भवति इति । अथान्यो मन्त्रो -

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पू: ।

प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्या: ।।

अपिच - एका चेतत् सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ।
(ऋ० सं० ७-९५-१,२) इति । इमौ मन्त्रौ सप्तममण्डले पंचनवतितमे सूक्ते प्रथम-द्वितीयौ भवत: । मन्त्रार्थ: -

एषा- दृश्यमाना नदीरूपा सरस्वती आयसी- लोहेन निर्मिता पू:- नगरीव धरुणं- विशिष्टपाजनतां धारयित्री धरुणा इत्यत्र लिंगव्यत्ययेन धरुणमिति । धायसा- लोकोत्तरपुण्यवत्तां धारकेण क्षोदसा- उदकेन प्रसस्रे- शीघ्रं गच्छति । सिन्धु:- स्यन्दनशीला सा नदी अन्या: विश्वा:- सर्वा: अप:- आपगा: नद्य: महिना- स्वकीयासाधारणमहिम्ना प्रबाबधाना- भृशं बाधमाना रथ्येव- वीथी इव विस्तीर्णा सती याति- गच्छति । यथा रथी स्वरथेन मार्गस्थं गुल्मादिकं चूर्णीकृत्य गच्छति तथा इयं नदी महता स्वकीयेन वेगेन सर्वं ध्वंसयित्वा गच्छतीति । अपि च एका इयं मुख्या सरस्वती नदी नदीनां- अन्यासां नदीनां मध्ये शुचि:- परमपवित्रा सती गिरिभ्यस्सकाशात् आसमुद्रपर्यन्तं याति- गच्छति । अचेतत्- भक्तप्रार्थनां जानातीति यावत् । तथा च श्रूयते -

'ऋषयो वै सरस्वत्यां सत्रमासत' (तै० ब्रा० २-१९)

इति । वेदे पि तस्या: माहात्म्यं श्रूयते ~~+--अपरं-अत्र--~~

अम्बितमे नदीतमे देवितमे सरस्वति । (ऋ० सं० २-४१-१६)

इति । ~~-अत्र-~~

ननु भवद्भि: दशनद्य: इत्युक्तं, तेषु गंगा यमुना सरस्वती एतास्त्रय: एव प्रसिद्धा: वर्तन्ते । अन्या: नद्य: कुत्र वर्तन्ते, काश्च ता: इति चेत्-उच्यते । शुतुद्री संप्रति सतलज इति प्राकृतनाम्ना व्यवह्रियते । परुष्णी- इरावती इयं लवपुरपार्श्ववर्तिनी रावी इति नाम्ना प्रसिद्धा । आर्जीकीया- विपाशा संप्रति व्यासा इति नाम्ना गीयते । असिक्नी- चन्द्रभागा इदानीं चिनाब् इति नाम्ना, वितस्ता- काश्मीरीयतक्षकसरस्समुद्भवा झेलम् इति नाम्ना च अभ्युपगतौ भवत: । एता: पंचनद्य: पंजाब्प्रदेशे प्रसिद्धा: वर्तन्ते । अत एव तस्य प्रान्तस्य पंचभिस्ताभिर्नदीभि: पंचाप इत्यत: पंजाब् इति अन्वर्थनामधेयमभवत् । सुषोमा-मरुद्वृधा इति अन्ययो: नद्यो: नामधेयं भवति । तत्र सुषोमा-सिन्धुनदी

भवति । मन्त्रे असिक्न्या वितस्तया सुषोमयेति पदत्रयं तृतीयान्तवाचकं भवति । केचन परुष्णि आ इति पदच्छेदं कृत्वा परुष्ण्या इति तृतीयान्तत्वेनाभ्युपगच्छन्ति । एवमनेन मन्त्रेण एतासु दशनदीषु वर्तमानस्य आनन्दनिधे: परमात्मन: स्वरूपामेकीभावेन अनुसन्धानं कर्तव्यमिति बोधितं भवति ।

एवं स्वयंज्योतिस्स्वरूपाया: परमात्मन: चितेरेव सर्वं विश्वमवभासते । अत: सर्वस्य विश्वस्य स: अधिष्ठाता इति मन्त्रो यं भणति -

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ।।

(ऋ० सं० १०-१७०-३) इति । मन्त्रो यं दशममण्डलस्य शतोत्तरसप्ततितमे सूक्ते तृतीयो भवति । सामवेदे ऽपि १४५५ इत्यत्र पठित: । मन्त्रार्थ: -

इदं- साक्षादपरोक्षं श्रेष्ठं- प्रशस्यतमं ज्योतिषां- सर्वप्रकाशकानां भौतिकानामादित्यादीनामपि ज्योति:- परमज्योतिरूप: परमात्मा इति । ज्योतिषामादित्यानामपि ज्योतिष्ट्वं स्वान्तर्गतस्वाधिष्ठानब्रह्मात्मचैतन्यज्योतिर्निमित्तं भवति । तथा च श्रूयते -

'तद्देवा ज्योतिषां ज्योतिरायुर्होपासते ऽमृतम्'

(बृ० उ० ४-४-१६) इत्यत्र । इन्द्रादयो देवा: तं परमात्मानं ज्योतिषामादित्यानां ज्योतिर्भासकं जगतो जीवनं कूटस्थमिति च ध्यायन्ति । तद्धि ज्योति: उत्तमं- यदन्यानवभास्यं स्वयं सर्वावभासकमिति सर्वोत्कृष्टम् । अत एव तत् सवश्वजित्- चराचरलक्षणस्य सर्वस्य विश्वस्याविर्भवित् इति । यत: स: सर्वं विश्वं स्ववशे स्थापयति । धनजित्- उत्तमरत्नवैडूर्यादिलक्षणस्य धनस्याविर्भवित् । यत: परमात्मन: कान्त्या एव रत्नादय: प्रतिभासन्ते, अत: स: धनजित् । बृहत्- महत् निरवधिकमनन्तमपारमिति च उच्यते-। स ब्रह्म एवंरूप इति सूक्ष्मदृग्भि: विपश्चिद्भि: अभिधीयत इति । अपि चैवंरूपो ब्रह्म विश्वभ्राट्- विश्वस्य प्रकाशयिता भ्राज:- स्वत: प्रकाशमान: महि- महान् सूर्य:- प्रेरयिता आत्मास्ति । तस्य दृशे- दर्शनरूपानुभवाय उरु- विस्तीर्णतया सर्वत्र वर्तमानं सह:- तमस: अभिभवित् अच्युतं- अप्रच्युतनिजस्वभावमविनाशं ओज:- स्वत:प्रथमानं सच्चिदा-

नन्दस्वरूपं तद्ब्रह्म पप्रथे- विस्तृतमभूदिति । एवमनेन मन्त्रेण एक एव ब्रह्मण: विभूति: प्रतिपादिता भवति ।

एवंरूपस्य तस्य ब्रह्मण: पूर्णानन्दस्वरूपं चिन्मात्रमन्तरात्मानं प्राप्य सर्वे जीवा: स्वस्वरूपे आनन्दिनो भवन्ति । आनन्दो हि जीवानामानन्दसाधनम् । न हि सर्वथा अनरानन्द: कश्चन प्राणितुं क्षमते । तथा च श्रुति: -

'को ह्येवान्यात् क: प्राण्यात् यदेष आकाश आनन्दो न स्यात्'

(तै० उ० २-७) इति । स चानन्द: आत्मस्वरूपभूत: । सुखमहमस्वाप्सम् इति सुप्तोत्थितस्य पुरुषस्य स्वापसुखपरामर्शदर्शनात् सुषुप्तौ स्वरूपभूतमेव सुखमनुभूतमिति गम्यते । जागरेऽपि स्रक्चन्दनवनितादिस्साधनै: स्वरूपानन्दाविर्भावप्रतिबन्धकस्य बहिर्विषयस्य तिरोधानादन्तर्मुखमनोवृत्तौ सत्यां स्वयंप्रकाशात्मसुखमेव स्वयमवभासते ।

'विषयेष्वपि लब्धेषु तदिच्छोपरमे सति ।
अन्तर्मुखमनोवृत्तावानन्द: प्रतिबिम्बति ।।
यत्सुखं भवेत्तद्ब्रह्मैव प्रतिबिम्बनात् ।
वृत्तिष्वन्तर्मुखास्वस्य निर्विघ्नं प्रतिबिम्बनम् ।।

(पंच० ११) इति पंचदश्यां ब्रह्मविवेकप्रकरणे विद्यारण्यस्वामिभि: प्रतिपादितम् । नच विषयेन्द्रियसंयोगादेव चित्तोपशमनस्य तत्प्रयुक्तसुखाभासस्य च प्रादुर्भावात् तस्यैव तादृक् सुखसाधनता अस्त्विति वाच्यम्, यत: तथासति योगाभ्यासेन संपादितचित्तोपशान्तिमतां वीतरागाणामपि महात्मनां विषयसंयोगे सति प्राकृतजनानामिव सुखपारवश्यप्रसंगात् सरागाणां च प्रियेष्वपि विषयेषु कदाचित् द्वेषाभावप्रसंगाच्च । दृश्यन्ते हि तादृशा अपि विषया ये खलु कदाचित् कस्यचित् अत्यन्तप्रियतमा पि तस्यैव कालान्तरे द्वेषास्पदतां प्रतिपद्यन्त इति । अत: चित्तोपशान्तितारतम्यादेव प्राणिनामानन्दतारतम्यभानमिति । श्रूयते तैत्तिरीयोपनिषदि -

'स एको मानुष आनन्द:' इत्युपक्रम्य 'स एको ब्रह्मण: इव आनन्द: । श्रोत्रियस्य चाकामहतस्य'

(तै० उ० २-८) इति । एवमादिना नित्यमात्मभूतं सुखं न केनापि नानुभूयत इत्युक्तम् । तथा च तदेवात्मभूतं सुखं स्वापे जागरे च समनुप्राप्य सर्वे जीवा अभिनन्दन्ति इति

ऋगियं दृढीकरोति :-

सर्वे नन्दन्ति यशसा गतेन सभासाहेन सख्या सखाय: ।
किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ।।

(ऋ० सं० १०-७१-१०) इति । दशममण्डलस्य एकसप्ततितमे सूक्ते ऋगियं दशमा ।

मन्त्रार्थ: - यशसा- ब्रह्मणा आनन्दनिधिना । श्रूयते च श्रुति: -

'न तस्य प्रतिमा अस्ति यस्य नाम महद्यश: ।'

(श्वे० उ० ४-१९) इति । आगतेन- अधिगतेन सर्वे- प्राणधारिणो जीवा: नन्दन्ति- परमानन्दिनो भवन्ति । सुषुप्तौ बाह्यविषयाकारवृत्त्युपशमे सति आत्मैकाकारवृत्तौ सत्यां सर्वे जीवा: परमं सुखं प्राप्य आनन्दिनो भवन्ति यथा तथा जागरेऽपि इति भाव: । चोक्तं भगवता गीतायाम् -

'आत्मसंस्थं मन: कृत्वा न किंचिदपि चिन्तयेत् ।'

(भग० ६-२५) इति । किं भूतेन ब्रह्मणा ? सभासाहेन । भया-दीप्त्या सह वर्तन्त इति सभा:, तान् तेजोरूपान् सहते- चक्षुरादीनन्तर्गृह्णता तेन । एवं श्रुति:-

'गृहीता वाक् गृहीता चक्षु:' (बृ० उ० २-१-१७)

इति । अथ च सख्या- उपकारेण जागरेऽपि विषयेन्द्रियसंयोगद्वारा सुखाभासानुभवलक्षणभोगप्रदानेन सर्वत्र उपकर्त्रा इति । सखाय:- समानख्याना: निद्रोपाशुद्धिरूपप्रतिबन्धापगमे सति तत्समानज्ञानसुखानुभवा: इति । अथ एषां- जीवानां मध्ये यो मूढमति: पितुषणि:- पितुरित्यन्ननाम तं गृह्णाति विषयसुखेषु इन्द्रियाणि तर्पयितुं आसक्त: य: स: किल्बिषस्पृक् । किल्बिषं- दु:खं स्पृशति अत: दु:खभागी इति यावत् । हि- यस्मात् अरं- अत्यर्थं वाजिनाय- इन्द्रियवीर्याय हित:- तत्परो भवति । अयमाशय: - सुखशब्दव्यपदेश्यमात्मसुखमेव सुखम् । यद्यपि विषयेन्द्रियसुखं तु तस्तुतो दु:खमेव तथाऽपि मूढैतरां भ्रान्त्या सुखरूपेण प्रतीयमानं सदपि परिणामे दु:खमेवेति । मन्त्रस्यास्य अनुवादं कुर्वन्त: श्रीमच्छंकराचार्या: शतश्लोक्यां एवमलिखन् -

'सर्वे नन्दन्ति जीवा अधिगतयशसा गृह्णता चक्षुरादीन्
अन्त: सर्वोपकर्त्रा बहिरपि च सुषुप्तौ यथा तुल्यसंस्था: ।

एतेषां किल्बिषस्पृक् जठरभृतिकृते यो बहिर्वृत्तिरास्ते
त्वक् चक्षु:श्रोत्रनासारसनवशमितो याति शोकं च मोहम् ।।

(शत० ६६) इति । तस्मात् परब्रह्मण एकमेवानन्दं सर्वे स्थावरजंगमात्मका: भजन्ति इत्यनेन मन्त्रेण प्रतिपादितो भवति ।

उपनिषत्तु निगदितप्रकारेण श्रवणात्मननत्निदिध्यासनादिभि: प्रतिबन्धापायात् आत्मस्वरूपस्य साक्षात्कार: संपद्यत इति वदन्ति वेदविदो वेदान्तिन: । सर्वैरपि चित्स्वरूपात्मकं एकं वस्तु वर्तत इत्यभ्युपगन्तव्यम् । तद्वस्तु कारणमकारणं वा सगुणं वा निर्गुणं वा सक्रियं निष्क्रियं वा सप्रपंचं निष्प्रपंचं वा सविग्रहमविग्रहं वा सविशेषमविशेषं वा इत्यादिभि: विकल्पै: वादिन: परस्परमनुरुन्धन्ति । सर्वैरपि स्वसिद्धान्तस्थापनाय यत्किमपि तत्वमभ्युपगन्तव्यमेव । अनेन तत्त्वस्य सत्त्वं सदात्वं निश्चितं भवति । यद्यपि स्थूलदृशामापातत: इमे विकल्पा: विरुद्धत्वेन प्रतीयन्ते, तथाऽपि विचारयतां समाहितमनसां तत्त्वदृशां एते मिथ: एकवाक्यतामापन्ना: सन्त: स्वीयं विरुद्धकल्पत्वं विजहति । यत: आविद्यकव्यवहारदशायां जगज्जन्मादिकारणं सर्वज्ञत्वादिगुणकं यद्वस्तु प्रतिभाति तद्वस्तु परमार्थावस्थायां निष्क्रियमकारणं त्रिविधपरिच्छेदशून्यं सत्यज्ञानानन्दरूपं ब्रह्म इति निर्धार्यते । अत एव यस्य साधकस्य आत्मवस्तुतत्त्वानुसन्धानसन्तति: आविर्भवति स एव तत्स्वरूपानन्दसाक्षात्कारमासाद्य सततसन्तुष्ट: जीवन्मुक्तो भवतीति तस्यात्मन: स्तवनमुखेन मन्त्रो यमुदाह्रियते मन्त्रदृग्भि: -

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ।।

(ऋ० सं० ८-६८-१) इति । ऋगियं अष्टमे मण्डले अष्टषष्ठितमे सूक्ते प्रथमा भवति । इयमेव सामवेदे १५४, १७७१ इत्यत्र निरुक्ते ५-३ इत्यत्र च पठिता दृश्यते ।

मन्त्रार्थ: - हे इन्द्र - परमैश्वर्यसंपन्न परमेश्वर शविष्ठ- अतिशयेन बलवन् हे सत्पते- सज्जनानां पालक त्वा- त्वां परमात्मानं वयं आवर्तयामसि- आवर्तयाम: श्रवणादिप्रत्ययावृत्त्या त्वामेव सततं भजाम इति यावत् । तदावृत्ति: किमर्थमभिधीयते चेत् शृणु ऊतये- प्रतिबन्धेभ्य: परित्राणाय साधकस्य आवृत्त्या हि

प्रतिबन्धनिरासद्वारा साध्यसिद्धेरनुकूलं रक्षणं भवति । अपिच सुम्नाय- स्वस्वरूप-साक्षात्कारलक्षणसुखस्वरूपाय । यथा रथवीरा: योद्धार: शत्रुभ्य: विजयस्य कृते रथमितस्ततो आवर्तयन्ति तद्वत् कामादीनां विजयाय आत्मविषयकश्रवणादिरूपां आवृत्तिरसकृत्कर्तव्या इति । तुविकूर्मिम् । तुवि:- प्रभूतं विश्वोत्पत्तिस्थितिलय-कारकं कूर्म:- कर्म यस्य विद्यते स: कतीषहं- हिंसकानां दु:खभयसन्तापादीनां कामादीनामभिभवितारं त्वां वयं हृदि ध्यायाम इति ।

एवमखिलस्य भूत-भौतिकरूपस्य जगत: निर्माणे विशुद्धचिदेकमेव ब्रह्म हेतुरिति प्रतिपादितम् । स ब्रह्म जगत: निमित्तोपादानोभयरूपमपि कारणं भवतीत्यत: ब्रह्मण: व्यतिरिक्तं हेत्वन्तरं नास्तीत्युक्तम् । तस्य ब्रह्मण: अखिलाधिपतित्वा-न्निमित्तत्वं नानाजगदाकारेण परिणममानमायाधिष्ठानत्वेन अस्यैव नानाकारेण प्रतीयमानत्वाच्च एतावती संबभूत इति कारणस्य कार्यसामानाधिकरण्यनिर्देशात् उपादानत्वं सिध्यत: । न च ब्रह्मण: सर्वकारणत्वे सर्वात्मत्वे च तस्य निष्प्रपंचत्व-मविकारत्वं च व्याकुप्येतामिति वाच्यम् । सर्वकारणत्व-सर्वात्मत्वयो: तयो: निष्प्रपंचब्रह्मप्रतिपत्तिप्रयोजनत्वात् यत: निरस्तनिखिलविशेषं ब्रह्म न साक्षात् विधिमुखेन प्रतिपादयितुं शक्यते । अत: प्रतीयमानप्रपंचरूपतामारोप्य प्रपंचसाक्षितया तद्विलक्षणे ब्रह्मणि प्रपंचप्रतिषेधे सति निरस्तद्वैतरूपब्रह्मप्रतिपत्ति: अवकल्प्यते । अन्यथा ब्रह्मण: प्रपंचात्मत्वप्रतिपत्ते: प्रयोजनाभावात् तदुपदेश: अनर्थक एव स्यात् । एवं रूपस्य ब्रह्मण: स्वस्य काल्पनिकसप्रपंचत्वं वास्तविकनिष्प्रपंचत्वं चाचष्टे भगवती श्रुति: -

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ।।

(ऋ० सं० १०-१२५-८) इति । अयं मन्त्र: दशममण्डलस्य शतोत्तरपंचविंशतिसूक्तस्याष्टम: । अथर्ववेदेऽपि ४-३०-८ इत्यत्र पठित: । मन्त्रार्थ: -

विश्वा- सर्वाणि विश्वाणि भुवनानि- भूतभौतिकजातानि कार्याणि आरभमाणा- कारणरूपेण सत्त्वेनोत्पादयन्ती अहमेव प्रवामि- प्रवर्ते । यथा वात इव । वायु: प्रेरणाप्रेरित: सन् स्वेच्छया सर्वत्रप्रवाति यथा तथा अहमेव परेणानधिष्ठाता अनन्यसहाया च स्वयमेव स्वेच्छया प्रवामीति । एवं प्रतिपादितस्य ब्रह्मण: काल्पनिक-

सप्रपंचत्वमुपपादयितुं श्रुतिः वदति- परो दिवेति । पर इति सकारान्तं परस्तादित्यर्थे वर्तते । यथा अध इत्यत्र इति अधस्तादर्थे । तद्योगे च अत्र तृतीया दिवा इति । आकाशस्य परस्तादित्यर्थः । एना पृथिव्या इति । 'द्वितीया टौ स्स्वेन' (पा०सू०२-४-३४) इत्यतः इदमः एनादेशः । अनन्तरं सुपां सुलुक् इति तृतीयायाः आत् आदेशः । अस्याः पृथिव्याः परस्तादिति । अत्र द्यावापृथिव्योरुपादानमुपलक्षणार्थं एतदुपलक्षितात्सर्वस्माद्विकारजातात् परं वर्तमानमसंगोदासीनकूटस्थाद्वयं चैतन्यरूपं ब्रह्म महिना- नानारूपेण महिम्ना एतावती संबभूव । एतच्छब्देन अत्रोक्तं सर्वं परामृश्यते । एतत्परिमाणमस्याः इति एतावती, सर्वजगदात्मना संभूतो स्मि इति । 'यत्तदेतेभ्यः परिमाणे' (पा०सू०५-२-३९) इति वतुप् 'आसर्वनाम्नः' (पा०सू०६-३-९१) इत्यतः आत्वम्, तथा च एतावतीति रूपम् । महिना इत्यत्र महच्छब्दात् इमनिच् टिलोपः, मलोपः छान्दसः । तस्मादनेन मन्त्रेण तस्य ब्रह्मणः प्रपंचस्य निमित्तोपादानोभयविधकारणत्वं सिध्यति ।

स्वरूपब्रह्मणः सम्यग्ज्ञानमाचार्योपदेशेनैव सिध्यति । तत्तु भगवदर्पणबुध्या निष्कामकर्मानुष्ठानपूर्वकशुद्धान्तःकरणेन कृतभगवदुपासनया च साधनचतुष्टयसंपन्नेन विधूतविक्षेपेण च सिध्यति । एवं भाग्यशालिनां मोक्षमात्राकांक्षिणां पुरुषाणां कृते परमपुरुषार्थरूपाविद्यानिवृत्तिरूपानन्दाविर्भावसाधनं प्रत्यगात्मब्रह्मात्मतत्त्वयोः तत्त्वंपदार्थयोः आत्मैक्यसमर्पकं महावाक्यार्थविज्ञानमियं वेदवाणी उपदिशति -

यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम् । स्युष्टे सत्या इहाशिषः ।।

(ऋ० सं० ८-४४-२३) इति । ऋगियमष्टममण्डलस्य चतुश्चत्वारिंशत्तमे सूक्ते त्रयोविंशी ।

मन्त्रस्यार्थः - हे अग्ने- स्वयंप्रकाशस्वरूप परब्रह्म यत्- शास्त्रबोधितस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य ब्रह्मणः यत् पूर्णात्मकं स्वरूपं अहं- जीवात्मा स्याम्- भवेयम् । अस्मीति यावत् । तत्- त्वमसि, यतः स्वस्वरूपस्यैव जीवात्मना कार्यकारणसंघाते शरीरे प्रवेशश्रवणात् । तथा हि श्रुतिः -

'अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि'

(छा० उ० ६-३-२) इति । त्वं वा घा- त्वं वै खलु यत्स्वरूपं स्याः- भवेः असीति यावत् । अतः तदहमस्मि इत्थमावयोः अभेद एवास्ति नास्ति मनागपि भेद इति ।

तथा च ब्रह्मैवाहं न संसारीति स्वस्वरूपस्याभेदनिश्चये सति परिच्छिन्नत्व-अब्रह्मत्वादिरूपः शोकमोहादिसंसारः विनिवर्तते । एवमहमेव ब्रह्म इत्यात्मनि ब्रह्मत्वनिश्चये सति पारोक्ष्यरूपं अनात्मत्वं निवर्तते ।

नन्वेवं सति प्रत्यग्ब्रह्मणोरन्योन्यतादात्म्यांगीकारे अखण्डैकरसत्वं सत्यपि न सिध्यति यतः 'नीलमुत्पलमि'त्यत्र सत्यपि तादात्म्ये गुणद्रव्यभेदस्य सद्भावात्, एवमत्रापि आत्मत्व-ब्रह्मत्वेन कृतः अहंत्व-त्वंत्वरूपो भेदः प्रसज्येतेति चेत्-न । दृष्टान्ते विषमो दोषः । यथा नीलोत्पलमित्यत्र द्रव्य-गुणयोः परस्परव्यभिचारत्वं अभ्युपगम्यते । तथा - नैल्यं गुणः मेघादावपि वर्तमानत्वात् उत्पलत्वं तत्र व्यभिचरति तथा उत्पलमपि शुक्लरक्तरूपेण वर्तमानत्वात् नैल्यगुणं व्यभिचरति । दार्ष्टान्तिके तु न तथा । सोऽयं देवदत्तः इतिवत् आत्मब्रह्मणोः परस्परा-व्यभिचारात् एकार्थत्वे सति अखण्डत्वसिद्धिरिति भण्यते । इदानीं तादृशाभेद-ज्ञानस्यापरोक्ष्यानुभवसिध्यर्थमुच्यते- इहेति । इह- अभेदज्ञाने विषयत्वं सप्तम्यर्थः । ते- तव परमात्मनः आशिषः- आशासनानि । तानि आशासनानि इवंरूपाणि -

'तत्सत्यं स आत्मा तत्त्वमसि' (छा० उ० ६-८-७)

'अयमात्मा ब्रह्म' (मा० उ० १-२)

'प्रज्ञानं ब्रह्म' (ऐ० उ० २-५-३)

'अहं ब्रह्मास्मि' (बृ० उ० १-४-१०)

इत्यादीनि । एवमादीनि वेदात्मना त्वया समुपदिष्टानि सत्या- सत्यानि यथार्थानुभवसंपादकानि स्युः भवेयुः इति । अन्यो मन्त्रः -

यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः ।

(ऋ० सं० ८-१६-२५) इति । मन्त्रार्थः - हे मित्रमहः- अभीप्सितपरमानन्दपूर्णदीप्तिमन् हे अग्ने, मर्त्यः- मरणधर्मकदेहात्मबुध्या तद्रूपाहं यत्- यदि त्वदुपासनया त्वद्विज्ञानेन च त्वं स्यां- त्वद्रूपमापन्नो भवेयम् । तर्हि अहं अमर्त्यः- मरणधर्मरहितः पूर्णानन्दनिधिः सत्यः त्वदभिन्नो भवेयमिति यावत् । अथवा यत् सच्चिदानन्दादिलक्षणं त्वं स्याः तदेव मर्त्यो हं स्याम् । यत्त्वमसि तदेवाहमस्मीति भावः । अनेन मन्त्रेण अहं मर्त्यभावमुत्सृज्यामर्त्यो भवामि इति दृढा प्रतिपत्तिरिति ।

मन्त्रान्तरम् -

पतंगमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।
समुद्रे अन्तः कवयो विचक्षते मरीचीनां पदमिच्छन्ति वेधसः ।।

(ऋ० सं० १०-१७७-१) इति । मन्त्रार्थः - असुरस्य- अचलस्य सर्वोपाधिविहीनस्य ब्रह्मणः संबन्धिन्या मायया- त्रिगुणात्मिकया अविद्यया अक्तं- जीवरूपेणाभिव्यक्तमात्मानं विपश्चितः- वेदान्ताभिज्ञाः ज्ञानिनः हृदा- हृत्स्थेनान्तर्मुखेन मनसा पतंगं- परमात्मानं व्याप्नोतीति पतंगः तं पश्यन्ति । उपाधिपरित्यागेन जीवात्मनः परमात्मना सह तादात्म्यं साक्षात्कुर्वन्तीति । अथ च तेकवयः - क्रान्तदर्शिनः ब्रह्मनिष्ठाः समुद्रे- समद्रवन्ति अस्माद्भूतानि इति समुद्रः परमात्मा तस्मिन् अधिष्ठाने अन्तः- मध्ये दृश्यजातं सर्वमध्यस्थत्वेन विचक्षते- विपश्यन्ति । अतः दृग्व्यतिरिक्तस्य नामरूपात्मकस्य प्रपंचस्य मिथ्यात्वव्यवहार इति । वेधसः- विधातारः के ते? इत्युक्ते बाधसामानाधिकरण्येन सर्वदा सर्वत्र 'सर्वमिदमहं च ब्रह्मैव' इति सच्चिदात्मना ब्रह्मभावनाकर्त्तार इति । ते मरीचीनां- ब्रह्माकारवृत्ति ज्ञानानां पदं- अधिष्ठानभूतं यत्परं ब्रह्म तदेव इच्छन्ति- तद्भावापत्तिमेव कामयन्ते इति । तथा च श्रुतिस्मृतयः -

'तदात्मानमेवावेदहं ब्रह्मास्मीति' (बृ० उ० १-४-१०)

'एको देवः सर्वभूतेषु गूढः' (श्वे० उ० ६-११

'अहमात्मा गुडाकेश' (भग० १०-२०)

इत्याद्याः सन्ति सहस्रशः + जीवब्रह्मणोः अभेदप्रतिपादकाः । एवं चैतैः मन्त्रैः ब्रह्मणः एकत्वं जीवब्रह्मणोरभेदश्च प्रतिपादितौ स्तः ।

एवमद्वितीयत्वेन वर्तमानस्य तस्य ब्रह्मणः एव चराचररूपाणां सृष्टिविषयककार्यस्य कर्तृत्वं अवश्यं वक्तव्यम् । यद्यपि चराचरे कृत्स्ने जगति सर्वथा प्रविष्टोऽसि इति विभाव्यते तथाऽपि सर्वमिदं मय्येवावस्थितं निराधारत्वात् अहं तस्मिन्नैवस्थितो न भवामि । अस्य निराधारस्य श्रवणं श्रुतिषु तत्र तत्र आम्नातं वर्तते । तथा हि-

'स भगवः कस्मिन् प्रतिष्ठित इति ? स्वे महिम्नि'

(छा० उ० ७-२४-१) इति श्रुतिः । यद्यपि लोके आपाततः कारणं कार्ये प्रविष्टमिति

प्रतीयते, तथाऽपि श्रुतिपर्यालोचनेन कार्यमेव कारणे प्रविष्टमित्यवगम्यते । एवं च अद्वैतिनां सिद्धान्तः विवर्तवादः उक्तो भवति ।

ननु सत्येवं कारणस्य कार्यप्रवेशः श्रुत्या कथ्यमानः किमर्थमिति चेत्-उच्यते । लोकबुद्धिमनुसृत्य तात्पर्यबोधनायेति । नच किमत्र प्रवेशगम्यं तात्पर्यमिति वाच्यम् । व्यापकस्य तस्य मुख्यप्रवेशासंभवात् तस्य जगद्व्याप्तावेव स्फुटं तात्पर्यं निश्चीयते । एवंरूपस्य ब्रह्मणः कर्तृत्वं वेदवाणीयं प्रतिपादयति -

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोमि अहं द्यावापृथिवी आविवेश ।।

(ऋ० सं० १०-१२५-६) इति । मन्त्रोऽयं दशममण्डलस्य शतोत्तरपंचविंशतितमे सूक्ते षष्ठो भवति । अथर्ववेदेऽपि ४-३०-५ इत्यत्र पठितः । मन्त्रार्थः -

पुरा त्रिपुरविजयसमये रुद्राय- रुद्रस्येति षष्ठ्यर्थे चतुर्थी । 'सुपां सुपो भवन्ति' इत्यनेन षष्ठीस्थाने चतुर्थीविभक्तिः । धनुः- चापं अहं ब्रह्म आतनोमि- आततज्यं करोमीत्यर्थः । किमर्थमिति चेत्- उच्यते । ब्रह्मद्विषे- ब्राह्मणानां द्वेष्टारं शरवे- हिंसकं त्रिपुरनिवासिनमसुरं । अत्र त्रिपुरनिवासिनमिति उपलक्षणतया उक्तं किन्तु सर्वान् द्वेष्टॄन् इति यावत् । हन्तवे- हन्तुं हिंसितुं हन्ता इति तुमर्थे तवे प्रत्ययः । मन्त्रस्थ उ शब्दः पादपूरकः । एवं च धनुराततकर्तृत्वादिनाऽव- गम्यमानः 'देवविजयो असुरपराभव' इत्ययं ब्रह्मकर्तृक इत्यवगम्यते । तथा हि -

'ब्रह्म ह देवेभ्यो विजिग्ये' (केनो० १-३-१४)

इति । अथवा मन्त्रपूर्वार्धस्यैवं भावः - आचार्यमूर्तिस्थः अहमेव ब्रह्मनिष्ठस्य निर्मलस्वान्तान्न विनीताय शिष्याय ब्रह्मावरकविद्यामुच्छेत्तुं विद्यालक्षणं धनुः प्रयच्छामि । तथा च श्रूयते श्रुतिः -

'धनुर्गृहीत्वौपनिषदं महास्त्रम्' (मुण्ड० २-२-३)

इति । शिष्यभूता चाहमेव शमदमादिदैवसहायं संपाद्य कल्याणपरिपन्थिनः सर्वान् रागद्वेषादिराक्षसान् निहन्मि इति । अहमेव समदं- समरमिति । समानं माद्यन्त्यस्मिन्निति समत्- संग्रामः तं शत्रुभिः सह युद्धं जनाय- मामेव जिज्ञासूनां जनानामर्थं कृणोमि- करोमि । तथा द्यावापृथिवी- दिवं च पृथिवीं च अन्त-

अन्तर्यामितया अहमेव आविवेश- प्रविष्टवान् । द्यावापृथिव्युपलक्षितं विश्वं सर्वमहमेव व्याप्तः सन् तदधिष्ठानत्वेन अवस्थितो भवामि इति भावः ।

सूक्तमेतत् एवं सगुण-निर्गुणरूपस्य ब्रह्मणः तत्त्वमाम्नातं भवति । अत्र विपश्चिद्विमर्शकाः सम्यगवधार्य विचारयन्तु इति । एवमन्येऽपि ब्रह्मतत्त्वावबोधकाः मन्त्राः बहवः वर्तन्त एव । ईदृशं-मन्त्ररूपाः तेऽपि मन्त्राः एवमेव विशदीकृत्य अनुसन्धेयाः इति शम् ॥

२ २ आतुरत्वम्

२२ जगतत्त्वम्

एवं पूर्वस्मिन् ब्रह्मतत्त्वप्रकरणे प्रतिपादितप्रकारेण स्वयंप्रकाशश्चैतन्यरूपो ऽ सः एको भगवान् भूतभौतिकरूपस्य सर्वस्य प्रपंचस्य अन्तर्बहिश्च व्याप्यावतिष्ठत इति सिध्यति। इदानीं तस्य ब्रह्मणः जगतः सृष्टिप्रकारकत्वमुपवर्ण्यते। प्रथमतः प्रपंचस्य सदात्मत्वमधिकृत्य विचार्यते। तथा हि -

> तिरश्चीनो विततो रश्मिरेषामधःस्विदासी३दुपरि स्विदासी३त्।
> रेतोधा आसन् महिमान आसन् स्वधा अवस्तात्प्रयतिः परस्तात्॥

(ऋ० सं० १०-१२९-५) इति। ऋगियं दशममण्डलस्य एकोनत्रिंशत्तिमे सूक्ते पंचमी। अपि चेयं शुक्लयजुर्वेदे ३३-७४ इत्यत्र, तैत्तिरीयब्राह्मणे २-८-९-५ इत्यत्र च आम्नाता।

मन्त्रार्थः - एषां- आविद्यककामकर्मरूपं वियदादिभूतजातं सृजतां रश्मिः- रश्मिरिव रश्मिः रश्मिसदृश इति। यथा सूर्यरश्मिः उदयान्तरेणैव निमिषमात्रेण युगपत्सर्वं जगद्व्याप्नोति तथा तस्येश्वरस्य कार्यरूपो प्रपंचः शीघ्रमेव सर्वत्र व्याप्नोतीति। एवं सृष्टिंगतो प्रपंचः विततः- विस्तृतमासीत्। विस्तारभूतो ऽयं प्रपंचः कथमासीदिति श्रुतिः वितर्कयति सः कार्यवर्गः प्रथमतः किं तिरश्चीनः- तिर्यगवस्थितो मध्ये स्थित आसीत्, उत किं अधः- अधस्तादासीत्, किं वा उपरि- उपरिष्टात् आसीत् ? इति। मन्त्रे वर्तमानः स्विदिति शब्दः वितर्कार्थे प्रयुक्तः 'विचार्यमाणानाम्' इत्यतः मन्त्रे प्लुतो भवति। तथा च एतेषु त्रिषु तिर्यगादिस्थानेषु प्राथम्यं कुत्रेति मन्त्रे विचार्य, सूर्यरश्मिवद् युगपत्सर्वतो दिक्षु शीघ्रं सर्गो निष्पन्न इत्युक्तम्। उक्तमेव मन्त्रे विभजते - सृष्टेषु कार्यभूतेषु पदार्थेषु मध्ये केचिद्भावाः रेतोधाः- रेतसो बीजभूतस्य कर्मणः कर्तारः भोक्तारश्च जीवाः आसन्। अन्ये भावाः महिमानः- महान्तो वियदादयो भोग्याः आसन्। महिमान इत्यत्र स्वार्थिक, इमानिच् इत्यतः

ह्मान् प्रत्ययो भवति । एवं मायासहित: परमेश्वर: सर्वं सृष्टिजातं सृष्ट्वा तस्मिन् स्वयं चानुप्रविश्य भोक्तृ-भोग्यादिरूपेण विभागं कृतवानिति । तथा हि-

'तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य'

(तै० उ० २-६) इति । एवं निरुक्तभोक्तृ-भोग्ययोर्मध्ये स्वधा- स्वधा इति अन्ननामैतत् । भोग्यप्रपंच इति यावत् । अयं भोग्यप्रपंच: अवस्तात्- निकृष्ट: आसीत् । प्रयति:- भोक्ता प्रयतिता इति । परस्तात्- उत्कृष्ट: आसीत् । एवं च ब्रह्म भोक्तृप्रपंचस्य शेषभूतं भोग्यप्रपंचं कृतवानिति सिध्यति । अनेन मन्त्रेण ईश्वर: एकस्मिन्नेव काले समानतया जगत: सृष्टिं चकार इत्युक्तम् ।

एवं भूतो स ईश्वर: जाग्रदाद्यवस्थावति लिंगदेहे तदालये लिंगशरीरे च आत्माभिमानी जीव: कर्ता भोक्ताऽहम्, मनुष्योऽहं ब्राह्मण इत्यादिरूपेणाज्ञानेन ईश्वराभिन्नं स्वात्मतत्वं विस्मृत्य कलत्रादिभोगेषु निबद्धचित्त: संसारजाले यथा सूत्रकृते जाले मत्स्या: इव अनादिकालत: पतितो अभवत् । यथा अविकृत: कौन्तेय एव कर्णो दुरदृष्टवशात् राधेयोऽयमिति जगत्यस्मिन् प्रसिद्धिमवाप्य बहुदु:खित: आसीत् तथा स्वत:शुद्धमविकृतं ब्रह्म एव निजप्रमादाज्जीवत्वमासाद्य पुन: पुन: जननमरणरूपशरीरमासाद्य दु:खभाक् भवति । यद्यपि तस्य दु:खसाक्षिण: परमार्थत: दु:खित्वमयुक्तं भवति, तथापि अध्यारोपितेऽपि तत् आत्मानात्मविवेकलक्षणात् मौढ्याच्च स्वस्मिन् अनुभूयत एव । यद्यप्ययमात्मा वस्तुत: धर्माधर्मादिना अविकृत एव भवति अथापि अनाद्यविद्याया: दोषवशेण सुखी द:खीत्यादिना विकारी भवति । अविद्या नाम -'अन्यस्मिन्नन्यधर्माध्यारोपणा' सैव सर्वानर्थबीजभूता, तयैव लोका: मोमुह्यन्ते । भाष्यकारै: शंकराचार्यै: सूत्रभाष्यस्याध्यासभाष्ये सम्यक् प्रपंचितोऽयं विषय: इति-

'अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम'

इति । तदेतत्परमार्थं वस्तु गमयितुमाविद्यकबन्धमुन्मूलयितुं च वामदेवदृष्टान्तेन -

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।
शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयम् ।।

(ऋ० सं० ४-२७-१) इति वेदवाणी प्रतिपादयति । अयं मन्त्र: चतुर्थमण्डलस्य

सप्तविंशतितमे सूक्ते प्रथमो भवति । ऐतरेयारण्यके चायं २-२४ इत्यत्र पठितः ।
अस्मिन् सूक्ते श्लोकोऽयं पठ्यते -

'श्येनमावं समाऽवस्थाय गर्भावोगेन निस्सृतः ।
ऋषिर्गर्भे शयानः सनु ब्रूत गर्भे नु सन्निति ।।

इति । मन्त्रार्थः -

गर्भे नु- गर्भे एव मातुः गर्भाशये एवेति । सन्-विद्यमानः मन्त्रस्थः न्विति शब्दः वितर्के भवति । अहं- वामदेवः अनेकजन्मान्तरकृतात्मानात्मविवेकेन जनितज्ञानेन एषां- इन्द्राग्न्यादीनां देवानां विश्वा- सर्वाणि विश्वाणि जनितानि- जन्मानि अनु अवेदम्- अनुज्ञानवानस्मि इति । अयं भावः - परमात्मनः सकाशात् सर्वे इन्द्रादयो देवाः जाताः, तस्मादेवात्मनः सत्तामादाय सत्तावन्तः सन्तः ते देवाः अवस्थिताः एवं चिदात्मनः तस्मात् कथमपि न पृथग्भूतास्ते इति । अतः तेषां जन्मादिहेतावधिष्ठानभूतमात्मानं परमार्थस्वरूपमद्वयमहमेवासमिति । श्रूयते श्रुतावपि - तैत्तिरीयारण्यके -

'गर्भे एवैतच्छयानो वामदेव एवमुवाच । स एवं विद्वान-
स्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्
कामान् आप्त्वा अमृतः समभवत् समभवत् ।'

(तै० आर० २-५-१) इति । इत्थंभूतादात्मज्ञानात् पूर्वमज्ञानदशायां शतं- असंख्यानि आयसीः- अयोमयानि इव अभेदानि लोहनिर्मितशृंखलासमानानि पुरः- शरीराणि मा-मां अरक्षन् - यथाऽहं शरीरव्यतिरिक्तमात्मानं न जानीयां तथा मामरक्षन् । आत्माध्यासं दृढीकृत्य अरक्षन् इति । अध- अधुना गुरुशास्त्र-प्रसादात् लब्धतत्वविवेकेन श्येनः- श्येनवदवस्थितः अहं श्येन इव जालं भित्वा जवसा- वेगेनात्मबोधाभ्याकृतसामर्थ्येन निरदीयम्- अविद्यामयाच्छरीरात् असंगं परिपूर्णमात्मानं जानन् निर्गतोऽस्मि । अनेन मन्त्रेण शास्त्रज्ञानेन अनाद्यनन्ता-नात्माध्यासस्य निरासः कर्तव्य इत्युक्तं भवति ।

एवं द्रष्टुरात्मनोऽन्यथाज्ञानमेव निखिलानर्थस्य निदानमित्युक्तम् । इदानीं तु तस्मादेव स्वात्मतत्वमबुध्वा आत्मैवायमिति अन्यथाग्रहं वितन्वानः सदा सर्वत्र

बहूनि भयानि बिभर्ति। स्वाज्ञानवशीभूत: एकस्मिन्नेव परमात्मनि विजृम्भितानि नानारूपाणि भिन्नत्वेन पश्यति। एषैव अज्ञानापरपर्याया अनाद्यनिर्वाच्या स्वात्मदेवस्य माया, यया मायया स्वयमेव विमोहितो भूत्वा विविधाननर्थान् संभजते। विषयेऽस्मिन् विवेकी कश्चिन्महात्मा स्वाशयमेवमाविश्चकार -

'आनन्ददुग्धोदधिमध्यवर्ती कणान् तदीयान् विषयानलोत्थान्।
आस्वादयन् कालमियन्तमेवं वृथाऽप्यनेषं हि विमूढचेता:॥

इति। अत एव द्वैतात्मदर्शनलक्षणं श्रुतय: कथयन्ति -

'द्वितीयाद्वै भयं भवति' (बृ० उ० १-४-२)

इति, 'मृत्यो: स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ० उ० ४-४-१९) इत्यादय:। अत: द्वितीयात्मज्ञानापेक्षया द्वैतात्मदर्शनलक्षणस्य निर्भयत्वादि-गुणकस्यात्मन: ज्ञाने अनुसन्धानं कर्तव्यम्। श्रूयते श्रुति: -

'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'

(बृ तै० उ० २-९) इति। यदा चायं पुण्यकर्मादिना शुद्धीकृतचित्त: विवेकादि-साधनचतुष्टयसंपन्नो भूत्वा स्वात्मज्ञानं कामयमान: परमात्मनि अभिमुखीभवन् श्रुत्या-चार्यप्रसादाच्च तस्य महिमानं समीक्षते तदा विदुषो अस्य द्वितीयात्मज्ञानेन समुत्थितास्सर्वा: भीतय: अद्वैतात्मकस्वात्मज्ञानेन प्रध्वस्ता: भवन्ति। एतादृश-तात्पर्यमभिसन्धाय भयतत्कारणतत्सहायादिकमनर्थजातनिवारणपुरस्सरं विद्याभिमुखी-भावलक्षणं बोधयतीयम् ऋक् -

त्वं न॑: प॒श्चाद॑ध॒रादुत्त॒रात्पु॒र इ॑न्द्र॒ नि पा॑हि वि॒श्वत॑:।
आ॒रे अ॒स्मत्कृ॑णुहि॒ दैव्यं॑ भ॒यमा॒रे हे॒तीरदे॑वी:॥

(ऋ० सं० ८-६१-१६) इति। अष्टममण्डलस्यैकषष्ठितमे षोडशतमा ऋगियं भवति।

मन्त्रार्थ: - हे इन्द्र- सत्यज्ञानादिलक्षणसंपन्न परमात्मन् त्वं न:- अस्मान् पश्चात्- पश्चाद्भागात् पुर:- पुरोभागात् अधरात्- अधोभागात् अत्र एतदु-परिभागस्योर्ध्वस्योपलक्षणं कर्तव्यम्। उत्तरात्- उत्तरभागात् एवमुपलक्षणतया दक्षिणभागस्य ग्रहणम्। किं बहुना विश्वत:- सर्वस्मात्प्रदेशात् दशदिग्भ्य: समागतेभ्य: विविधेभ्य: अनर्थकारिभ्य: निपाहि- परिपाहि। तन्निवारकसाधन-

बलमस्माकं दत्वा परिरक्षेति । किंच देव्यं भयं- देवस्येयमाश्रिता इति देवी माया सा चाविद्या तया प्रयोजितमन्यथाग्रहलक्षणं सर्वभयादिकारणं अस्मत्- अस्मत्तः आरे- दूरे कृणुहि- कुरु अद्वैतात्मदर्शनेन यथार्थग्रहणेन तदपसारयेति भावः । एवं अदेवीः- आसुराणि ब्रह्मात्मज्ञानसहायानि कामक्रोधादीनि दुःखमदादि हेतीः- आयुधविशेषाणि दूरे निरासनं कुर्विति । अनेन मन्त्रेण वाविद्यकनिखिलभेदपुरस्सरं प्रपंचस्य गर्हितत्वं बोध्यत इति ।

एवं प्रपंचस्य निराधारत्वमुपन्यस्य 'निर्विशेषो निराकारो निरवद्यो निरंजनः' इत्यादिरूपे अखण्डानन्दैकरसे तस्मिन् परमात्मनि चित्तवृत्तयः सर्वाः स्थिरीकर्तव्याः इतीदानीं प्रपंच्यते । स तु परमात्मा एवंरूपो भवति -

'इन्द्रो मायाभिः पुरुरूप ईयते' (ऋ० सं० ६-४७-१८)

'एकः सन् बहुधा विचारः' (तै० आर० ३-११)

'स एकधा भवति त्रिधा भवति पंचधा सप्तधा भवति नवधा

'चैव पुनश्चैकादशस्मृतः' (छा० उ० ७-२६-२)

'ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।

'एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम् ।।' (भग० ९-१५)

इत्यादिश्रुतिस्मृतिभ्यत्मायाकल्पितैः समष्टिस्थूलसूक्ष्मकारणोपाधिभिः विराट् हिरण्यगर्भः ईश्वरः इति व्यष्टिस्थूलसूक्ष्मकारणोपाधिभिः विश्वत्तैजस-प्राज्ञ इति गुणत्रयोपाधितः ब्रह्म-विष्णु-महेश्वर इत्यवान्तरगुणादिकृतोपाधिभिः देवाः पितरः ऋषयः मनुष्याः तिर्यंचः इत्यादिरूपेण आरोपितनामरूपाण्यनुकुर्वन् नाना इव प्रतीयते । अतः मुमुक्षुभिः सर्ववेद-वेदान्तप्रसिद्धं सर्वात्मकं ब्रह्मैव अविद्याकल्पित-नामरूपभेदमगृहीत्वा चित्तवृत्तिभिः सर्वदा चिन्तनीयमिति वेदवाणी उपदिशति -

क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।
न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ।।

(ऋ० सं० १०-६४-२) इति । दशममण्डलस्य चतुष्षष्टितमे सूक्ते ऋगियं द्वितीया भवति । मन्त्रार्थः -

विवेकादिसाधनसंपन्नानामस्माकं ब्रह्मविदां हृत्सु- हृदयेषु धीतयः- निधातव्याः

क्रतव:- सर्वे संकल्पा: बुद्धिवृत्तय: क्रतूयन्ति- परमात्मानमेव एवमनेकरूपं सर्वदा कल्पयन्ति । तथा वेना:- कान्ता: संसारवासनाकृतान्यभावं परित्यज्य तदेकभावरूपा: विषयिण्य: सर्वा इच्छा: इति । वेनन्तिता: इच्छादय: सौन्दर्यसारसर्वस्वमजस्रं कामयन्ते । एवं दिश:- अस्माभिर्निर्दिश्यमाणा: प्रमोदविशेषा: रागद्वेषादय: निर्मलरूपेषु अस्माकं हृदयेषु आपतन्ति- आगच्छन्ति । एवमनर्थजातं सर्वं प्रतिपाद्य व्यतिरेकेण प्रतिपादयति- एभ्य:- देवेभ्य: । देवेभ्य इत्यत्र आनन्त्यसार्वात्म्य-द्योतनाय बहुवचनप्रयोग: । अत: अस्मद्देवादित्यर्थ: । अन्य: कश्चन देहेन्द्रियाद्यनात्मभूत: पदार्थ: मर्डिता- सुखयिता न विद्यते । ब्रह्मात्मव्यतिरिक्तस्य पदार्थजातस्य सर्वस्य मायिकत्वेन तुच्छत्वात् मिथ्यात्वाच्च सुखकरत्वं न संभवतीति भाव: । यत: एवं तत: देवेष्वधि- अधिशब्द: अधिकरणात्मक: तस्मिन् सर्वात्मके देवदेवे परब्रह्मणि मे- मदीया: सर्वे कमा:- रागद्वेषेच्छादय: अयंसत- प्रविलाप्यन्तेति । अत्र एतदाम्नातं भवति यत् कूटस्थात् महादेवात् सर्वस्य विश्वस्योत्पत्ति:, तस्मिन्नेव लय: इति । तेन प्रभवानां कामानां तत्रैव श्रूयमाणं नियमनं प्रमाणविरोधात् न तेषां परमार्थत: पृथक् सत्वं साधयति, किन्तु आपामरप्रसिद्धं तेषां पृथक्सत्वम-भिप्रेत्य अस्मिन् परिदृश्यमाने प्रपंचे ब्रह्मव्यतिरिक्तं पृथक् सत्वं न किमप्यस्ति इति बोधनेन आत्मनि कल्पितस्य प्रपंचसत्वस्यानुपपत्ति: बुध्यते । तथा च श्रुतय: -

'नेह नानास्ति किंचन' (बृ० उ० ४-४-१९६)

इति, आत्मैकत्वेऽपि - 'आत्मैवेदं सर्वम्' (छा० उ० ७-२५-२)

'ब्रह्मैवेदं सर्वम्' (मुण्ड० २-२-२१)

इत्यादय: श्रुतय: संगच्छन्ते । कार्ये कारणसत्तातिरिक्तसत्ताया: अभाव: सर्वैर-भ्युपगतोऽयं विचार: । अत्र मन्त्रान्तरमपि भवति -

सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् । असदित्ते विभु प्रभु ।।

(ऋ० सं० १-९-५) इति । प्रथममण्डले नवमे सूक्ते पंचमोऽयं मन्त्र: । मन्त्रार्थ: -

हे इन्द्र- प्रत्यगात्मन् तव वरेण्यं- श्रेष्ठभूतं राध:- ज्ञानरूपं धनं चित्रं- देवतात्वरूपेण बहुविधं अर्वाक्- आत्मसाक्षात्काररूपेण यथा भवति च तथा अस्मान् सं चोदय- श्रवणादिनाजनितसम्यग्ज्ञानेन प्रेरय इति । अत: आत्मस्वरूपत्वादेव

आकाशादिवत् त्वं विभु भवसि । सर्वत्र सकलचराचरान् व्याप्य तिष्ठसीति । व्याप्यत्वादेव सर्वस्य जगतः प्रभुरपि भवसि । अतः जगतः सृष्ट्यादानविषये तवैव शक्तिर्वर्तते । तस्मात् त्वज्ज्ञानसाक्षात्कारेण आधिदैविकसकलानर्थहेतुभूतस्य संसारस्यात्यन्तनाशो भवत्विति । अथवा परिदृश्यमानं विभुरूपं भूत-भौतिकात्मकं जगत् त्वज्ज्ञानात् पूर्वं सदिव अभात् इदानीं तु सम्यग्ज्ञानेन तत्सर्वं मिथ्येति चानुभूयते । अनेन प्रपंचस्य कालत्रयसत्तावत्त्वं निषिद्धो भवति । अपरो मन्त्रः -

ऋतं शंसन्त ऋजुदीध्याना दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ।।

(ऋ० सं० १०-६७-२) इति । मन्त्रार्थः मन्त्रोऽयं दशमे मण्डले सप्तषष्ठितमे सूक्ते द्वितीयः । मन्त्रार्थः - ऋतं- त्रिकालाबाध्यं परमात्मस्वरूपं यत्सत्यं आत्मजिज्ञासूनां कृते अभेदश्रुतयः शंसन्तः- उपादिशन् । अपि च स्वयं ऋजु- मायाख्यकौटिल्यरहितं शुद्धं ब्रह्मतत्त्वं दीध्यानाः- सततं ध्यायमानाः सन्तः ते जिज्ञासवः । पुनः कीदृशाः ? दिवः- द्योतनवतः सर्वत्र सदा दीप्तस्य असुरस्य प्रप्रज्ञावतः सर्वेश्वरस्य पुत्रासः- पुत्रवत्प्रियतमाः भवन्ति । पुनः कथं भूताः ? वीराः- विविधानां शास्त्राणामर्थान् वक्तारः मेधाविनः इत्यर्थः । अपि च ते अंगिरसः- देहाद्यंगरसभूतप्रत्यगात्मभावमापन्नाः वर्तन्त इति । तथा च श्रुतिः -

'तं वा एतं अंगरसं सन्तं अंगिरा इत्याचक्षते ।'

(गो० ब्रा० ५-१७) इति । 'रसो वै सः' (तै० उ० २-७)

इति च भवतः । यास्कोऽपि निरुक्ते -

'बहुरूपा ऋषयस्ते गम्भीरकर्माणो वा गंभीरप्रज्ञा वा
ते अंगिरसः'

(नि० ११-१७) इत्याह । अतस्ते यज्ञस्य- प्रशस्तमस्य ज्ञानयज्ञस्य । चोक्तं गीतायाम्-

'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप ।'

(भगं०० ४-३३) इति । अतः प्रथमं- मुख्यं अनावृत्त्यलक्षणं कैवल्यं धाम- स्थानं इदानीमेव जीवन्मुक्तिदशायां मनन्त- विजानन्तः इति । विप्रं पदं पुरातनैः विप्रैः प्राप्तं यत्पदं तत् दधानाः- धारयन्तः भवन्ति । विदेहावस्थायां ब्रह्मणः

पदं धारयन्ति । तत्रैव एकीभवन्ति न पुनरावर्तयन्ति । तथा च श्रुतिः -

'ते सर्वगं सर्वतः प्राप्य धीराः युक्तात्मानः सर्वमेवाविशन्ति ।'

(मुण्ड० ३-२-५) इति भवति । अवसितो मन्त्रार्थः ।

एवं परमात्मनि एकीभावे कारणभूतं मनः विषयचिन्तानिचयेन बहिर्मुखवृत्त्या दिशो दश निरन्तरं विधावतीति सर्वजनानामाबालवृद्धानामनुभवः । गीतायाम्-

'चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।'

(भग० ६-३३) इति । अतः विषयचिन्तानिरोधं विना न कदापि मनसः बहिर्मुखवृत्तयः शाम्यन्ति । निरोधस्तु अभ्यास-वैराग्याभ्यामेव भवतीति वेदवाणी -

न वि जा॑नामि॒ यदि॑वे॒दम॑स्मि॒ नि॒ण्यः सन्न॑द्धो॒ मन॑सा चरामि ।

यदा॒ मा॑ऽऽगन्प्रथम॒जा ऋ॒तस्य आदिद्वा॒चो अ॑श्नुवे भा॒गम॒स्याः ।।

(ऋ० सं० १-१६४-३७) इति । मन्त्रोऽयं प्रथममण्डलस्य शतोत्तरचतुष्षष्ठितमे सूक्ते सप्तत्रिंशत् भवति । अयमेवाथर्ववेदे ६-१०-१५ इत्यत्र निरुक्ते ७-३ इत्यत्र च पठितः ।

मन्त्रार्थः - यत् इव यदपि अप्यर्थे इवशब्दः । इदं- परिदृश्यमानं विश्वं- अस्मि- कृत्स्नः प्रपंचः अहमेवास्मि । योऽयं सर्वत्र वर्तमानः सच्चिदानन्दरूपः सः अहमेवास्मि इति यदि न विजानामि- अनुभवेन न अधिगतोऽस्मि । शास्त्रोपदिष्टमिदं सर्वमहमस्मीति विज्ञानं मयि एतावता न जातमतः अविवेकी अहमस्मि इति ।

एवं कार्यकारणयोरभेदात् कृत्स्नः प्रपंचस्य ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपंचजातमप्यवगतो भवतीति उभयोः तादात्म्यरूपे प्रतिपादयन्ति एताः श्रुतयः -

'इदं सर्वं यदयमात्मा'. (बृ० उ० ४-५-७)

'तदैक्षत बहुस्यां प्रजायेयेति' (छा० उ० ६-२-३)

'आत्मैवेदं सर्वम्' (छा० उ० ७-२५-२)

इत्यादयः । अस्मिन् विषये वेदवाणी अपि कथयति -

इयं मे॒ नाभि॑रि॒ह मे॑ स॒धस्थ॑मि॒मे मे॑ दे॒वा अ॒यम॑स्मि॒ सर्वः॑ ।

(ऋ० सं० १०-६१-१९) इति । मन्त्रार्थः - इयं- प्रत्यक्षतो नुभूयमाना मे-मम चितिशक्तिः नाभिः- सर्वपदार्थस्य मध्ये प्रकाशेन वर्तमाना विश्वबन्धिका अस्ति । इह- अस्मिन् मे- मम शरीरे सधस्थं- निवासाय स्थानमस्ति । अत एव विद्रूपस्य

मे- मम इमे- इन्द्रादय: देवा: स्वात्मरूपास्ते सन्ति । अत एवायं सर्व:-
विश्वप्रपंच: अहमस्मि इति । मत:- व्यतिरिक्तमन्यत्किमपि नास्तीति । निण्य:-
निण्य इति अन्तर्हितनाम । अन्तर्हित:- मूढचित्त:, अत एव परिच्छिन्न: हीनश्चा-
यं संवृत इति । उपपत्तिमाह- सन्नद्ध:- अविद्याकामकर्मभि: परिवेष्टित: सन्
मनसा- विषयादिना विक्षिप्तेन बहिर्मुखेन चेतसा संचरामि- संसारे भ्रमामि ।
एवं भ्राम्यमानस्य जीवस्य हिताय वेदवाणी प्रतिवक्ति यदा मां प्रति श्रवणमनन-
निदिध्यासनादिना परिपक्वचित्तयुक्त: आगन्- आगमिष्यति तदा ऋतस्य-
परमार्थसत्यरूपस्य ब्रह्मण: प्रथमजा:- प्रथमोत्पन्न: मुख्यतया आत्मज्ञानेनाभिव्यक्त:
सन् मां प्राप्स्यति । मयि अभेदो भवतीति । आदित्- अव्यवधानेनैव स: अस्या:
वाच: ऐकात्म्यप्रतिपादिकाया: उपनिषच्छ्रुते: भागं- भजनीयं तत्त्वदर्शिभि: सेवनीयं
विशुद्धं ब्रह्मपदं अश्नुवे- तद्भावेन प्राप्स्यामि । यदा विषयसुखादीनां स्वरूप-
भस्मीकरणादात्यन्तिकी चित्तशान्ति: सिध्यति तदा एव वास्तविकस्वरूपानुभवजन्य
मखण्डात्मज्ञानसुखं समुदेतीति मन्त्रस्य विवेक: ।

ज्ञानानन्दनिधि: स ब्रह्म एव । जीवाभावापन्नस्य स्वस्यात्मा ये जानन्ति
च ते विवेकिनो धीरा: सम्यग्ज्ञानेन जीवत्वं दूरीकृत्य तस्मिन् एकीभवन्ति ।
आत्मज्ञानात्पूर्वं व्यवहारदशायां स: जीवत्वेनैव उक्तान् तत्कर्माणि करोति च ।
तत्र भवति दृष्टान्त: ।

कश्चित् राजकुमार: कारणान्तरेण चाण्डालगृहे परित्यक्त: सन् तेन चाण्डालेन
पालित:, तत्रैव विवृद्ध: शैशवमतिक्रम्य युवानो भूत्वा स: राजन्यकुलोद्भवत्वमात्मानं
विस्मृत्य अहं अतिनीचो दरिद्र: अहमस्मि इति स्वात्मना अभिमन्यते । एवम-
भिमानेन स: स्वकुलोचितं कर्म कुरुते, अनन्तरं स एव परमार्थेन केनचिद्दयालुना कृतो-
पदेन प्रत्यानीतं स्वमात्मानं राजपुत्रत्वेन स्मृत्वा चाण्डालभावमुज्झित्वा क्षात्रलक्षणं
शौर्यतेजादिना स्वमात्मानं मनुते यथा तथा अद्वयमलिकृताविद्यातत्कार्यविनिर्मुक्तं ब्रह्म
स्वस्वरूपं विस्मृत्य जीवो भूत्वा अविद्यया न्यस्तदेहे तादात्म्याध्यासात् तदीयान्
धर्मान् अनुष्ठेयत्वेन भजते । अनन्तरं स एव स्वत:प्रमाणेन वेदोपनिषदादिना
परमवेदस्वरूपं स्वमात्मानमवाप्य परिच्छिन्नरूपं जीवभावमपहाय आत्मज्ञानसाक्षात्कारेण

जीवन्मुक्तो भवतीति स्वाशयं प्रकटीकरोति वेदवाणी -

युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ।।

(ऋ० सं० ३-८-४) इति । मन्त्रोऽयं तृतीये मण्डले अष्टमसूक्तस्य चतुर्थो भवति । तैत्तिरीयब्राह्मणेऽपि ३-६-१-३ इत्यत्र पठितः । मन्त्रार्थः -

युवा- नित्यनूतनः अखण्डैकरसः । बाल्यवार्धक्यस्थूलत्वकृशत्वादैः स्थूलदेहविकारः तथा कामक्रोधलोभादिभिः सूक्ष्मदेहविकारैश्च तत्कारणभूतया अविद्यया विरहितः कूटस्थो आत्मा इति । सुवासाः- सुष्ठु वास इति । अन्नमयादिपंचकोशकृतं स्वरूपतिरोधायकं यस्य सः शोभनेन वाससा युक्तः अन्तःकरणे प्रतिबिंबितः सन्, परिवीत- स्थूलादिभिः शरीरैः समावृतः आगात्- जीवदशां प्राप्तः । उ इति निश्चयार्थकः । अनेन लोकसिद्धजीवदशा सूच्यते । तथा च ऐतरेयब्राह्मणम्-

'प्राणो वै युवा सुवासाः सो यं शरीरैः परिवृतः स उ
श्रेयान् भवति ।'

(ऐ० ब्रा० १-२) इति । अथेदानीं बद्धस्य तस्यैव जीवस्य बन्धविमोकाय साधनसंपत्तिरुच्यते - स उ- स एव जायमानः- शुभैः कर्मभिः सगुणोपासनया चेतसः शुद्धिं संपाद्यमानः श्रेयान्- श्रेष्ठः शुश्रूषादिगुणैः वर्धितो भवति । एवं बहिरंगसाधनमभिधाय अन्तरंगस्वरूपं निरूपयति - धीरासः- निर्विकारचेतसो धीराः शमदमादिसाधनसंपत्तिपरायणाः दृढव्रता इत्यर्थः । कवयः- सुनिपुणमतयः प्राज्ञाः देवयन्तः- परमात्मभावमात्मनः कामयमानाः मनसा- अभ्यासवैराग्ययुक्तेन विशुद्धेन मनसा स्वाध्यः- सुष्ठु सर्वतः ब्रह्मज्ञाननिरताः सन्तः तं- वेदोपनिषच्छास्त्रप्रसिद्धं स्वमात्मानं उन्नयन्ति- सर्वोत्कृष्टं ब्रह्मभावं प्रापयन्ति । ब्रह्मस्वरूपे एकीभवन्तीत्यर्थः । तथा च प्रत्यपादयन् शंकराचार्याः शतश्लोक्याम् -

'यः सद्भावाकारवृत्तौ प्रतिफलति युवा देहमात्रावृतोऽपि
तद्धर्मैर्बाल्यवृद्धादिभिरनुपहतः प्राण आविर्बभूव ।।
श्रेयान् साध्यस्तमेतं सुनिपुणमतयः सत्यसंकल्पभाजो
ह्यभ्यासाद्देवयन्तः परिणतमनसा साकमूर्ध्वं नयन्ति ।।'

(श्लो०) इति । तथा चानेन मन्त्रेण जीवाः आत्मज्ञानेन आविद्यकजीवत्वं दूरीकृत्य

परमात्मनि एकीभवन्ति इति ।

अथ च तानेव जीवानुद्दिश्य संसारस्य सारत्वं बोधयतीयम् ऋक् -

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथा: ।।

(ऋ० सं० १-६-३) इति । ऋगियं प्रथममण्डलस्य षष्ठे सूक्ते तृतीया भवति । इयमेव सामवेदसंहितायां १४७० इत्यत्र तैत्तिरीयसंहितायां ७-४-२१ इत्यत्र अथर्वे २०-२६-६ इत्यत्र तैत्तिरीयब्राह्मणे ३-६-४-३ इत्यत्र पठिता भवति । मन्त्रार्थ-

हे मर्या:- मरणधर्माणो मनुष्या: यूयमिदमाश्चर्यं पश्यत + इत्याध्याहार: कर्तव्य: । तत्र किमाश्चर्यमिति ? उच्यते । स्वप्रकाशचैतन्यरूपो यमात्मा उषद्भि:- ज्वलज्ज्योतिरूपाभि: तत्तद्विषयाज्ञानदाहकाभि: तत्तदाकारवृत्तिरूपाधिरूपाधिभि: उष: दाहार्थे स्मर्यते । अजायत- उदपद्यत जाग्रदाद्यवस्थाया: पुन: पुन: संप्राप्य नामरूपव्यवहारप्रवर्तको भूत्वा समुदितो भवतीति । किं कुर्वन् ? अकेतवे- ज्ञान-रश्मि रहिताय स्थूलसूक्ष्मकारणात्मकशरीरत्रितयाय इति । केतुं- चैतन्यं कृण्वन्- स्वकीयां चिद्रूपां समर्पयन् उदपद्यत । पुनश्च किं कुर्वन् अपेशसे- सुन्दररूपरहिताय मर्त्याय शरीराय पेश:- सुन्दररूपमभिव्यज्यमानं कुर्वन् उदपद्यत ।

~~पेश-इति-रूपनाम-+~~ 'पेश इति रूपनाम पिंशते:'

(नि० ८-११) इति यास्केनोक्तं भवति । चतुर्थ्यन्तौ अकेतवे पेशसे इति पदद्वयं षष्ठ्यर्थे भवत इति । तथा च यत्सत्यया इदं शरीरादिकं जगत् सदिव ~~।~~ यस्य चैतन्येन जडभूतमिदं सर्वं चेतनमिव यस्य प्रकाशेन सर्वं प्रकाश्यते, यस्यानन्देन सर्वमिद-मानन्दं भवति एवंरूपं तं लोका: नावगच्छन्तीति मन्त्रभाव: । तथा च श्रुति: -

'आराममस्य पश्यन्ति न तं पश्यति कश्चन ।'

(बृ० उ० ४-३-१४) इति । एवंचानेन मन्त्रेण परमात्मा अयं स्वात्मरूपेण ज्योतिना सर्वत अवतिष्ठत इत्यत: सर्वेषां ~~##~~ ज्ञेयरूपो ब्रह्म एव सारतमत्वात् संसाररूपप्रपंचस्यासारत्वमुक्तम् ।

एवमचिन्त्यरूपं तं शास्त्रदिशा यदि ये मुमुक्षव: तज्ज्ञानपरायणा: भवेयु: तदा ते अस्माकं हृदि असौ अस्ति, वयं च तस्य स्म इति संबन्धविशेषभावनया तं सत्यज्ञानानन्दनिधिं सर्वात्मना आराधयन्ति । प्रपंचे संसारेऽस्मिन् आशादिभावान्

उत्सृज्य इष्टानिष्टसंयोगवियोगजन्यहर्षविषादौ विहाय निष्कामभावनया भगवत्प्रीत्यर्थं आश्रमोक्तकर्माणि कुर्वन्तोऽपि ते स्वात्मानमसंगमिति भावयेयुः। अतः सर्वैरपि स्वाधिष्ठानभूतो परब्रह्म सर्वदा चिन्तनीय इति मन्त्रोऽयं वदति -

इमे त इन्द्र ते पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो।

न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः॥

(ऋ ऋ० सं० १-५७-४) इति। ऋगियं प्रथममण्डलस्य सप्तपंचाशत्तमे सूक्ते चतुर्थी भवति। इयमेव सामवेदे ३७५ इत्यत्र अथर्ववेदे २०-१५-४ इत्यत्र च आम्नाता भवति।

मन्त्रार्थः - मन्त्रेऽस्मिन् परमात्मसंबोधनानि बहूनि भवन्ति। पुनः पुनः परमात्मनः परमानुग्रहाय, तस्यावधारणार्थं चेति मन्तव्यम्। हे इन्द्र हे प्रभूवसो - प्रभूतैश्वर्य अथवा अमितपराक्रमेति। पुरुष्टुत- बहुभिः भावुकैः स्तुतः, हे गिर्वणः। सद्भावनामयीभिः वैखर्यादिभिः गीर्भिः संभजनीय परमेश्वर ये वयं- स्तावकाः त्वां- परमात्मानं त्वमेव आरभ्य- आश्रयतया अवलम्ब्य चरामसि- इत्यत्र इदन्तो इदन्तो मसिः प्रत्ययः। तथा च चरम इति। महत्यस्मिन् संसारे विलक्षणनाटकरूपे वर्तामहे। इष्टानिष्टोपपत्तिषु समचित्तत्वं विधाय त्वदिच्छायामेव जीवननिर्वाहं कुर्वामहे इति। मन्त्रान्तरमप्यत्र भवति -

आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते। उश्मसि त्वा सधस्थ आ॥

(ऋ० सं० ८-४५-२०) इति। अष्टममण्डले पंचचत्वारिंशत्तमे सूक्ते विंशतितमोऽयं भवति मन्त्रः। मन्त्रार्थः -

हे शवसस्पते- सकलशक्तिनिधे त्वां - परमात्मानं जिव्रयः- क्षीणाः वयं रम्भं न- दण्डमिव आ ररम्भा- आलम्बामहे। तथा श्रूयते च -

'आरभामहे त्वा जीर्णा इव दण्डम्' (नि० ३-२१)

इति। यथा केचित् वृद्धाः अवष्टम्भनार्थं दण्डमेवावलम्बते तथा त्वामेव अभ्युदय-श्रेयस्कामो वयं अवलम्बामहे इति। अत एव त्वा- त्वामेव वयं- वयं सधस्थे- अत्यन्तसमीपे हृदयस्थाने आ- आभिमुख्येन द्रष्टुं उश्मसि- कामयामहे इति। यतः तवेच्छायाः एव वयं जीवनं कुर्मः अत एव ते इमे वयमिति। अत्र तच्छब्दः प्रसिद्धवाचको भवति। अपरोक्षवाची इदं शब्दः तदर्थकत्वेन प्रसिद्धाः वयमिति।

परमेश्वरस्य तवापरोक्षज्ञानं वयं कामयामहे इति । एवं ब्रह्मस्वरूपसाक्षात्कारे अन्यो मन्त्रः भवति -

कदान्वं १ न्तर्वरुणे भुवानि (ऋ० सं० ७-८६-२)

इति । मन्त्रार्थः - कदानु- कदा खलु वरुणे- पूर्णाद्वितसुखसागरस्य देवे प्रपवेत अन्तः भुवानि- अन्तर्भूतस्तदेकात्मभावापन्नो भविष्यामि ? इति जिज्ञासन अत्र यतेत्यते । अपि च-

कदा मृलीकं सुमना अभिख्यम् (ऋ० सं० ७-८६-२)

इति । अयमर्थः - सुमनाः- शोभनमनस्कः । एकाग्रत्वनिर्मलत्वादिकं मनसः शोभनत्वं भवति । अहं कदा- कस्मिन् समये मृलीकं- मृडात्मानं सर्वेश्वरं अभिख्यम्- अभितः पश्येयमिति मन्त्रद्रष्टा वितर्कयति । प्रकृतमनुसरामः - तस्मात् त्वदन्यः- त्वत्तोन्यः कश्चिदपि पदार्थः गिरः- प्रार्थनारूपाः अस्मदीयाः वाचः । वाणीः इति कर्मपदं द्वितीयाबहुवचनम् । न हि सघत्- नहि प्राप्नोति । अर्थात् त्वां सर्वलोकमहेश्वरमन्तर्यामिणं स्वात्मभूतं भगवन्तं विहाय सवभ्येभ्यः निष्पृहाः सन्तः नान्यं कमपि कामयामहे । अतः अस्मदीयाः प्रार्थनादिज्ञापनपरा वाणी नान्यगामिनी भवति । वाणी इति मनश्चक्षुरादेरुपलक्षणं भवति । अत्र मन्त्रान्तरम्-

वयं घा ते अपि त्वे इन्द्र विप्रा अपि ष्मसि ।
न हि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ।।

(ऋ० सं० ८-६६-१३) इति । अयं मन्त्रः अष्टममण्डलस्य षट्षष्ठितमे सूक्ते त्रयोदशः ।

मन्त्रार्थः - हे इन्द्र पुरुहूत हे मघवन्- इन्द्ररूपो परमात्मा वयं घ- खलु ते- तव स्वभूताः विप्राः- तत्त्वदर्शिनो विवेकिनः । अपि इति संभावनायाम्। त्वे- अन्तरात्मने त्वयि इत्- एव ष्मसि- संलग्नचित्ताः भवाम इति । यतः त्वदन्यः कश्चन पदार्थः मर्डिता- सुखकरो नास्ति । अतः अन्याद्विहाय परमात्मनि इन्द्रे एव वर्तामहे इति भावः । प्रकृतमन्त्रार्थः - अतः त्वं नः- अस्माकं स्तुति- जपादिलक्षणात्मकं विहितं वपः वचः- वचांसि पतिहर्य- स्वीकुरु । तत्र दृष्टान्तमाह - क्षोणीरिव इति । यथा पृथिवी स्वकीय-

विकारान् भूतजातान् स्वस्मिन् स्वीकरोति । तथा सर्वः जपादयः तुभ्यमेव समर्पितं सत् त्वया एव स्वीकृतं भवतु । अत्र अन्या ऋगपि भवति -

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति रिच्यते ।।

(ऋ० सं० ८-९२-२२) इति । ऋगियं अष्टमे मण्डले द्विनवतितमे सूक्ते द्वादशतमा भवति । मन्त्रार्थः -

हे इन्द्र परमात्मन् इन्दवः- इन्दुवत् प्रशान्ताः वीतरागाः तत्त्वदर्शिनः सन्यासिनः त्वा- शुद्धस्वरूपं त्वां आ विशन्तु- उपाधिपरित्यागेन प्रविष्टा इव प्रविशन्ति इति । उक्तार्थे दृष्टान्तः - सिन्धवः- स्यन्दमानाः नद्यः यथा समुद्रं सर्वात्मना प्रविशन्ति, यथा वा पूर्वमपि ताः नद्यः समुद्रजलरूपाः सत्यः तत्रैव समुद्रे अभिविशन्त्यः तद्रूपाः भवन्ति तथा परमात्मा एवोपाधिरूपेण जीवाभिधेयस्सन् अनन्तरं आत्मसाक्षात्कारेण परमात्मस्वरूप एव भवति, यथा वा जीवः श्रवणमननादिना कृतसाक्षात्कारेण सर्वात्मना ब्रह्मरूपो भवतीति । यत एवं तस्मात् सर्वाधिष्ठानं त्वां जडः पदार्थः चेतनो वा कश्चित् नातिरिच्यते- वस्तुतः पृथग्भूतो न भवति । अत्र अवान्तरमन्त्राः पृथक् तदर्थे प्रतिपादिताः वर्तन्ते । सहृदयाः विभागीकृत्य अवधारयन्त्वित्ति । ।

एवमेतादृशाः दृढव्रताः जीवाः पुण्यकर्माणस्ते सततमनुसरन्ति एते किल भगवतः प्रज्ञाशक्तिं संपाद्य श्रेयसः विघ्नभूतान् कामादिशत्रून् विध्वंस्य सागरोचरणे विजयशालिनो भवन्ति इति मन्त्रोऽयं प्रतिपादयति

नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे । इन्द्राभिमातिषाह्ये ।।

(ऋ० सं० ३-३७-३) इति । ऋगियं तृतीयमण्डलस्य सप्तत्रिंशत्तमे सूक्ते तृतीया भवति । अथर्ववेदे पीयं २०-१६-३ इत्यत्र पठिता । मन्त्रार्थः -

हे शतक्रतो- शतक्रतुभिः लब्धं पदं यस्य सः शतक्रतुः हे इन्द्र- परमात्मन् अभिमातिषाह्ये- मातिर्नाम- गर्वः, मान इति अभितः मातिः येषां ते अभिमातयः प्रभूतगर्वशालिनः । प्रध्मान इति । तथा हि श्रूयते -

'आत्मा वा अभिमाति हि' (तै० सं० ५-२-१-३-५)

इत्यत्र । पापजनकानां कामादीनां सहनमेव सह्यं यस्मिन् एवंरूपस्य, ते- तव

परमेश्वरस्य नामानि परमपावनानि नामधेयानि विश्वाभिः- सर्वाभिः गीर्भिः- मध्यमावैखरीपश्यन्तीपराख्याभिः चतुर्भिः वाणीभिः अधिकारिभेदेन वयं ईमहे- परमप्रीत्या संकीर्तयाम इति । एवमेव मन्त्रान्तरमपि -

मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः ।।

(ऋ० सं० ८-११-५) इति । अष्टमे मण्डले एकादशे सूक्ते पंचमोऽयं मन्त्रः । मन्त्रार्थः-

मर्ताः- मर्त्यलोकवासिनो मनुष्याः वयं अमर्त्यस्य- अविनाशिनो देवदेवस्य जातवेदसः जातानां- स्वस्मात्समुत्पन्नानां सर्वेषां पदार्थानां वेदिता- जातवेदाः तस्य सर्वविदः ते- तव भूरि- बहूनि नाम- परमपावननामानि मनामहे- संस्मराम इति । कीदृशाः वयं विप्रासः- विशेषेण तव नाम्नः अर्थं निराकारो यमिति भावयन्तः सन्तः वर्तामहे । श्रूयते हि गीतायाम् -

'व्याहरन् मामनुस्मरन्' (भग० ७-१३)

इति । योगसूत्रेऽपि - 'तज्जपस्तदर्थभावनम्' (यो० सू० १-२८)

इति च । एवं मन्त्रान्तरमपि -

विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे ।।

(ऋ० सं० ८-११-६) इति । ऋगियं अष्टममण्डलस्य एकादशे सूक्ते षष्ठी भवति । मन्त्रार्थः - विप्रं- विशेषेण सर्वं पश्यति इति सर्वज्ञं अग्निं परमेश्वरं देवं विप्रासः- भगवच्चिन्तनपराः मेधाविनः मर्तासः- मरणधर्मकाः मनुष्याः वयं अवसे- प्रसादयितुं ऊतये- कामादिविकारेभ्यो रक्षणार्थं गीर्भिः- सुवचोभिः हवामहे- आह्वयामहे । अत्र विप्रं- विप्रास इति पदद्वयेन जीवपरमेश्वरस्य तादात्म्यं सूच्यते । अन्यो मन्त्रः-

नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त सन्दृष्टौ ।

(ऋ० सं० ६-१-४) इति । मन्त्रार्थः -

याज्ञिकाः ये यज्ञियानि- यज्ञरूपविष्णुसम्बन्धीनि नामानि- मन्त्ररूपेणावस्थितानि नामानि चित्- अपि दधिरे- धारयन्ति विषये नुराग इव, केवलं नामजपपरा अपि ते परमेश्वरस्य विष्णोः भद्रायां- कल्याणमय्यां सन्दृष्टौ- अनुग्रहदृष्टौ रणयन्तः- आत्मानमेव रमयन्ति इति । एवं चात्र प्रतिपादितैः मन्त्रैः भगवतः नामप्रभावः प्रतिपादितो भवति । एवं प्रतिपादिता वाणी चतुर्विधा भवति ।

परापश्यन्ती, मध्यमा, वैखरी, समाख्या चेति। सा च वाणी 'शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' इति वचनानुसारेण परब्रह्मसाक्षात्कारसाधनरूपा मन्त्रादिरूपा इत्युच्यते। तत्र तिस्रः वैखरीमध्यमापरापश्यन्त्याख्यः उपासनप्रयुक्ताः भवन्ति। तेषु या खलु अनार्यासिन मानवानां संसारजनितसंतापं अतिशयेन संहरति सा वैखरी स्थूला वाणी इति गीयते। अस्याः साधनपरिपाके सति मन्त्रादिलक्ष्यस्य परमात्मनः सुदृढा धारणा अविच्छिन्नधारा सूक्ष्मा वाणी भवति मध्यमा। अनन्तरं सुसूक्ष्मया पश्यन्त्या वाण्या अनल्पप्रज्ञाः योगिनः परमात्मानं तं साक्षात्-कुर्वन्ति। या च वाणी स्वयं परमात्मनमभिदधाना ज्ञानमिवाभिधेयं तं विषयी-कुर्वाणा वर्तते यतः ततः सा पश्यन्ती इति अन्वर्थनाम्ना भण्यते। चतुर्थी समाख्या वाणी त्रिविधायाः वाचः परा सूक्ष्मतमा भवति। ताभ्यः सवलक्षणा सती तेषामवसानभूमिः च भवति। इयमेव परं ब्रह्मतत्त्वं तुरीया वाक् इत्युच्यते, यथा जाग्रत्स्वप्नसुषुप्त्यवस्थाभ्य तुरीयं ब्रह्म तद्वत्। श्रूयते श्रुतिरपि -

'वागेव विश्वा भुवनानि जज्ञे। वाचेव विश्वं बहुरूपं
निबद्धं तदेवैकं प्रविभज्योपयुङ्क्ते। वाचीमा विश्वा
भुवनान्यर्पिता।'

(तै० ब्रा० २-८-८-४) इति।अतः ये वेदशास्त्राधिगम्यं तत्त्वं सूक्ष्मेक्षिकया पर्यालोचयन्ति ते चित्तशुद्धिद्वारा विषयान्तरेभ्यो व्यावृत्ताः सन्तः परं ब्रह्मतत्त्वम-धिगच्छन्ति इति बोधयतीयं वेदवाणी -

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।

(ऋ० सं० १-१६४-४५) इति। प्रथममण्डलस्य शतोत्तरचतुष्षष्टितमसूक्तस्य पंचचत्वारिंशतमा भवतीयम् ऋक्। तथा चेयं अथर्ववेदे ६-१०-२७ इत्यत्र तैत्तिरीयब्राह्मणे २-८-८-५ शतपथब्राह्मणे ४-१-३-१७ निरुक्ते १३-६ इत्यादिस्थलेषु प्रतिपादिता।

मन्त्रार्थः - वाक्परिमिता। वाचः- कृत्स्नायाः वाण्याः, परिमितानि-इयत्तया परिच्छिन्नानि, अत्र षष्ठीतत्पुरुषः समासः। 'शेश्छन्दसि बहुलम्' (पा० सू० ६-१-७०) इति सूत्रेण जसः शेर्लोपे परिमिता इति भवति। चत्वारि-

परापश्यन्तीमध्यमावैखरीसमाख्य: पदानि- स्वरूपाणि तस्या: वर्तन्त इति। या लोके वागस्ति सा चतुर्धा विभक्ता। ज्ञप्तिरूपा नादात्मिका एका वागेव मूलाधारादुदिता परा इत्युच्यते- समाख्या इत्युच्यते। इयमेव समाधौ योगिनां निर्विकल्पकज्ञानविषयत्वं भजते। नादस्य सूक्ष्मतमत्वेन दुर्निरूपत्वात्। अनन्तरमिदानीं तासां स्वरूपज्ञानपूर्वकमुपासनमधिकृत्याह - तानि- वाच: चत्वारि स्वरूपाणि ब्राह्मणा: मनीषिणश्च विदु:- जानन्ति। ब्राह्मणा:- वेदाख्यं ब्रह्म सांगोपांगं विदन्तीति अतस्ते शब्दब्रह्मतत्त्वस्याधिगन्तारो मेधाविन इति। एते परब्रह्मविषयत्वेन तां समुपासत इति भाव:। एते कथंभूता: ? मनीषिण:- मनस: नियन्तार: स्वाधीनमनस्का: विजितेन्द्रिया: इति। अनेन शास्त्रसम्यग्ज्ञान-मन:संयमलक्षणा वागुपासनाधिकारसंपत् उक्ता भवति। चतुर्षु मध्ये त्रीणि-परादीनि गुहा- गुहासु निहिता- स्थापितानि परमेश्वरेण। गुहा, निहिता इत्यत्र च 'सुपांसुलुक् पूर्वसवर्ण---'(पा० सू० ७-१-३९) इत्यनेन सूत्रेण सप्तमीप्रथमयो: लुगिति बोध्यम्। तथा च तासां स्वरूपं गुहारूपोपनिषन्मन्त्रेषु स्थापितमिति भाव:। अथवा हृदयादिरूपा गुहा भवति। तत्र हृदिस्थाने मध्यमा वाक्, नाभौ पश्यन्तीवाक्, मूलाधारचक्रे परानामिकावाक् इति च विवेचनीयम्। विपश्चित: वागुपासनलब्धेन ज्ञानयोगबलेन गुहागम्यभज्ञानान्धकारं विदार्य पूर्णं परं तत्त्वं साक्षात्कृत्य अमृता: अभयाश्च भवन्ति। तानि परादीनि नेंगयन्ते- न चेष्टन्ते इति। एवं त्रयाणां वाचां स्वरूपज्ञानं प्रतिपाद्य अन्यां स्थूलां वाणीं परामृशति- तुरीयमिति। तस्या एव वाच:- शब्दजालस्य तुरीयं- चतुर्थभागं वैखर्याख्यं मनुष्या: व्यवहाररूपेण वदन्ति- व्यवहरन्ति इति यावत्। त्वरते: इति तुरीयम्। इयमेव त्वरितमिव निर्गतं भवति तिसृभ्य:, तथा मनुष्येभ्यश्चेति। चतुर्धा वाण्या: विवेकपुरस्सरं ज्ञानं, तज्ज्ञानेन च साक्षात्कार: इत्युक्तम् मन्त्रेणानेन। स्थूला वाणी प्रपंचरूपत्वात् तस्या: ज्ञानेन प्रपंचस्य मोक्षो व्यपगच्छति इत्यत: प्रपंचनि:सारत्वमपि निगदितम्।

एवं जगदाकारेण परिणताया: स्थूलाया: वाण्या: माया इत्यपि नामान्तरं वर्तते। सा तु जीवजगदादिरूपेण लीलया क्रीडत: परमेश्वरस्य संबन्धिनी सती

तदधीना पिण्डब्रह्माण्डादिरूपेण विस्तार्यमाणा, मामहं न जानामि इति साक्षिकप्रत्यक्षत्वेनापलापानर्हा इन्द्रजालादेरिव अनृतप्रपंचस्य प्रकाशिका सत्त्वादि-गुणमयी च भवति । अत्र ऋङ्मन्त्रः -

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।।

(ऋ० सं० १-१६४-४१) इति । मन्त्रोऽयं प्रथममण्डलस्य शतोत्तरचतुष्षष्टितमे सूक्ते एकचत्वारिंशत्तमः । अयमेवाथर्ववेदे ९-१०-२१ तैत्तिरीयब्राह्मणे २-४-६-११ तैत्तिरीयारण्यके १-९-४ इत्यत्र निरुक्ते ११-४० इत्यत्र च पठितः । मन्त्रार्थः -

गौरी- गरणशीला शुक्लवर्णा सरस्वती या शब्दब्रह्मात्मिका वाणी सा मिमाय- स्वकीयैः शब्दैः अभिधेयं इदं सर्वं जगत् स्वमायया मिमीते परिच्छिनत्तीति । किं कुर्वती ? सलिलानि- सलिलोपलक्षितानि सर्वाणि भूतभौतिकजातानि तक्षती- तत्तदनेकशब्दवाच्यतया निष्पादयन्ती सती । अयं भावः - एकैकस्यापि पदार्थस्य बहूनि नामधेयानि सन्ति वृक्षो महीरुहः शाखी इति यथा पर्यायबहुत्वदर्शनं तद्वत् । यद्यपि प्रवृत्तिनिमित्तभूताः अवयवार्थाः भिद्यन्ते, अथापि देशभेदेन विभिन्नासु भाषासु नास्ति प्रवृत्तिनिमित्तभेदः । तस्मात् शब्दप्रपंचस्य बाहुल्यात् तदपेक्षया अर्थप्रपंचस्य स्वल्पत्वात् तेन तस्य परिच्छेदकत्वं समंजसमिति । सा च वाणी एकपदादिरूपा -- एकपदी- अव्याकृतावस्था एकमनिर्वाच्यं पदं- स्वरूपं यस्य सा एकपदी । शब्दब्रह्म-परनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं जगदुपादानभूत-मव्याकृतं परा वाक् इत्युच्यते । सा एव द्विपदी- सूक्ष्मसमष्टिरूपा । चतुष्पदा-सत्यं तपः,जनः,मह इति चतुर्भिरुपरितनैः लोकैर्विशिष्टा । अष्टापदी- पृथिव्य-प्तेजोवाय्वाकाशमनोबुद्ध्यहंकारभेदेन भिन्ना अष्टधा प्रकृतिः । चोक्तं भगवता -

'भूमिरापो नलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।।'

(भ०गी० ७-४) इति । नवपदी- भूम्यन्तरिक्षस्वर्गैः त्रिभिः लोकैः, त्रिभिर्देवैः अग्निवायुसूर्यैः प्रपंचस्य सर्गस्थितिप्रलयैश्च संयुक्ता सा इति । किमनया परिगणनया सिध्यतीति चेत् शृणु । एवं विस्तृतपरिणामभेदादेकपदादिरूपेण विवर्धमाना

सा माया सहस्राक्षरा- अनन्तभूत-भौतिकादिविस्तारविशिष्टा भवति । सहस्रशब्द: अनन्तपर्यायवाची । ब्रह्म सर्वव्यापित्वात् तदधिष्ठेया मायाऽपि विस्तृता भवति । एवंरूपा सा बभूवुषी- प्रथमं भूत-भौतिकसृष्टिरूपेण भवितुमिच्छां कृतवती, अनन्तरं तथा एव बभूव । इयं सांख्यै: निरूप्यमाना प्रकृतिरिति यावत् । एवं तस्या: कल्प्यं वैलक्ष्यं प्रपंच्य चिदध्यस्तत्वं प्रतिपाद्यते - परमे इति । प्रकृष्टरूपे व्योमन्- व्योमरूपे अधिष्ठाने ब्रह्मणि विषयत्वेनाश्रयत्वेन कल्पिततादात्म्यसंबन्धेनावस्थिता वर्तत इति । अत्रायं समाधि: -

गौरीमायाशक्ते परिणामविशेषाणां सर्वेषां सलिलादिभावानामधिष्ठान- भूतो एक एवात्मा व्योमशब्दप्रतिपाद्य: + अत्रावगम्यते । तस्यैव सत्तास्फूर्त्यादिकमादाय इयं गौरी सर्वमनिर्वचनीयमयमनेकभेदविस्तारं जगत् स्वभवतो निर्मातुं शक्नोति नान्यथा ॥

P. एवंरूपया तया मायया अनादिभवपरंपरानुभूतानेकस्त्र्यादिविषयवासनावासिता- न्त:करणान्, वासनापरवशतया प्रवर्तमानान्, विषयसक्तमानसान् जीवान् प्रति तेषां विषयप्रवणतां परावर्तयितुं पुरूरवोर्वशीसंवादमुखेन स्त्र्यादिविषयेषु सुखाभावं बोधयितुं तथा असतीनां स्त्रीणां हृदयमतीव क्रूरमिति वर्णयन् सर्वेषां हितं बोधयती यं वेदवाणी -

पुरूरवो मा मृथा मा प्रपप्तो मा त्वा वृकासो अशिवास उक्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥

(ऋ० सं० १०-९५-१५) इति । दशममण्डलस्य पंचनवतितमे सूक्ते मन्त्रोऽयं पंचदश: । शतपथब्राह्मणेऽपि ११-५-१-१६ इत्यत्रायं पठित: । मन्त्रार्थ: -

सर्वलोकसुन्दरी उर्वशी विवेकविकलं स्वासक्तं राजानं पुरूरवसं प्रति उवाच - हे पुरूरव: इति । त्वं मा मृथा:- स्त्र्यादिविषयासक्त्यात्मकदुष्टविषयभक्षणेन मृतिं मा प्राप्नोऽहि । म्रियते इति धातो लुङि थासि इत्यत्र ह्रस्व 'ह्रस्वादंगात्' (पा० सू० ८-२-२७) इति लोप: । एवं व्यवहरन्ति विद्वांस:-

'न विषं विषमित्याहुर्विषया विषमुच्यते ।'

इति । तथा मा प्रपप्त:- स्त्रीपिण्डसंपर्कसंभूतकामकलुषितचेतस्त्वेन विषयविशेषेण आत्मन: अध: पतनं त्वं मा कार्षी: । प्रपप्त इति पततेर्लुङि लृदित्वात् पुषादि-

त्यादिना च्लेरङ् 'पत: पुम्' (पा० सू० ७-४-१६) इत्यत: पुम् विधीयते । तथा त्वां- च त्वां अशिवास:- स अशुभा: सन्तापप्रदा: वृकास:- विषयविमोहितेन्द्रियरूपा: वृ वृका: मा उ दान्- अत्र उ इति एवकारार्थक: । दान्- अदन् मा- मारयन्त्वित्यति । तदेवं विषयसक्तिलक्षणमृत्युनिवारणमध:पातत्राणमिन्द्रियवृकवासविधानं कर्तृव्यत्ययेनोक्त्वा विषयादिषु दृढं वैराग्यं जनयितुं स्त्र्यादिविषयस्यासारतां शोकसंतापाद्यनर्थां च प्रदर्शयति- स्त्रैणानि इति । स्त्रीणामिमानि कुलटाभि: कृतानि सख्यानि- स्नेहप्रधानानि गाढमैत्रीरूपाणि न वै सन्ति- सुखकराणि भवन्ति । तत्र कारणमाह - एता- एतानि सख्यानि सालावृकाणां- आरण्यपशूनां हृदयानि तेषां हृदयानि क्रूराणि भवन्तीति भाव: । यथा तानि विश्वासापन्नानां वत्सादीनां घातुकानि भवन्ति तथैव कुलटानां स्त्रीणां पापरूपाणि हृदयान्यपि घातुकानि भवन्तीति । अत्र मन्त्रान्तरं भवति -

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।

(ऋ० सं० १०-९५-१) इति । मन्त्रार्थ: -

र ऊर्वशीकामव्याकुल: पुरूरव: तां पश्यन् वदति - ह ये- हे घोरे - अस्माकं प्रभूतदु:खजनकत्वात् घोरदु:खकारीणि जाये- मनसा- ममोपरि अनुरागवता मनसा युक्ता सती तिष्ठ- मत्सन्निधौ क्षणमात्रं निवस । मा शीघ्रं गच्छेति । किमर्थं तव संस्थानमिति ? तत्राह - वचांसि- वाक्यानि मिश्रा- मिश्राणि उक्ति-प्रत्युक्तिरूपाणि नु- क्षिप्रं अथ वा कृणवावहै- करवामहै इति ।

अन्यो मन्त्र: -

पुरूरव: पुनरस्तं परेहि दुरापना वात इवाहमस्मि ।

(ऋ० सं० १०-९५-२) इति । मन्त्रार्थ: - तं स्वकामुकं राजानं तिरस्कुर्वन्ती ऊर्वशी प्रत्युवाच - हे पुरूरव: । त्वं पुन: मत्सकाशात् अस्तं- स्वगृहं परेहि- परागच्छ । मय्यभिलाषं मा कार्षी: इति भाव: । अथ स्वस्याग्रहत्वमपि आह- ऊर्वशी - अहं वात इव- वायुरिव दुरापना- दुष्प्रापा अस्मि इति त्वं दृढं जानीहि । एवमादिमन्त्रवर्णेन स्त्रीविषयासक्ति: प्रभूतानर्थादियिनी इत्युक्तम् ।

एवं तदा तदा विचार्य गृहमेधिभिः स्वकुटुम्बस्य निर्वाहः कर्तव्यो भवति । स्वकुटुम्बनिर्वाहाय धनमपि अर्जनीयमेव । परन्तु तन्न्याय्येनैव मार्गेण कर्तव्यः । ननु इदानीं लोके प्रायः अस्य विपरीतमेव दृश्यत इति चेत्-मैवम् । स्थूलदृष्ट्या क्वचित्स्थलेषु तथा दृश्यमाणे ऽपि सूक्ष्मदृष्ट्या निरीक्ष्यमाणे अन्याय्यं कुर्वद्भिः अन्ते स्वकीया महती दुर्दशा एव संपाद्यत इति । अतः सुखार्थिभिः कथमपि निषिद्धमन्याय्यं कार्यं महद्धनलाभेऽपि न करणीयमिति वेदवाणी उपदिशति -

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ।।

(ऋ० सं० १०-३४-१३) इति । दशममण्डलस्य चतुस्त्रिंशत्तमे सूक्ते त्रयोदशो भवत्ययं मन्त्रः । मन्त्रार्थः -

हे कितव- अनृतान्याय्यप्रिय । सर्वं मयैव द्रव्यं जितमिति यः अन्याय्येनान्यं प्रतिब्रुवाणः कितव इत्युच्यते । अक्षैः- द्यूतसाधनपाशकादिभिः मा दीव्य- द्यूतं मा कुरु । द्यूते नैव बहवो अनर्थाः संभविष्यन्ति हि । एवं ऋगन्तरेणोक्तम् -

दिव्या अंगारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ।

(ऋ० सं० १०-३४-९) इति । मन्त्रार्थः - शीताः- शीतस्पर्शाः सन्तोऽपि इमे दिव्याः- शोभनयुक्ताः अंगाराः- अंगारसदृशाः अक्षाः इरिणे- इन्धनरहिते देशे न्युप्ताः- प्रक्षिप्ताः सन्तः हृदयं- कितवानामन्तःकरणं निर्दहन्ति- पराजयजनितसंतापेन भस्मीकुर्वन्ति इति । एवं सर्वहितैषिणः भगवतो वेदस्याज्ञा सर्वैरपि मनुजैः पालनीया, तत्परिपालने सर्वविधः अभ्युदयः सिध्यति, अन्यथा नलयुधिष्ठिरादीनामिव महती दुर्दशैव भविष्यतीति न विस्मरणीयम् । इदमेवेदानीं 'सट्टा' इति नाम्ना गीयते । तस्मात् सर्वानर्थमूलं द्यूतं सद्यः दूरतः परिवर्जनीयमिति ~~अन्यो-मन्त्र~~ अन्यो मन्त्रः द्यूतस्य दुर्दशां प्रदर्शयति -

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ।।

(ऋ० सं० १०-३४-१०) इति । दशमे मण्डले चतुस्त्रिंशत्तमे सूक्ते ऋगियं दशमी ।

मन्त्रार्थः - क्वस्वित्- क्वचित् चरतः- निर्वेदोद्वेगाभ्यां इतस्ततो गच्छतः

कितवस्य- द्यूतादिकारिण: जाया- भार्या हीना- भोजनवस्त्रादिसाधनविहीना तेन परित्यक्ता च सती तप्यते- संतप्तहृदया भवति । एवं पुत्रस्य- कितवस्य संबन्धात् माता- जननी अपि शोकेन दु:खिता भवति । एवमेव तस्य दुष्टस्य संबन्धिन: अन्ये बान्धवाश्च दु:खितमनस: भवन्ति । ऋणा‍ ‍वा- धनादिपराजयात् । ऋणा इत्यत्र छान्दसो दीर्घ: । ऋणावान् कितव: सर्वत: बिभ्यत्- भयमनुभवन् धनं- स्तेयलभ्यं धनं इच्छमान:- कामयमान: अन्येषां- धनिकानां अस्तं- गृहं नक्तं- रात्री उप एति- चौर्यार्थमुपगच्छति । अस्तं पस्त्यमिति गृहनामसु पठ्यते । एवमेवान्यो मन्त्र: -

पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतत् ।

(ऋ० सं० १०-३४-४) इति मन्त्रार्थ: - पिता-माता-भ्रातरादय: एनं- कितवं वयं न जानीम: इत्येवं ब्रुवाणा: एते तं तिरस्कुर्वाणा:- उपेक्षमाना: सन्त: आहु:- अधिकारीनुद्दिश्य-वदन्ति-।--अत-एव-ते-एवं-कित वदन्ति । अत एव ते अधिकारीनुद्दिश्य एवं कितवं रज्ज्वा बध्वा यूयं नयत इति वदन्ति । यत्र कुत्रापि स्थितं तं दुष्टं यथेष्टदेशं कारागृहं प्रापयत नास्माकं तेन सह संबन्धलेशो पि अस्तीति भाव: । तस्मात् अतिनिन्द्यं द्यूतादिकं कर्म कृत्वा अनिन्द्यमात्मानं निन्द्यत्वेन न नेय इति । प्रकृतमनुसराम: - सत्येवं जीवननिर्वाहाय धनलाभाय च किं करणीय-मिति चेत्- उच्यते । कृषिं- भूमिकर्षणाद्यात्मक: अन्नाद्युत्पादनानुकूलो व्यापारविशेषो कृषि: तां इत्- एव कृषस्व- कुरु । अस्यामेव बहवो गुणा: सन्ति । जीवननिर्वाहकस्य साधनस्य यावन्नैर्मल्यं संपाद्यते तावन्न्यूनं स्वान्तमपि निर्मलत्वेन प्रसन्ना भवति । अतस्तां सर्वश्रेष्ठां सर्वाभ्युदयमूलां कृषिमेव विधेहीति भाव: । कृषे: वर्णनमन्यो मन्त्र: करिष्यति -

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।

(ऋ० सं० १-१६४-३३) इति । मन्त्रार्थ: - नाभिरत्र- नाभिभूतो भौम: रस: अत्र तिष्ठति । ततश्च अन्नं जायते, अन्नाद्रेत: रेतसो मनुष्य: इत्यादि पारंपर्येण जनिता- जनयिता बन्धु:- बन्धिका इयंमही- महती पृथिवी भवति । अस्या: पृथिव्या: रक्षक: अन्तरिक्षं भवति । अत: कृषीवलस्य मम इमावुभौ माता-पितरौ

अभूताम् इत्यर्थ: ।

ननु तथा केवलया म कृष्या प्रभूतस्य धनस्य लाभो न भवति इत्यत आह - वित्ते- कृष्यासंपादिते जीवननिर्वाहयोग्ये स्वल्पेऽपि पापवर्जिते धने रमस्व- प्रीतिं कुरुष्व । तस्य धनस्य बहु मन्यमान:- यत्स्वल्पमपि सन्तोषात् बहुमन्यमान: प्रसन्नचेता: त्वं वस इत्यादेश: । कृषौ माहात्म्यं वदति - तत्र तस्यां कृषौ सत्यां गाव:- धेनव: रक्षिता: भवन्ति । तासां रक्षणादेव सर्वं रक्षितं भवति । एवं तत्र कृषौ जाया- भार्या प्रसन्ना भवति । अत्र जायेत्युपलक्षणम् सर्वे कुटुम्बिन: प्रसन्ना: भवन्तीति । अत्र तत् तदेव धर्मरहस्यं कुटुम्बनिर्वाहसाधनसंयुक्तं सविता- सर्वस्य प्रेरक: अयं सूर्यमण्डले ब्-र्ह दृष्टिगोचर: अर्य:- लोकस्यास्य स्वामी परमेश्वर: मे- मह्यं लोकहितचिन्तकाय मन्त्रदर्शिने विचष्टे- विविधं यथा स्यात्तथा प्रोक्तवान् । लोकानामुपदेशार्थं मह्यमुपदिदेश इति । तस्मादनेन मन्त्रेण परमेश्वरेण निषिद्धत्वेन यत्प्रोक्तानि कर्माणि तानि सर्वथा न कर्तव्यानीति सिध्यति ।

जनानामेव सुपदिश्यानन्तरमपि तान् संबोधयति वेदवाणी - हे जना: सर्वलोकहितोपदेष्टु: मम सदुपदेशमिमं सावधानेन मनसा समाकर्णयत, तदनु विचार्य च स्वहृदि स्थापयत, यत्- युष्मदीया: सर्वे संकल्पा: निश्चयरूपा: प्रयत्ना: व्यवहाराश्च सरला: कापट्यादिदोषरहिता: भावसंशुद्धिसमुपेता: क्रियन्ताम् । एवमेव युष्माकं हृदयानि समानतया विधीयन्ताम्, न तु विषमाणि । एषां खलु विवेकविचाररहितानां हृदयानि वैषयिकं सुखमनुरंजयन्ति, दु:खमनुरुन्धन्ति इत्यादिना असमानानि भवन्ति । ते सुखदु:खे प्रियाप्रिये, लाभालाभे च समानहृदया: भवितव्या: । एते एव विवेकिन: भवन्ति । चोक्तं गीतायाम् -

'सम: शत्रौ च मित्रे च तथा मानापमानयो: ।
शीतोष्णसुखदु:खेषु सम: संगविवर्जित: ।।'

(भग० १२-१८) इति । एवमेतादृशेन समानेन हृदयेन यत्किमपि घोरमपि कर्म कुर्वाणो जन: कथंचन प्रत्यवायभाक् न भवति । श्रूयते च गीतायाम् -

'यस्य नाहंकृतो भाव: बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान् न हन्ति न निबध्यते ।।'

(भग० १८-१७) इति । तस्मात् सर्वैरपि हृदयस्य महद्भूतमो वैषम्यो परित्यक्तव्य: ।

समत्वयोगेनैव सर्वत्र सर्वविधं शोभनं धर्मार्थादिः साहित्यं सुलभतया सिध्यति इति, वेदवाणी-

समानीव आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ।।

(ऋ० सं० १०-१९१-४) इति । दशममण्डलस्य शतोत्तरैकनवतितमे सूक्ते चतुर्थोऽयं मन्त्रः । अयमथर्ववेदे ६-६४-३ इत्यत्र तैत्तिरीयब्राह्मणे २-४-४-५ इत्यत्र च पठितः ।

मन्त्रार्थः - हे लोकवासिनो जनाः वः- युष्माकं आकूतिः- संकल्परूपः अध्यवसायः समानी- कापट्यादिदोषरहिता स्वच्छा एकविधा अस्तु- भवतु । तथा वः- युष्माकं हृदयानि- अन्तःकरणानि समाना- सुखदुःखादिद्वन्द्वेषु समुपस्थितेषु सत्सु हर्षशोकरहितानि समत्वयोगयुक्तानि समानानि भवन्तु । एवं वः- युष्माकं मनः- चित्तं । अत्र प्रत्येकापेक्षया एकवचनमिति मन्तव्यम् । तदपि समानम्- सुशीलत्वेन एकविधमस्तु । कीदृशं तद्भवेदिति ? अत आह - यथा- येन प्रकारेण वः- युष्माकं सुसह- शोभनसाहित्यं असति- संपादितं भवेत् तथा तत्समानं भवत्विति अध्याहारः । असति इति पदं अस्तेर्लुटि 'बहुलं छन्दसि' (पा० सू० ७-३-९७) इति शपः लुगभावेन सिध्यति । एवं चानेन मन्त्रेण सर्वेषां सर्वविधत्वेन समानत्वमभिहितं भवतीति ।

एवं समानभावनया क्रियमाणाभिः शोभनरूपैः निष्कामकर्मभिः चित्तशुद्धिरुदेति । शुद्धे पवित्रे चेतसि सर्वसाधनफलभूता भुक्तिः भगवान् उत्पादयति । यद्यपि चित्तं द्रव्यं जतुवद् स्वभावतः कठोरं अनादिकालतो विषयेष्वासक्तं च अथापि श्रवण-कीर्तनादिभिः चित्तजतुद्रावकैः कर्मभिश्च साधनैः अन्यपदार्थेभ्यः दोषदृष्टिद्वारा वैराग्यमुत्पाद्य परब्रह्मणः प्रेमकर्षोत्पादनं क्रियते । प्रेमकर्षश्च आवर्जनीयतया तत्त्वज्ञानमुत्पाद्य सकलानर्थनिवृत्त्या आत्मसाक्षात्काररूपं मोक्षं संपादयति । यावज्ज्ञानं तावद् संसारस्याविमुक्तिरिति भावः । एवं प्रतिपादयत्ययं मन्त्रः -

पवमानस्य ते वयं पवित्रमभ्युन्दतः । सखित्वमावृणीमहे ।।

(ऋ० सं० ९-६१-४) इति । मन्त्रोऽयं नवममण्डलस्य एकषष्ठितमे सूक्ते चतुर्थः । सामवेदेऽपि ७८७ इत्यत्र पठितः । मन्त्रार्थः -

केवलपरमेश्वरप्रीत्यर्थं कर्तृत्वाभिमानमुत्सृज्य निष्कामभावनया विहितैः कर्मभिः

पवित्रं- मलदोषरहितमस्माकीनामन्तःकरणं अभ्यन्दतः- विषयासक्तिलक्षणं काठिन्यं दूरीकृत्य द्रवीभूतमापादयतः ते- परमेश्वरस्य तव पवमानस्य- नित्यशुद्धबुद्धमुक्तस्वभावस्य सखित्वं- समानस्थानत्वं आवृणीमहे- प्रार्थयामहे। समानस्थानत्वमेव कैवल्यमित्युच्यते। तदु ब्रह्मनिर्वाणापरपर्यायं कैवल्यमिति ब्रह्मवादिनः अभिरोचयन्ते। तथा श्रुतिस्मृतयः -

'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३-२-६)

'ब्रह्मैव सन् ब्रह्माप्येति' (बृ० उ० ४-४-७)

'स एतदभवत्' (बृ० उ० १-८-१०)

'ब्रह्म निर्वाणमृच्छति' (भग० २-७२)

'लभन्ते ब्रह्मनिर्वाणम्' (भग० ५-२५)

इत्यादयो भवन्ति। अन्यो मन्त्रः -

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव॥

(ऋ० सं० १-९४-१३) इति। मन्त्रस्यार्थः -

हे अग्ने- सत्यानन्दनिधे परमात्मन् त्वं देवानां- इन्द्रादीनां देवः असि- प्रकाशकोऽसि। त्वमेक एव महान् देवः, अनेकेषां देवानामुत्पादकोऽसि इति यावत्। एवंरूपो त्वं अद्भुतः- कृपाकटाक्षमात्रतः सकलेष्टसंपादकत्वेनाश्चर्यकरः महान् मित्रः- सखा असि। तथात्वं अध्वरे- समस्ताभ्युदयनिःश्रेयसावहे यज्ञे वर्तमानः त्वं चारु- शोभनः सन् सब वसूनां- इष्टफलानां मध्ये वसुः- परमेष्टकः परमानन्दनिधिरसि। अत एव सप्रथस्तमे- सर्वतः प्रथुतमे व्यापके अपरिच्छिन्ने तव- स्व त्वस्वरूपभूते शर्मन्- शर्मणि परमेष्टितमे मोदे स्याम- वयं सर्वदा वर्तमाना भवेम। तव सख्ये- तादृशे सखित्वे वयं मा रिषाम- न हिंसिता भवाम इति। श्रवणादीनामभ्यासः कृतेऽपि आत्मज्ञाने अनधिकारिणो न भवाम इति। 'रिष हिंसायाम्' इति हि स्मरणम्। अन्यो मन्त्रः -

इन्द्रस्य सख्यमृभवः समानशुः' (ऋ० सं० ३-६०-३)

इति। मन्त्रार्थः - ऋभवः। ऋतेन- सत्येन ज्ञानेन ये भान्ति- दीप्यन्ते, ते

ऋभव:- तत्वज्ञानपरायणा: योगिन इति । इन्द्रस्य- सर्वात्मन: परब्रह्मण: सख्यं- समानख्यानस्वरूपं मोक्षं समानशु:- सम्यक् प्राप्नुवन् इति । तथा च श्रुति:-

'निरंजनं परमं साम्यमुपैति दिव्यम्'

(मुण्ड० ३-३) इति । स्मृतिरपि -

'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।'

(भग० ८-१६) इति । अपरो मन्त्र: -

वामं नो अस्त्वर्यमन् वामं वरुण शंस्यम् । वामं ह्यावृणीमहे ।।

(ऋ० सं० ८-८३-४) इति । अष्टमे मण्डले त्र्यशीतितमे सूक्ते चतुर्थोऽयं मन्त्र: ।

मन्त्रार्थ: - हे अर्यमन्, हे वरुण- तद्रूप भगवन् इति । वामं- वमनीयम् । संभजनीयं सत्यं शिवं सुन्दरं एवमादिरूपं तव सखित्वं न:-अस्माकं अस्तु- भवतु । तत् एतादृशं भवति - शंस्यं- सर्वैरपि प्रशंसनीयं तदेव वामं वयं हि- निश्चयेन त्वामेवोपसन्ना: सन्त: आवृणीमहे- पुन: पुन: कामयामहे इति ।

एवंरूपब्रह्मण: कीर्तनादिना सम्यग्ज्ञानं च भवति । तथा हि - संकीर्तयितार: जना: सर्वसन्तापविनिर्मुक्ता: सन्त: किमपि आत्यन्तिकमनिर्वाच्यं सुखमनुभवन्ति । एवमस्याम् ऋचि स्मर्यते -

अग्निं विश्वा अभिपृक्ष: सचन्ते समुद्रं न स्रवत: सप्त यह्वी: ।

(ऋ० सं० १-७१-७) इति । मन्त्रार्थ: - विश्वा:- सर्वा: पृक्ष: पृक्ष इति अन्ननाम । अन्नमयं मन: तद्वृत्तय इति । तथा च मनस: वृत्तिवृत्तिमतोरभेदात् अत्र पृक्ष इति पदेन मनोवृत्तय: स्वीक्रियन्त इति । 'पृची संपर्के' इत्यस्मात् औणादिक: कर्मणि क्विप् धातो: सुट् आगमत्वात् पृक्ष इति । अग्निं- अंगनादिदिव्यगुणकर्मगुण युक्तं परमेश्वरं अभिसचन्ते- आभिमुख्येनसेवन्ते तदेकाकारा: भवन्ति । उक्तार्थे दृष्टान्त: - स्रवन्त:- स्रवन्त्य: गंगाद्या: सप्त- सप्तसंख्याका: एता: सप्त 'गंगे च यमुने' इत्यस्मिन्नस्याम् ऋचि प्रसिद्धा: भवन्ति । एता: नद्य: यह्वी:- महत्य: समुद्रं- सागरमभिगच्छन्ति यथा तद्वदत्रापि । मन्त्रे वर्तमान: नकार: इवार्थको भवति । एवमेव सर्वैरपि स्वजीवनं पावनं सफलं च कर्तुं प्रयत्नीयमिति वेदवाणीयं सर्वानादिशति -

तमु स्तोतार: पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।

आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ।।

(ऋ० सं० १-१५६-३) इति । प्रथममण्डलस्य शतोत्तरषट्पंचाशत्तमे सूक्ते ऋगियं मंत्रे तृतीया । तैत्तिरीयब्राह्मणेऽपि २-४-३-६ इत्यत्र पठिता । मन्त्रार्थः -

हे स्तोतारः- संकीर्तयितारः तमु- तमेव सर्वकारणत्वेन प्रसिद्धं विश्वाधिनाथं श्रीमन्नारायणं कीदृशं विष्णुम् ? पूर्व्यं- अनादिसंसिद्धं पुराणपुरुषमिति यावत् । पुनः कीदृशम् ? ऋतस्य- यज्ञस्य गर्भं- यज्ञानुष्ठानेन वांछनीयं फलभूतं विष्णुं यथा- गुरूपसदनश्रद्धातत्परत्वादिना येन प्रकारेण यूयं विद- जानीथ । तथा तं साक्षात्कृत्य जनुषा पिपर्तन- जन्मसमाप्तिं कुरुत इति । प्रत्यगात्मनः विष्णोः साक्षात्कारेण पुनर्जन्मसमाप्त्यात्मको मोक्षः सिध्यतीति भावः । किं च अस्य- महानुभावस्य व्यापकरूपस्य विष्णोः । आस्य इत्यत्र छान्दसो दीर्घः । नामचित्- सर्वैः नमनीयं सार्वात्म्यप्रतिपादकं 'शिवविष्णु' इत्यादिकं नाम, जानन्तः- तत् सकलपुरुषार्थप्रदमिति अधिगच्छन्तः यूयं आ- समन्तात् सर्वतोभावेन विवक्तन- विशेषेण ब्रूत निरन्तरं संकीर्तयत इति । एवमुपदिष्टस्य तस्य विष्णोः साक्षात्काराय अखण्डाकाराशिचत्तवृत्तिं विधातुं प्रतिजानते - हे विष्णो ! सर्वात्मदेव महः- महतः विभोः ते- तव सुमतिं- त्वदेकाकारां सुष्टु- शोभनां बुद्धिं आ- समन्तात् भजामहे- सेवामहे इति । मनसः एकत्वसंपादनमेव तत्त्वसाक्षात्कारप्रयोजकं निदिध्यासनमिति विद्वद्भिः परिकीर्त्यते । एवं चानेन मन्त्रेण मनस एकीकरणरूपं निदिध्यासनं ततः चित्तशुद्धिद्वारा आत्मप्राप्तिः इत्युक्तम् ।

एवं श्रवणादिसाधनैः प्राप्यरूपो स ब्रह्म वस्तुतः सर्वात्मा प्रत्यक् चेतनः सन् एकरूपोऽपि मायया कल्पितैर्देहाद्युपाधिभिः अनेकरूप इव विभाव्यमानः, उपाध्यावृतनिजस्वरूपः विविधसुखदुःखसाक्षाकारवृत्तिभाग्भवति । तस्मात् विपश्चिद्भिः आत्मज्ञानेन अज्ञानाद्युपाध्यावरणं दूरीकृत्य तद्विशुद्धस्वरूपसाक्षात्काराय यत्नः आस्थेय इति बोधयति वेदवाणी -

रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।

इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ।।

(ऋ० सं० ६-४७-१८) इति । षष्ठेमण्डले सप्तचत्वारिंशत्तमे सूक्ते अष्टादशोऽयं मन्त्रः ।

शतपथब्राह्मणे १४-५-५-१९ इत्यत्र बृहदारण्यकोपनिषदि २-५-३९ इत्यत्र च पठितः ।

मन्त्रार्थः - अयमिन्द्रः अपरिच्छिन्नत्वात् सर्वोपाधिसंबन्धात् नानारूपप्राप्तौ प्रभुः परमात्मा 'इदि परमैश्वर्ये' इत्यस्य धातोः अर्थानुगमात् । सः आकाशवत्सर्वगतश्च सदानन्दरूपश्च भवति । स एवं रूपं रूपं- रूप्यते नामादिना इति रूपं, रूपं- शरीरादि, अभ्यासः अवधारणार्थकः । प्रतिरूपः- प्रतिशरीरमवच्छिन्नः सन् विभिन्नप्राणिदेहानुप्रविष्टः प्रतिरूपवान् वायुरिव, अयमपि प्रतिरूपो रूपान्तरं बभूव इति । वास्तविकं सच्चिदानन्दरूपं स्वात्ममायया अवरुध्य असद्रूपः जडदुःखात्मको बभूवेति । अथवा स एव चिद्रूपः परमेश्वरः स्वमायया वियदादिजगदात्मना विवर्तमानः नामरूपे व्याकुर्वाणः उपाधिरूपेः अन्तःकरणेः प्रतिबिम्बरूपः सन् सर्वाणि शरीराणि प्राप्नोतीति । एवमुभयविधवर्णनेन परिणामवादः प्रतिबिम्बवादश्च अत्र प्रतिपादितौ भवतः । एवमन्यो मन्त्रः -

परि॒त्मना॑ विषु॑रूपो जिगासि

(ऋ० सं० ५-१५-४) इति । मन्त्रार्थः - विषुरूपः- नानारूपः सन् त्मना- आत्मना स्वस्वरूपेण परिजिगासि- सर्वाणि भूतानि व्याप्नोसि इति ।।

यो अ॒प्सु च॒न्द्रमा॑ इ॒व सोम॑श्च॒मूषु॑ द॒दृशे॑ ।

(ऋ० सं० ८-८२-८) इति मन्त्रान्तरम् । मन्त्रार्थः - उदकेषु यथा एक एव चन्द्रमाः प्रतिबिम्बतया नानाविधो दृश्यते, तथा चमूषु- चमसपात्रकल्पेषु शरीराद्युपाधिषु एक एव सोमरूपो महेश्वरः अनेकरूप इव ददृशे इति । ननु एवं कस्मै प्रयोजनाय तस्य प्रतिरूपभावनमिति चेत्-उच्यते । तत् एतत् अस्य- परमात्मनः यद्वास्तवं निरुपाधिकं प्रज्ञानघनाख्यं रूपं तस्य प्रतिचक्षणाय- प्रतिनिमितदर्शनाय निमित्तरूपं भवति । सर्वं चराचरं विश्वं तस्य परमकारणस्य व्यापकस्य परमात्मनः कार्यं तेनैव प्रकाश्यं व्याप्यं च भवति । एवं सोपाधिकस्य विशिष्टस्य दर्शनं, निरुपाधिकस्य शुद्धस्यादर्शनं प्रति हेतुभावं प्रपद्यत इति भावः । नन्वेवंरूपस्य तस्य रूपं कथं कस्मै प्रतिख्यातं स्यात् इति चेदुच्यते । स चेन्द्रः- परमेश्वरः एक एव रूप रूपः सन् मायाभिः- मायाशक्तिभिः नामरूपभूतकृतमिथ्याभिमानैः पुरुरूपः- वियदादिभिः बहुविधरूपैः उपेतः सन् ईयते- प्रतीयत इति । तत्पुनः कस्मै प्रयोजनाय बहुरूपमभवत् ?

उच्यते । हि- यस्मात् हरयः- इन्द्रियाणि शब्दादिविषयाहरणशीलत्वात् शता- शतानि दश च सहस्रसंख्याकाः प्राणिभेदबाहुल्यात् असंख्याताः युक्ताः- विषयेषु संयुक्ताः सन्तीति । तथा च तस्यासंख्येयहरिभिः विविधशब्दादिविषयाहरण-लक्षणं प्रयोजनमनुसन्धाय मायया बहुरूपभवनमधिगम्यते । अत एव मायिकेन्द्रिय-विषयोपाधिबाहुल्यादपि प्रत्यगात्मा एकोऽपि बहुरूपो विभाति । तस्मात् प्रपंचस्य नानात्वं सिध्यति । अस्मिन्नेवार्थे मन्त्रान्तरम् -

रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम् ।
त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मन्त्रैरनृतुपा ऋतावा ।।

(ऋ० सं० ३-५३-८) इति । ऋगियं तृतीयमण्डले अष्टपंचाशत्मे सूक्ते अष्टमी भवति ।

मन्त्रार्थः - मघवा- निरतिशयसंपन्नः परमेश्वरो इन्द्रः रूपं रूपं- यद्यदिष्टं रूपमिच्छति तत्तद्रूपं भगवान् गृहीतुं कामयते, तानि सर्वाणि रूपाणि कामयित्वा अप्रतिबन्धेन बोभवीति- पुनः पुनः तत्तद्रूपात्मका भवति । तथा च श्रूयते -

'यद्यद्रूपं कामयते तत्तद्देवता भवति' (नि० १०-१८)

इति । तत्र कारणं तु एतद्भवति- मायाः- वस्तुतः अरूपो पि अहमिदं रूपं भवामि इति संकल्पयित्वा अनेकरूपग्रहणसामर्थ्यरूपाः शक्तीः कृण्वानः- प्रकटीकुर्वन् तन्वं परि स्वाम्- स्वां तनुं नानाविधरूपोपेतां कुर्वाणः यत्- यस्मात् स्वैर्मन्त्रैः- श्रद्धामतिपुरस्सरं क्रियमाणाभिः स्वदिव्यनामभिः आहूतः- सः कथंभूतो सौ ? ऋतावा- सत्यसंकल्पवान् दिवः- ब्रह्मलोकात् परि- अधि मुहूर्तं- मुहूर्तकालं प्रति यत्- यः त्रिः- त्रिवारं आगात्- आगच्छति यज्ञस्थलेषु भक्तगृहेषु चेति भावः । तथा चायमिन्द्रः नैकत्र तिष्ठति, किन्तु बहुषु स्थलेषु बहुप्रकारविग्रहेण संस्थित्वा अतिशीघ्रं स्वलोकादागच्छति स्वाश्रितजनहिताय । आगत्य चासौ अनृतुपाः भवति । अनृतुपाः- न केवलमृतुष्वेव भक्तैः समर्पितं दुग्धादिकं यज्ञे समर्पितं द्रवद्रव्यं च पिबति, किन्तु अनृतुष्वपि सर्वसमयेषु पिबतीति । अत्र परमेशानोपलक्षकम् । अतः पेयं सर्वं पिबति, भक्ष्यादिकमखिलमश्नाति सर्वदा इति भावः । अयं नानादेशवर्तिषु यज्ञादिस्थानेषु एकस्मिन्नेव मुहूर्ते त्रिषु प्रातरादिसवनेष्वपि गन्तुं प्रभवतीति । अन्यो मन्त्रः -

यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ।

(ऋ० सं० १०-५४-२) इति । मन्त्रार्थः -

तन्वा- शरीरेण विग्रहवान् भूत्वा वावृधानः- पुनःपुनः नानारूपैर्वर्धमानः जनेषु- भक्तजनेषु बलानि- आत्मीयानि वीर्याणि सामर्थ्यविशेषान् प्रब्रुवाणः- प्रख्यापयन् हे इन्द्र ! यत् त्वमचर- शिष्टपरिपालनं दुष्टशिक्षणमित्यादीन् कर्तुं अवतारकार्याणि आचरितवानसि इति । एवमनेन मन्त्रेण ब्रह्म एव प्रपंचाकारेण परिणमति, सर्वे जीवाः तस्य प्रतिबिम्बाः इति च निगदितं भवति ।

ब्रह्माभिन्नस्य सर्वस्य प्रपंचस्य मिथ्यात्वात् सर्वः प्रपंचः ब्रह्मणि विलीनोऽस्ति । एवं च वियदादिसृष्टेः प्राक् निरस्तसमस्तप्रपंचायां प्रलयावस्थायामपि स्थितं यद-निर्वाच्यं कारणस्वरूपं तत् स्वरूपं वेदवाणीयं प्रतिपादयति -

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ।।

(ऋ० सं० १०-१२६-१) इति । दशममण्डलस्य शतोत्तर-एकोनत्रिंशत्तमे सूक्ते प्रथमा ऋगियम् । तैत्तिरीयब्राह्मणेऽपि इयं २-८-६-३ इत्यत्र शतपथब्राह्मणे १०-५-३-२ इत्यत्र च आम्नाता । मन्त्रार्थः -

तदानीं- प्रलये वर्तमानं यदस्य वियदादिजगतो मूलकारणं निमित्तो-पादानभूतं तत् न असत्- शशविषाणादिवत् सनरूपाख्यं नासीत् । नह्यसतो निःस्वरूपात् सतो ऽस्य जगतः उत्पत्त्यादिकं संभवति । तथा श्रूयते श्रुतिः -

'कथमसतः सज्जायेत' (छा० उ० ६-२-२)

इति । अतः असतः तदुत्पत्तौ दृष्टान्ताभावात् सत एवोत्पत्तिः अभ्युपगम्यते ।

ननु बीजोपमर्दे जायमानः अंकुरः दृष्टान्तो भवेदिति चेत्-नैवम् । यतः बीजावयवानां तत्संस्थानविशिष्टानां कार्यभूते अंकुरे अनुवर्तमानत्वात् न तेषामुपमर्दः अंकुरोत्पत्तौ कारणीभूतो भवति । यदि अभावलक्षणात् असत एव घटादिकं कार्यमु-त्पाद्येत तदा घटार्थिना मृत्पिण्डादिकं नोपादीयेत । तस्मात् असद्भिन्नमेव तत्कारणमभ्युपगन्तव्यम् । एवं तर्हि तत्किं सत्कारणमासीत् ? इत्यपि प्रतिषेधयति श्रुतिः- नो सदासीदिति । सत्- आत्मवत् पारमार्थिकं कालत्रयाबाध्यं कारणं, नो- नैव आसीदिति । सद्रूपस्य तद्विलक्षणजगत्परिणामित्वासंभवात् । इदमत्र

बोध्यम् - अनिर्वाच्यात् कारणात् समुत्पद्यमानं वियदादि जगदपि अनिर्वाच्यं भवति। न हि अत्यन्तासत: नि:स्वरूपस्य त्रिकालेष्वपि अबाध्यस्वरूपया अवस्थितस्य परस्मात् पारमार्थिकसत: उत्पत्ति: नाशो वा संभवति। अत: सदसद्विलक्षणमनिर्वचनीयमेवोत्पद्यते नश्यति च इत्यवश्यं सर्वैरभ्युपगन्तव्यम्। अत्र सदसत् इति शब्दौ पारमार्थिकापारमार्थिकयो: प्रसिद्धौ भवत:, किन्तु 'यदन्यद्वायोरन्तरिक्षाच्चैतत् सत् वायुरन्तरिक्षं चैत्यसत्' इति श्रुतिप्रमाणानुरोधेन भूतेषु सदसच्छब्दौ प्रसिद्धौ न भवत इति।

ननु 'नो सदिति' पारमार्थिकसत्त्वस्य निषेध: क्रियते चेत्तर्हि आत्मन: अनिर्वाच्यत्वप्रसंग:। यद्यप्युच्येत 'आनीदवातम्' इति अनन्तरमन्त्रेणाग्रे आत्मन: सत्त्वस्य वक्ष्यमाणत्वात् परिशेषात् मायाया एवात्र पारमार्थिकसत्त्वं निषिध्यत इति, तथापि तदानीमिति विशेषणस्य वैयर्थ्यं भवति। सृष्टिव्यवहारदशायामपि तस्या: पारमार्थिकसत्त्वाभावात् इति चेत्-उच्यते। 'नासीद्रजो नो व्योम' इति रजोनिषेधादावेव तदानीमित्यस्य अन्वयाभ्युपगमात् वैयर्थ्यदोषो न प्रसजति। रज:प्रभृतीनां तु सर्वदा अस्तित्वाभाव: न हि भवति, किन्तु तेषां प्रलये एव। वस्तुतस्तु 'नासदासीत्' इत्यस्य सदसद्भिन्नानिर्वचनीयपदार्थबोधकस्यास्य वाक्यस्य 'तम आसीत्' इत्यत्र अर्थपर्यवसानसंभवात् एकवाक्यतार्थमेव नासीदित्यादौ तदानीम् इत्यन्वय: आवश्यक:। अथ व्यावहारिकसतां पृथिव्यादीनां भावानां तदा विद्यमानत्वं प्रतिषेधति- रज इति। तथा च निरुक्तं भवति -

'लोका: रजांस्युच्यन्ते' (नि० ४-१९)

इति। तथा च तदानीं नासीद्रज' इत्यनेन अधस्तना: पातालादय: पृथिव्यन्ता: तदानीं नासन् इत्युच्यते। रज इति एकवचनं तु सामान्यापेक्षं भवति। एवमेव व्योम- अन्तरिक्षं पर:- परस्तात् पर इति सकारान्त: शब्द:। परशब्दात् छान्दस: तासेरर्थे असि इति प्रत्यय:, अन्तरिक्षलोकस्य परस्तात् द्युलोकादिसत्यलोकान्तं वर्तमानानि लोकानि यदपि तदपि नो सदासीदिति। एवं चतुर्दशभुवनगर्भरूपं ब्रह्माण्डं निषिध्य तदावरकत्वेन प्रसिद्धानि वियदादिभूतानि, तेषामवस्थानप्रदेशं तदावरणनिमित्तं च आक्षेपमुखेन क्रमश: निषेधयति- किमावरीव इति। आवृणोतेर्यङ्‌लुगन्ताच्छन्दसि लङि तिपि रूपमावरीव इति। किमावरणीयं- तत्त्वमा-

वरकाणि भूतानि आवृण्वन्तु- आवृणुयुः, आवरणीयाभावात् । तदा आवरकाणि भूतानि नासन्निति भावः । आवृण्वत् ततत्वं सत्यपि कुह- कुत्र देशे स्थित्वा आवृणुयात् । तादृशो आधारभूतो दशोऽपि तदानीं नासीदिति । किं शब्दस्य सप्तम्यर्थे हप्रत्ययः, 'कुति किमि होरि' ति प्रकृतेः कु इत्यादेशः । कस्य भोक्तुः जीवस्य शर्मन्- शर्मणे सुखदुःखसाक्षात्काररूपभोगाय तन्निमित्तभूतायावरकं तत्त्वमावृणुयात् । जीवानामुपभोगार्थों हि सृष्टिः, सत्यां तस्यां हि ब्रह्माण्डस्य भूतैः आवरणं भवति । प्रलयदशायां भोक्तारो जीवाः उपाधिविलयात् प्रविलीनाः सन्तः तदा नासन्निति । तस्मात् कश्चिदपि भोक्ता तदानीं न संभवति, इत्यावरणस्य निमित्तत्वाभावात् तन्न घटत इति । 'सुपां सुलुक्' इति शर्मणः चतुर्थ्या लुक् भवति । एतेन भोग्यप्रपंचवत् भोक्तृप्रपंचोऽपि तदानीं नासीदित्युक्तं भवति । यद्यपि सावरणस्य ब्रह्माण्डस्य निषेधेन तदन्तर्गतं असत्त्वमपि निराकृतं भवति, अथापि श्रुतिषु प्राप्तं सलिलादिदीनां सत्त्वभ्रमं निरस्यति - अंभः किमासीदिति । गहनं- दुष्प्रवेशं गभीरं- दुरवस्थानं ईदृशरूपं अम्भः किमासीत्, तदपि नैवासीत् इत्यर्थः । एवमनया ऋचा आम्नातं भूतभौतिकनिखिलविश्वस्यपरिणाम्युपादानकारणीभूतायाः मायायाः अनिर्वचनीयत्वमधिकृत्य शंकराचार्याः विवेकचूडामणौ इत्थमलिखन् -

'सन्नाप्यसन्नाऽप्युभयात्मिका नो भिन्नाऽप्यभिन्नाऽप्युभयात्मिका नो ।
सांगाऽप्यसांगाऽप्युभयात्मिका नो महाद्भुताऽनिर्वचनीयरूपा ।।'

(विवेक० चू० १११) इति । अस्य तथा च परिदृश्यमानमिदं जगत् मिथ्या इति । वेदान्तिभिः अनिर्वचनीयख्यातिः आश्रियते । एवमन्येऽपि बहवः मन्त्राः अस्मिन् प्रकरणे प्रवेशयितव्याः । अवसितो जगत्तत्त्वविचारः इति शम् ।।

0000000000000000

२ ३ आत्मतत्त्वम्

२३ आत्मतत्वम्

पूर्वस्मिन् जगत्तत्वप्रकरणे जगतः विनाशित्वं, विषयाणां सुखं क्षणिकत्वमित्यादयो बहवो विषयाः प्रतिपादिताः । इदानीं मोक्तुः जीवमधिकृत्य विचार्यते । तथा हि -

अस्मिन् भारतखण्डे जनितानां पुंसां पुरुषार्थः एतावानेव भवति यत् येनकेनाप्युपायेन परमात्मनि एकान्तभक्तिः साधिता स्यात् । सा च भक्तिः आराधनाभ्याससामर्थ्यादेव प्रादुर्भवति । अपि चेन्द्रियसंयमादिनियमेन विवेकविरागपरायणया मेधया च बहिर्वृत्तिकं मनः शनैः शनैः समाधाय मम भगवानेव भगवत एवाहम् इत्यविरतभावनया समाराधितः भगवान् परमस्वामी एक एव सन् सर्वेभ्यः सर्वमभीप्सितं दास्यति इति वेदवाणी भणति ।

आ हि ष्मा सूनवे पिताऽऽपिर्यजत्यापये ।
सखा सख्ये वरेण्यः ।।

(ऋ० सं० १-२६-३) इति । प्रथममण्डलस्य षड्विंशतितमे सूक्ते तृतीया भवतीयम् ऋक् । मन्त्रार्थः :-

पिता- चराचरविश्वोत्पादकः परमेश्वरः, स तु एवम्भूतः वरेण्यः- सर्वश्रेष्ठः, आपिः- बन्धुः, स्नेहलालनपालनादिना मनः बध्नाति यः सः भक्तवत्सल इति । पुनः सः कथम्भूतः ? सखा- समानख्यानात् स्वात्मरूपेण प्रियः, सूनवे-पुत्रस्थानीयाय तदाज्ञाकारिणे, आपये- बन्धवे, प्रेम्णा स्वमनोमन्त्रीबन्धकाय सख्ये- परमप्रियाय, हि- निश्चयेन आ- समन्ततः यजति स्म- सर्वथा तदभीष्टं ददाति इति । यजिरिति दानार्थे । अन्यो मन्त्रः -

त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ।

(ऋ० सं० ६-१-५) इति ।

मन्त्रार्थः -

हे तरणे- संसारस्य त्रिविधदुःखतारक भगवन् त्वं त्राता- भयेभ्यो रक्षिता भूः- भवसि । अत एव त्वं चेत्यः- ज्ञातव्यः । त्वमस्माभिः बोद्धव्यो असि, किमिति ? त्वमस्माकं कोऽसीति । इति विमृश्य च मनुष्याणामस्माकं त्वं सदमित्- सद् एव पिता माता चासि इति सत्य एव इति ।

अपरो मन्त्रः -

पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा ।

(ऋ० सं० ६-३६-४) इति । मन्त्रार्थः -

असमः- अनुपमः सर्वोत्कृष्टः त्वं जनानां- सर्वेषां प्राणिनां पतिः- अधिपतिः बभूव- बभूविथ । तथा विश्वस्य- सर्वस्य भुवनस्य- भूतजातस्य एकः- असाधारणो अद्वितीयः राजा- परमात्मा असि इति । एवमेतैः मन्त्रैः परमात्मा एक एवेति तस्य एकत्वं निरूपितम् ।

एवंरूपः स एक एवात्माविविधनामभिरवगतः सन् विविधदेवतात्मना प्रतिभाति । यस्मादेक एव महान् परमात्मा स्वाश्रयया अनादिमायया अचिन्त्यलीलया कल्पितानि नाना नामानि रूपाण्याकाराणि चापन्नः सन् बहुधा प्रतीयते तस्मात् विविध- नामभिरवगतः सर्वदेवतात्मकः एकैव आत्मा अस्ति । अथ च यथा अनेकाभिधानैः प्रतिपादितमेकं वस्तु नानेकत्वेन जानन्ति लोकाः, यथा च प्राणिनः स्वांगानि शिरःपाण्यादीनि क्वचिदपि परकीयबुद्ध्या न पश्यन्ति तथा तत्त्वदर्शिनो विद्वांसः विश्वात्मनो ब्रह्मणः अनेकनामभिः तस्यानेकत्वं नावगच्छन्ति । एवमात्मनः ऐकात्म्यं प्रतिपादयतीयं वाणी -

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।

(ऋ० सं० १-१६४-४६) इति । प्रथममण्डलस्य शतोत्तरचतुष्षष्टितमे सूक्ते षट्चत्वारिंशो भवत्ययं मन्त्रः । अथर्ववेदे ९-१०-२८ इत्यत्र निरुक्ते च ७-१८ इत्यत्र च पठितः । मन्त्रार्थः -

अखिलेश्वरं परमात्मानममुमिन्द्रं- दिव्यैश्वर्यविशिष्टत्वात् अनेन नाम्ना

आहु:- कथयन्ति विप्रा:- विपश्चितो विद्वांस: । तथा मित्रम् । प्रमीते:- मरणात् मृत्युयुक्तसंसारसागरात् समुद्धर्तृत्वात् एतन्नामकं देवमाहु: । एवं वरुणं- स्मरणादिना सन्तापस्य निवारकत्वात् तन्नाम्ना एनं देवं व्यवहरन्ति । तथा अग्निं- अंगनाग्रणीत्वादिगुणसंयुक्तत्वात् तन्नामकत्वेन भणन्ति । अथो- अपि च अयमेव दिव्य:- दिवि भवत्वात् अलौकिकसंचारितधामा तथा सुपर्ण:- शोभनानि पूर्णानि सच्चिदानन्दादीनि लक्षणानि यस्य स: । एवं गरुत्मान्- गुरुभूत: आत्मा । अथवा गरणात्- प्रलये सर्वस्य स्वस्मिन्नुपसंहृतत्वात् गरुत्मान्- सर्वलयाधारो भगवान् य: भवति सोऽपि अयमेवेति ।

ननु एकस्यैवात्मन: नानात्वं कथमुच्यत इति चेत्-उच्यते । अमुमेव परमेश्वरमेकमेव वस्तुत:, सत्- परमार्थसत्त्वेन सन्तं विप्रा:- विपश्चितो मेधाविन: बहुधा वदन्ति- प्रतिपादयन्ति । एक एव आत्मा इन्द्रादिविविधनामरूप इत्याचक्षते । किं च तमेव वृष्ट्यादिप्रयोजकत्वात् वैद्युताग्निं, स्वर्ग-नरकादिफलप्रदातृत्वात् नियन्तारं यमं, स्वच्छन्दं स्वच्छन्दं ॥ विचरन्तं मातरिश्वानं चेति कथयन्ति । तथा चानेन मन्त्रेण परब्रह्मण: अनन्यत्वेन सार्वात्म्यं तथा एकत्वं चोपपादितं भवति ।

अथ चान्या वेदवाणी -

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो न: प्रचोदयात् ।।

(ऋ० सं० ३-६२-१०) इति । ऋगियं तृतीयमण्डलस्य द्विषष्टितमे सूक्ते दशमी भवति । मन्त्रार्थ: -

य:- सविता देव: न:- अस्माकं धिय:- कर्माणि धर्मादिविषया वा बुद्धी: प्रचोदयात्- प्रेरयेत् । तत्- तस्य सर्वासु श्रुतिषु प्रसिद्धस्य देवस्य- द्योतमानस्य सवितु:- सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टु: परमेश्वरस्यात्मभूतं वरेण्यं- सर्वैरुपास्यतया ज्ञेयतया च सम्भजनीयं भर्ग:- अविद्यातत्कार्ययो: भर्जनाद्: भर्ग: स्वयंज्योति: परब्रह्मात्मकं तेज: धीमहि- सोऽहमिति वयं ध्यायाम: । अथवा - तदिति भर्गो विशेषणम् । सवितुर्देवस्य तत्, तादृशं भर्ग: धीमहि । किं तदिति अपेक्षायामाह - यद्भर्गो धिय: प्रचोदयादिति तद्ध्यायाम इति समन्वय: । अस्मिन्नर्थे य इत्यत्र यत् इति लिंगव्यत्ययो भवति ।

एवं सर्वदेवमयस्य ईश्वरः नः आत्मज्ञानरूपं कल्याणं तनोतु इति अभिधास्यत्ययं मन्त्रः -

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ।।

(ऋ० सं० ५-५१-११) इति । ऋगियं पंचममण्डलस्य एकपंचाशत्मे सूक्ते एकादशी भवति । मन्त्रार्थः -

नः- अस्मभ्यं अश्विना- अश्विनौ देववैद्यौ स्वस्ति- स्वाभिप्रेतमभ्युदय-निःश्रेयसलक्षणं कल्याणं मिमीताम्- कुरुताम् । कर्तृपदं द्विवचनमनुरुध्य वचनव्यत्ययेन मीमातां- कुर्वातामित्यर्थः । भगः- ऐश्वर्यनिधिर्देवः नः स्वस्ति मिमाताम् । तथा देवी अदितिः- अखण्डिता देवशक्तिः अस्माकं कल्याणमभिधीयताम् । अनर्वणः- केनाप्यनुपद्रुतो देवः पूषा- पोषको देवः असुरः- शत्रूणां निरासिता च कल्याणकामिभ्यः नः शं दधातु - समर्पयतु । तथा अस्मभ्यं द्यावापृथिवी एतावपि सुचेतुना- शोभनेन प्रज्ञादानेन स्वस्ति मिमीतामिति । तस्मादनेन मन्त्रेण स एको महानात्मा नः शोभनं विज्ञानं समर्प्य कल्याणं तनुताम्, आत्मज्ञानैतसाक्षात्कारेण अस्मान् कृतकृत्यान् करोतु, यतः स एव सर्वासु देवतासु व्यवस्थित इति ।

एवं विविधदेवादिरूपेण सर्वत्रावस्थितो स ब्रह्मरूपः एक एव सततमस्मान् अभिरक्षतु, यतः ब्रह्मव्यतिरिक्तं देवजातं सर्वं परमार्थतः किंचिदपि न विद्यते । तस्मात् स एक एव शोभायास्माभिः बहुधा प्रार्थनीय इति वेदवाणी उपदिशति -

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ।।

(ऋ० सं०५-५१-१३) इति । मन्त्रोऽयं पंचममण्डलस्यैकपंचाशत्मे सूक्ते त्रयोदशः । मन्त्रार्थः -

विश्वे- सर्वे देवाः नः- अस्मान् अद्य- अस्मिन् समये स्वस्तये भवन्तु- रक्षन्तु । वैश्वानरः- सर्वे एनं नयन्तीति वैश्वानरः वसुः- सर्वस्याच्छादयिता अग्निः देवः, तथा च निरुक्तम् -

'अयमेवाग्निः वैश्वानर इति शाकपाणिः'

(नि० ७-२३) इति । एवम्भूतः नः स्वस्तये स्तु । ऋभवः-ऋतेन भूत्या देवत्वेन

युज्यन्त इति ऋभवः इते देवाः स्वस्तये भवन्तु । रुद्रः- दुःखानां द्रावयिता देवः अंहसः- पापान् स्वस्ति यथास्यात्तथा नः- अस्मान् पातु-रक्षतु इति । एवंचानेन मन्त्रेण अस्माकं रक्षणे एक एव देव इत्युक्तं भवति ।

एवंञ्च सः विश्वस्य प्रसविता चतसृष्वपि दिक्षु अवस्थित इति श्रुत्यादिभिः विभाव्यते । यत्र यत्र वयं दृष्टिः निपातयामः तत्र तत्र स एव सर्वसाक्षी परमात्मा समुपलभ्यते । तथा च साम्प्रदायिकानां श्लोकः -

प्राच्यां दिशायां दिशि पश्चिमायां दिश्युत्तरस्यां दिशि दक्षिणायाम् ।
ऊर्ध्वं च ह्यधस्ताच्च तथैव तिर्यक् अन्तर्बहिस्त्वं विभुरेक एव ।।

इति । एवं सर्वत्र अन्तर्बहिश्च वर्तमानस्य तदनुभवेन सर्वात्मना सर्वाश्चित्तवृत्तयः निर्मलीभवन्ति । निर्मलासु तासु तस्य विमलानन्दः सुतरां प्रकटीभवति । एवं प्रत्यग्रूपस्य परमात्मनः आत्मेति उपासनया समस्तमभीष्टं सिध्यतीति विज्ञापयतीयं वेदवाणी -

सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ।।

(ऋ० सं० १०-३६-१४) इति । दशममण्डलस्य षट्त्रिंशत्तमे सूक्ते चतुर्दशो भवत्ययं मन्त्रः । मन्त्रार्थः -

पश्चातात्- पश्चिमतः अस्यां दिशि स्थितः सविता- विश्वाधिष्ठाता जगत्स्रष्टा परमेश्वरः पुरस्तात्- पूर्वस्यां दिशि स्थितः सविता उत्तरात्तात्- उत्तरस्यां दिशि स्थितः सः अधरात्तात्-दक्षिणतः दक्षिणस्यां दिशि वर्तमानः सविता नः- अस्माकं सर्वासु दिक्षु पश्यतां सर्वतातिं- सर्वमभिलषितं, अभिलषितं तु ऐहिकं धनादिकं आमुष्मिकं स्वर्गादिकं पारमार्थिकं निःश्रेयसमित्यादि भवति । एवं सः अस्माकं समस्तमभीष्टं सुवतु । सुवतु सुवतीति समर्पयतीति । अपि च स एव सविता नः- अस्मभ्यं दीर्घं- बहुकालीनं आयुः- जीवनं रासताम्- । रासते-ददातीत्यर्थः । एवं प्रार्थनामन्त्रेणापि दयालुः सः परमात्मा उपासकानामपेक्षितं सर्वं वितीर्य तेषां योगक्षेमं च निर्वहति । तथा चोक्तं भगवता गीतायाम् -

'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।'

(भग० ९-२२) इति । मन्त्रेऽस्मिन् अनेकसवितृपदग्रहणमत्यन्तमादरार्थम् । तस्या-

नुसन्धान पौन:पुण्येन कुर्वन्त्विति ।

(एवं-निरूपितस्य-तस्य-परमात्मन:) एवं निरूपिते ब्रह्मणि अब्रह्मत्वादीम-ध्यारोपनिवृत्ति: सर्वैरवश्यं करणीया भवति । सर्वभूतेष्वात्मा एक:, तस्मिन् आत्मनि सर्वभूतानां भाव इति हि तत्वम् । अत एव 'पुरुष एवेदं सर्वम्' ऋ० सं० १०-९२-२ इति हि किल निश्चितो वेदार्थ: । तस्मात् यत्साक्षादपरोक्षं पंचकोशविलक्षणं सर्वान्तरमबाह्यमशनायाद्यतीतममृतमभयं पूर्णं ब्रह्मास्ति, तदेवाहमस्मि नान्य: संसारी इति विज्ञानात् अब्रह्मत्वस्याध्यारोपितनिवृत्त्या तत्कार्यस्य असत्त्वस्या-पगमाच्च तत्वसाक्षात्कारवान् भवति । तदा स: प्रत्यगात्मन: ऐकात्म्यं सर्वभूतेषु पश्यति, तस्मिन् ब्रह्मणि समाहितस्सन् सर्वदा सर्वरूपेणावस्थितं तं पश्यति । दृष्टेप्यात्मनि द्वैतं सर्वं दृष्टं भवति यथा रज्जुस्वरूपे दृष्टे तत्र अध्यस्तानां सर्पस्रग्दण्डा-दीनां स्वरूपं दृष्टं भवति + तद्वत् । अद्वैतात्मसत्तातिरिक्ताया: द्वैतसत्ताया: अभावादिति । तथा च श्रुतय: -

'विश्वं नारायणं देवम्' (नारा० उ० ४-१)

'इदं सर्वं यदयमात्मा' (बृ० ४-५-७)

'नेह नानास्ति किंचन' (कठ० २-४-११)

'न तु द्वितीयमस्ति' (बृ० ४-३-२८)

'नासदासी न्नो सदासीत्' (ऋ० सं० १०-१२९-१)

इत्यादय: भवन्ति । अत एव गर्भे एव सन्वामदेव: ब्रह्मविद्याया: ब्रह्मभावसर्वापचि-लक्षणमिवाप्त + इत्याख्यायिकया ब्रह्मण: सर्वात्म्यस्वानुभवं प्रतिपादयत: इमे वेदवाण्यौ -

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्र: ।
अहं कुत्समार्जुनेयं न्यृंजेऽहं कविरुशना पश्यतामा ।।

(ऋ०-सं० इति

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय ।
अहमपो अनयं वावशाना: मम देवासो अनु केतमायन् ।।

(ऋ० सं० ४-२६-१,२) इति च । चतुर्थमण्डलस्य षड्विंशतितमे सूक्ते इमौ मन्त्रौ प्रथमद्वितीयौ भवत: । मन्त्रार्थ: -

अहं- वामदेव: मनु:- सर्वस्य लोकस्य मन्ता शासक: प्रजापति: अभवं- अस्मि । अहमेव सूर्यश्च- सर्वस्य प्रेरक: सविता देवोऽस्मि । विप्र:- मेधावी कक्षीवान्- दीर्घतमस: ऋषे: पुत्र: एतत्संज्ञक: अतिप्रसिद्ध: ऋषिरपि अहमेव भवामि । आर्जुनेयं- अर्जुन्या मातु: पुत्रं कुत्सं- प्रख्यातमेतन्नामकमृषिं अहमेव न्यृञ्जे- नितरां प्रसाधयामि । ज्ञानशक्तिं प्रदाय सुयोग्यतया साधित: कुत्सोऽपि अहमेवेति । कवि:- क्रान्तदर्शी सर्वज्ञ: उशना- एतदाख्य: ऋषि: अहमेवास्मि । उक्तमिदमुपलक्षणं भवति । अत: परमार्थदृष्ट्या कृत्स्नमपि अहमेवास्मीति भाव: । हे जना: मा- मां सर्वात्मानं ज्ञानदृष्ट्या पश्यत । यूयमपि एवमेव स्वस्वरूपमनुभवतेति । अत्रायं भाव: - पूर्वमहमज्ञानदशायां संसारसागरे दु:खराशिमन्वभवम्, इदानीमात्मज्ञानस्य प्रादुर्भावात् अहमद्वैत: सर्वात्मा सन् सदा सर्वत्र स्थितोऽस्मि इति यूयमपि ममाश्चर्यरूपं पश्यतेति ।

मन्त्रान्तरस्यार्थ: - अहं- वामदेव: आर्याय- उदारचरिताय विश्वमान्यादिमर्यादाय मनवे भूमिं- कृत्स्नां पृथिवीं शासितुमिति शेष: । अददां- दत्तवानस्मि । मदुद्देशेन हविरादिकं दत्तवते मर्त्याय- मरणधर्मकाय मनुष्याय वृष्टिं- सस्याभिवृद्ध्यर्थं वृष्टिलक्षणमुदकं अहमेव अददाम् । किं चाहं वावशाना:- शब्दायमाना: गर्जनं कुर्वतो: अप:- उदकानि अनयम्- सर्वमपि प्रदेशं प्लावयितुं अभ्रादिना अगमयम् । देवास:- वह्न्यादय: सर्वे देवा: मम केतं- आज्ञारूपं संकल्पं अनु- आयन्- अनुयन्ति । मदीयामाज्ञां शिरसि निधाय तदनुसारेणैव सर्वं कार्यं साधयन्ति इति भाव: । इदमत्रावधेयम् -

आत्मन: अन्यद्वस्तु भ्रान्त्या प्रतीयते, वस्तुत: आत्मैवास्ति । आत्मन: अज्ञानात् सर्वमात्मन: अन्यदिव भाति । आत्मज्ञानात् तत्त्वत: आत्मैव तद्वद्व्यवस्थितं भवति । तथा च विदुष: सम्यग्ज्ञानेन निजं परमार्थतत्त्वं ज्ञातं भवति । मिथ्यादृष्टं सर्वं परिच्छिन्नरूपं च बाधितं भवति । तथा च व्यासेन सूत्रितं भवति -

'शास्त्रदृष्ट्या तूपदेशो वामदेववत्'

(ब्र० सू० १-१-३०) इति । ननु अत्र अनेन सूत्रेण वामदेवजीवचैतन्यस्य वस्तुत: ब्रह्माभेदेन सूर्यादिभवस्य तत्त्वावबोधनिमित्तकसर्वभावब्रह्मभावपरत्वं बोध्यते । सत्येवं

तर्हि मन्त्रेऽस्मिन् शुद्धचिति अभवम् इत्युत्तमपुरुषप्रयोगः कथं भवतीति चेत्-उच्यते । बाधितानुपपत्त्या अहंत्वप्रकारस्य शरीरीभूतबोधस्य पूर्वं भूतत्वेन च अखण्डाकारबोधेऽपि एवं प्रयोगस्य संभवात् इति । भवेदप्येवं 'अहं भूमिमददामार्याय' इत्यादि निष्क्रियायां शुद्धचिति कथं संगच्छेत । अतः चिन्मात्रं भूमिदात् इति न भवतीति चेत् अत्र उपहितचितमादाय भूमिदातृत्वादीनामुपपत्तेः । तदुपस्थितिद्वारा अखण्डशुद्धिचिति अवगमात् इति । एतेन वामदेवस्य 'अहं मनुरभवम्' इत्यादि-वाग्व्यवहारस्य अद्वितीयब्रह्मसाक्षात्कारानन्तरभावित्वम्, तत्साक्षात्कारस्य च सकलभेददर्शननिवर्तकत्वात्, भेददर्शननिबन्धनः पूर्वोक्तव्यवहारः कथं सिध्येत् ? (निबन्धनः) इत्यस्य तद्व्याहतत्वात् इत्युक्त्या समाहितं भवति । आत्मसाक्षात्कारेण अज्ञाननिवृत्तौ सत्यामपि प्रारब्धकर्मकृतप्रतिबन्धवशात्, क्षालितलशुनभाण्डानुवृत्त-लशुनवासनावत् देहादिभेदप्रतिभासानुवृत्त्युपादानाविद्यालेशस्यानुवर्तमानत्वात् जीवन्मुक्तस्यापि वामदेवस्य भेददर्शनोपपत्तेः । रज्ज्वादिसाक्षात्कारेण सर्पाद्य-ध्यासस्य समूलस्य निवृत्त्यनन्तरमपि तत्संस्कारवशात् कंचित्कालं भयकम्पाद्यनुवृत्तिवत् ब्रह्मसाक्षात्कारस्य तस्य समूलभेददर्शनसत्यत्वाद्यध्यासनिवर्तकत्वेऽपि भेददर्शनप्रयोजक-विद्यादिसंस्काराानिवर्तकत्वात् तद्वशात् तस्मिन् भेदप्रतिभासः अवतिष्ठत इव, तन्निबन्धनः मन्त्रोक्तव्यवहारः मुमुक्षुहितसाधकः सार्वात्म्यब्रह्मभावावबोधकः उपपद्यत एव इति । तस्मात् ब्रह्मशास्त्रोपनिषदादिना उत्पत्स्यमानसम्यग्ज्ञानेन सर्वमहं, अहं च सर्वम् इति ब्रह्मणः एकता प्रतिपादिता भवतीति ।

अयमेवात्मा श्रुतिषु उद्घोषितः । तथा हि -

'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० उ० १-१-१)

इत्यादि श्रुत्या एक एवात्मा सः पारमार्थिक आसीत्, नान्यत्किंचिदपि द्वितीयं पारमार्थिकं वस्त्वासीत् । तस्य निमित्तोपादानकारणता तु यथा पटं चिकीर्षुः तन्तुवायः पटस्य उपादानभूतान् तन्तून् पश्यति तथा अयमात्माऽपि पुनः सृष्ट्या-रम्भक्षणे जगदुपादानभूतमनाद्यज्ञानं तद्गजीवकृतकर्मबीजसहितं समष्टिकारण-देहात्मकं पश्यति । ततश्च तत एव चित्प्रतिबिम्बितजीवसहितानि व्यष्टिभूता-न्यज्ञानानि जायन्ते । एवं क्रमेण तत्परिणामविशेषभूताः लिंगदेहकाश्च

समुत्पद्यन्ते । ततः स्थूलदेहानामुद्भवः, निमित्तकारणभूतेषु तेषु सूक्ष्मस्थूलदेहेषु आत्मनः तादात्म्याध्यासात् अहमिति भावः समुदितः । एवमविद्याकामकर्मभिः संबद्धाः जीवाः पूर्वमुपात्तं स्थूलदेहं परित्यजन्तः नवीनं नवीनतमं च देहं परिगृह्णन्तः अधोर्ध्वमध्यलोकेषु सततं परिभ्रमन्ति । एवं परिभ्रमतां जीवानां मध्ये देहेन्द्रिया-द्यनात्मभावतादात्म्याध्यासवत्सु असंख्येषु जीवसंघेषु मनुष्यातिरिक्तानामा-त्मज्ञाने श्रेयसि प्रवृत्तेरभावात् मनुष्यत्वमेव तावत् दुर्लभं भवति । सत्यपि मनुष्यत्वे सर्वे जनाः ज्ञानाय न प्रवर्तन्ते, किन्तु सहस्रेषु कश्चिदेव महासुकृती सन् आत्मज्ञाने अधिकारी भवति । तस्मात् आत्मज्ञानसाधनानुष्ठानं दुर्लभतरं भवति । तत्रापि विघ्नप्राचुर्यात् साधनानुष्ठायिनां सर्वेषां ज्ञानं न सिध्यति, अपि तु महापुरुषा-र्थिनः कस्यचिन्महाभागस्य एवात्मज्ञानसाक्षात्कारो भवति । अतः ज्ञानमपि दुर्लभतमं भवति । तस्मादेवोक्तं भगवता श्रीमच्छंकराचार्येण विवेकचूडामणौ -

जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः
मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ।।

(विवेक० श्लो० २)इति । एते आचार्या अपि आशयममुं वेदवाण्या एव प्रत्यपादयन् इति भाति । तथा हि मन्त्रः -

अपाङ् प्राङेति स्वधया गृभीतो मर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्यन्यं चिक्युर्न निचिक्युरन्यम् ।।

(ऋ० सं० १-१६४-३८) इति । प्रथममण्डलस्य शतोत्तरचतुष्षष्टितमसूक्तस्य अष्टत्रिंशत्तमा भवतीयम् ऋक् । इयमेव अथर्ववेदे ९-१०-१६ इत्यत्र, ऐतरेयारण्यके २-८ इत्यत्र, निरुक्ते च १४-२३ इत्यत्र आम्नाता भवति । मन्त्रार्थः -

अमर्त्यः- अविनाशी अयमात्मा मर्त्येन- मरणधर्मणा देहेन सयोनिः- समानयोनिः-स्थानः तत्तादात्म्यापन्न इति, यत्र यत्र परिच्छेदको देहः तत्र तत्र वर्तमान इति भावः । एवंभूतः सन् सः स्वधया- अन्नोपलक्षिततत्तद्भोगेन अथवा मायया गृभीतः- परिगृहीतः । एवमन्नमयादिपंचभिः कोशैः संयुक्तः सः

अपाङ्- अशुक्लं पापं कर्म कृत्वा अधोनरकादिकं गच्छति । तथा प्राङ्-ति । शुक्लं पुण्यं कर्म कृत्वा ऊर्ध्वं स्वर्गलोकादिकं एति- गच्छति इति । परमात्मैवा-विद्यया प्रकृते: गुणत्रयान्वित: आध्यात्मिकाधि शरीरत्रयेण संबद्ध: सन् जीवसंज्ञां लब्ध्वा, तत्रोक्तं नानाविधं कर्ममाचरन् तत्तद्भोगार्थं लोकान्तरेषु परिभ्रमति इति । तथा च श्रुति: -

'गुणान्वयो य: फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता ।

न विश्वरूपस्त्रिगुण: त्रिवर्त्मा प्राणाधिप: संचरति स्वकर्मभि: ।।'

(श्वे० उ० ५-७) इति । एवमात्मन: कष्टप्रदामध्यासमूलां संसारावस्थां प्रदर्श्य तयोरात्मानात्मनो: जडचेतनयोश्च परस्परतादात्म्यमुक्तं भवति मन्त्रस्य द्वितीय-पादेन । तथा हि -

ता- तौ मर्त्यामर्त्यौ, आत्मानात्मानौ अत्यन्तविविक्तावपि । ता इत्यत्र 'सुपां सुलुक्' (व्या० सू० ७-१-३९) इत्यादिना सूत्रेण द्विवचनौकारस्या-कारो भवति । एवमेवोत्तरत्र द्रष्टव्य: । शश्वन्ता- अविद्यया अविभागेन सर्वदा वर्तमानौ, अत एव तौ विषूचीना- नानागतिसंयुक्तौ वियन्ता- तत्तत्कर्मफलो-पभोगाय सर्वत्र लोकान्तरेषु गच्छन्तौ वर्तेते । यद्यप्यत्र असंगस्य व्यापकस्यात्मन: स्वत: गमनादिकं न संभवति, तथापि अनात्मदेहाद्युपाधिसंबन्धात् घटाकाशादाविव तस्मिन् गमनस्योपचार: क्रियते । तथा चान्यत्र श्रूयते श्रुति: -

'ध्यायतीव लेलायतीव' (बृ० उ० ४-३-७)

इति । आत्मा बुद्धौ ध्यायतीव बुद्धौ लेलायतीव इति प्रतीयते, परं तु नायं स्वतो ध्यायति नापि चलतीति भाव: । ~~अत्र द्विप्रकारक:~~ एवमध्यास: उपन्यस्तो भवति ।

अत्र द्विप्रकारका: जना: भवन्ति - विवेकिन: अविवेकिनश्च इति । तत्र विवेकिन: प्रत्यक्षतो दृश्यमानाद्देहादिसंघातात् विवेकेन स्वयं पृथक् भूत्वा स्वस्या-त्मस्वरूपं जानन्ति । अविवेकिनस्तु विवेकविकलास्सन्त: स्वात्मानं देहेन्द्रिया-दिकमेवमित्येव परिगणयन्ति । अत: पुनरपि वेदवाणी विविच्य प्रदर्शयति -

केचन अविवेकिन: पामरा: नरा:, अन्यं- आत्मनोऽन्यं, देहेन्द्रियादि-संघातं भिन्नमात्मानं भूतात्मानमेव निचिक्यु:- नितरामात्मत्वेन जानन्ति ।

अन्यं- अपरं देहाद्व्यतिरिक्तं प्रत्यगात्मानं न निचिक्य:- न जानन्ति । इति । तस्मादनेन मन्त्रेण आत्मानात्मनोर्विवेक: ब्रह्मज्ञानस्य दुर्लभतमत्वमित्यादि प्रतिपादितं भवति ।।

य: एवंरूपं तत्वविज्ञानं प्राप्नोति तस्य किं किं न सिध्यति ? सर्वमपि सिध्यतीति भाव: । न केवलं पुरुष:,पुराणादीनां श्रवणेन स्त्रियोऽपि तत्त्वविज्ञानस्य प्रभावात् समनन्तरजन्मनि पुरुषत्वं प्राप्नुवन्ति । अनया तत्त्वदृष्ट्या एव स्थूलदृष्टिरहिता अन्धा पावनवद्‌दृष्मन्तो भवन्ति । पुत्रा: अपि स्वपित्रपेक्षया पूज्यपितृत्वं लभन्ते । शास्त्रदृष्ट्या स एव पिता चक्षुष्मान् भवितुमर्हति । य: पूर्णं स्वप्रकाशमपरोक्षं विजानाति स एव धन्यो भवति । तस्मात् तत्त्वबुभुत्सुभि: सम्यग्ज्ञानसंपादनार्थम्, आविद्यकसकलानर्थनिवृत्त्यर्थं च प्रशस्यतमं तत्त्वविज्ञानंसंपादनीयमित्यर्थं वेदवाणी वेदवाणी प्रतिपादयति -

स्त्रिय: सतीस्तां उ मे अस्तु पुंस आहु: पश्यदक्षण्वान्न विचेतदन्ध: ।
कविर्य: पुत्र: स ईमा चिकेत यस्ता विजानात् स पितुष्पिता सत् ।।

(ऋ० सं० १-१६४-१६) इति । प्रथममण्डलस्य शतोत्तरचतुष्षष्टितमसूक्तस्य षोडशो भवत्ययं मन्त्र: । अथर्ववेदेऽपि ९-९-१५ इत्यत्र, तैत्तिरीयारण्यके १-११-४ इत्यत्र, निरुक्तेऽपि ५-१ इत्यत्र च पठित: । मन्त्रार्थ: -

'सदेव सौम्येदमग्र आसीत्' (छा० उ० ६-२-१)

इति श्रुतिप्रसिद्धस्य एकस्याद्वितीयस्य ब्रह्मण: ज्ञानात् तस्य लौकिकानि पुंस्त्वस्त्रीत्वादीनि औपाधिककाल्पनिकरूपाणि यानि सन्ति, तानि वस्तुत: तस्मिन् ब्रह्मणि न विद्यन्त इति सूक्ष्मरहस्यविज्ञानं य: कश्चिदासादयति, स एव महापुरुष: पूज्य: इति च वेदितव्य इत्युपक्रमेणाह - इदानीं या: स्त्रिय: सती:- स्त्रीत्वं प्राप्ता इत्याहुर्लौकिका: । ता उ- तानेव मे- मह्यं पुंस:- पुरुषा इति आहु:- प्रतिपादयन्ति तत्त्वज्ञा: । एवं सति कथमन्यस्य अन्यभाव: उच्यते ? एकस्यैव निरस्तसमस्तोपाधिकस्यात्मन: तत्तद्देहावस्थानमात्रेण तत्तद्‌व्यपदेशोपपत्ते: । तथा हि आम्नायते श्रुति: -

'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी'

(श्वे० उ० ४-३) इति । स्त्रीत्वं पुंस्त्वं च वस्तुत: आत्मनि न भवत: । श्रुतौ

एवमाम्नायते -

'नैव स्त्री न पुमानेष: नैव चायं नपुंसक: ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ।।'

(श्वे० उ० ५-१०) इति । एवंरूपमत्यन्तनिगूढमर्थं अक्षिण्वान्- दर्शनवान् ज्ञानदृष्ट्युपेत: कश्चिन्महान् पश्यत्- पश्यति । अन्ध:- ज्ञानदृष्टिरहित: अज्ञानी तत्त्वमम्मुं न विचेतत्- न जानाति । इति । अपिच पुत्र:- वयसा लघु: शिशुरपि य: कवि:- क्रान्तप्रज्ञ: ज्ञानी स्यात् स: ईम्- इममर्थं विचिकेत- ज्ञातवान् भवेत् । एवमुक्तलक्षणस्य तस्य परमात्मन: तानि- स्त्रीत्व-पुंस्त्वादीनि य: विजानात्- औपाधिकानीति जानीयात् स: पितु: पिता सत्- पितु: पिता- ब्रह्म तत् सत् निरुपाधिकब्रह्मेति, एवं ज्ञानवान् - ब्रह्मज्ञानवान् ब्रह्म एव भवतीत्यर्थ: । तथा च मनुना उच्यते -

'ब्राह्मस्य जन्मन: कर्ता स्वधर्मस्य च शासिता ।
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मत: ।।'

(मनु० २-१५०) इति । तस्मादनया ऋचा आत्मज्ञानं नातिसुलभम्, सार्वात्म्यदृष्ट्या एव तत्त्वविज्ञानस्य मननं कर्तव्यमित्युक्तं भवति ।।

ये किल आत्मज्ञानार्थं कृतसंन्यासा: वीतरागद्वेषा: विपश्चित: श्रुतिषु प्रसिद्धं प्रत्यगात्माभिन्नस्य विष्णो: परमं पदम् अपरिच्छिन्नचिदानन्दाखण्डैकरसं सर्वत्र सदा नैरन्तर्येण स्वादयन्ति ते एव धन्या: भवन्ति अस्मिन् लोके । अयमेवाशय: वेदवाण्या उपदिष्ट: -

'त्वां दे॒वासो॑ अ॒मृता॑य॒ कं प॑पु:'

(ऋ० सं० ९-१०६-८) इति। मन्त्रार्थ: -

देवास:- तत्त्वदर्शिनो विद्वांस: त्वां- सर्वत्र समनुगतं परमात्मानं कं- परमानन्दस्वरूपं ब्रह्मस्वरूपं अमृताय- परमप्रयोजनाय मोक्षाय पपु:- सततं पानेन आस्वादयन्तीति । अत्र कमिति पदं ब्रह्मवाचि भवति । तथा च श्रुति: -

'ओम् कं ब्रह्म खं ब्रह्म' (छा० उ० ४-१०-५)

इति । एवं ब्रह्मज्ञानिन: तत्त्वविद एव भुवि मतिमन्त: सन्त: श्रुतिसारविद्वरा:

भवन्ति । एतादृशां ब्रह्मविदां अपरं किंचिदपि अन्वेष्टव्यं ज्ञातव्यं वा कृत्यं नावशिष्यते । एते हि कृतार्थाः जीवन्मुक्ताः सन्तः अन्यानपि आत्मज्ञानोपदेशेन कृतार्थीकुर्वन्ति । ज्ञानिनः संसारसागरं स्वयं तीर्त्वा अन्यानपि तस्मात् उत्तारयन्ति इति वदती वेदवाणी प्रतिपाद्यते -

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ।।

इति,

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत्परमं पदम् ।।

(ऋ० सं० १-२२-२०,२१) इति च । इमे ऋचौ प्रथममण्डलस्य द्वाविंशतितमे सूक्ते विंशति-एकविंशतित्वेन प्रतिपादिते भवतः । इमे सामवेदे १६७२ इत्यत्र शुक्लयजुर्वेदे ६-५ इत्यत्र, अथर्ववेदे ७-२४-७ इत्यत्रकृष्णयजुर्वेदे १-३-६-२ इत्यत्र च प्रतिपादिते वर्तेते । मन्त्रार्थः -

'यद्यपि तद्विष्णोः परमं पदम्' इति मन्त्रः प्रथमाध्याये प्रतिपादितो भवति तथाऽपि अत्र सम्यग्ज्ञानाय प्रतिपादयिष्यत इति । तथा हि - तत्- सम्यग्ज्ञानादिलक्षणं प्रसिद्धं ब्रह्म विष्णोः- व्यापनशीलस्य तस्यैव । अत्र षष्ठ्यर्थस्तु शिलापुत्रकस्य शरीरम्, राहोः शिरः इतिवत् भवति । परमं- अनौपम्यस्वभावं पदं- पद्यते आत्मत्वेन अहं ब्रह्मास्मीति ज्ञानेन इति पदम्, पदनीयं- ज्ञातव्यं प्रत्यगभिन्नं ब्रह्मतत्त्वम् । सदा- कालत्रयेऽपि तस्य स्वरूपस्य नित्यत्वात् । पश्यन्ति- तत्पदं वयं स्म इति + साक्षात्कुर्वन्ति । के ? इति, सूरयः- कृताहं ममेति दौर्जन्यसन्यासाः पण्डिताः पश्यन्तीति । आह च वेदव्यासः भागवते-

'परं पदं वैष्णवमामनन्ति तद् यन्नेति नेतीत्यतदुत्सिसृक्षवः ।'

इति,

'त एतदधिगच्छन्ति विष्णोर्यत्परमं पदम् ।
अहं ममेति दौर्जन्यं न येषां देहगेहजम् ।।'

(श्रीमद्भा० १२-६-३२,३३) इति च । कीदृशाः सन्तः पण्डिताः दिवीव- स्वयंप्रकाशे स्वस्वरूपे वर्तमानाः सन्तः । अत्र इवकारः आधाराधेयभावद्योतको भवति । तत्स्वरूपं कीदृशमिति ? चक्षुः- स्वयंप्रकाशः इति । आततं -

देशकालवस्तुकृतपरिच्छेदशून्यं विस्तृतमिति । यथा दिवि द्योतमानं सूर्यं स्पष्टतरं सर्वे चक्षुषा पश्यन्ति, तथा ज्ञानचक्षुषा अधिकारिणः ब्रह्मतत्त्वं पश्यन्तीति ।

तत्तु ब्रह्मतत्त्वं सद्गुरूपदेशेनैव सिध्यतीति अनन्तरऋचा प्रतिपाद्यते - तत्- उक्तं वैष्णवं पदं विप्रासः- विप्रा इति । छान्दसः असुगागमः । तत्त्वदर्शिनो ब्रह्मनिष्ठाः ब्राह्मणाः विप्राः भवन्ति । एतादृशानामेव ब्रह्मोपदेशे अधिकार इति विप्रेति पदेन सूचितं भवति । ते तु ईदृशाः भवन्ति विपन्यवः- विमन्यव इति । छान्दसो वर्णव्यत्ययः । कामक्रोधादिवियुक्ताः परमहंसपरिव्राजका इति । पदस्यास्य व्युत्पत्तिः - मन्युः- क्रोधः, तदुपलक्षितं कामादिकं, वि- वियुक्तं येभ्यः ते विमन्यव इति । एवं गीतायामपि चोक्तं भगवता -

'कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ।।'

(भग० ५-२६) इत्यत्र । एते विप्राः जागृवांसः- जागरणवन्तः अप्रमादिनः संयमशीला इति । स्मर्यते गीतावचनम् -

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।'

(भग० २-६९) इति । एते किं कुर्वन्तीति ? समिन्धते- सम्यग्दीपयन्ति । स्वात्मानं मुमुक्षून् अन्यान् च प्रकाशयन्ति इति यावत् । कथनविषयं तच्छब्दार्थमेवमन्येषामुपदिशन्ति - विष्णोर्यत्परमं पदमिति । यत्- सर्वेषु वेदेषु प्रसिद्धं व्यापकस्य विष्णोः स्थानमुत्कृष्टमिति । एवमन्यो मन्त्रः -

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ।।

(ऋ० सं० १-१५४-५) इति । मन्त्रो यं प्रथमे मण्डले शतोत्तरचतुष्पंचाशत्तमे सूक्ते पंचमः । मन्त्रार्थः -

अस्य- महतः विष्णोः प्रियं- परमप्रेमास्पदं उत्कृष्टं पदं तत्- सर्वैः ज्ञानिभिः प्राप्यत्वेन प्रसिद्धं पाथः- अन्तरिक्षम् अन्तर्हृदये ईक्षमाणमिति । तथा च निरुक्तं भवति -

'पाथो अन्तरिक्षम्' (नि० ६-७) इति ।

अविनश्वरमद्वैतं ब्रह्मलोकमिति यावत् । मुमुक्षुरहं, अश्याम्- प्राप्नुयामिति । तदेव परमपदं विशिष्यते - यत्र- यस्मिन् पदे स्थिता: देवयव:- देवं स्वप्रकाशरूपं विष्णुमात्मन इच्छन्त: तत्पदं प्राप्ता: नर:- महाभाग्यशालिनो नरा: मदन्ति- निरंकुशां तृप्तिमनुभवन्ति इति । पुनरपि विशेष्यते, स उरुक्रमस्य- सर्वंजगदाक्रममाणस्य विष्णो:- व्यापकस्य सर्वात्मन: तस्य परमे- सर्वोत्कृष्टे जरामरणादिरहिते पदे- स्थाने मध्व:- शाश्वतानन्दस्य उत्स:- निष्यन्द: यत् अखण्डप्रवाह: तत् प्राप्नुयामिति भाव: । अत: ततोऽधिकं स्थानं नास्ति, इयमेव गति: पराकाष्ठा इत्युच्यते । इत्था- इत्थमिति । छान्दसो दीर्घ: । उक्तप्रकारेण स हि- स एव हि बन्धु:- सर्वेषां तत्त्वज्ञानसंपन्नानां बन्धुभूत: परमहितकर: इति । तत्स्थानं प्राप्तवतां अपुनरावृत्ति: श्रुतिस्मृत्यो: श्रूयते -

'न च पुनरावर्तते' (छा० उ० ८-१५-१)

'मामुपेत्य स कौन्तेय पुनर्जन्म न विद्यते' (भग० ८-१६)

इति । एवमन्या अपि द्रष्टव्या: । अन्यो मन्त्र: -

अत्राह तदुरुगायस्य वृष्ण: परमं पदमव भाति भूरि ।

(ऋ० सं० १-१५४-६) इति । मन्त्रार्थ: -

अत्रा- अत्र अस्मिन् हृदये, अत्रा इति छान्दसो दीर्घ: । हि- निश्चयेन उरुगायस्य- बहुभिर्महात्मभि: स्तुत्यस्य, वृष्ण:- कामानां वर्षितु: विष्णो: तादृशं परमं- निरतिशयं पदं- स्वरूपं भूरि- अतिप्रभूतं अवभाति- साक्षादपरोक्षत: स्फुरति । सो हम् इत्यभेदेन प्रकाशत इति भाव: ।

एतदात्मज्ञानमेव संसारसागरोत्तरणस्य हेतुभूतं भवति, आत्मज्ञानाभावे संसारसागरे निमज्जनमेव भवेत् । अत: ब्रह्मस्वरूपा वाग्देवी स्वात्मस्वरूपं बुभुत्सुं संबोधयति - भो कल्याणपथिक सखे ! मां सर्वकरणवृत्तिसाक्षिणं स्वस्वरूपमात्मानमिति विजानीहि । यत: आत्मज्ञानमेवास्ति संसारव्याधे: सिद्धौषधम् । तत: यत्नेन महता तत्संपाद्य स्वस्य निश्चलरूपं स्वास्थ्यं संपादनीयमिति । तस्मात् सर्वसाक्षिणं कूटस्थं परमात्मानं उपनिषदादिशास्त्ररीत्या विज्ञाय प्राणादिष्वनात्मसु आत्मभाव: परित्यक्तव्य: । य: मां जानाति स: सुखभाग्भवति,

ये न जानन्ति ते तु संसारसागरे सदा दुःखिनः सन्तः तत्रैव निमज्जन्ति इति मन्त्रदेवता उपदिशति -

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ।।

(ऋ०सं० सं० १०-१२५-४) इति । इति । दशममण्डलस्य शतोत्तरपंचविंशतमे सूक्ते इयम् ऋक् चतुर्थी भवति । अथर्ववेदे ऽपीयं ४-३०-४ इति स्थले ऽस्मिन् पठिता ।

मन्त्रार्थः -

यः- कश्चित् भोक्ता अन्नं-अदनीयं व्रीहियवादिकं अत्ति- खादति सः- सर्वो ऽपि प्राणी मया- आत्मचैतन्यज्योतिषा मयैव भोक्तृरूपेण सन्नत्ति, न स्वत इति । एवं चक्षुषा विपश्यति- घटपटादिकं विविधं जगत् साक्षात्करोति, सो ऽपि मयैव प्रेरितः सन् पश्यति इति । तथा चान्यत्र श्रूयते -

त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः ।

(ऋ० सं० १०-१०२-१२) इति । मन्त्रार्थः -

हे इन्द्र ! सर्वात्मन् विश्वस्य- विश्वस्य जगतः- देवदनुजमनुजपशुपक्ष्यादेः चक्षुषः- चक्षुरिन्द्रियस्य चक्षुः त्वमसि इति । स्वतस्तदिन्द्रात्मचैतन्यज्योतिश्शून्यं काष्ठलोष्टसमं जडमेव, अतः ब्रह्मेन्द्रज्ञानशक्त्यधिष्ठितमेव चक्षुः रूपदर्शनं कर्तुं शक्नोति नान्यथा इति भावः ।। एवं यश्च प्राणिति- श्वासोच्छ्वासादिव्यापारं करोति सो ऽपि मयैव- मम प्रत्यगात्मनः चैतन्यशक्तिमादायैव स्वव्यापारं कर्तुं समर्थो भवति इति । एवं यः ईं- इदं उक्तम्- कथितं शब्दस्वरूपं शृणोति- श्रोत्रेन्द्रियेण शब्दश्रवणं करोतीति । सो ऽपि मयैव- ममात्मनः चैतन्यज्योतिषा दीपितेन श्रोत्रेण शब्दं गृहीतुं क्षमो भवति नान्यथेति । ईदृशीं सर्वकार्यकरणसंघातप्रवर्तिकामन्तर्यामिरूपेणावस्थितां नित्यां कूटस्थां मां चितिशक्तिं ये न जानन्ति ते अमन्यवः- मद्विषयकज्ञानरहिताः उपक्षियन्ति- उपक्षीणाः सन्तः संसारसागरे अधोगच्छन्ति । एवमात्मविज्ञानरहितस्याधोभावमर्थात् आत्मज्ञानिनः ब्रह्मभावं चाभिधाय तमधिकरणकारिणमुपदेष्टुं प्रतिजानीते- हे श्रुत- मतिमन् सखे, त्वं श्रुधि- शृणु ममोपदेशमिति । कीदृशः श्रोतव्यो सः

उपदेश:? इति विशिनष्टि- श्रद्धिवं- श्रद्धेयं श्रद्धातव्यमिति, अथवा श्रदिति सत्यनाम, तत्सत्यं धीयते यत्र सा श्रद्धा मिथ्याज्ञानरहिता ऋतम्भरा प्रज्ञा तया लभ्यं श्रद्धिवमिति, ईदृशं ब्रह्मनिष्ठकमुपदेशं, ते- तुभ्यं शिष्यगुणान्विताय श्रद्धालवे योग्याय वदामि- कथयामि इति। 'संघातविलक्षण:तत्साक्षी आत्मैव ब्रह्म पूर्णज्ञानसुखघन: सर्वम्' इति एकत्वविज्ञानेन सर्वशास्त्रसम्मतं स्वानुभवेन तव प्रतिपादयामि इति भाव:। एवंचानेन मन्त्रेण आत्मतत्वप्रतिपादनं, तत्त्वस्य श्रेष्ठता च प्रतिपादितो भवति।

एवमात्मज्ञाने सर्वे ऽपि प्रयन्तं कुर्वन्ति। अखिला: प्राणिन: सुखं मे निरतिशयं भूयात्, दु:खं अणुमात्रमपि माभूत् इति शाशासाना वर्तन्ते। अथा ऽपि ते संसारे ऽस्मिन् उत्साहेन प्रवर्तमाना अपि आत्यन्तिकं दु:खाभावं सुखं न लभन्ते। अतस्ते दु:खमेव अनुभवन्तीति यावत्। तथा च श्रुतिस्मृतय: -

'नाल्पे सुखमस्ति' (छा० उ० ७-२३-१)

'अतो ऽन्य दार्तम्' (बृ० उ० ३-७-२३)

'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्' (भग० ९-३३)

इत्यादिवय: भवन्ति। आभि: श्रुतीभि: परिच्छिन्नस्याल्पस्यास्य संसारस्य परमार्थसद्भिन्नस्य सुखरहितत्वं स्पष्टमेवोक्तं भवति। प्राणिषु केचन -

'यो वै भूमा तत्सुखम्' (छा० उ० ७-२३-१)

'रसो वै स:' (तै० उ० २-७)

इत्यादिश्रुतिभि: प्रतिपादित: सुखस्वभाव: प्रत्यगात्मा एव, (सद्रूप) स: सुखरूप: सुखदाता चेति मत्वा तमेवाविरतं ध्यायन्ति। एवं सुखनिधि: केवलस्य इन्द्ररूप-परमात्मन: सर्वजनकाम्यत्वं वेदवाणी अपि बोधयति -

इन्द्रं परे ऽवरे मध्यमास इन्द्रं यान्तो ऽवसितास इन्द्रम्।

इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते।।

(ऋ० सं० ४-२५-८) इति। ऋगियं चतुर्थमण्डलस्य पंचविंशतितमे सूक्ते अष्टमी भवति। मन्त्रार्थ: -

परे- उत्कृष्टा: सात्विका: सदाचारिण इति। अवरे- निकृष्टा: तामसा:

दुराचाररता:, तथा मध्यमास:- साधारणस्थितिका: राजसा: जना: इन्द्रं - सुखस्वरूपं परमात्मानं हवन्ते- आह्वयन्ति । सर्वेष्वेते साक्षाद्वा परम्परया वा सुखस्वरूपं प्रत्यगात्मानमिन्द्रमेव नित्यमभिलषन्तीति भाव: । एवं यान्त:- कार्यसिध्यर्थं गच्छन्त: कार्यसाधका: इन्द्रं कामयन्ते । सुखस्वभावस्य तस्यैव कार्यसिद्धेर्लक्ष्यत्वात् । तथा लोकवचनमपि - सुखार्था: सर्वभूतानां मता: सर्वा: प्रवृत्तय: इति । आवसितास:- निवृत्तिपरायणा: जना: तमेव कामयन्ते । क्षियन्त:- गृहे वसन्त: गृहस्था: जना: 'क्षि निवासे' इति स्मर्यते, एतेऽपि तमिन्द्रमेवाभिलषन्तीति । उत- अपि च युध्यमाना:- युद्धं कुर्वाणा: योद्धार: विजयार्थमिन्द्रमाह्वयन्ति । सुखस्य विजयोद्देश्यत्वात् । वाजयन्त:- अन्नमिच्छन्तो बुभुक्षव: नर:- नेतारो मनुष्या: इन्द्रमेव हवन्ते अन्नेच्छया अपि सुखेच्छाया: शेषत्वात् । अत्रायं समाधि: - निरुपाधिकं ब्रह्म एव हि लोके साक्षात्प्रियमिति प्रसिद्धम् । तच्च सुखमेव नान्यत् । अत: सर्वेषां तत्रैव इच्छा इति ।

एवंरूप: एक एवान्तरात्मा सर्वैरपि अन्वेष्टव्यो भवति । मुमुक्षुभि: अन्तरात्मा सदाशिव: स्वहृदये एव अन्वेष्टव्य: दृष्टव्यश्च भवति । तद्दर्शनेन हि सर्वेन्द्रियेषु दिव्यरसाद्युपलब्ध्या पूर्णप्रसन्नताया: लाभो भवतीति अनया प्रोच्यते -

अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया ।
गृभ्णन्ति जिह्वया ससम् ।।

(ऋ० सं० ८-७२-३) इति । अष्टमे मण्डले द्विसप्ततितमे सूक्ते मन्त्रो यं तृतीय: । मन्त्रार्थ: - तं प्रसिद्धं रुद्रं, रुत्- संसारदु:खं तस्य साक्षात्कारेण द्रावयितारं देवं, तादृशं परमेश्वरं मुमुक्षव: मनीषया- नियमनशीलया सूक्ष्मया एकाग्र्यया बुद्ध्या जने- ब्रह्मादिस्थावरान्तेषु प्राणिसमुदायेषु । अत्र सामान्यापेक्षमेकवचनम् + जने इति । अन्त:- अन्तर्यामितया अवस्थितं पर:- सर्वोत्कृष्टं तं इच्छन्ति- स्वात्मरूपेण ध्यातुं अन्तर्बहिश्चसर्वत्र पूर्णानन्दस्वरूपेण साक्षादनुभवितुं अभिलषन्ति इति । एते अभीष्टसिध्यनन्तरं तत्त्वदर्शिन: जीवन्मुक्ता: सन्त: जिह्वया+ जिह्वाप्रभावेण उक्तेन सदुपदेशेन ससं- सर्वत्रान्त:स्वपन्तं तम् ।

तथा चोक्तं निरुक्ते - 'ससं स्वपनमित्युच्यते, स्वपनशीलमित्यर्थ: ।' (नि० ५-३) इति । एवंरूपं तं परमात्मानं गृभ्णन्ति- बोधयन्तीति । एवं

सर्वात्मन: तस्य ज्ञानध्यानाभ्यां पक्वभूतेन शुद्धेन मनसा साक्षात्कारो भवतीति ।

अपरा ऋक् -

एक: सुपर्ण: स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ।

तं पाकेन मनसा पश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ।।

(ऋ० सं० १०-११४-४) इति । दशममण्डलस्य चतुर्दशोत्तरशततमे सूक्ते ऋगियं चतुर्थी भवति । मन्त्रार्थ: -

एक:- अद्वितीय: स्वजातीय-विजातीय-स्वगतभेदरहित: स: परमात्मा सुपर्ण:- सुपूर्ण इति शोभनै: सच्चिदानन्दादिलक्षणै: पूर्ण: स: समुद्रं- नामरूपात्मकं द्वैतप्रपंचजातं प्रसिद्धसमुद्रवत् अपारं आविवेश- प्रविष्टवान् । तथा च श्रुति: -

'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै० उ० २-६)

इति । स: चाविश्य इदं विश्वं- सर्वं भुवनं- समस्तभूतजातं विचष्टे- अनुग्राह्यतया पश्यति इति । सर्वप्रकाशकं तं देवं अहमुपासक: पाकेन- ज्ञानध्यानाभ्यां परिपक्वेन मनसा अन्तित:- अन्तिके स्वहृदये एव अपश्यम्- साक्षात्कारेण दृष्टवानस्मि । सत्यज्ञानानन्दनिधिं साक्षात्कृतं तं माता- शोभना बुद्धि: रेळ्हि- आस्वादयति । रेळ्हि इत्यत्र 'लिह आस्वादने' इति धातु: । पुत्रस्थानीयानि सर्वेन्द्रियाणि अपि तमानन्दमास्वादयन्ति । स उ- स एव परमात्मा मातरं- बुद्धिं रेळ्हि- स्वानन्दास्वादयुक्तं करोति इति ।।

एवं साक्षात्कृत: स एक: परमात्मा अन्येभ्य: स्तुवद्भ्य: आत्मभूत: सन् तेषामपि अभ्युदयरूपं नि:श्रेयसपदं ददाति इत्याह वेदवाणी -

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।

होतारं रत्नधातमम् ।।

(ऋ० सं० १-१-१) इति । मन्त्रो यं प्रथममण्डलस्य प्रथमसूक्तस्य प्रथमो भवति । मन्त्रार्थ: -

अग्निं- अग्निनामकं परमात्मदेवं । अस्य परमात्मस्वरूपत्वं श्रुत्यादिषु प्रसिद्धम् । तथा हि -

'अग्निरग्रे प्रथमो देवानां समानो वा चोत्तमो विष्णुरासीत्'

(तै० ब्रा० २-४-३-२) 'प्राणोऽग्नि: परमात्मा' (मैत्रा० उ० ६-६)

(इन्द्र-व-मुत्का) इत्याद्या: श्रुतय: तस्य परमात्मत्वं प्रतिपादयन्ति । अग्रं कर्मफलं प्रापयतीति अग्नि:, अथवा जगत: अग्रं जन्म अंगयतीति अग्नि: इति । अस्यैकत्वं साक्षात् वेदवाणी भणति - 'एकं सद्विप्रा बहुधा वदन्ति' (ऋ० सं० १-१६४-४६) इत्यादिना । सत्यप्येवं सर्वमभिधानमात्मार्थमेवेति सर्वावस्थमात्मानं सर्वाभिधान-व्युत्पत्तित: तं निरुच्य याथात्म्यत: सर्वं परिज्ञाय, सर्वात्मन: तस्य सर्वावस्थं विभूतितद्भाव्यं चानुभवतीति सर्वपदव्युत्पत्ते: प्रयोजनं भवति ।

एवं सत्यत्र आक्षेपो भवति - पृथिवीस्थाने भौतिकोऽग्नि: लोकप्रसिद्धो भवति । मन्त्रे वर्तमानाग्निपदेन तस्याग्ने: ग्रहणं कर्तव्यमिति । सामान्याग्ने-रपि श्रुत्यादिना व्युत्पत्तिबलेन च ग्रहणासंभवादिति चेत्-न । केवलस्य जडरूपस्य तस्याग्ने: उपास्यत्वायोगात् । अत: यथा सालिग्रामावच्छेदेन विष्णुरिति तद्वत् अग्न्यवच्छेदेन तदन्तरवस्थितपरमात्मन: उपासनाभिप्रायेण प्रतिपादितत्वात् भौतिकाग्ने: अग्रहणस्य न विरोध इति । चोक्तं निरुक्ते -

'न मन्येतायमेवाग्निरिति इममेवाग्निं महान्तमात्मानमे-
कमात्मानं बहुधा मेधाविनो वदन्ति ।'

(नि० ७-१६) इति । एवमेवान्या च ऋक् भवति -

अग्निर्देवेषु राजति अग्निर्मर्तेष्वाविशन् ।
अग्निर्नो हव्यवाहनो ऽग्निं धीभि: सपर्यत ।।

(ऋ० सं० ५-२५-४) इति । मन्त्रार्थ: - देवेषु- इन्द्रादिदेवेषु अग्नि:- अग्निनामक: (इन्द्र) ज्योतिस्वरूप: परमात्मा एव राजति- दीप्यति, अयमेव परमात्मा अग्नि: मर्तेषु- मरणधर्मकेषु प्राणिषु आविशन्- प्रविष्टवान् । अयमात्मा नामरूपादिभि: स्वस्वरूपं प्रकाशितवानिति । न:- यज्ञादीनां कुर्वता-मस्माकं अग्निरूपोऽयं हव्यवाहन:- एतन्नामकाग्निर्भवति । तस्मात् अमुमग्निं धीभि:- विवेकिभि: धीरै: सपर्यत- सम्यक् स्वात्मत्वेन परिचरणं कुरुत इति ।

अ अन्या ऋक् -

अग्ने कदा त आनुषक् भुवद्देवस्य चेतनम् ।

(ऋ० सं० ८-७-२) इति । अस्यार्थ: - हे अग्ने- परमात्मन् ! कदा- कस्मिन् काले ते- तव भुवत्- भुविवर्तमानस्य देवस्य- अग्निनामकस्य चेतनं- तन्नाम्ना

प्रतीति: आनुषक्- अनुषक्तं - अवस्थितममुत् इति मन्त्रद्रष्टा ऋषि: विचिकित्सां करोति इति ।। एते ऋचौ चेतनमात्मलक्षणमाध्यात्मिकमग्निं आमनन्ति । देवतानुक्रमण्यां माधवभट्टेनाप्युक्तं भवति -

'यत: सर्वमिदं भूत्वा महानात्मा व्यवस्थित: ।
तस्मादग्न्यादिविषय: वेदस्तत्र प्रतिष्ठित: ।।'

(देवता० ८-१६) इति । तस्मादस्मिन् मन्त्रे प्रतिपाद्यमानोऽयमग्नि: परमात्मा इति । तमग्नि:- परमात्मानं यज्ञस्य- यजनजपस्वाध्यायादिलक्षणस्य विविधयज्ञरूपस्य पुरोहितं- सर्वेषां सदा अग्रत: स्थितं तं ईडे- आत्मत्वेन प्रार्थयामि इति । 'ईड स्तुतौ' इति धातु: । अत्र डकारस्य लकारप्राप्ति: बह्वृचाध्येतृसंप्रदायप्राप्ता भवति । यद्यपि ईड धातो: स्तुत्यर्थत्वं प्रसिद्धं भवति, तथाऽपि धातूनामनेकार्थत्वमिति न्यायमाश्रित्य अत्र प्रार्थना, अध्येषणा, पूजनार्थेषु उचितव्याख्यानकरणेऽपि न कश्चिद्विरोध: । अग्ने: व्यापकत्वं च श्रुत्यादिषु प्रसिद्धम् । तथा हि -

'ओम् तत्सर्वम्, ओम् तत्पुरो नम:' (तै० आ० १०-६८)

इति । तथा च निराकारमप्यग्निं भक्तानुग्रहाय दिव्यसाकारविग्रहवन्तमिष्टदेवमेवंरीत्या प्रार्थये - त्वमिहागच्छ, इह तिष्ठ, प्रसन्नो भव, वरदो भव इत्यादिना संस्कारपूर्वकमागमनात् अतिथिवत् देवं तं प्रवर्तयामि, विविधोपचारैश्च पूजयामि इति उपास्यत्वरूपेण तस्मिन् अग्निनामके परमात्मनि भावना जायत इति । पुरोहितमित्यत्र अन्यो मन्त्र: भवति -

ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जना: ।

(ऋ० सं० १०-१४०-६) इति । मन्त्रार्थ: - ऋतावानं- सत्यवन्तं महिषं- पूज्यं विश्वदर्शतं- सर्वै दर्शनीयं सर्वज्ञं भगवन्तं तमग्निं सुम्नाय- तद्ध्यानजन्यसुखाय तं लब्धुं जना:- भक्तजना: पुर:- पुरस्तात् सम्मुखे दधिरे- धारयन्ति ये ते पुरोहिता: इति ।

~~ऋत्विजमग्निं~~ कीदृशमग्निं ? ऋत्विजम् । ऋ - गतौ इति धातु: उणादौ पठित: । ऋतु:- गति:, गत्यात्र अवगतिरूपं विज्ञानं विवक्षितं भवति ।

तस्मिन्निमित्ते सति य: यजनत्वेन स्वात्मानं ददाति, अभेदेन संगमयति, आवरण-निरासेन ज्ञापयति, अन्ते स्वात्मरूपेण तस्मिन् संगतो भवति च स: ऋत्विगिति उच्यते । ज्ञानगम्यं सर्वात्मरूपं परब्रह्मतत्त्वं तमृत्विजं भावयामीति । पुन: कथंभूतम् ? होतारं- य: जुहोति स: होता भवति, अभेदेन परमात्मा अपि होता भवति । तमिति । 'हु दानादानयो:' इति धातो: होता इति पदं संपन्नं भवति । तथा च स: परमात्मा स्वाराधकेभ्य: भक्तेभ्य: अभ्युदयं नि:श्रेयसं च ददाति । तथा चोच्यते-

'तोयं वा पत्रं वा यद्वा किंचित्समर्पितं भक्त्या ।
तदलं मत्वा देव: नि:श्रेयसमेव निष्क्रयं मनुते ।।'

इति । एवं भूतं तं होतारं चिन्तयामि इति । पुनरपि कीदृशमग्निम् ? रत्नधातमम् । रमणीयानां यज्ञफलरूपाणां धर्मार्थकाममोक्षाणामतिशयेन दातारं (धर---इत्यर्थ:) पोषयितारं तं स्तौमि इति । तस्मादनया ऋचा अन्तर्यामिण: परमात्मन: एकस्य देवाधिदेवस्य स्वरूपं प्रतिपाद्यते । एवं च ऋगियं प्राधान्येन स्तुतिरूपा भवति । नचैवं सति ऋत्विक्-पुरोहितादिशब्दानां लोकप्रसिद्धार्थमुपेक्ष्य व्युत्पत्तिमात्रेणैव ततो विलक्षणार्थत्वं कथमत्र प्रतिपाद्यत इति वाच्यम् । अमुं विषयमधिकृत्य यास्काचार्या: निरुक्ते एवमलिखन् -

'शब्दगतिविभुत्वात् ऋचां विविधार्था: भवन्ति ।'

(नि० ७-२२) इति । तत्रैव निरुक्तटीकाकारा: दुर्गाचार्या अपि एवं प्रत्यपादयन् -

'न हि मन्त्रेष्वर्थस्य इयत्तावधारणमस्ति । महार्था: ह्येते दुष्परिज्ञानाश्च । यथा अश्वारोहवैशेष्यात् अश्व: साधु: साधुतरश्च वहति, एवमेते मन्त्रा: वक्तृवैशेष्यात् साधून् साधुतरान् चार्थान् स्रवन्ति ।'

इति । माधवभट्टोऽपि ऋग्वेदानुक्रमण्यामेवमाह -

'नानाविधैरभिप्रायै: ऋचो दृष्टा: महर्षिभि: ।'

(देवता० १-१६) इति । तस्मात् मन्त्रेषु यावन्तो अर्था: उपपद्येरन् अध्यात्म-अधिदेव-अधियज्ञाश्रया: सर्वे एव ते योज्या: भवन्ति । अत: ऋत्विक्पुरोहितानां शब्दानां अन्यार्थकल्पने नाविरोध इति ।।

एवं सर्वत्र अवस्थित: आत्मा एवेति प्रतिपाद्य सर्वेषां योगक्षेमनिर्वाहक: विविधस्थलेषु प्रतिपाद्यमान: एक एव परमात्मा इन्द्र इति अयं मन्त्र: प्रतिपादयति -

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् ।
इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्र: क्षेमे योगे हव्य इन्द्र: ।।

(ऋ० सं० १०-८९-१०) इति । ऋगियं दशममण्डलस्य एकोननवतितमे सूक्ते दशमी भवति । निरुक्तेऽपीयं ७-२ इत्यत्र आम्नाता भवति । मन्त्रार्थ: -

इन्द्र:- परमेश्वर: दिव:- द्युलोकस्य स्वर्गस्य ईशे- ईष्टे नियामक इति । स एव सर्वेषु जीवेषु अन्त:प्रविश्य शास्ता भवतीति । ईशे इति मन्त्रे सर्वत्र अनुषंग: कर्तव्य: । पृथिव्या:- भूमे: शास्ता इन्द्र इति । अपां- उदकानां, तथा पर्वतानां- भूधराणां, वृधां- वृद्धानां, वीरुधामित्यत्र स्थावराणां शासिता इन्द्र: । मेधिराणां- मेधावतां जंगमानां, इदिति एवकारार्थे । पृथक् पृथक् तत्र तत्र इन्द्र: इति संयोज्य पठनीय: । मन्त्रेऽस्मिन् इन्द्रपदस्य आवृत्ति: आदरार्था भवति । योगे- ऐहिकस्य शरीरयात्रादे: आमुष्मिकस्य स्वर्गस्य च ब्रह्मावाप्तिरूपस्य मोक्षस्य प्रापणे, क्षेमे- प्राप्तस्य ऐहिकामुष्मिकस्य मोक्षस्य रक्षणे च इन्द्ररूप: परमात्मा एव समर्थो भवति । एतादृश: इन्द्र: हव्य:- ह्वातव्य: सर्वै: स्वस्वरूपेण आह्वातव्य इति । एवमन्यो मन्त्र: -

इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्र: पुरू पुरुहूत: ।
महान् महीभि: शचीभि: ।।

(ऋ० सं० ८-१६-७) इति । अष्टमे मण्डले षोडशतमे सूक्ते सप्तमोऽयं भवति मन्त्र: । मन्त्रार्थ: - अयं परमात्मरूप: इन्द्र: ब्रह्मा- परिवृढ: सर्वेभ्यो धिक: सर्वेषामीशानश्च । एवंरूप: इन्द्र: ऋषि:- सर्वस्य शब्दार्थजातस्य द्वैतप्रपंचस्य द्रष्टा । स इन्द्र: पुरू:- स विश्वरूप:, अत एव स: पुरुहूत:- बहुभिराहूतश्च भवति । महीभि:- महतीभि: शचीभि:- प्रशस्तजन्मगुणकर्मभि: महान्- प्रभूत: सर्वाराध्यो भवतीति । मन्त्रान्तरमपि भवति -

तवेमा: प्रजा: दिव्यस्य रेतस: त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वं पवमान ते वशे त्वमिन्द्रो प्रथमो धामधा असि ।।

(ऋ० सं० ९-८६-२८) इति । नवममण्डलस्य षडशीतितमे सूक्ते ऋगियम् अष्टाविंशतितमा भवति । मन्त्रार्थ: -

तव दिव्यस्य- लोकोत्तरस्य रेतस:- सर्वशक्ते: सकाशात् इमा:- स्थावर-जंगमरूपा: प्रजा: सन्ति । अत एव त्वं विश्वस्य- सर्वस्य भुवनस्य- भूतभौतिकजातस्य राजसि- ईश्वरो भवसि । अथाऽपि चेदं विश्वं- विश्वरूपं हे पवमान- शुद्ध-निर्विकार ! ते वशे- त्वदधीनं वर्तते । हे इन्दो- सदा शान्तस्वरूप प्रथम:-मुख्यस्त्वं सर्वोत्तमतम:, धामधा:- धाम्न: स्वयंप्रकाशदीप्ते: धर्ता भवसि इति ।

एवमेक एव चिदात्मा स्वमायागुणैस्तदवस्थाभेदभूतादिभि: अनेक: सन् अनेक-देवादिविशेष: विविधगुणक्रियादिप्रवर्तक: बभूव । परन्तु तत्र न तद्भेद: कदाचित् क्वाप्यस्ति । अत एव श्रुतिर्भगवती स्तोतृणां कल्याणाय विविधदेवादिभावेन वर्तमानमेकं चिदात्मानं स्तौति -

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पति: ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु न: ।।

(ऋ० सं० ५-५१-१२) इति । ऋगियं पंचममण्डलस्य एकपंचाशत्तमे द्वादशतमी भवति । मन्त्रार्थ: - स्वस्तये- क्षेमरूपकल्याणाय वायुं- विशिष्टशक्तिसंपन्नं पवनं देवं उपब्रवामहे - तद्गुणान् चिन्तयाम: । परमात्मभावनां विधाय मनस्समाहितं विदध्म इति । सोमं- सर्वौषधिपोषकं रसात्मकं चन्द्रमसं चिन्तयाम इति । कथम्भूत: सोम:- यो भुवनस्य - सर्वलोकस्य पति:- पालक: तं चिन्तयाम इति । सर्वलोकानां जीवनस्य सोमायत्तत्वात् । तथा सर्वगणं- सर्वदेवगणोपेतं बृहस्पतिं-बृहत: कर्मण: पालयितारं देवं स्वस्तये स्तुतिं कुर्म इति । आदित्यास:-आदित्या: देवमातु: पुत्रा: सर्वे देवा: न:- अस्माकं स्वस्तये- आत्मसाक्षात्काराय भवन्तु इति । एवं चानेन मन्त्रेण स्वयंप्रकाशचैतन्यरूपं सद्ब्रह्म प्रपंचे अन्तर्बहिश्च व्याप्यावतिष्ठते इत्युक्तं भवति ।

प्रपंचात् देहेन्द्रियादिभ्यश्च विलक्षण: आनन्दस्वभाव: सच्चिद्रूप: परमात्मा सर्वसंसारादिविनिर्मुक्त इन्द्र: अहमस्मि इति तन्मयतया अखण्डब्रह्माकारवृत्त्या सततं ब्रह्मण: अनुभवो विधातव्य इति वेदवाणी उपदिशति -

अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवे वतस्थे कदाचन ।
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ।।

(ऋ० सं० १०-४८-५) इति । दशममण्डलस्य अष्टचत्वारिंशत्तमे सूक्ते भवत्ययं मन्त्रः पंचमः । मन्त्रार्थः -

अहमिन्द्रः- क्षेत्रज्ञः प्रत्यगात्मा अस्मीति क्रियापदस्य अध्याहारः कर्तव्यः । देहेन्द्रियादिरूपं सविकारं क्षेत्रं नाहमस्मीति भावः । इन्द्रपदं प्रत्यगात्माभिन्न-ब्रह्मार्थबोधकमिति श्रुतिषु प्रसिद्धम् । तथा च श्रुतयः -

'एष ब्रह्मा एष इन्द्रः' (ऐ० उ० ५-३)

'स ब्रह्मा स शिवः सेन्द्रः' (महाना० उ० ११-१३)

'एष हि खल्वात्मा इन्द्रः' (मै० उ० ६-८)

इत्यादयो द्रष्टव्याः । व्युत्पत्तिरपि- इदमसौ सर्वमकरोत् सोऽयं विश्वस्रष्टा सर्वेश्वरः इन्द्रः इति भवति । इन्द्रस्वरूपोऽहं न इत्- नैव । पराजिग्ये- प्रकृतितत्प्रपंचजालेभ्यः कालत्रये न पराजितो भवामि । छन्दसि कालानियमात् । अतो धनं- पूर्णानन्दात्मकमात्मीयं वित्तमिति । वित्तं द्विविधम् - मानुषं दैवमिति । तत्र भवति मानुषं वित्तं सुवर्णरजतादि । दैवं वित्तं ब्रह्मज्ञानादि । अत्र दैवं वित्तमुच्यते । अपिचाहं मृत्यवे- मारकाय यमाय तस्य सम्मुखे कदाचन नावतस्थे- नोपस्थितो भवामि । अर्थादधिगतेन्द्रस्वरूपः तत्त्वदर्शी सर्वथा मृत्युभाक् न भवतीति भावः । यस्मादेवं तस्मात् सोमं- इन्द्रस्यात्मनः शुद्धं स्वरूपं सुन्वन्तः- साक्षात्कर्तुमभिलषन्तः वसु- ब्रह्मानन्दलक्षणमक्षय्यं धनं मेत्- मामेव इन्द्रभूतं याचत- अन्याः सर्वाः परिहाय मदभिमुखास्सन्तः मन्निष्ठाः भवत इति । हे पूरवः- मनुष्याः मे- ममेन्द्रस्य सख्ये- मित्रतायां न रिषाथन- न विनाशं प्राप्नुथ । इति अवसितो मन्त्रार्थः ।

एवमेव सोमरूपस्य परमात्मनः विषये मन्त्राः भवन्ति । तथा हि -

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताऽग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ।।

(ऋ० सं० ९-९६-५) इति । नवममण्डलस्य षण्णवतितमे सूक्ते पंचमोऽयं भवति मन्त्रः । अयमेव सामवेदे ५२७ इत्यत्र निरुक्ते १४-१२ इत्यत्र च आम्नातः । मन्त्रार्थः-

मतीनां- बुद्धीनां जनिता- उत्पादकः प्रादुर्भावक इति। निपातनाद् णिलोपो भवति। एवं प्रादुर्भूतानां बुद्धीनां मध्ये चैतन्यानन्दरूपेण वर्तमानः सः सोमः ताः- मतीः पवते- पुनाति। स्वकार्यक्षमाः करोतीति भावः। एवं सः सोमः दिवः- अन्तरिक्षस्य पृथिव्याः- भूमेः अग्नेः- भौतिकाग्नेः सूर्यस्य- सूर्यमण्डलमध्यवर्तिनः इन्द्रस्य- सुराधिपस्य विष्णोः- व्यापकशीलस्य देवस्य एवं सर्वेषां देवानां समस्तस्य विश्वस्य च जनिता भवतीति। मन्त्रे जनिता इति शब्दबाहुल्यं स्पष्टमवधारणार्थमिति।

मन्त्रान्तरम् भवति -

एष विश्ववित्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा।

(ऋ० सं० ९-९७-५६) इति। मन्त्रार्थः - एषः सोमः- अयं सोमात्मकः परमात्मा मनीषी सन् विश्ववित्- प्रपंचाधिकारकी भूत्वा विश्वस्य- भुवनस्य सर्वस्य भवनधर्मकस्य चराचरभूतजातस्य मध्ये राजते- प्रकाशते। एवं प्रकाशमानस्सः सच्चित्सुखात्मना पवते- पुनाति सर्वमिति।

अपरा ऋक् -

अयं सयो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः।

अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम्॥

(ऋ० सं० ६-४७-४) इति। षष्ठे मण्डले सप्तचत्वारिंशत्तमे सूक्ते चतुर्थी भवतीयम् ऋक्। मन्त्रार्थः - सोऽयं सोमः- सोऽयं परमात्मा यः पृथिव्याः वरिमाणं- विस्तृतत्वं अकृणोत्- अकरोत्। तथायं सोमः दिवः- द्युलोकस्य वर्ष्माणं- दृढत्वमकृणोत्। स हि सोम एव। अपिचायं सोमः तिसृषु- ओषधिषु अप्सु गोषु च प्रवत्सु- प्रकृष्टासु एतासु पीयूषं- अमृतमयरसं दाधार- अवस्थापयत्। दधार इत्यत्र दकारस्य छान्दसो दीर्घः। एवमेव सः उरुः- विस्तीर्णं अन्तरिक्षमस्तम्भयत् इति। अन्या ऋक् भवति -

त्वमिमा ओषधीस्सोम विश्वास्त्वमपो अजनयस्त्वं गाः।

त्वमा ततन्थोर्व१न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ॥

(ऋ० सं० १-९१-२२) इति। प्रथममण्डलस्य एकनवतितमे सूक्ते मन्त्रोऽयं द्वादशतमः। मन्त्रार्थः - हे सोम- परमात्मन् त्वमेव इमाः ओषधीः- अन्नादयः ओषधिरूपान् भोग्यपदार्थान् ततन्थ- विस्तारं कृतवान्। विश्वाः आपः- सर्वस्य च

जलस्य त्वं विस्तारितवान् । तथा त्वं गा:- दुग्धदातॄन् अजनय इति । एवमेव अन्तरिक्षं त्वमाततन्थ- धारितवानसि । त्वं ज्योतिषा- स्वात्म-ज्योतिप्रभया तम:- अज्ञानं विववर्थ- विनष्टं कृतवानसि इति । एवं च न: अज्ञाननिवारक: सोम: इति सिध्यति ।

अपरो मन्त्र: -

सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिम् । (+योषधिम्)
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ।।

(ऋ० सं० १०-८५-३) इति । दशममण्डलस्य पंचाशीतितमे सूक्ते तृतीयोऽयं मन्त्र: । मन्त्रार्थ: - तं सोमं मन्यते क इति ? पपिवान्- पानकर्ता यत्- यं सोमं ओषधिं- वल्लीरूपं संपिंषन्ति- सामर्थ्यात् याज्ञिका: अभिषवग्रावभिरिति अध्याहार: कर्तव्य: । एवंरूपो न साक्षात्पारमार्थिको भवति । तर्हि कीदृश: सोम: पारमार्थिक: ? उच्यते । सोमं हि तं मन्येत यं ब्रह्माण:- ब्रह्म भवितुकामा: ब्रह्मचर्यादिसाधनसंपन्ना: ब्राह्मणा: विदु- शुद्धात्मस्वरूपत्वेन जानन्ति । तस्य तं । तमर्थे कर्मणि षष्ठी । एवरूपं सोमं तं कश्चन न अश्नाति- भक्षितुं पातुं वा न शक्नोति । एवं च तत्त्वदर्शिन: यं शुद्धात्मस्वरूपं सोमरमिास्वादयन्ति सो यं अखण्डैकरसो भवति, न तु ओषधिलताप्रसूत इति ।

एवं स्वश्रेयस्कामै: जनै: सर्वदा नित्यकर्मावश्यमनुष्ठयं भवति । अकरणे प्रत्यवायप्रसंगात् । जनकादिवत् जीवन्मुक्तेनापि गृहस्थेन स्वाश्रमोचितं देवता-तिथिप्रभृतीनां हविरन्नाद्यर्पणं कर्म निष्कामेन करणीयं भवति । सर्वस्यापि कर्माधिकृतस्य यज्ञदानादिपरिशिष्टान्नाशनं प्रशस्तम् ।शास्त्रेणैव तस्य विहितत्वात् । धर्मज्ञ: य: कोऽपि दैनन्दिनत्वेनावश्यकर्तव्यान् भूतपितृदेवर्षि-मनुष्यसंज्ञकान् पंचमहायज्ञान् कृत्वा परिशिष्टान्नाशी भवति स एव सर्वपापैर्विमुक्तो भूत्वा पापविमोकात् चित्तशुद्धि तया चित्तशुद्ध्या ज्ञानं मोक्षं च विन्दति इति सर्वात्मज्ञाने मध्यमाधिकारिण: अधिकरोति वेदवाणी -

मोघमन्नं विन्दते अप्रचेता: सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ।।

(ऋ० सं० १०-११७-६) इति । अयं मन्त्र: दशममण्डलस्य शतोत्तरसप्तदशतमे षष्ठो

भवति। तैत्तिरीयब्राह्मणे २-८-८-३ इत्यत्र निरुक्ते ७-३ इत्यत्र च पठिता भवति। मन्त्रार्थः -

अप्रचेताः- यज्ञदानादिसत्कार्ये प्रकर्षेण मनो यस्य न भवति सः अप्रकृष्टज्ञानवान् इति। मोघं- व्यर्थमेवान्नं विन्दते- प्राप्नोति। 'विदॢ लाभे' इति तौदादिको धातुः। 'शे मुचादीनाम्' (पा०सू०७-१-५९) इति सूत्रेण नुमः आदेशो भवति इति। उक्तमिदं सत्यं- यथार्थम् इति ब्रवीमि- ऋषिरहं मन्त्रद्रष्टा वच्मि। न केवलं तदन्नं व्यर्थम्, यज्ञादिसत्कार्यविमुखस्य जनस्य स वध इत् - तदन्नं वधोपलक्षणं मृत्युरेव भवति। तच्छब्देनान्नस्यान्नं परामृशतः वधशब्दसामानाधिकरण्यात् पुल्लिंगता भवति। यत्कर्म स एव कर्ता भवतीतिवत्। अथ तत्र वैयर्थ्यं स्पष्टीकरोति यः- पुरुषः अर्यमणं- सर्वान् देवान् अर्यमादीन् अर्यमणमित्युपलक्षणाम्। न पुष्यति- हविरादिप्रदानेन न पोषयति। नो- अपि सखायं- समानख्यानं अभ्यागतसाधुब्राह्मणादिकं मित्रवर्गं च न तोषयति। 'पुष पुष्टौ' इति दैवादिको धातुः। अदानत्वादिना तस्य परलोके अनुपयोगरूपं वैयर्थ्यं ज्ञेयम्। अथ वधहेतुत्वं स्पष्टीकरोति केवलादी- केवलं भुंक्ते न तु ददाति सः। विनियोगशून्यमन्नं भुंजान इति यावत्। अत्र अदेः 'सुप्यजातौ' (पा०सू०३-२-७८) इति सूत्रेण णिनिः। अतः उपधालक्षणा वृद्धिः इति। केवलाघो भवति- केवलं पापवान् भवति। दुःखनिदानमघमेव केवलं तस्य शिष्यते। न किंचित् पुण्यम्। पुण्याभावे तस्य अनिर्मोक्षप्रसंग इति। एवमनया ऋचा नित्यकर्मणः चित्तशुद्धिद्वारा ब्रह्मसाक्षात्कारे अधिकारिणः उक्ताः भवन्तीति।

अन्यो मन्त्रः -

न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः।
इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥

(ऋ० सं० १०-१०७-८) इति दशमे मण्डले सप्तत्युत्तरशततमे सूक्ते मन्त्रोऽयमष्टमः। मन्त्रार्थः - भोजाः- भोजयितारः अन्नदानकर्तारः पुरुषाः इति भावः। न मम्रुः- न म्रियन्ते देवत्वं भजन्त इति। अत एव न्यर्थं- निकृष्टां गतिं न ईयुः- न कदापि ते प्राप्नुवन्ति। तथा ते नरिष्यन्ति- न कैश्चिदपि दुष्टैः हिंसिताः

भवन्ति । अत एव एते भोजाः- सुपात्रेभ्योऽन्नभोजनं कारयितारः न व्यथन्ते- संसारस्य आधिव्याधि॑ध्युपाधिभिः सर्वदा न बाधिताः भवन्ति । ह इति प्रसिद्धार्थकः । एवं लोके अनुभवः - अन्नदानकर्ता सकलानिष्टनिवृत्त्या इह लोके चकास्ति इति । ६- एवमनिष्टनिवृत्तिमभिधाय इष्टसिद्धिः प्रतिपाद्यते, इदं- परिदृश्यमानं विश्वं- सर्वं यद्भुवनं- भवनधर्मकमैहिकमभीष्टादि यद्विशयजात- मस्ति, स्वः- आमुष्मिकः स्वर्गलोकश्चास्ति एतत्सर्वं दक्षिणा- अन्नदानपद- मेतत् कर्तृपदं भवति । एभ्यः- अन्नदानेन भोजयितृभ्यः ददाति- प्रयच्छति इति । एवं भोजयितारं वर्णयन् अभोजयितारं निन्दयति ऋगियम् । अन्नदानाकर्तारः कृपणाः कुत्सिताशयाः सन्तः पुनः पुनः संसारेऽस्मिन् म्रियन्ते जायन्ते च । देवत्वं ब्रह्मज्ञानं च कदाऽपि प्राप्तुं न प्रभवन्तीति एते ऋचौ प्रतिपादयत इति ।

यस्तु स्वमहिमप्रतिष्ठः परमात्मैव स्वयोगमायाशक्त्या कार्यकारणात्मकमिदं सर्वं बभूव, जगदात्मना विववृते च अतस्ततो अन्यत्किंचिदपि नाभूत् नास्ति न भविष्यतीति ब्रह्माभेदभावनया विश्वरूपे परमात्मनि मनो निवेश्य तत्स्वरूपध्याना- नन्दस्वाराज्यदीक्षितो भवति सः कश्चिदन्यो महाभाग इत्युच्यते ।

'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' (ईशा० उ० ७)

इति श्रुत्युदितज्ञानेन सः सर्वमिदमहं च परमात्मैव इति तमेकत्वेन स्वात्मत्वेन च पश्यति । अतः कारणसत्तातिरिक्तकार्यसत्ता मिथ्या इति प्रतिपादयितुं इयं वेदवाणी अवतरति -

एक एवाग्निः बहुधा समिद्धः एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं विभाति एकं वा इदं विबभूव सर्वम् ।।

(ऋ० सं० ८-५८-२) इति । अष्टमे मण्डले(वालखिल्यकाण्डे) अष्टपंचाशत्तमे सूक्ते द्वितीयोऽयं मन्त्रः । मन्त्रार्थः -

अत्र सम्यगवधारणाय यथेति पदमध्याहार्यम् । यथा एक एवाग्निः- दानादिगुणयुक्तः परमात्मा बहुधा- बाडवजाठरवैद्युताद्यनेकप्रकारेण समिद्धः- सम्यग्दीप्त्या प्रतीतो भवतीति । यथा एकः- एकाकी सूर्यः- प्राणिनां सृष्ट्व कर्मसु ईरयिता देवः विश्वं- सर्वं जगत् अनु- अनुप्रविश्य । तस्यानुप्रवेशः श्रुतो-

'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै० उ० २-६)

इत्यत्र प्रसिद्धो भवति। एवं प्रविश्य स: प्रभूत:- अनेकात्मतया प्रादुर्भूतो ऽस्ति इति। तथा चोक्तमन्यस्याम् ऋचि -

'सूर्य आत्मा जगतस्तस्थुषश्च' (ऋ० सं० १-११५-१)

इति। किं च यथा एका- एकाकिन्येव उषा:- रात्रेरवसानसमये काचित् तमोनिवारिका सूर्यस्य प्रसूता रक्तवर्णा दीप्ति: सर्वं- समस्तं इदं- दृश्यमानं रूपजातं वि भाति- विशेषेण दीपयति। उषारूपेण सर्वाणि रूपाणि सर्वत्र प्रतीयन्त इति भाव:। एवं यथा तथा एकं वै- एकमेवाद्वितीयं ब्रह्म इदं- आब्रह्मस्तम्बपर्यन्तं जगत् विबभूव- विशेषेणाभवत् इति। एवं दृष्टान्तानुरोधेन कथनं युक्तमेव भवति। अयं भाव: - यदा अग्न्यादयो देवा: अप्येकाकिन: सन्त: अनेकभवनसमर्था: भवन्ति तदा परं ब्रह्म एकं सदनेकं भवति। यथा वा उपाधिभेदमनुसृत्य एक एव सूर्य: अनेकधा प्रतीयते तथा एकं ब्रह्म मायोपाधिना जगद्रूपेण बहुधा प्रतीयते। च यथा च एकैवोषा स्वभासा सर्वं रूपजातं भासयति तथा एकं ब्रह्म स्वभासा सर्वं प्रकाशयति। एवमेव 'न तत्र सूर्यो भाति' इत्यादिश्रुतिष्वपि श्रूयते। तस्मात् आत्मरूपं ब्रह्म एकमेव भवति। स्वाभिन्नेन प्रपंचं भासयति, जीवाभेदेन च सर्वत्र वर्तते * इति आत्मस्वरूपमनया ऋचा प्रतिपादितं भवति।

एवमन्येऽपि सन्ति बहव: ऋङ्‌मन्त्रा: आत्मतत्त्वावबोधनार्था:। तेषां सर्वेषां प्रतिपादनस्यात्र अशक्यत्वात् तेषु दिङ्‌मात्रेण केचन एव मन्त्रा: विवेचिता: सन्ति। तस्मादवसित: आत्मतत्त्वविचार *-** इति।। इति शम्।।

⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘⁘

२ ४ नौकातन्त्रम्

~~२-४--आत्मतत्त्वम्~~

२ ४ मोक्षतत्त्वम्

पूर्वस्मिन् आत्मतत्त्वप्रकरणे ~~विवक्त~~ आत्मानात्मन: विवेचनं, जगदधिष्ठाता ~~(एकस-)~~ एक एवात्मा, स एव चराचरस्य जीवस्वरूप इत्यादयो विषया: सम्यक् प्रतिपादिता: । इदानीं तस्यात्मन: मोक्षस्वरूपं प्रतिपाद्यते । तथा हि - कामस्य कर्मण: च सृष्टिकारणत्वात् तन्निरोधादेव संसारमोक्षो नाम आत्म-साक्षात्कारो भवतीति प्रतिपादयति वेदवाणी -

> कामस्तदग्रे समवर्तताधि मनसो रेत: प्रथमं यदासीत् ।
> सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ।।

(ऋ० सं० १०-१२९-४) इति । दशममण्डलस्य शतोत्तर-एकोनत्रिंशत्तमे सूक्ते चतुर्थोऽयं भवति मन्त्र: । तैत्तिरीयब्राह्मणे २-४-१-१० इत्यत्र तैत्तिरीयारण्यके १-२३-१ इत्यत्र च प्रतिपादित: । मन्त्रार्थ: -

अग्रे- अस्य विकारजातस्य सृष्टे: प्रागवस्थायां, परमेश्वरस्य मनसि काम:- सिसृक्षा तस्येच्छा, समवर्तत- समपद्यत इति । ईश्वरस्य सिसृक्षा किं ~~(हेतुक)~~ हेतुका ? आह मनस इति । मनस:- अन्त:करणस्य अधि- संबन्धि वासनाशेषेण मायायां विलीनेऽन्त:करणे समवेतं, सामान्यापेक्षमेकवचनम् । एतेनात्मन: गुणाश्रयत्वं प्रत्याख्यातं भवति । तादृशं रेत:- भाविन: प्रपंचस्य बीजभूतं प्रथमं- अतीते कल्पे प्राणिभि: कृतं पापपुण्यादिकं शुभाशुभं कर्म, यत्- यत: कारणात् सृष्टिसमये आसीत्- अभवत् । तत्- तस्माद्धेतो: फलप्रदस्य सर्वसाक्षिण: परमेश्वरस्य मनसि कामरूपा सिसृक्षा अजायत । जातायां तस्यां सृष्टव्यं पर्यालोच्य तत: सर्वं जगत्सृजति । एवमाम्नायते श्रुतौ -

'सोऽकामयत, बहुस्यां प्रजायेयेति, स तपो तप्यत,
स तपस्तप्त्वा, इदं सर्वमसृजत, यदिदं किंच ।'

(तै० उ० २-६) इति । सत:- सत्त्वेनेदानीं प्रतीयमानस्य सर्वस्य जगत: बन्धुं- बन्धकं हेतुभूतं कल्पान्तरे प्राण्यनुष्ठितं कर्मसमूहं कवय:- क्रान्तदर्शिन: अतीतानागतवर्तमानाभिज्ञा: योगिन: हृदि- हृदये निरुद्धया मनीषा- मनीषया बुध्दया 'सुपां सुलुक्' इति तृतीयाया: लुक् । प्रतीष्या- विचार्य अन्येषामपि दृश्यते इति सांप्रतिको दीर्घ: । असति सलिलक्षणे कारणरूपे व्याकृते निरविन्दन्- विविच्य अजानन् इति । अत्रायं भाव: - एतेन जगत: पुनरुत्पत्तौ ईश्वरस्य पर्यालोचनात्मकं तप: कारणम्, तस्य कारणं सिसृक्षात्मक: काम:, तस्य कारणं कल्पान्तरानुष्ठितप्राणिसमुदाय: । तथा च तयो: कामकर्मणोरज्ञानमूलयो: तत्त्वज्ञानेनाज्ञानसंहारद्वारा प्रतिसंहारे सत्येव मोक्षो लभ्यत इति । तथा च कर्तृत्व-कर्मत्वादिकमेव संसारस्य मूलं भवति, अस्य कर्म-कर्तृत्वादे: विच्छेद एव एव मोक्ष इति ।

एवं मुमुक्षूणां मन्दप्रज्ञानां चित्तशुद्धौ उपास्यत्वेन सविशेषज्ञाने निर्विशेषज्ञाने चोपायभूतान् विभूतिविशेषान् संक्षेपत: प्रतिपादयतीयं वेदवाणी -

ब्रह्मा देवानां पदवी: कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोम: पवित्रमत्येति रेभन् ।।

(ऋ० सं० ९-९६-६) इति । अयं मन्त्र: नवममण्डलस्य षण्णवतितमे सूक्ते षष्ठो भवति । सामवेदेऽपि १४४ इत्यत्र तैत्तिरीयसंहितायां ३-४-११-१ इत्यत्र तैत्तिरीयारण्यके १०-१०-१ इत्यत्र निरुक्ते १४-१३ इत्यत्र च आम्नात: । मन्त्रार्थ:-

सोम:- उमया महामायया सह वर्तमानो महेश्वर: सविशेष: परमात्मा देवानां- अग्नीन्द्रादीनां मध्ये ब्रह्मा- सरस्वती सहचर: सर्वदेवनियन्तृत्वशक्ति- विशिष्ट: चतुर्मुख: ब्रह्मा स: सर्वस्य लोकस्य शिक्षकत्वेन अवस्थित: । श्रूयते श्रुति:-

'ब्रह्मा देवानां ------- स ब्रह्मविद्याम् सर्वविद्याप्रतिष्ठाम- थर्वाय ज्येष्ठपुत्राय प्राह ---------- प्राह ।'

(मुण्ड० १-१) इति । अनेन ब्रह्मण: ब्रह्मविद्यासंप्रदायप्रवर्तकत्वमाम्नायत इति ।

एवं कवीनां- क्रान्तप्रज्ञानां पुरुषधौरेयाणां मध्ये पदवी:- पदवाक्यादि-सामर्थ्याभिज्ञ: व्यासादिरूपेणावस्थित: आसीत् । पदव्या: व्युत्पत्तिस्तु एवं भवति - पदं व्याकरणादौ निष्पन्न: साधुशब्दविशेष:, तद्वेत्ति- जानाति । विप्राणां- वैदिकधर्मपथपथिकानां ब्राह्मणानां मध्ये स परमात्मा ऋषि:- वसिष्ठविश्वामित्रपराशरादिरूपेण अवस्थितोऽभूत् । तथा चोक्तं यास्केन -

'ऋषिर्दर्शनात्' (नि० २-१-११)

इति । मृगाणां- चतुष्पदां पशूनां मध्ये महिष:- बलाधिक्येन युक्त: प्राणिरूपेण स्थितोऽभूत् । गृध्राणां- गृध्रोपलक्षितानां पक्षिणां सर्वेषां मध्ये श्येन:- शंसनीय: पक्षिराजा गरुड: आसीत् । एवं वनानां- तरुगुल्मलतादि समूहरूपाणां विस्तृतानां मध्ये तच्छेदनशक्तिसंपन्न: स्वधिति:- परशुरभवत् । तथा च प्रतिपादिता: सर्वे प्येते सादृश्यमुखेन तस्य ब्रह्मण: अखिलविभूतिप्रदर्शपरा: भवन्तीति वेदितव्या: । एवं सकलविभूतिरूप: परमेश्वर: रेभन्- शब्दायमान: तद्विभूतिशब्देरवगम्यमान: सन् पवित्रं- परमपावन: इति । सामान्ये नपुंसकं पुल्लिंगत्वेन विपरिणेयम् । स: अत्येति- सर्वान् सातिशयान् विभूतिविशेष-स्वरूपानतिक्रम्य निरतिशयस्वरूपेण सर्वोपरि वर्तत इति । तस्मात् मोक्षदाता मुक्तिस्वरूपश्च स एव भवति । अत: तस्य ज्ञानेनैव आत्मसाक्षात्काररूपो मोक्ष: सिध्यतीति ।

मुक्ते: कारणभूतस्य निराकारस्य परमात्मन: उपासनं कर्तुं न भवति । अत: तस्य स्वरूपज्ञानाय प्रथमत: साकारेणैव तस्योपासना करणीया । परमार्थतस्तु तस्य निराकारत्वेन निर्विषयत्वेन च आलम्बना न सिध्यति । तथा च श्रुति: -

'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।'

(केन० १-५) इति । सत्येवं किमालम्बना परमेश्वरोपासना कार्या ? इति चेत् उच्यते । शुद्धसत्वमयीमायोपधानप्रत्युपस्थापितै: विग्रहै: समुपेत: पुरुरूप: ईश्वर: उपासने ऽवलम्बनीय इति वेदवाणी उपदिशति -

स्थिरेभिरङ्गै: पुरुरूप उग्रो बभ्रु: शुक्रेभि: पिपिशे हिरण्यै: ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ।।

(ऋ० सं० २-३३-९) इति । मन्त्रो यं द्वितीये मण्डले त्रयस्त्रिंशत्तमे सूक्ते नवमो भवति ।

मन्त्रार्थः - स्थिरेभिः- दृढैः अवयवैः संयुक्तः पुरुरूपः- बहुभिः रूपैरुपेतः उग्रः- उद्‌गूर्ण इति तेजस्वी सर्वसमर्थः बभ्रुः- भर्ता रुद्ररूपः परमेश्वरः शुक्रेभिः- दीप्तैः सत्त्वमयीमायाप्रत्युपस्थापितैः हिरण्यैः- हिरण्यवत् हितरमणीयैः साकारविग्रहैः पिपिशे- दीप्यते। अनेन पूर्वार्धेन साकारविग्रहोपेतस्य सगुणस्य तस्य परमेश्वरस्य उपासना सूचिता भवति। ईशानात्- ईश्वरात् अस्य- भुवनस्य समस्तभूतजातस्य भूरेः- भर्तुः विधारकत्वात् रुद्रात्- परमेश्वरात् असुर्यं- ज्ञानादिबलं, असुर इति पदं दीप्ता इत्यत्र साधु भवति सद्‌वाक्यादि दीप्तेषु विद्वत्सु उपलभ्यमानं बलमसुर्यमित्युच्यते। तज्ज्ञानबलमिति। तत् न वा उ- नैव योषत्- पृथक् भवति। 'पिश अवयवे' इत्यतः दीपनायां पिपिशे इति कर्मणि लिट्। 'असु दीपणे' इति असेरुरन् अतः असुर्यं इति। योषत् -'यु मिश्रणामिश्रणयोः' इति यौतेः लेटि अडागमः, सिब्बहुलं लेटि इति सिप् भवति। तथा चानेन मन्त्रेण साकारोपासनामार्गेण क्रममुक्तिः आम्नाता भवतीति।

मुमुक्षूणां मुक्तिसाधनं वेदस्य सदुपदेश एव भवति। सन्ति भूयांसि भगवतो वेदस्यानाद्यविच्छिन्नकालप्रवृत्तानि सदुपदेशरूपाणि वचांसि। यथावदवगम्यमानानि एतानि वचांसि नास्तिकानामपि श्रोत्राणि नास्तिक्यलक्षणं बाधिर्यं विचूर्णयन्ति। एवम्भितेभ्यः वचोभ्यः संप्राप्तेन सद्विज्ञानरूपप्लवेन अतिदुस्तरं संसारार्णवं पर्वतनाः बहवो महाभागाः समतारिषुः, इदानीन्तनाः पुण्यजनाः सन्तरन्ति, भाविनोऽपि सन्तरिष्यन्ति। अतः अयं सद्विज्ञानप्लवः शाश्वतः। ज्ञानं सत्यं भवति सर्वैरपि स्वस्वमोक्षाय ब्रह्मणः ज्ञाने विगतरागादि कल्मषचित्तता सिद्धये सदा प्रयत्नः विधातव्य इति वेदवाणी बोधयति -

ऋतस्य हि शुरुधः सन्ति पूर्वीः ऋतस्य धीतिर्वृजिनानि हन्ति।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः॥

(ऋ० सं० ४-२३-८) इति। दशममण्डलस्य त्रयोविंशतितमे सूक्ते भवत्ययं मन्त्रः अष्टम इति। मन्त्रार्थः -

ऋतस्य- त्रिकालाबाध्यस्य सत्यस्य परमात्मनः प्रतिपादकानि शुरुधः- श्रोतॄणां शोकनिवारकाणि महामहिमशालीनि वचनानि, शुकमिति शोकं संरुन्धन्ति

इति निर्वचनात् । पूर्वीः- अनादिपरंपराप्राप्तानि भूयांसि सन्ति हि- विद्यन्ते खलु । एवं ऋतस्य- परमात्मनः धीतिः- धार्यमाणा प्रज्ञा- विज्ञानं वृजिनानि- वर्जनीयानि अविद्यादिक्लेशलक्षणानि हन्ति- नाशयति । तथा तस्य ऋतस्य श्लोकः- यशः यः यदि बुधानः- बुध्यमानः तपसा सावधानेन यथावदवगम्यमानः स्यात् । तथा च श्रुतिः -

'तपसा ब्रह्म विजिज्ञासस्व' (तै० उ० ३-२)

इति । एवंरूपः सः शुचमानः- दीप्यमानः ध्याननिष्ठया अन्तर्हृदये सततं प्रकाशमानः सन् परमार्थरूपां मुक्तिं साधयतीति । तस्यैव लोकदृष्टम् फलमप्याह - स च तत्त्वदर्शिनः सकाशात् श्रूयमाणः यशः आयोः- सत्यविमुखस्य बहिर्गमनशीलस्य नास्तिकजनस्य बधिरा- बधिरौ कथं वर्तमानौ ? नास्तिक्यविचिकित्सादि-दोषेण प्रतिबद्धौ कर्णा- कर्णौ ततर्द- तर्दति, नास्तिक्यसंशयादिलक्षणं बाधिर्यं हत्वा तस्य हृदयान्तःप्रविशति । ज्ञानरूपः वेदार्थबोधः नास्तिकमपि आस्तिकं , मूढमपि प्राज्ञं बहिर्मुखं अन्तर्मुखं करोतीति यावत् । एवमस्ति वेदस्य प्रभावः । अतः सर्वेऽपि स्वात्मसाक्षात्कारेण संसारमुक्त्यै अवश्यं वेदज्ञाने श्रद्धेया भवेयुरिति ।

एवं मुक्तिस्वरूपं ज्ञानफलं प्राप्तुं कुतर्कादयः दूरतः प्रक्षेपणीयाः भवन्ति । यद्यपि भूयांसो जनाः श्रुत्यादिशास्त्राण्यधीयन्ते, शास्त्ररसमास्वादयन्ति च । छात्राः बहवः तानि शास्त्रवाक्यानि शृण्वन्ति, अन्येषां श्रावयन्ति च, तथाऽपि चेतसः पराक्प्रवणतया कुतर्कग्रस्ततया च श्रुतीनां प्रधानार्थभूतं ब्रह्मतत्त्वं साक्षात्कर्तुं न पारयन्ति । यः अनेकजन्मार्जितसुकृतवासनया आसादितचित्तशुद्धिः सन् कुतर्का-दिभ्यः विमुखो भवति स एव श्रुत्याचार्योपदिष्टं सम्यगर्थं ब्रह्म ज्ञातुं शक्नोति इति प्रतिपादयितुं प्रवृत्तेयं वेदवाणी -

उत त्वः पश्यन्न ददर्श वाचमुतत्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं१ विसस्रे जायेव पत्य उशती सुवासाः ।।

(ऋ० सं० १०-७१-४) इति । दशममण्डलस्य एकसप्ततितमे सूक्ते चतुर्थी भवति ।
मन्त्रार्थः - अत्र उत इति शब्दः अप्यर्थकः । एवं त्वशब्दः एकार्थकः । उतत्वः-

अप्येकः कश्चित् पराङ्मुखः असंस्कृतः अनधिकारीति । वाचं- श्रुत्याचार्यो-पदिष्टां वाचं, लिपिरूपेण पश्यन्नपि- कुतर्ककामाद्युपहतेन मनसा पर्यालोचयन्नपि न ददर्श- अपरोक्षतः तदर्थं न पश्यति । स्वात्मत्वेन नानुभवति ऐकाग्र्या-भावात् । एवं उतत्वः- अप्येकः एनां वाचं स्वरूपेण शृण्वन्नपि न शृणोति । दर्शनश्रवणफलाभावात् दर्शने श्रवणे च अदर्शनत्वश्रवणत्वं चोपचर्यैते इति । तथा हि न्यायः - निष्फलं कार्यं कृतमप्यकृतं भवतीति । ~~एवमर्थेन~~ एवमर्थेन अधिकार-संपद्विधुरः बहिर्मुखः अज्ञः निन्दितः । तृतीयपादेन अधिकारसंपत्संयुक्तं विज्ञं सफलकार्यत्वेन स्तौति । उतो त्वस्मै- अपि निश्चयेन एकस्मै साधनसंपन्निमते तन्वं- तनुमिति अर्थरूपं शरीरं विसस्रे- विस्तारं कृत्वा प्रकाशयति । अर्थो हि वाचः शरीरं, अर्थस्य हि सम्यक् प्रकाशनमिति । सृ धातोः 'छन्दसि लुङ् लङ् लिटः' (पा० सू० ३-४-६) इति सूत्रेण वर्तमाने लिट्रूपम् । ददर्शेत्यत्रापि एवमेव बोध्यम् । चतुर्थपादेन सादृश्यरूपदृष्टान्तेन तमेवार्थानुभवज्ञं स्तुवन्नाह - जायेव इति । यथा जाया उशती- संभोगं कामयमाना सुवासाः- शोभनवस्त्र-युक्ता जाया गर्भग्रहणविधारणादियोग्या पत्नी पत्ये- स्वभर्त्रे ऋतुकाले संभोगार्थं प्रेम्णा स्वीयं सकलस्वरूपं दर्शयति, तथा सा वाक् उत्तमाधिकारयुजे स्वात्मानमर्थं विवृणोति । स एव चेतसः शुध्यैकाग्र्यकाले एनामर्थस्वरूपां वाचं यथावत्पश्यति शृणोति च नान्य इति । तस्मात् वागर्थप्रतिपत्तये श्रेयस्कामैः मुमुक्षुभिः महता प्रयत्नेन अधिकारसंपत् संपादनीया, इयमेव मुक्तिप्रयोजिका भवतीत्युक्तं भवति ।

मोक्ष एव ज्ञानस्य फलं भवति । तत् फलं निर्विघ्नेन संपादयितुं प्रथमतः गणपति-प्रार्थना करणीया भवति । अकरणे सति आविधकं सर्वं न नश्यति, तेन ब्रह्मणः कृतश्रवणमननिदिध्यासने पि आत्मसाक्षात्कारो न भवति । अत एवोच्यते -

अभीप्सितार्थसिध्यर्थं पूजितो यस्सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणेशाय नमो नमः ।।

इति । अन्यच्च -

अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः स्मृतः ।
यो ददात्यमृतत्वं हि सो नः पातु गणाधिपः ।।

इत्यादि स्मार्तवचनेन प्रसिद्धमहिम्नस्तस्य देवस्य सान्निध्यं सर्वेषां कार्याणां साकल्याय भवति इत्याह वेदवाणी -

नि षु सीद गणपते । गणेषु त्वामाहुः विप्रतमं कवीनाम् ।
न ऋते त्वत्क्रियते किंचनारे महामर्कं मघवन् चित्रमर्च ।।

(ऋ० सं० १०-११२-९) इति । अयं मन्त्रः दशममण्डलस्य शतोत्तरद्वादशतमे सूक्ते नवमो भवति । मन्त्रार्थः -

हे गणपते । - इदं जगत् गणसंज्ञितस्य यः पतिः एषः शिवः स्वयं गणपतिरिति । तत्संबुद्धौ हे विश्वपते इति । गणेषु- त्वद्भक्तगणेषु ध्यानेन त्वदभिमुखीभूतेषु स्वेष्टलाभप्रदकार्यकर्तृषु त्वं सुष्टु यथास्यात्तथा निषीद- सन्निहितो भव । सन्निहितस्य तव कृपाकटाक्षप्रभावात् सर्वाण्यपि कार्याणि सफलानि भवन्ति इति त्वद्भक्तानां पूर्णो विश्वासः । यद्यपि सामान्यतस्तव सर्वान्तर्यामिणः सन्निधिः सदा सर्वत्र चास्ति, तथाऽपि सन्निहितो भव इति सत्यां भक्तप्रार्थनायां विग्रहवत्त्वादिना विना सर्वगतः परमात्मा विशेषतः न सन्निहितो भवितुं शक्नोति । तस्मात् सन्निहितस्य प्रार्थनमिदं व्यर्थं सत् स्वसार्थक्याय विग्रहलक्षणस्य सान्निध्यमर्थाद्बोधयति इति ।

ननु सान्निध्यायासौ अभ्यर्थितो पि सामर्थ्याभावात् न ज्ञातुं न च सन्निधातुं शक्त इति चेत्-उच्यते । कवीनां- क्रान्तप्रज्ञानां देवादीनां मध्ये त्वा- त्वां विप्रतमं- विशेषेण सर्वंपरोक्षं पश्यति- जानाति इति । विप्रः- सर्वज्ञ इति । निपातनात् साधुर्भवति अयं शब्दः । अतिशयेन विप्रः विप्रतमः तं- निरतिशयसर्वज्ञानशक्तिमन्तं आहुः- कथयन्ति विपश्चित इति । एवं भगवन्तं गणेश्वरमादृत्य श्रद्धालुभिः कर्मजातं सर्वं साफल्याय क्रियत इति व्यतिरेकेणाह - त्वदृते इति । त्वां वर्जयित्वा तत्र ध्यानादिकं विहाय त्वद्भक्तैः किंचन- लौकिकं वैदिकं वा किंचिदपि कर्म क्रियमाणं आरे- दूरे समीपे वा । तथा हि निगमनं- 'आराद्दूरसमीपयोः' इति । न क्रियते- न विधीयते इति । त्वाम- नादृत्य कृतं कर्म न निर्विघ्नं सफलं भवति इत्यतः स्वाभ्युदयकामैः कर्मणः प्रारम्भे मध्ये अन्ते च विघ्नध्वान्तमार्तण्डस्य गणेशस्य ध्यानादिकमवश्यं विधातव्यमिति

भाव: । तस्मादेव हे मघवन्- दिव्यघनवन् महेन्द्र महां- महान्तं अर्क- अर्चनीयं चित्रं- दिव्यतमनानारूपयुक्तं साश्चर्यं- चेतश्चमत्कृतिकारकं स्वस्वरूपमस्माकं हृदये प्रकटीकृत्य अर्च- अस्मान् त्वदुपसन्नान् कल्याणस्वरूपं आत्मज्ञानं समर्पय इति । 'अर्च पूजायाम्' इति भौवादिक: । इति । अन्यो मन्त्र: -

अनुत्तमा ते मघवन्न किर्नु न त्वावाँ अस्ति देवता विदान: ।

(ऋ० सं० १-१६५-६) इति । मन्त्रार्थ: -

आ इति स्मरणे, स्मृतवन्तो वयमिदानीं हे मघवन्- परमैश्वर्यसंपन्न । ते- त्वया अनुत्तं- अप्रेरितं किंचिदपि कर्म न किर्नु- नैवास्ति । नु इति निश्चयार्थक: । हे देव त्वावां- त्वत्सदृश: विदान:- विद्वान् सर्वज्ञस्सर्वशक्तिमान् । विदान इत्यत्र व्यत्ययेन शानच् । देवता- देवो न अस्ति । सर्वं कर्म तव प्रेरणयेव उत्पत्स्यन्त इति यावत् । एवमनेन मन्त्रेण आत्मज्ञानफले मुक्तौ संभाव्यमानान् आविधकविघ्नान् भक्तगणोद्धारक: विश्वपति: निवनरयति । निवार्य च तेषां आत्मज्ञानफलं स: दास्यति चेति ।

अपि च यस्य वागनृतादिभिरदुष्टा मनश्च रागद्वेषादिभिरदूषितं भवति, स एव वेदोपदिष्टं मोक्षरूपं फलं प्राप्नोति । मोक्षस्य सत्य-ब्रह्मचर्यादीनि सम्यग्ज्ञानसहकारीणि साधनानि भवन्ति । एभ्य: साधनेभ्य एव साध्यमीप्सितं मोक्षरूपफलं अवाप्तुं शक्यते । अत: साधनप्रतिष्ठाये तावदादौ विपक्षविजयो विधातव्य इति । श्रुत्याचार्येश्वरप्रसादात् सेन्द्रियमनस: जय: साधनीय:, तेन च ब्रह्मविद्या तथा च कैवल्यमिति भगवती श्रुतिरुपदिशति -

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।

अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।

(ऋ० सं० १०-७१-२) इति । ऋचियं दशममण्डलस्य एकसप्ततितमे सूक्ते द्वितीया भवति । निरुक्ते पौर्यं ४-१० इत्यत्र पठिता वर्तते । मन्त्रार्थ: -

इव- यथा तित उना- चालन्या सक्तं- भर्जितयवचणकादिचूर्णं सावशेषं पुनन्त:- तुषाद्यपनीय शोधयन्ति जना:, तथा यत्र- यस्मिन् श्रुत्याचार्योपदेशे प्राप्ते धीरा:- धीमन्त: वेदार्थध्यानवन्त: मनसा- विवेकविचारशीलेन एकाग्रेण

चतसा वाचं- वाणीं अक्रत- अकृषत इति।। अनृताप्रियासाधुशब्देभ्य: विविक्तां शुद्धां साधुशब्दां कृतवन्त इति । एवं पूर्वार्धेन सबाह्याभ्यन्तरशुद्धिमभिधायेदानीं सर्वजनस्पृहणीयमभ्युदयनि:श्रेयसं वर्णयति उत्तरार्धेन - अत्रा सखाय इति । अत्र- इत्यत्र छान्दसो दीर्घ: अत्रा इति । अत्र- अस्यामीदृश्यां शुद्धौ सखाय:- समानख्यातय: सर्वपदार्थेषु ब्रह्मात्मैक्यत्वसमत्वपूर्णत्वज्ञानवन्त: ब्रह्माभेददर्शिन: सख्यानि- तादृशसखिषु भवानि स्वच्छाभ्युदयफलानि स्वत्वायुज्यानि जानते- लभन्ते । यत: एषां- परिशुद्धवागादीन्द्रियव्यापाराणां निवृत्तभेदग्रहाणां सबब्रह्मात्मैकत्वमनुपश्यतां विदुषां वाचि- वेदाख्ये परब्रह्मणि प्रतिपादिता या भद्रा- कल्याणी नि:श्रेयसभूता लक्ष्मी:- सर्वभासकस्वत:प्रकाशपरमार्थब्रह्मसंविल्लक्षणा अधिनिहिता- स्वात्माभेदेनावस्थिता भवति इति । लक्ष्मीर्लक्षणात्- भासनात् - ब्रह्मरूपा सर्वानुगतसंविल्लक्षणा अत्रोच्यते । भासनार्थात् 'लक्ष दर्शनांकनयो:' इत्यस्माद्धातो: औणादिक: 'लक्षेर्मुट्‌च' इति इकार: अत: लक्ष्मीरूपसिद्धि: भवति । अन्यो मन्त्र: -

यो अदधाज्ज्योतिषि ज्योतिरन्तर्यो असृजन्मधुना संमधूनि ।

(ऋ० सं० १०-५४-६) इति ।। मन्त्रार्थ: -

य:- चैतन्यानन्दनिधि: परमात्मा इन्द्र: ज्योतिषि- ज्योतिष्मति आदित्यादौ स्वकीयं ज्योति: अदधात्- स्थापितवान् । आदित्यादिषु स्थितं यज्जगद्भासकं तेज: तत्परमात्मन एवेति भाव: । एवं मधुना- मधुराणि दिव्यानि प्रियाणीति समसृजत्- सर्जितवान् इति । यथा अस्मिन् लोके सत्त्वेन प्रतीयमाना: सर्वे पदार्था: अस्य ब्रह्मण: निरतिशयमाधुर्येणैव संयुक्ता: सन्त: प्रियतया विभाव्यन्ते । तथा परमात्मन: प्रकाशानन्दाधीनमेव सर्वस्य वस्तुजातस्य प्रकाशानन्दवत्त्वम् , न तु स्वत इति । अन्यो मन्त्र: -

त्वं भासा रोदसी आ ततन्थाजस्रेण शोचिषा शोशुचान: ।

(ऋ० सं० ७-५-४) इति । अयमर्थ: -

त्वं- हे परमात्मन् अजस्रेण- नित्येन शोचिषा- प्रकाशेन शोशुचान:- सदा स्वत: प्रकाशमान: सन् भासा- दीप्त्या प्रकाशेन रोदसी- द्यावापृथिव्यौ

पदमिदमुपलक्षणम्, सर्वपदार्थान् द्यावापृथिव्यादीनीति वा ततान- विस्तारयामास इति। श्रुतिरपीयम् -

'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति न कुतो यमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।।'

(मुण्ड० २-२-१०) (कठ० २-५-१५) (श्वे० उ० ६-१४) इति भवति। तस्मात् विश्वस्यास्य प्रकाशकः स एक एव नित्यः सर्वगतः स्वयंप्रकाशः चिद्रूपः परमात्मा भक्तलक्ष्मीगम्यः सर्वत्र स्वस्वरूपेणाजस्रं विभावनीयः सः नित्यत्वात् नित्यरूपमोक्षस्य स एवालम्बनीयः। तस्यालम्बनेनैव मोक्षरूपं फलं स्वतस्सिद्धं भवतीति।

एवं या ज्ञप्तिरूपा वाग्देवी चराचरविश्वस्य जननी पराप्रकृतिरिति चोच्यते, या चाद्वैता ब्रह्मशक्तिः गंगादिनिखिलनदीजलमाविश्य तदन्तर्याम्यात्मना भ्राजमाना विभाव्यते, एतस्याः भगवत्या महासरस्वत्या नान्यगामिना मनसा विहितया समुपासनया श्रद्धाघनस्साधकः आधिव्यक्तसंसारदैन्यात् सद्यः परिमुच्यते इति विन्दन्तः मन्त्रद्रष्टारः ऋषयः इष्टानिष्टप्राप्तिपरिहाराय तामनया ऋचा अभ्यर्थयन्ते -

अम्बितमे नदीतमे देवितमे सरस्वति।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि।।

(ऋ० सं० २-४१-१६) इति। ऋगियं द्वितीयमण्डलस्य एकचत्वारिंशत्तमे सूक्ते षोडशी भवति। मन्त्रार्थः -

हे अम्बितमे- मातृणां श्रेष्ठे प्रशस्यतमे इति। नदीतमे- नदीनां श्रेष्ठभूते, देवितमे - देवीनां श्रेष्ठे हे सरस्वति- शुभ्रश्वेतधारिणि। सरस्वतीत्यत्र सर- इति उदकनाम, ज्ञाननाम च भवतः, 'सृ गतौ' इत्यस्य तद्रूपम्। तेन सरसा विशिष्टेन - उदकेन ज्ञानेन च तद्वति सरस्वति इति। चोक्तं निरुक्ते -

'सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति'

(नि० २-२३-३) इति। ततस्तस्याः मन्त्रोक्तं विशिष्टं प्राशस्त्यमुपपद्यत एवेति। एवं संबोधनमात्रकृतसंस्तवेन आशुतोषिणीं तां वाग्देवतां प्रसाद्य स्वाभीष्टसिद्धये प्रार्थनां प्रकुर्वते- हे अम्ब इति। मातः। अप्रशस्ता इव- विद्याभावात् असमृद्धाः- दैन्यभावं समुपेताः इव वयं स्मसि- वर्तामहे। अतः हे सरस्वति

नः- अस्मभ्यं तावकेभ्यः प्रशस्तिं- पकर्षभूतां विद्यासमृद्धिं कृधि- कृपया प्रयच्छ इति । त्वत्प्रसादात् किं किं न सिद्धं भवति ? अपि तु सर्वमिष्टजातमात्मज्ञानरूपमोक्षं च सिध्यतीति भावः । एवमेव मन्त्रान्तरं भवति -

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ।।

(ऋ० सं० १०-१७-७) इति । दशममण्डलस्य सप्तदशे सूक्ते सप्तमोऽयं भवति मन्त्रः ।

मन्त्रार्थः - देवयन्तः- सर्वान्तर्यामिणं सच्चित्सुखात्मानमपरोक्षयितुं कामयमानाः सरस्वतीं- ब्रह्मविद्यास्वरूपिणीं यजनशीलाः भक्ताः हवन्ते- आह्वयन्ति,+ तथा अध्वरे- हिंसारहिते वैदिके शुभकर्मफलप्रदे यज्ञे, इति । तथा च निरुक्तम्-

'अध्वर इति यज्ञनाम ध्वरति हिंसाकर्मा तत्प्रतिषेधः'

(नि० १-८) इति । तायमाने- बहुप्रकारैः विस्तार्यमाणे तस्मिन् भक्ताः तां देवीं यजन्ति पूजयन्तीति यावत् । तथा सुकृतः- संचितपुण्यकर्माणः ते भगवतीं सरस्वतीं अह्वयन्तः- अभीप्सितफलमादातुं स्वात्मत्वनाह्वयन्ते । यतः एवमतः सा प्रसन्ना सरस्वती दाशुषे- यज्ञे हवींषि दत्तवते तदुपसन्नाय यजमानाय वार्य- वरणीयमभीष्टं फलं ज्ञानं दात्- शीघ्रं प्रयच्छति इति । तस्मात् मोक्षार्थिनः मोक्षरूपफलस्य कृते ब्रह्मज्ञाने निरताः भवेयुरित्युक्तं भवति । आत्मा च ब्रह्म इत्यतः श्रुत्युक्तप्रकारेण आत्मसाक्षात्कारे आत्मोपासना करणीया इति यावत् ।

एवं कृते सति इन्द्ररूपः परमात्मा सकामेभ्यः कामानां, निष्कामेभ्यः स्वसाक्षात्कारेण मोक्षामृतत्वस्य च वर्षकत्वेन परमेष्टो भवति इति मन्त्रदृक् तं स्तौति -

त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।
त्वं ब्रह्मा रयिविद् ब्रह्मणस्पते त्वं विधर्तः सचसे पुरन्ध्या ।।

(ऋ० सं० २-१-३) इति । द्वितीयमण्डलस्य प्रथमे सूक्ते तृतीया भवतीयम् ऋक् ।

मन्त्रार्थः - हे अग्ने !- हे परमात्मन् त्वं सतां- सज्जनानां सदाचारसंपन्नानां कृते वृषभः- अभीष्टानां पदार्थानां वर्षिता असि, अतः त्वमिन्द्रोऽसि । त्वं विष्णुः- स्वसृष्टेषु कार्यकरणसंघातेषु जीवात्मना प्रवेशनात् सकलविश्वव्यापनाच्च

विष्णुरसि, अत: उरुगाय:- बहुभिर्गीयमान: नमस्य:- नमस्कार्यश्च भवसि ।
हे ब्रह्मणस्पते- हिरण्यगर्भस्य सर्वभूतपतेरपि पालयित: । त्वं रयिवित्- शुभाशुभकर्मणां वेत्ता असि । अतस्त्वं ब्रह्मा- निरतिशयमहत्त्वोपेत: भवसि ।
हे वियर्त:- विविधविश्वधारक त्वं पुरन्ध्या- निर्मलत्वैकाग्रत्वादिबहुप्रकारया बुध्या सक्से- प्रत्यक्षो भवसि । आत्मन: प्रत्यक्षमेव मोक्ष इति । तथा चोच्यते-

'दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभि: ।'

(कठ० १-३-१२) इति कठवल्याम् । तस्मात् ब्रह्मण: प्रत्यक्षमेव मोक्षरूपं फलं भवति । तस्मान्मुमुक्षु: प्रमादालस्यादिकं विहाय परमपुरुषार्थरूपमोक्षपरायणो भवेदिति । य: प्रमादालस्यपरित्यागं कृत्वा शास्त्रसद्गुरूपदेशमनुसृत्य च पुरुषार्थी एव आत्मज्ञाने अधिकारी भवितुं शक्नोति, स एव कृतकृत्यो भवति च । तमेव देवा: सर्वात्मना रक्षितुमिच्छन्ति इति वदति भगवान् वेद: -

इच्छन्ति देवा: सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
यन्ति प्रमादमतन्द्रा: ॥

(ऋ० सं० ८-२-१८) इति । मन्त्रोऽयं अष्टममण्डलस्य द्वितीये सूक्ते अष्टादशो भवति । अयमेव सामवेदे ७२१ इत्यत्र अथर्ववेदे २०-१८-३ इत्यत्र च पठित: ।

मन्त्रार्थ: - सुन्वन्तं- सोमस्य सर्वाभीप्सितस्य अपरिमितशाश्वतसुखविशेषस्य प्रपंचोपशमस्य मोक्षस्य प्रादुर्भावं कर्तुं सर्वे देवा:- इन्द्रादय: दैवीसंपत्संयुक्तं विद्वांसं इच्छन्ति- सदुपदेशै: तत्त्वं विज्ञापयितुं अभिलषन्ति । अत: ते न स्वप्नाय स्पृहयन्ति । स्वप्नाय- स्वप्नं तद्वन्तं स्वपन्तं, स्वप्नशब्देन अत्र सोमस्यानादरो लक्ष्यते, तस्मादेव आलस्यादिदोषयुक्तं विचारवर्जितं प्रमादिनं जनं न स्पृहयन्ति- रक्षणादिना समुद्धर्तुं न वांछन्ति इति । यत एव तत: विचारशीला: मानवा: अतन्द्रा:- स्वाभ्युदयनि:श्रेयससिद्धये निरन्तरं सदुपायानाश्रित्य अनलसा: सन्त:, प्रमाद- अज्ञानं तत्कार्यं च प्रयत्नेन कर्तव्यकार्यस्य प्रमादं यान्ति- निराकुर्वन्ति इति । अत्र प्रमादमुपलक्षणमालस्यनिद्रयोरपि । कर्तव्येऽपि कार्ये श्रद्धावैधुर्येणोत्साहाभाव: आलस्यम्, बुद्धिजाड्याधिक्येन कर्तव्यं परित्यज्य स्वापो निद्रा भवत: । एवमेतयोरपि निगमनमत्र बोद्धव्यं भवति ।

एवं मन्त्रान्तरं भवति -

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।

(ऋ० सं० ५-४४-१४) इति । पंचमे मण्डले चतुश्चत्वारिंशत्तमे सूक्ते चतुर्दशोऽयं मन्त्रः । मन्त्रार्थः - यः- महापुरुषः जागार- प्रमादरहितः सदा सावधानः स्वकर्तव्ये अर्थे जागरूकेन अनन्यचेताः सन् वर्तते, तं- तमेव ऋचः- सर्वशास्त्रात्मिकाः कामयन्ते- अभिलषन्ति । यो जागार, तम्- तमेव सामानि- गीतिरूपाणि स्तोत्राणि यन्ति- प्राप्नुवन्ति । तानि सामानि यथावत् सुस्वरेण गातुं जागरूकस्य एव प्रभवति नान्य इति यावत् । यो जागार तमेव अयं- विश्वरूपेण पुरःस्थितः सोमः- परमात्मा आह- सर्वान्तर्बहिः मां पश्येति वक्ति । अथेदानीं साधकः प्रतिजानीते हे भगवन् तव- परमेश्वरस्य सख्ये- सखित्वे न्योकाः- नियतस्थानः प्रतिष्ठितः अहमस्मि इति तं हृदये साक्षात्करोतीति । एवमनया ऋचा स परमात्मा अहमस्मि इति आत्मसाक्षात्काररूपो मोक्षः उक्तो भवति ।

एवंरूपस्याद्वितीयस्यैकरसस्य आनन्दरूपस्य साक्षात्कारेण पापोच्छेदेन कल्याणरूपस्य मोक्षस्य लाभो भवति । रागद्वेषादिरूपस्य संसारस्य हेतुभूतमविद्याख्यं मृत्युं भगवतः विमलविज्ञानलक्षणया केवलया विद्यया समुच्छिद्य मतिमान् तद्भावापन्नः सन् मुक्तः अनन्तसुखं सर्वदा अनुभवति इति वदति वेदवाणी -

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् ।
भद्रं भवाति नः पुरः ।।

(ऋ० सं० २-४१-११) इति । द्वितीयमण्डलस्य एकचत्वारिंशत्तमे सूक्ते भवत्ययं मन्त्रः एकादशः । मन्त्रार्थः -

इन्द्रः- सकलैश्वर्यसंपन्नः पूर्णानन्दनिधिः परमेश्वरः नः- संसारिणोऽस्मान् जीवान् मृळाति- परिपूर्णं सुखं समर्पयति । यदा च पश्चात्- पृष्ठतः संलग्नमात्मस्वभाव/परिरोधकं अघं- दुरितं अविद्यालक्षणं नः- अस्मान् न नशत्- व्याप्नुयात् अस्मभ्यं तत्संबन्धो विच्छिद्येत इति । तथा च तादृशस्य पापस्य सदुपायेन समुच्छेदे सत्येव नः- अस्माकं पुरः- पुरस्तात् समक्षमिति ।

भद्रं- निःश्रेयसरूपं कल्याणं भवाति- भवति । विषयेऽस्मिन् मनागपि सन्देहो माभूत् इति भावः । अत एव अभ्युदयनिःश्रेयसप्रतिबन्धकानि अखिलानि पापान्युच्छेत्तुं विशेषतः समाम्नाता भवतीयम् ऋक् -

बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ।

(ऋ० सं० १-२४-९) इति । मन्त्रार्थः -

हे परमेशान: निर्ऋतिं- अस्मदनिष्टकारिणीं राक्षसीं पराचैः- अस्मतः पराङ्मुखीं कृत्वा दूरे- व्यवहिते देशे स्थापयित्वा तां बाधस्व- विध्वंसय । एवं कृतं चित- पूर्वमस्माभिस्तद्वशीभूतैः अनुष्ठितमपि एनः- पापं अस्मात्- अस्मभ्यः प्रमुमुग्धि- प्रकर्षेण मुक्तं कुरु इति । एवं मोक्षं तत्साधनानि च सविस्तरं प्रतिपाद्येदानीं विवेकादिसाधनवता पुरुषेणैव सफला ब्रह्मविद्या वाप्यते नेतरेण इत्युच्यते + - ब्रह्मात्मतत्त्वविज्ञानादेव भवदुःखवारिधेर्निस्तारो भवति । अतस्तद्विज्ञानमवश्यं सुकृतिना साधनसंपत्तिमासाद्य संपाद्यं भवति । साधनसंपदं विना कथमपि ब्रह्मज्ञानरूपं फलं न सिध्यति । न हि विवेकादिसाधनमन्तरा केवलं वेदाध्ययनेन कस्यचित् ब्रह्मजिज्ञासा प्रादुर्भवति । ब्रह्मोपदेशस्य अधिकारिविशेषस्यैव साक्षात्कारपर्यवसायी ज्ञानं भवति । तस्मात् संसारमुक्त्यै तेनानन्तसुखमवाप्तुं च ब्रह्मविद्यां विहाय नान्यत्परं साधनमस्ति, सा तु ब्रह्मविद्या विवेकादिसाधनसंपद्विना न सिध्यति इति उपदिशति भगवान् वेदस्वरूपो परमात्मा -

तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ।।

(ऋ० सं० १-११६-१२) इति । ऋगियं प्रथममण्डलस्य शतोत्तरषोडशतमे सूक्ते द्वादशी भवति । मन्त्रार्थः -

हे नरा- नरौ नराकारौ नेतारौ अश्विनौ वां- युवयोः संबन्धि दंस इति कर्मनामैतत् । किं विशिष्टं तत्कर्म भवति ? उग्रं- क्रूरं, अन्यैः कर्तुं दुःशकमिति । युवाभ्यां पुरा तत्कर्म कृतं तत्किं निमित्तमिति ? सनये- लाभाय लाभबुद्ध्या लोके लोकाः क्रूरं कर्मापि आचरन्ति । तद्वत् युवाभ्यामपि । तत्- तत्कर्म आविः- प्रकाशं आविष्कृणोमि- आविष्करोमि । भवद्भ्यां यद्रहसि कृतं

तत्प्रकटीकरोमि इति । किमिवेति दृष्टान्तेन प्रतिपाद्यते तन्यतुः- पर्जन्यः न- इव । वेदे पदादुपरिष्टात् श्रूयमाणः नकारः स खलु उपचारः सन् उपमार्थकोऽपि भवति न प्रतिषेधार्थक इति । यथा अश्वं 'अश्वं न गूढमश्विना' इत्यत्र अश्वमिवेति तद्वदत्रापि । तन्यतुरिव वृष्टिम्, यथा पर्जन्यः स्तनयित्वादिशब्दैः वृष्टेरागमनं प्रबोधयति, तथा इं युवयोः कर्म आविष्कृणोमीति । कर्म इत्युच्यते तत्कर्म किमिति ? उच्यते । दध्यङ्- एतत्संज्ञकः ऋषिः आथर्वणः- आथर्वणो पत्यं पुत्रः अश्वस्य शीर्ष्णा- युष्मत्सामर्थ्येन निहितशिरसा वां- युवाभ्यां ईम्- इमां मधुब्रह्मविद्यां यत्- ह- यदा खलु प्र उवाच- प्रोक्तवान् । इति ।।

अस्मिन् मन्त्रविषये एका आख्यायिका वर्तते । विस्तरभिया सा आख्यायिका नेह प्रस्तूयते । मधुब्रह्मविद्यायां सम्यक् निरूपिता भवति । सायणाचार्यैरपि मन्त्रस्यास्य व्याख्यानावसरे[1] आख्यायिकायाः सारांशः निगदितो भवति । तत्रैव द्रष्टव्यः । तथा च ब्रह्मविद्यासंपादने विवेकादिसाधनचतुष्टयसंपत्तिः अपेक्षिता भवति । विवेकादिमता पुरुषेणैव सा विद्या अवाप्यते । विद्यायाः तस्याः फलं मोक्ष इति । तस्मात् मोक्षकामैस्सर्वैरपि आत्मज्ञानसाधकानि उपनिषदादि- शास्त्राणि पठितव्यानीति । उपनिषदादिषु कृतश्रवणमनननिदिध्यासनादिभिः जनितात्मज्ञानेन आविद्यक संसारात् मुक्तिं प्राप्नुवन्तीति ।

सर्वेषां च कृते सत्यज्ञानानन्दरूपः स परमात्मा स्वस्तिं विदधातु इति मनसि स्मृत्वा प्रकरणमंगलत्वेन ऋग्मन्त्र पठ्यते -

त्रायन्तामिह देवाः त्रायतां मरुतां गणः ।
त्रायन्तां विश्वा भूतानि यथायमरपा असत् ।।

(ऋ० सं० १०-१३७-५) इति ।। इति शम् ।।

०००००००००००००००००००००००००

---

१ सा० भा० पृ० ७१६ - ७२०

२५ इतरविभावा:

२५ इतरविषया:

एतावता प्रकरणचतुष्टयं प्रतिपादितं भवति। तत्र प्रथमे ब्रह्मतत्त्वप्रकरणे सगुण-निर्गुणब्रह्मविषयमधिकृत्य केचन मन्त्रा: उल्लिखिता:। द्वितीये जगत्तत्त्वप्रकरणे जगत: सृष्टि:, मायाया: स्वरूपं, अविद्याया: लक्षणं, ब्रह्मण: निमित्तोपादानकारणत्वं, तथा परिणाम-विवर्तवादौ इत्यादि विषया: सम्यग्विचारिता: भवन्ति। तृतीये आत्मतत्त्वप्रकरणे जीवात्म-परमात्मानावधिकृत्य बहवो मन्त्रा: अवलोकिता: वर्तन्ते। चतुर्थे मोक्षतत्त्वप्रकरणे मोक्ष:, मुक्तिसाधनं, मोक्षफलम्, ब्रह्मज्ञानसाधनानि इत्यादयो विषया: प्रतिपादिता:। एवं चतुर्षु प्रकरणेषु तत्तदद्वैततत्त्वं पुरस्कृत्य बह्व्य: ऋच: अर्थेन विशदीकृता:। एकमर्थविवरणकाले सायणभाष्यमपि तत्र तत्र उद्धृतं वर्तते। भाष्यकारै: सायणाचार्यैरपि कानिचन सूक्तानि अद्वैतार्थपरकतया विवृतानि सन्ति। किन्तु तेषां सर्वेषां लेखनं प्रतिपादयितुमत्र न शक्यते। दिङ्मात्रतया तेषु सूक्तेषु सूक्तद्वयं सायणाचार्यभाष्यरीत्या प्रपंच्यते। एकं पुरुषसूक्तम्, अन्यं नासदीयसूक्तम् इति। तत्रापि नासदासीयसूक्तस्य तैत्तिरीयब्राह्मणस्थसायणभाष्यमेवात्र उल्लिख्यते। तत्र प्रथमत: पुरुषसूक्तं प्रारभ्यते।

'सहस्रशीर्षा' इति षोडशर्चं सूक्तम्। सूक्तमेतत् दशममण्डलस्य नवतितमो भवति। सूक्तस्यास्य नारायण नाम ऋषि:। अन्त्या ऋक् त्रिष्टुप्छन्दोबद्धा। शिष्टा: ऋच: अनुष्टुभ:। सूक्तस्यास्य अव्यक्तमहदादिविलक्षण: य: चेतन: पुरुष: 'पुरुषान्न परं किंचित्' (कठ० ३-११) इत्यादिश्रुतिषु प्रसिद्ध: स: देवता। मन्त्र: -

सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात्।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम्॥

मन्त्रार्थः - सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सो ऽयं सहस्रशीर्षा । सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षत्वं सहस्रपादत्वं च । स पुरुषः भूमिं- ब्रह्माण्डगोलकरूपां विश्वतः- सर्वतः वृत्वा- परिवेष्ट्य दशांगुलं- दशांगुलपरिमितं देशं अत्यतिष्ठत्- अतिक्रम्य व्यवस्थितः । दशांगलमित्युपलक्षणम् । ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ।

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।२।।

इति । मन्त्रार्थः - यत् इदं- वर्तमानं जगत् तत् सर्वं पुरुष एव । यच्च भूतं- अतीतं जगत् यच्च भव्यं- भविष्यज्जगत् तदपि पुरुष एव । यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोः द्रष्टव्यमित्यभिप्रायः । उत- अपि च अमृतत्वस्य- देवत्वस्य अयं ईशानः- स्वामी । यत्- यस्मात्कारणात् अन्नेन- प्राणिनां भोग्येनान्नेन निमित्तभूतेन अतिरोहति- स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः ।।

एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३।।

इति । मन्त्रार्थः - अतीतानागतवर्तमानरूपं जगद्यावदस्ति एतावान्- सर्वोऽपि अस्य- पुरुषस्य महिमा- स्वकीयसामर्थ्यविशेषः । न तु तस्य वास्तवस्वरूपम् । वास्तवस्तु पुरुषः अतः- महिम्नोऽपि ज्यायान्- अतिशयेनाधिकः । एतच्चोभयं स्पष्टीक्रियते - अस्य- पुरुषस्य विश्वा- सर्वाणि भूतानि- कालत्रयवर्तीनि प्राणिजातानि पादः- चतुर्थांशः । अस्य- पुरुषस्य अवशिष्टं त्रिपात्- स्वरूपं अमृतं- विनाशरहितं सत् दिवि- द्योतनात्मके स्वप्रकाशरूपे व्यवतिष्ठत इति शेषः । यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० २-१) इति आम्नातस्य परब्रह्मणः इयत्ता- भावात् पादचतुष्टयं निरूपयितुमशक्यं, तथाऽपि जगदिदं ब्रह्मस्वरूपापेक्षया अल्पमिति

विवक्षितत्वात् पादत्वोपन्यासः ।।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विश्वङ् व्यक्रामत्साशनानशने अभि ।।४।।

इति । मन्त्रार्थः - योऽयं त्रिपात् पुरुषः- संसाररहितः ब्रह्मस्वरूपः सोऽयम् ऊर्ध्वः उदैत्- अस्मादज्ञानकार्यात्संसाराद्बहिर्मुक्तो अत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान् । तस्य अस्य- सोऽयं पादः- लेशः सोऽयम् इह- मायायां पुनः अभवत्- सृष्टिसंहाराभ्यां पुनः पुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताऽप्युक्तम् -

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।।'

(भग० १०-४२) इति । ततः- मायायामागत्यानन्तरं विश्वङ्- देवमनुष्यतिर्यगादिरूपेण विविधः सन् व्यक्रामत्- व्याप्तवान् । किं कृत्वा । साशनानशने अभिलक्ष्य साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातं अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ।।

तस्माद्विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।५।।

इति । मन्त्रार्थः - विश्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते । तस्मात्- आदिपुरुषात् विराट्- ब्रह्माण्डदेहः अजायत- उत्पन्नः । विविधानि राजन्ते वस्तून्यत्रेति विराट् । विराजोऽधि- विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा, पुरुषः- तद्देहाभिमानी कश्चित् पुमान् अजायत । सो यं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतच्चाथर्वणिकाः उत्तरतापनीये विस्पष्टमामनन्ति -

'स वा एष भूतानीन्द्रियाणि विराजं देवताः
कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते
माययैव'

(नृ० उ० २-१-९) इति । सः जातः- विराट्पुरुषः अत्यरिच्यत- अतिरिक्तो

अभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । पश्चात् - देवादि-जीवभावादूर्ध्वं भूमिं ससर्जेति शेषः । अथो - भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज । पूर्यन्ते सोतधियांतुभिरिति पुरः शरीराणि ।।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।६।।

इति । मन्त्रार्थः - यत् - यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवाः-उत्तरसृष्टिसिध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासंभवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण - पुरुषाख्येन हविषा मानसं यज्ञं अतन्वत-अन्वतिष्ठन् । तदानीं अस्य - यज्ञस्य वसन्तः - वसन्तर्तुरेव आज्यम् आसीत्-अभूत् । तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं ग्रीष्म - इध्मः आसीत् । तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः । तथा शरत् हविः आसीत् । तामेव पुरोडाशा-दिहविष्ट्वेन संकल्पितवन्त इत्यर्थः । पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः । अनन्तरं तु वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् ।।

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।।७।।

इति । मन्त्रार्थः - यज्ञं - यज्ञसाधनभूतं तं - पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि-मानसे यज्ञे प्रौक्षन् - प्रोक्षितवन्तः । कीदृशमित्यत्राह - अग्रतः - सर्वसृष्टेः पूर्वं पुरुषं जातं - पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तं 'तस्माद्विराळजायत विराजो अधि पूरुषः' इति । तेन - पुरुषेण पशुना देवा अयजन्त । मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह - साध्याः - सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः ऋषयः - मन्त्रद्रष्टारः च ये सन्ति ते सर्वे ऽप्ययजन्तेत्यर्थः ।।

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशून् तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ।।८।।

इति । मन्त्रार्थः - सर्वहुतः - सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत् । तादृशात् तस्मात् - पूर्वोक्तात् मानसात् यज्ञात् पृषदाज्यं - दधिमिश्रमाज्यं संभृतं-संपादितम् । दधिचाज्यं चेत्येवमादिभोग्यजातं सर्वं संपादितमित्यर्थः । तथा

वायव्यान्- वायदेवताकांल्लोके प्रसिद्धान् आरण्यान् पशून् चक्रे- उत्पादितवान् । आरण्या- हिरण्यादय: । तथा ये च ग्राम्या:- गवाश्वादय: तानपि चक्रे । पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते -

'वायव: स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षा: ।
अन्तरिक्षदेवत्या: खलु वै पशव: । वायव स्थैनान्
परिददाति'

(तै० ब्रा० ३-२-१-३) इति ।।

तस्माद्यज्ञात्सर्वहुत ऋच: सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।९।।

इति । मन्त्रार्थ: - सर्वहुत: तस्मात्- पूर्वोक्तात् यज्ञात् ऋच: सामानि च जज्ञिरे- उत्पन्ना: । तस्मात्- यज्ञात् छन्दांसि- गायत्र्यादीनि जज्ञिरे । तस्मात्- यज्ञात् यजु: अपि अजायत ।।

तस्मादश्वा अजायन्त ये के चोभयादत: ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावय: ।।१०।।

इति । मन्त्रार्थ: - तस्मात्- पूर्वोक्तात् यज्ञात् अश्वा अजायन्त- उत्पन्ना: । तथा ये के च- अश्वव्यतिरिक्ता: गर्दभा: अश्वतराश्च उभयादत:- ऊर्ध्वाधोभागयोरुभयो: दन्तयुक्ता: सन्ति तेऽप्यजायन्त । तथा तस्मात्- यज्ञात् गाव: च जज्ञिरे । किं च तस्मात्- यज्ञात् अजावय: च जाता: ।।

यत्पुरुषं व्यदधु: कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ।।११।।

इति । मन्त्रार्थ: - प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना: उच्यन्ते । प्रजापते: प्राणरूपा: देवा: यत्- यदा पुरुषं- विराड्रूपं व्यदधु:- संकल्पेनोत्पादितवन्त: तदानीं कतिधा- कतिभि: प्रकारै: व्यकल्पयन्- विविधं कल्पितवन्त: । अस्य- पुरुषस्य मुखं किं आसीत् । कौ बाहू अभूताम् । का ऊरू । कौ च पादावुच्येते । प्रथमं सामान्यरूप: प्रश्न: पश्चात् मुखं किमित्यादिना विशेषविषया: प्रश्ना: ।।

ब्राह्मणो॑ऽस्य मुख॑मासीद्बा॒हू रा॑ज॒न्य॑: कृ॒तः ।

ऊ॒रू तद॑स्य॒ यद्वैश्य॑: प॒द्भ्यां शू॒द्रो अ॑जायत ।।१२।।

इति । मन्त्रार्थः - इदानीं पूर्वोक्तानां प्रश्नानामुत्तराण्यि दर्शयति । अस्य- प्रजापतेः ब्राह्मणः:- ब्राह्मणत्वजातिविशिष्टः पुरुषः मुखमासीत्- मुखादुत्पन्न इत्यर्थः । योऽयं राजन्यः:- क्षत्रियत्वजातिमान् पुरुषः, बाहू कृतः:- बाहुत्वेन निष्पादितः । बाहुभ्यामुत्पादित इत्यर्थः । तत्- तदानीं अस्य- प्रजापतेः यत्- यो ऊरू- तद्रूपः वैश्यः सम्पन्नः । ऊरुभ्यामुत्पन्नः इत्यर्थः । तथा स्य पद्भ्यां- पादाभ्यां शूद्रः- शूद्रत्वजातिमान् पुरुषः अजायत । इयं च मुखादिभ्यो ब्राह्मणादिम्लेदीनामुत्पत्तिर्यजुःसंहितायां सप्तमकाण्डे -

'स मुखतस्त्रिवृतं निरमिमीत'

(तै० सं० ७-१-१-४) इति इत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये ।।

च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒: सूर्यो॑ अजायत ।

मु॒खादिन्द्र॑श्चा॒ग्निश्च॑ प्रा॒णाद्वा॒युर॑जायत ।।१३।।

इति । मन्त्रार्थः - यथा दध्याज्यादिद्रव्याणि गवादयःपशवः ऋगादिवेदाः ब्राह्मणादयः मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेः मनसः सकाशात् चन्द्रमाः जाताः । चक्षोश्च- चक्षुषः सूर्य अपि अजायत । अस्य मुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ । अस्य प्राणाद्वायु- रजायत ।।

नाभ्या॑ आसीद॒न्तरि॑क्षं शी॒र्ष्णो द्यौः सम॑वर्तत ।

प॒द्भ्यां भूमि॒र्दिश॒: श्रोत्रा॒त्तथा॑ लो॒काँ अ॑कल्पयन् ।।१४।।

इति । मन्त्रार्थः - यथा चन्द्रादीन् प्रजापतेः मनःप्रकृतिभ्यो कल्पयन् तथा अन्तरिक्षादीन् लोकान् प्रजापतेः नाभ्यादिभ्यो देवाः अकल्पयन्- उत्पादितवन्तः । एतदेव दर्शयति । नाभ्याः- प्रजापतेर्नाभेः अन्तरिक्षमासीत् । शीर्ष्णः- शिरसः द्यौ समवर्तत- उत्पन्ना । अस्य पद्भ्यां- पादाभ्यां भूमिः उत्पन्ना । अस्य श्रोत्रात् दिशः उत्पन्नाः ।

सप्तास्या सन्परिधयस्त्रिस्सप्त समिध: कृता:।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।।१५।।

इति । मन्त्रार्थ: - अस्य सांकल्पकयज्ञस्य गायत्र्यादीनि सप्त छन्दांसि परिधय: आसन् । ऐष्टिकस्याहवनीयस्य त्रय: परिधय: उत्तरवेदिकास्त्रय: आदित्यस्य सप्तम: परिधिप्रतिनिधिरूपा: । अत एवाम्नायते -

'न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन्
पुरस्ताद्रक्षां स्यपहन्ति'

(तै० सं० २-६-६-३) इति । तत: एते आदित्यसहिता: सप्तपरिधयो त्र सप्त छन्दोरूपा: । तथा समिध: त्रि: सप्त- त्रिगुणीकृतसप्तसंख्याका: एकविंशति: कृता: + ~~द्वादशमासा: पंचर्तवस्त्रय: इमे लोका: असावादित्य: एकविंश:~~

'द्वादशमासा: पञ्चर्तवस्त्रय: इमे लोका: असावादित्य: एकविंश:'

(तै० सं० ५-१-१०-३) इति + श्रुत्या पदार्था: एकविंशतिदारुयुक्ते इध्मत्वेन भाविता: । यत् य:- पुरुष: वैराजो अस्ति तं पुरुषं देवा: प्रजापतिप्राणेन्द्रियरूपा: यज्ञं तन्वाना:- मानसं यज्ञं तन्वाना- कुर्वाणा: पशुं अबध्नन्- विराट्पुरुषमेव पशुत्वेन भावितवन्त: । एतदेवाभिप्रेत्य पूर्वत्र यत्पुरुषेण हविषा' इत्युक्तम् ।।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा: ।।१६।।

इति । मन्त्रार्थ: - पूर्वं प्रपंचेनोक्तमर्थं संक्षिप्यात्र दर्शयति । देवा:- प्रजापति-प्राणरूपा: यज्ञेन- यथोक्तेन मानसेन संकल्पेन यज्ञं- यथोक्तयज्ञस्वरूपं प्रजापतिं अयजन्त- पूजितवन्त: । तस्मात्- पूजनात् तानि- प्रसिद्धानि धर्माणि जगद्रूप-विकाराणां धारकाणि प्रथमानि- मुख्यानि आसन् । एतावता सृष्टिप्रतिपादक-सूक्तभागार्थ: संगृहीत: । अथोपासनतत्फलानुवादकभागार्थ: संगृह्यते - यत्र- यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्या:- पुरातना: विराडुपास्ति साधका: देवा: सन्ति- तिष्ठन्ति तत् नाकं- विराट्प्राप्तिरूपं स्वर्गं ते महिमान:- तदु-पासका: महात्मान: सचन्त- समवयन्ति प्राप्नुवन्तीति ।

* एवं सायणभाष्यानुसारेण पुरुषसूक्तं समाप्तम् ।।

२-८-६ इत्यत्र

तैत्तिरीयब्राह्मणे वर्तमानस्य अस्य नासदासीयसूक्तस्य श्रीमन्तः सायणाचार्याः एवमर्थं प्राचीकटन् -

नासदासीन्नो इति

यदा पूर्वसृष्टिः प्रलयोत्तरसृष्टिश्च नोत्पन्ना तदानीं सदसती द्वे अपि नाभूताम् । नामरूपविशिष्टत्वेन स्पष्टं प्रतीयमानं जगत् सच्छब्देनोच्यते । नरविषाणादि-समानं शून्यं असदित्युच्यते । तदुभयं नासीत् । किन्तु कश्चिन काचिदव्यक्तावस्था आसीत् । सा च विस्पष्टत्वाभावात् न सती जगदुत्पादकत्वेन सद्भावात् नाप्यसती । नोसदासीदिति यत् सद्ग्रहेणोक्तं तदेव प्रपंच्यते - नासीद्रजो । रजश्शब्देन सत्वरजः-तमोगुणात्रयमुपलक्ष्यते । तत् त्रयं नासीत् । नो व्योम आकाशवाचिना व्योमशब्देन भूतपंचकमुपलक्ष्यते । तदपि नासीत् । यथोक्तगुणात्रयपंचभूतापेक्षया परः पदार्थः अन्यः गिरिनदीसमुद्रादिकः यो दृश्यते सो पि नासीत् । यथा भूतानि नासन् तद्वत् भौतिकमपि नासीदित्यर्थः । अनेन भूतभौतिकगुणात्रयनिषेधेन ब्रह्म ब्रह्माण्डस्य निषेधः संपन्नः । अण्डाद्बहिः महत्तत्वाद्यावरणानि पौराणिकाः वदन्ति - तदेतदावरणजातमाद्यौपवाचिना किं शब्दत्रयेण निष्पद्यते । आवरणस्य दृष्टि-विष्यभूतं किंचिदाव्रियमाणमपेक्षितम् । तत्र अण्डाभावात् किमावरीवः किन्नाम वस्तु तैरावरणैराव्रियते । अतः सावरणकस्यासंभवात् आवरणमपि कुहेति देशाक्षेपः । निमित्ताक्षेपः कस्य शर्मन्निति । कुत्र देशे कस्य भोक्तुः सुखनिमित्तमिदमावरणं स्यात् । नत्वस्ति तदा कश्चिद्देशो वापि सुखस्य भोक्ता विद्यते । अत्र कश्चित् मन्दः अवान्तरप्रलयविषयान् -

'आपो वा इदमग्रे सलिलमासीत्'

इति श्रुतिं श्रुत्वा महाप्रलयेऽपि तथा विधं जलमस्तीति भ्राम्यति । तद्भ्रमव्युदासाय जलं निषिध्यते । गहनं प्रवेष्टुमशक्यं, गभीरं- अगाधत्वेनावस्थातुमपि अशक्यं यदम्भः किमासीत् ? तदापि नासीदित्यर्थः ।

अथ द्वितीयामृचमाह - न मृत्युर्नामृतं तर्हि न ।

तर्हि- तस्मिन् महाप्रलयकाले मृत्युर्नासीद्- एककमेव प्राणिनां मृत्युः नासीत् तेषामेवाभावात् । अत एवामृतं जीवनमपि नासीत् । न रात्र्याः प्रकेतः-

चिह्नं चन्द्रनक्षत्रादि चिह्नः प्रकेतः सूर्यः तदुभयमपि नासीत् । किन्तु तत् सर्वो-
निषत्-प्रसिद्धम् एकं वस्तु ब्रह्म स्वधया स्वस्मिन्नाश्रितया सर्वजगत्कारणरूपया मायया
सहितमानीत्- चेष्टितवत् । नात्र चलनं चेष्टा किन्तु सद्भावमित्यभिप्रेत्य अवात-
मिति विशिष्यते । वायुरहितं निश्चलमित्यर्थः । तस्मात्- एकस्माद्ब्रह्मणः
अन्यत् किं च । किमपि परं- उत्कृष्टं नास- नैव आसीत् । अस्य जगतः
निषिद्धत्वात् निकृष्टं पूर्वमेव निराकृतम् । तस्मात् उत्कृष्टं निकृष्टं च किमपि
ब्रह्मव्यतिरिक्तं नासीत् ।

अथ तृतीयामाह - तम आसीत्तमसा इति ।।

तमसा तमश्शब्देन अविद्या, माया, शक्त्यादि शब्दवाच्यं जगद्विकारो-
पादानं मूलाज्ञानमुच्यते । यथा तमः पदार्थानावृणोति एवमिदमपि ब्रह्मतत्त्वमा-
वृणोतीति तमश्शब्देन व्यवहारः । तादृशं जगद्विकारनिष्पदनक्षमं ब्रह्मण्याश्रितं
किंचितम आसीत् । तेन तमसा सर्वं जगद्गूढं, यथा मृत्पिण्डे घटो गूढः यथा वा
बीजे भूमि वृक्षो गूढः तद्वत् । अत एव अप्रकेतं- प्रकर्षेण ज्ञातुमशक्यम् । तथा च

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।।'

(मनु इति मनुना स्मर्यते । तत्र दृष्टान्तः- सलिलमिति । यथा वर्षे पतिताः
वर्षोपलताः सलिलमात्रत्वेनावशिष्यते । तथा सर्वं जगदिदं तम आसीत्, तमोमात्र-
रूपेणावशिष्टमित्यर्थः । अत्र हि कणादादयः असत्कार्यवादिनः कारणे पूर्वम-
विद्यमानमेव कार्यमुत्पाद्यत इत्याहुः । सत्कार्यवादिनस्तु सांख्यादयः पूर्वं विद्यमान-
मेव कार्यमव्यक्तं सत् कारणव्यापारेण व्यक्तीभवति इत्याचक्षते । तत्र सत्कार्य-
वादिनां मतमेव तमसा गूढमिति श्रुत्या अंगीकृता । नासन्ताद्भवत्युत्पद्यत इति
आभुत् जगत् तदेतत् तुच्छेन अपिहितम् । तत्त्वज्ञानमात्रेण निवर्त्यत्वात् तत् तत्कारणं
मूलाज्ञानं तुच्छं तेनापिहितं- प्रलयकाले प्रलयकाले आच्छादितम् । तादृशं जगदा-
सीत् तज्जगत् अव्यक्तं सत् पूर्वोक्तात् अज्ञानरूपात् तमसः सकाशात् महिना- महत्त्वेन
अभिव्यक्तजगद्रूपेण अजायत- उत्पन्नम् । तदिदं अज्ञानदृष्ट्या जगदाकारेण
भासमानमपि परमार्थतः एकं ब्रह्मैव ।

का/ चतुर्थीमाह - कामस्तदग्रे इति

ब्रह्मसंबन्धिन: मनस: प्रथमं रेत: आद्यकार्यं तदा आसीत् तत्कार्यं अग्रे- सृष्ट्यादौ कामो भूत्वा अधि समवर्तत- आधिक्येनाविर्भूत । अयमर्थ: - यदेतदेकमेवाद्वितीयं सत्यं ज्ञानमानन्दं ब्रह्मेत्येवं रूपं वस्तु सृष्टे: पूर्वं तमसा आवृतमासीत् । तस्य तमोविशिष्टस्य ब्रह्मण: सिसृक्षारूपं यन्मन: आदावुत्पन्नं तस्य मनस: काम एव प्रथमकार्यभूत: पदार्थ: । स च काम: उपनिषदि स्पष्टमाम्नात: -

'सोऽकामयत बहु स्यां प्रजायेय'

इति एको द्वितीयरूप: अहमेव बहुविधो भवेयम् । तत्रायमुपाय: - पूर्वमवस्थित-मद्वितीयरूपमनुपमृद्य प्रकर्षेण मायाकल्पितजगद्रूपेण उत्पद्येयेति तस्य वाक्यस्यार्थ: । स च काम: सतो बन्धु: इदानीं सत्त्वेन प्रतीयमानस्य भूत-भौतिकरूपस्य जगत: असच्छब्दाभिधेयेन तमसि अव्यक्ते बन्धनहेतु: । कामो म इयज्ञाने सर्वं व्यवहारं बध्नाति । यथा निद्रोणे पुरुषे समुत्पन्ना चित्तवृत्ति: नानाविधं स्वप्नव्यवहारं बध्नाति, यथा वा जागरणेऽपि अत्यन्तमलभ्ये विषये समुत्पन्ना तृष्णा सुख सुखदु:खपर्यन्तं मनोराज्यरूपं व्यवहारं बध्नाति । कवय: विद्वांस: वेदान्तपारंगता: हृपद-हृदयकमले, मनीषा- स्वबुध्या, प्रतीष्या- विचार्य असति अव्यक्ते तमसि कामं सत: उत्पत्स्यमानस्य जगत: बन्धुं- बन्धनहेतुं निरविन्दन्- निश्चितवन्त: । कामस्य सर्वव्यवहारहेतुत्वं वाजसनेयिन: समामनन्ति -

'अथो खल्वाहु: - काममयमेवायं पुरुष:'

इति । व्यासोऽपि स्मरति -

'कामबन्धनमेवेदं नान्यदस्तीह बन्धनम् ।'

इति । अस्मादनुभवोऽपि तथा दृश्यते । सर्वो हि पुरुष: प्रथमं किंचित् कामयित्वा तदर्थं प्रयतमाना: सुखं दु:खं वा लभते । तस्मात् श्रुतिस्मृत्यनुभवसिद्धत्वात् काम एव सर्वव्यवहारहेतुरिति विदुषां निश्चय: ।

अथ पंचमीमाह - तिरश्चीनो इति

रश्मि:- सूर्यरश्मिसमान: कश्चित् स्वयंप्रकाश: चैतन्यपदार्थ: । एषां

भूत-भौतिकरूपाणां जगद्वस्तूनां मध्ये तिरश्चीन:- तिर्यग्वर्तमान: विततः- व्याप्त: स: चैतन्यरूप: परमात्मा अमीषां पदार्थानां अधोभागे व्यवस्थित: । किं वा उपरिभागे व्यवस्थित: स्विद् शब्दो विकल्पितपदाद्वयसूचनार्थौ । प्लुति: विचारद्वयद्योतनार्था । अयमभिप्राय: - सोऽयं प्रकाश: कश्चित् चैतन्यपदार्थ: सर्वेषां वस्तूनां मध्ये पर्यालोच्यमान: दीर्घतन्तुवत् तिर्यग्भूत: व्याप्यावभासते । अध: यत्र पर्यालोच्यमान: तत्रापि अवभासते । उपरि पर्यालोच्यमान: तत्राप्य-वभासते । तस्मात् अध: ऊर्ध्वं मध्ये च भासमानत्वात् स्कत्रैव अवस्थित इति वक्तुमशक्य इति । यथा घटस्य उपादानभूत: मृत्पिण्ड: घटस्य अध: ऊर्ध्वं मध्यभागेषु सर्वेष्वनुवर्तते । एवं तत्तत्पदार्थोपादानानि तत्तत्कार्येषु व्याप्यैव वर्तन्ते । एवमयं परमात्मा अपि स्वकार्येषु व्याप्य वर्तमानस्सन् अध: आसीदित्येव वा उपरि आसीदित्येव वा निश्चेतुमशक्य इति । सर्वे एते पदार्था: भूत-भौतिकरूपा: पूर्वोक्तस्य विततरश्मिरूपस्य स्वप्रकाशचैतन्यस्य रेतोधा:- साररूप-धारिण: आसन् । तत्र विदेकरसस्य हि वस्तुन: सद्रूपं सारं तच्च सर्वे पदार्था: धारयन्ति अस्ति अस्तीत्येव स्वरूपेणैव सर्वेषामवभासमानत्वात् । ते च सद्रूपधारिण: सर्वे महिमान: गिरिनद्यादिरूपेण महान्त: आसन् । एवं स्वधाशब्दवाच्यमाया अविद्यादिशब्देनाभिधीयमाना परमेश्वरी शक्ति: अवरस्तात् अधमं कारणम् । प्रयति: सा शक्ति: प्रयतते यस्मिन् परमात्मनि सोऽयं शक्तिप्रयत्नाधार: परमात्मा प्रयति: । स च परस्तात्- परं उत्तरं कारणम् । तावेतौ शक्ति-परमात्मानावेव जगत्कारणभूतौ प्रकृतिपुरुषाविति शास्त्रेषु व्यपदिश्यते ।।।

अथ षष्ठीमाह - को अद्धा वेद इति

अत्र केचित् आगममुपेक्ष्य स्वस्वबुद्धिबलात् अन्यथा अन्यथा उत्प्रेक्षन्ते । तथा हि - परमाणव: मूलकारणमिति कणादि-गौतमादयो मन्यन्ते । स्वतन्त्रम-चेतनं प्रधानं जगत: मूलकारणमिति कपिलप्रभृतय: । शून्यादित: जगदुत्पत्तिरिति माध्यमिका: । जगत: कारणमेव नास्ति, स्वभावत एव अवतिष्ठत इति लोकायतिका: । ते सर्वेऽपि भ्रान्ता एव । का अद्धा वेद- जगत्कारणं को नाम पुरुष: साक्षादवगच्छति । अनवगत्य च क इह प्रवोचत् । स्वयमदृष्ट्वा को नाम

जगत्कारणमीदृगिति वक्तुं शक्नोति । कोऽयमत्र वक्तव्यांश इति चेदुच्यते - इयं विविधासृष्टिः कुत आजाता, कस्मादुपादानकारणात् सर्वतः उत्पन्ना, पुनरपि कुतो निमित्तादुत्पन्ना इति तदिदमुपादानं निमित्तं च वक्तव्यम् । वक्तुमशक्यं कुतो (इत्यत्र)- अशक्यमिति चेदुच्यते - किं देवाः एतद्ब्रुयुः उत क अन्यः कश्चिन्मनुष्यः । न तावद्देवाः वक्तुं शक्ताः, तेऽस्य जगतः विसर्जनाय विविधसृष्टेः अर्वागेव विद्यन्ते । न तु सृष्टेः पूर्वं ते सन्ति । यदा देवानामपि ईदृशी गतिः तदानीं यतो जगदाबभूव तत्कारणं वक्तुं अन्यः को वा वेद । किञ्च देवाश्च मनुष्याश्च सृष्टेः प्रागवस्थानं न तावत् प्रत्यक्षेण पश्यन्ति तदानीं स्वयमेवाभावात् । नाप्यनुमातुं शक्ताः तयोग्ययोः हेतुदृष्टान्तयोरभावात् । तस्मात् अतिगंभीरमिदं परमार्थतत्त्वं वेदैकसमधिगम्यमित्यभिप्रायः ।

अथ सप्तमीमाह - इयं विसृष्टिरिति ।

इयं दृश्यमाना भूतभौतिकरूपा विविधा सृष्टिः यस्मात् उपादानकारणात् आबभूव पूर्वतः उत्पन्ना तदुपादानकारणं यदि वा किंचित्स्वरूपं धृत्वा अवतिष्ठते, यदि वा तस्य स्वरूपमेव नास्ति तमिमं निर्णयं यः परमेश्वरः अस्य जगतः अध्यक्षः, स्वामी सो अंग वेद यदि वा सोऽपि न वेद । ईशित्रीशितव्यानि लौकिकव्यवहारदृष्ट्या सो अंग वेद इत्युक्तम् -

'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्'

इत्यादिसर्वव्यवहारातीतपरमार्थदृष्ट्या यदि वा न वेद इत्युक्तम् । अतः मनुष्यादिषु तद्वेदनशंका अपि दूरापेता ।

इति समाप्तं तैत्तिरीयब्राह्मणस्थस्य नासदासीयसूक्तस्य सायणभाष्यम् । विपश्चिद्भिर्मर्शकाः एवमेव हिरण्यगर्भसूक्तम् वागाम्भृणीसूक्तं च समवलोकयन्त्विति ।।

इति शम्

३ तृतीयोऽध्यायः

ऐतरेयोपनिषदि अद्वैतसिद्धान्ताः

३० ऐतरेयोपनिषद्भाष्यसमीक्षणम्

ऐतरेयोपनिषदि प्रतिपादिताः केचन सिद्धान्ताः अत्र निरूपयिष्यन्ते । तत्र प्रथमतः उपनिषदिति शब्दस्य व्युत्पत्तिः क्रियते -

उपनिषत्- रहस्यविज्ञानं - ब्रह्मविद्या इत्यतः उपनिषच्छब्दः ब्रह्मविद्यावाचको भवति । तद्यथा - उपनिषदित्यत्र उप इति उपसर्गस्य सामीप्यमर्थः । मुख्यं सामीप्यं सर्वेषां जीवानां प्रत्यगात्मन्येव भवति । तस्मिन्नेव परमात्मनि सामीप्य-तारतम्यस्य विश्रान्तिदर्शनात् । नि इति उपसर्गस्य निश्चयो अर्थः । तथा पाणिनिना षदल् धातुः विशरणगत्यवसादनार्थेषु स्मर्यते । एवं च षद् धातोः उपनिपूर्वस्य क्विप्प्रत्ययान्तस्य उपनिषत् इति रूपं निष्पद्यते । सहेतुसंसारनिवर्तक-ब्रह्मात्मैक्य ज्ञानलक्षणां विद्यामभिदधातीति । सा तु प्रत्यगात्मनि ब्रह्मणः अत्यन्ताभेदलक्षणं शास्त्रनिश्चितं सामीप्यं प्रकाश्य मिथ्याज्ञानलक्षणं सहेतुं संसारं सादयति इति । तथा चोक्तं सुरेश्वराचार्यैः स्ववार्तिके -

उपनीयेममात्मानं ब्रह्मापास्तद्वयं स्वतः ।।
निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत् ।+
निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम् ।।
गमयत्यस्तसंभेदमतो वोपनिषद्भवेत् ।
प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः ।।
यतो वसादयेद्विद्या तस्मादुपनिषन्मता ।

(सुरे० वा० ५-८) इति । अस्यामुपनिषदि सूक्ष्मरूपतया बहवो सिद्धान्ताः प्रतिपादिताः सन्ति । एते सिद्धान्ताः अत्र विस्तरत्वेन न प्रतिपादयिष्यन्ते, यतः अद्वैतवेदान्तेषु मुख्यभूताः कानिचन सिद्धान्ताः उपसंहारप्रकरणे व्याचिख्यास्यन्ते

तस्मादत्र श्रुतिषु दिङ्मात्रेण उक्ता: सिद्धान्ता: यथाक्रमं निरूपयिष्यन्ते ।।

३ १ ब्रह्मतत्त्वम्

एवं निरुक्तोपनिषदि प्रतिपादित आत्मा त्रिविध: - गौण: मिथ्या मुख्यश्चेति । तत्र यथा सिंहदेवदत्तयो: भेदं पश्यन्नेव सिंहगतक्रौर्यशौर्यादिसदृश-गुणानां देवदत्ते सद्भावमवलोक्य सिंहो यमिति व्यवहरति तथा पुत्रमित्रादिगौणात्मा स्वस्माद्भेदं पश्यन्नेव चनरक्षणादिरूपं तत्सुखदु:खसदृशसुखदु:खादिमत्त्वरूपं स्वकीयं गुणं तस्मिन्नवलोक्य ममात्मा अयं पुत्र:, मित्रो देवदत्त इति य: प्रयुंक्ते स: गौणात्मा भवति । मिथ्यात्मा तु यथा मन्दान्धकारे अरण्ये धावन्तं हरिणं दृष्ट्वा भ्रान्त्या सिंहो यमिति निश्चित्य बिभेति तथा मिथ्यारूपा: देहेन्द्रिया-धनात्मवर्ग: , अविद्याया: तेषु अहमिति प्ररूढो व्यवहार: सार्वजनीनो भवति । अन्तिम: मुख्यात्मा ~~अथवा~~ यथा वा निजसिंहं पश्यति तथा नित्यशुद्धबुद्धमुक्तस्वभाव: अद्वैतानन्दघनरस: शास्त्रैकगम्यो भवति । तथा च उपनिषच्छास्त्रं- 'सर्वे वेदा: यत्पदमामनन्ति' (कठ० २-१-५) नावेदविन्मनुते तं बृहन्तं' (तै० ब्रा० ३-१२-६-७) 'तन्त्वौपनिषदं पुरुषं पृच्छामि' (बृ० उ० ३-६-२६) 'न ~~सिद्धान्ते~~ सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्' (श्वे० उ० ४-२०) 'अशब्दमस्पर्शम-रूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्' (कठ० १-३-१५) 'न तत्र चक्षुर्गच्छति' (केनो० १-३) इत्यादय: श्रुतय: द्रष्टव्या: । तस्मात् आत्मदेहयो: विद्यमानस्यैव भेदस्य अविद्यया प्रतीत्यभावात् अहं मनुष्य इत्यादिप्रत्यय: मिथ्यात्मविषयप्रत्यय इति सिध्यति । एवं रूप: स आत्मा -

'श्रोतव्यो मन्तव्यो निदिध्यासितव्य:'

(बृ० उ० २-४-५) इति श्रुत्युक्तदिशा स्वावधेयो भवति । तथा च भवति ऐतरेयोपनिषद्वाक्यम् -

'एष ब्रह्मैष इन्द्र: एष प्रजापति: -------
प्रज्ञातिष्ठा, प्रज्ञानं ब्रह्म ।'

(ऐ० उ० ५-३) इति । अत्र शंकराचार्य: अस्या: श्रुते: एवमर्थमभिप्रयन्ति -

एष: प्रज्ञानरूप: सर्वात्मपो यं ब्रह्म सर्वशरीरस्थ: सन् अन्त:करणाद्युपाधिषु अनुप्रविष्ट: प्रतिबिम्बसूर्यवत् हिरण्यगर्भादिरूपेण प्रतिभाति । स एव इन्द्र प्रजापतिरूपेण च शरीरगुणत्वेन उपासकानां पुरत: साक्षात् भवति । अस्य प्रजापते: मुखादिभि: द्वारै: अग्न्यादयो लोकपाला: जाता: भवन्ति । अग्न्यादिदेवरूपेणैकेनाद्ययमेव तिष्ठति । एवं भूतभौतिकादीनि सर्वशरीरोपादानभूतानि सर्वं स आत्मा भवति । एवं भवति अभूत् भविष्यति च यदत् सर्वं तत्प्रज्ञानेत्रं भवति । प्रज्ञप्ति: प्रज्ञा तच्च ब्रह्मैव, नीयते अनेनेति नेत्रम्, प्रज्ञानेत्रं यस्येति प्रज्ञानेत्रम् । तथा चोत्पत्तिस्थितिलयकालेषु ब्रह्मणि प्रतिष्ठितं प्रज्ञानं प्रज्ञाश्रयमिति यावत् । सर्वस्य जगत: प्रज्ञा प्रतिष्ठा । तस्मात् प्रज्ञानं ब्रह्म इति । अनया श्रुत्या ब्रह्मण: निरुपाधिकत्वं सार्वात्म्यत्वमेकत्वमधिष्ठानत्वं उपाधिरूपेणावभासकत्वं च सिध्यन्ति । अत एव स: प्रत्यस्तमितसर्वोपाधिविशेषं सर्वशब्दप्रत्ययगोचरं शान्तमद्वयं विशुद्धप्रज्ञोपाधिसंबन्धेन सर्वज्ञं, सर्वसाधारणाव्याकृतजगद्बीजप्रवर्तकं नियन्तृत्वात् अन्तर्यामिसंज्ञां लभते । एवमत्र अन्या अपि श्रुतय: भविष्यन्ति -

'ब्रह्म तं परादा ------ इदं सर्वं यदयमात्मा'

(बृ० उ० २-४-६) इति । अस्या: भावार्थ: - आत्मव्यतिरेकेणान्यत् किंचित् नास्ति । यदस्ति न तद्विदितं स्यात्, न तु अन्यदस्ति । सर्वमात्मैव भवति । तस्मात् आत्मनि विदिते सर्वं विदितं स्यात् । यस्मात् सर्वमात्मन: जायते, अस्मिन्नेव लीयते, स्थितिकालेऽपि सर्वमात्ममयं भवति, आत्मव्यतिरेकेण कस्यचिदपि अग्रहणात् सर्वमात्मैवेति । अन्या श्रुति: -

'स वा अयमात्मा सर्वेषां भूतानामधिपति: ---
सर्वे एते आत्मन: समर्पिता:'

(बृ० उ० २-५-१५) इति । श्रुते: सारांश: - यस्मिन् आत्मनि परिशिष्टो विज्ञानमय: अन्त्ये पर्याये प्रवेशित: सो यमात्मा भवति । तस्मिन् अविद्याकृतकार्यकरणसंघातविशिष्टे शरीरे ब्रह्मविद्यया परमार्थात्मनि प्रवेशिते सति स एव मुक्तस्सन् अनन्तरो बाह्य:कृत्स्न: प्रज्ञानघन: अखण्डैकरसो भवति । तस्मादात्मविज्ञानादेव इदं सर्वं विज्ञानं भवति । तथा च अस्मिन्नात्मनि परमार्थभूते ब्रह्मणि सर्वाणि

भूतानि ब्रह्मादिस्तम्बपर्यन्तानि,सर्वे अग्न्यादयो देवा: भूरादयो लोका: वागादय: सर्वे प्राणा: जलचन्द्रवत् सर्वे एते आत्मन: शरीरानुप्रवेशिनश्च अविद्याकल्पिता: भवन्ति । तथा च ऋङ्मन्त्र: -

'अहं भूमि मनुरभवं सूर्यश्च' (ऋ० सं० ४-२६-१)

इति । तस्मात् स ब्रह्म सर्वात्मा निरुपाधिकश्च । तथा चानुभव: - 'सुखमहमस्वाप्सम्' इति सुप्तोत्थितस्य पुरुषस्य स्वापसुखपरामर्शदर्शनात् स्वापे स्वरूपभूतमेव सुखमनुभूतमिति । अत्रायमाक्षेप: -

ननु सुषुप्तौ दु:खाभाव एवानुभूयते न तु सुखम्, तज्जनकसामग्र्यभावात् । जन्यसुखाभावेऽपि नित्यं स्वरूपसुखं निर्विकल्पकमनुभूयत इति नच वाच्यम् । विषयानन्दातिरिक्तस्वरूपानन्दे मानाभावात् । यदि सुषुप्तौ ब्रह्मानन्दो नुभूयते, तर्हि 'कामिनीमन्तरेणेयं यामिनी विरसा गता' इति सुप्तोत्थितानां विषयासक्तानां कामुकपुरुषाणां तच्छेन्द्रियसुखहानिनिमित्तको निर्वेद: कथमपि नोपपद्यत । को हि नाम महान्तमानन्दमनुभूय स्वल्पेन्द्रियसुखार्थे शोकं कुर्यात् ? तस्मादात्मन: स्वापे सुखरूपानन्दत्वमसिद्धं भवति । एवं जागरेऽपि विषयेन्द्रियसंयोगादेव जायमानमनित्यं सुखं सर्वे नुभवन्ति, नित्यमात्मभूतं सुखं तु न केनापि अनुभूयते । अपि चात्मन: सर्वत्र सदा सिद्धत्वात् नित्यत्वाच्च तद्रूपस्य सुखस्यापि तथात्वात् जगत्यस्मिन् न केनापि दु:खमनुभूयते ? सुखार्थं साधनान्वेषणा च विलुप्येत । अत: जागरितेऽपि आत्मन: सुखात्मत्वमसिद्धमिति चेत्-

अत्रोच्यते । सुप्तोत्थितस्य विषयसुखसामग्र्यभावेऽपि तूष्णीभावप्रसादादिलिंगदर्शनेन अनुभूतसुखसंस्कारसंभवात् । न हि सुषुप्तौ स्वरूपसुखानुभवं विना स संभवति, आकस्मिकत्वापत्ते: । न च तत्र दु:खाभाव एवानुभूयत इति वक्तुं युक्तम्, सत्येवं दु:खाभावाभावावरदिर्ण न सुखमिति परामर्शप्रसंगात् । इष्टापत्तिरिति चेत् सुखमहमस्वाप्समिति परामर्शविरोधात् । अपि च स्वापसमये धर्मिग्रहणमन्तरेण कथमभावानुभव: स्यात् ? तथा च धर्मिग्रहणाद्यभावे सति दु:खाभावानुभवासंभवात् । परिशेषात् विषयसुखानुभवासंभवे सति स्वरूपसुखस्यैव स्वयंप्रकाशत्वेनानुभव: तत्र समाश्रयणीय: । अनेन विषयानन्दातिरिक्तस्वरूपा-

तिरिक्तस्वरूपानन्दे प्रामाण्यमप्युपदर्शितम् । किंच तुच्छं विषयसुखमनादृत्य समाधिदशायां महद्भिः परमाप्तैः सिद्धैः सनकवामदेवादिभिः अप्रतिबद्धेनानुभूतस्य निर्विषयस्य स्वरूपसुखस्य, शास्त्रोक्तशुभकर्मभिः फलत्यागेन सत्त्वशुद्धिभगवदनुग्रहसंपादनद्वारा भूयोभिः मुमुक्षुभिः एकान्ततः काम्यमानस्य तस्य स्रवणयलम्पटादिमात्रेणापलापः कर्तुं न शक्यते । श्रुतिस्मृत्यनुभवविरोधप्रसंगात् । अपि च स्वापे अज्ञानेन स्वस्वरूपभूतस्य ब्रह्मानन्दस्याच्छादितत्वात् मूढाः तं सामान्यतो जानन्तोऽपि विशेषतो न जानन्ति, अत एव तेषां पूर्वोक्तः सप्रलापे निर्वेदः उपपद्यत एव । तस्मात् सुषुप्तौ आत्मनः सुखरूपत्वं सिद्धम् । तथा च श्रुतिः -

तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तः
न विन्देयुरेवमेवेमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं
ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः ।'

(छा० उ० ८-३-२) इति श्रूयते । अस्यार्थः - प्रजाः- जीवाः अहरहः- प्रतिदिनं सुषुप्तौ ब्रह्म गच्छन्त्योऽपि स्थूलसूक्ष्मोपाधिलयेन तदभिमानकृतब्रह्मभेदशून्या अपि ब्रह्म स्वप्रकाशमिति न जानन्ति, हि- यस्मात् , अनृतेन- मिथ्याभूतेनाज्ञानेन, प्रत्यूढाः- आच्छादितस्वरूपकाः, सन्तः न विन्दन्तीति यावत् । अत्र ऋतं- सत्यं ब्रह्म, तद्भिन्नमनृत मज्ञानमिति । एवं जागरितेऽपि विषयेन्द्रियसंयोगस्य सुखजनकत्वं नास्ति, प्रत्युत तस्य पुनः पुनः अधिकतृष्णाया सर्वथा दुःखजनकत्वमेवास्ति । प्रसिद्धं हि तृष्णा दुःखहेतुरिति । तथा चोक्तं भर्तृहरिणा वैराग्यशतके -

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं
क्षुधार्तः शाल्यन्नं कवलयति सूपादिकलितम् ।
प्रदीप्ते कामाग्नौ सुदृढतरमालिंगति वधूं
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः ।।

(भर्तृ० वै० श०) श्लोक इति । तस्मात् विषयेन्द्रियसंयोगादेव जायमानमेव सुखं सर्वेऽपि अनुभवन्तीति कथनं भ्रान्तिनिदानत्वेन अलीकमेव भवति । अपि च यो हि स्वाभीप्सितविषयालम्भे सति विषयमिलाषकाणां तात्कालिकमनश्शान्तिलेशनिबन्धनः तात्कालिकः कश्चन सुखाभासो लक्ष्यते सोऽपि नित्यस्यात्मसुखस्यैव

प्रतिबिम्बभूतः अनुभूयते न तस्मात् पृथग्भूत इति । तस्मात् सर्वमनवद्यम् । आनन्दरूपो ऽयं ब्रह्म सुखस्वरूपश्चेति सिद्धम् ।

किं च यदि विषयेभ्य एव ऐकान्तिकी सुखप्राप्तिः स्यात् तर्हि न कोऽपि विश्रान्तिलाभाय सुषुप्त्यवस्थायामनुधावेत् । विविधविषयविभ्रान्तचेतसो हि पुरुषाः तादृशान् विषयानवधूय विसृज्य च दूरतः तदभिलाषं, मृदुलतरशय्यायां शयानाः सन्तः, नयने च निमील्य सम्यक् प्रसार्य च पाणिपादान्, निद्राभिमुखीं चित्तवृत्तिं आश्रित्य, विस्मृत्य च बाह्याभ्यान्तरसुखदुःखभेदान्, सौषुप्तसुखस्य सर्वोत्कृष्टत्वमभिमन्यमानः विश्रान्तिकामनया सुषुप्त्यावस्थामनुधावन्तीति सार्वजनीनं भवति । तत्तु सौषुप्तसुखं च विषयानभिव्यंग्यतया देशकालादिपरिच्छेदरहिततया च परमानन्दरूपं ब्रह्मैवेति । तद्योगादेव च जीवस्य तदा सुखाविर्भावः, तदर्थमेव च जीवस्य प्रत्यहं सुषुप्त्यवस्थामनुधावनमित्यत्रैव सर्वासामुपनिषदां उद्घोषः । तस्मात् विषयाणां सुखसाधनत्वाभिमानः भ्रान्तिनिबन्धन एव भवति । सर्वथाऽपि चित्तोपशान्त्यैव कश्चिदानन्दाभासः प्रादुर्भवतीति तु निर्विवादम् । स चानुभूयमानः आभासरूपानन्दः शाश्वतब्रह्मानन्दस्यैव प्रतिबिम्बो भवति ।

अपि च यदुक्तमात्मभूतस्य सुखस्य सदा सिद्धत्वात् नित्यत्वाच्च जगत्यस्मिन् केनाऽपि दुःखं नानुभूयते, सुखार्थं साधनान्वेषणा च विलुप्येतेति अस्य समाधानम् - सदा सिद्धस्य नित्यस्याप्यात्मभूतस्य सुखस्य आवरणशक्तिमत्या अविद्यया आच्छादितत्वात् विक्षेपशक्तिमत्या तथा तद्विपरीतस्य दुःखस्य उद्भासितत्वाच्च तदनुभवो न विरुध्यते । ससाधनेन पुरुषार्थ प्रयत्नेन उपाधिनैर्मल्यापादने सति तदभिव्यक्तिसंभवात् साधनान्वेषणाऽपि लुप्ता न स्यात् ।। तस्मात् मूढैः कल्पितं विषयसुखमपि स्वरूपसुखमेव न ततो अतिरिक्तमिति अवसितो आनन्दरूपताविचारः । सिद्धमानन्दरूपं ब्रह्मेति । तथा च श्रुतिः -

> आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि
> भूतानि जायन्ते । आनन्देन जातानि जीवन्ति ।
> आनन्दं प्रयन्त्यभिसंविशन्तीति ।'

(तै० उ० ३-६) इति ।

एवमेव ब्रह्मण: सर्वात्म्यं व्यापकत्वं च बोधयतीयमैतरेयश्रुति: -

'तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदिन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण'

(ऐ० उ० ३-१४) इति। श्रुतेरर्थ: - आकाशादिवत् व्याप्ततमं सृष्ट्यादिकर्तृत्वेन प्रकृतं यत्साक्षादपरोक्षाद्ब्रह्म सर्वान्तरमपश्यत न परोक्षेण। तस्मात् इदं पश्यतीति इन्द्रो नाम परमात्मा स एव प्रसिद्ध: लोकेश्वर:। अमुमेव ब्रह्मविद: सव्यवहारार्थं परोक्षाभिधानेन आचक्षते सर्वदेवानामपि देवो ईश्वर इति।

उपाधिवशात् स एव ब्रह्म बहुधा भासते। तथा च श्रुति: -

'स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति। सो द्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्।'

(ऐ० उ० १-३) इति। + श्रुतेरर्थ: - स परमात्मा सर्वप्राणिकर्मफलोपादाना-धिष्ठानभूतात् अंभादिचतुरो लोकान् सृष्ट्वा पुनरपि स ईक्षत। कथमिति ? मया इमे चत्वार: लोका: सृष्टा: अभवन्। सृष्टिंगता एते लोका: यदि परि-परिपालयितृवर्जिता: भवेयु: तर्हि अवश्यं विनश्येयु:। अत: लोकानां रक्षणार्थमहं लोकानां पालयितृन् सृजे। अनन्तरं स्वात्मना तत्र अवस्थानार्थं शिर:पाण्यादिमन्तं पुरुषं समुद्धृत्य स्वावयवसंयोजनेन मूर्च्छितवान् । यथा कुलाल: पृथिव्या: मृत्पिण्डमिव। जीवरूपेणावस्थितस्य स्वस्योपभोगार्थमेव पंचभूतानि भौतिकप्रपंचं च स परमात्मा असृजत्। एवं चाद्वितीय: स एक: ब्रह्म उपाधिवशेन जीवेन, जीवस्य भोग्यप्रपंचरूपेण बहुधा अभवदिति।

ब्रह्मण: स्वातन्त्र्यनिरूपणं प्रतिपादयतीयं श्रुति: -

'स ईक्षते मे नु लोकाश्च लोकपालाश्च अन्नमेभ्य: सृजा इति।'

(ऐ० उ० ३-१) इति। भावार्थ: - स: परमात्मा इमे लोका: लोकपालाश्च मयैव सृष्टा: भवन्ति, तथैव ते लोकपाला: जनाश्च तद्भोग्यप्रपंचे अशनपिपासाभ्यां मया संयोजिताश्च इति ईक्षितवान्। ततश्च ईक्षत एतेषां व्यावहारिकस्थिति: अन्नमन्तरेण न संभवति इति। तस्मात् एतेषामर्थं अन्नरूपं भोग्यप्रपंचं सृजे इति। एवं तस्य सर्जनरूपहेतौ स्वातन्त्र्यमेव कारणं भवति। यथा लोके ईश्वरस्य प्रसादे

निग्रहे च स्वातन्त्र्यं विद्यते जनानां च स्वातन्त्र्यं तद्‌ तस्य ब्रह्मण: सर्जने, अप्रुष्टौ च स्वातन्त्र्यं सर्वथा वर्तत इति ।

तस्य ब्रह्मण: सोपाधिकत्वं श्रुतिरेव प्रतिपादयति -

'यदेतद्धृदयं मनश्चैतद्‌ । संज्ञानमाज्ञानं ----------
कामो वश इति । सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि
भवन्ति ।'

(ऐ० उ० ३-२) इति । श्रुत्यर्थ: स्पष्टार्थक: । एक एव ब्रह्म अनेकधा भवतीति ।।

ईश्वरस्य जगत: ईक्षितृत्वं प्रतिपादयतीयं श्रुति: -

'स ईक्षत लोकान्नुसृजा इति । स इमान्‌ लोकानसृजत ।
अंभो -------- ता आप: ।'

(ऐ० उ० १-१,२) इति । अत्रायं भाव: - सर्वज्ञ: स ईश्वर: अद्वितीय: सन्‌ स्थूल-सूक्ष्मरूपान्‌ भूत-भौतिकान्‌ प्रपंचजातान्‌ सृजामि इति ईक्षित । न केवलं ईक्षितृमात्रेण तथा भूत-भौतिकादीन्‌ ससर्ज च । तत्र प्रथमत: द्युलोकं तत: अन्तरिक्ष-पृथिव्यादिपातालान्तान्‌ लोकान्‌ ससर्जेति । अंभ इति । अद: तदंभश्शब्दवाच्यो लोक:, अंभो भरणात्‌ उच्यत: द्युलोक: अंभश्शब्दवाच्य: । अमुं द्युलोकं स: ससर्ज । अथ द्युलोकादधस्तात्‌ वर्तमानं यदन्तरिक्षं तद्‌ मरीचीशब्दवाच्य: । अमुं लोकं म्रियन्ते अस्मिन्‌ भूतानि इति मर:- पृथिवीम्‌ इमां च । पृथिव्या: अधस्तात्‌ वर्तमाना: पातालादयो लोका: आप इत्युच्यन्ते, लोका: आप्नुवन्तीति यावत्‌ । पातालादीन्‌ च स: ससर्ज इति । एवं च स: सर्वज्ञ ईश्वर: यथा विज्ञानवान्‌ मायावी निरुपादाने आत्मानमेव आत्मान्तरत्वेनाकाशेन गच्छन्तमिव निर्मिमीते, एवमयमपि सर्वशक्तिरूपे महामाये आत्मानमेवात्मान्तरत्वेन जगद्रूपेण निर्मिमीते इति सिद्धमस्य जगत्कर्तृत्वम्‌ इति ।।

एवं सृष्टस्य प्रपंचस्य तद्‌ ब्रह्म उपादानकारणं भवतीति श्रुतिरियं दृष्टान्तेन प्रतिपादयति -

'सोऽपोऽभ्यतपद्‌, ताभ्यो अभितप्ताभ्य: मूर्तिरजायत ।
या वै सा मूर्ति: अजायतान्नं वै तद्‌ ।'

(ऐ० उ० ३-२) इति । तात्पर्यार्थः - स ईश्वरः अन्नं सिसृक्षुः आप उद्दिश्य अभ्यतपत् । ताभ्यः उपादानभूताभ्यः अभितप्ताभ्यां अद्भ्यः चराचरलक्षणं धारणसमर्थं घनरूपमुत्पन्नम् । यत्तु मूर्तिरूपमन्नमेव । तथा च प्रसिद्धिर्लोके अद्भ्य एव अन्नमुत्पद्यत इति । एवं यथा तथा ब्रह्म सृष्टेषु पदार्थेषु सर्वत्र सद्रूपेण भासमानत्वात् वर्तमानत्वाच्च सृष्टिं गतस्य चराचरस्य भूतभौतिकात्मकस्य पदार्थ-जातस्योपादनं भवतीति सिद्धम् ।।

स एव ब्रह्म कार्यकारणसंघातेऽस्मिन् शरीरे प्रविशति इतीयं श्रुतिः वदति -

'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत । सैषा विदृतिर्नाम ---------- अयमावसथ इति ।'

(ऐ० उ० ३-१२) इति । अयं भावः - अयं परमात्मा जीवस्य मूर्धानं विदार्य केशविभागावस्थानं छिद्रं कृत्वा तेन द्वारेण कार्यकारणसंघातरूपं शरीरं प्रविवेश । तथाह्यनुभवः मूर्ध्नि तैलादिधारणकाले अन्तः तद्रसादिसंवेदनात् । इदं तु द्वारं केवलस्य परमेश्वरस्यैव भवति । अन्ते च सः अनेन मूर्ध्निद्वारेण सः गत्वा परस्मिन् ब्रह्मणि एकीभवति । जीवाभावापन्नस्य पुरुषशरीरप्रविष्टस्य तस्य आत्मनः राज्ञ इव पुरं त्रयः आवसथाः । तथा हि - जागरितकाले इन्द्रियस्थानं दक्षिणं चक्षुः, स्वप्नकाले अन्तर्मनः, सुषुप्तकाले हृदयाकाशः इति ते त्रयः । अथवा पितृशरीरं, मातृगर्भाशयः स्वं च शरीरमिति । एवं स एव ब्रह्म शरीरे प्रविष्टः सन् जीवात्मा इत्याम्नायते । अविद्यया जीवात्मभावेन वर्तमानः सः दीर्घकालं गाढं प्रसुप्तः सन् सकलानर्थान् अनुभूयमानः कार्यकारणसंघातः स्वाभाविकेनात्मज्ञानेन न प्रबुध्यते । तथा च स परमात्मा संसारी जीव इति नाम्ना अभिधीयत इति अवसितमैतरेयोपनिषदि प्रतिपादितं ब्रह्मतत्त्वप्रकरणम् ।।

इति शम्

---

३ २ आत्मैक्यवाद:

३ ३ २ आत्मैक्यवाद:

पूर्वस्मिन् ब्रह्मतत्त्वप्रकरणे ब्रह्म एव स्वलीलया बहुव्याकरणशील: सन् कार्यकारण-संघातममुं देहं प्रविश्य जीव: शरीरी इत्यादिना व्यपदिश्यत इत्युक्तं भवति । अधुना स: जीव: कर्मण: कर्ता तस्य फलस्य भोक्ता अपि सन् उपनिषज्ज्ञानेन आत्मसाक्षात्कारेण ब्रह्मणि एव एकीभवतीति, आत्मभिन्नमन्यत् किमपि वस्तु नास्ति दृश्यं सर्वं मिथ्या इति च प्रतिपाद्यते । तथा हि ऐतरेयश्रुति: -

'आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषत् ।'

(ऐ० उ० १-१) इति । श्रुतेरर्थ: - अत्र प्रतिपाद्य आत्मा द्विविधरूप: । व्यावहारिक आत्मा जीव: सगुणब्रह्म हिरण्यगर्भश्चेति । शुद्धात्मा केवल: नित्यशुद्धमुक्तस्वभाव: निर्विशेषचैतन्यरूप: । अथवा तत्र व्यवहार: त्रिविध: - ~~जाग्रत्स्वप्न~~-:- जाग्रत्स्वप्न: सुषुप्तिश्चेति । एतेषु त्रिषु जाग्रत्स्वप्नयो: अव्यभिचारेण विषयेण सह वर्तमान आत्मा व्यवहार आत्मा । सुषुप्तिकाले सुषुम्नानाड्यां आसीन: अविषयक: आत्मा पारमार्थिक: आत्मा इति । एवं कैवल्योपनिषदि पठ्यते -

'सुषुप्तिकाले सकले विलीने तमोभिभूत: सुखरूपमेति ।'

(कैव० १३) इति ।

व्यवहारावस्थायां वर्तमानस्य आत्मन: निर्वचनमेवं कर्तव्यम् :- 'वासनानां स्वीकारात् आदत्ते' इति आत्मा । तथा हि - जागरणावस्थायां चक्षुरादि-बाह्येन्द्रियै: तदिन्द्रियविषयान् अयमात्मा भुंक्ते इति । एवमाथर्वणिका: -

'स्त्र्यन्नपानादिविचित्रभोगै: स एव जाग्रत्परितृप्तिमेति'

(कैव० १२) इति वर्णयन्ति । शुद्धात्मन: निर्वचनमेवं क्रियते - 'यस्मात्कारणात् अस्यात्मनो भाव: स्वभावविशेष: सन्तत: परिच्छेदरहित: यस्य' इति ।

तस्य स्वरूपं तैत्तिरीयोपनिषदि उपवर्ण्यते -

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० २-१)

इति । अस्य ज्ञानस्य फलम् - ब्रह्मावाप्तिरेव भवति । तथा च श्रुतिः -

'यो वेद निहितं गुहायां परमे व्योमन् । सो ऽश्नुते
सर्वान्कामान् सह । ब्रह्मणा विपश्चितेति ।'

(तै० उ० १-२) इति । विपश्चित्त्वं - सर्वज्ञत्वं । आत्मा इत्यत्र यौगिकार्थो वा भवतु अथवा रूढ्यर्थः, सर्वथाऽपि तेन आत्मशब्देन सन्ततः अखण्डैकरसः सर्वप्रपंचस्य अधिष्ठानत्वेन रूपेण तदीयवास्तवस्वरूपभूतः पदार्थ एव स्वीक्रियते इत्यवसितः आत्मशब्दार्थः ।

आप्नोतेरिति आत्मा । सः सर्वज्ञः सर्वशक्तिः सर्वसंसारधर्मवर्जितः सन् नित्यशुद्धबुद्धमुक्तस्वभावः श्रुतावुक्तः आत्मा इति । सः अद्वयोऽपि सन् नामरूप-कर्मभेदभिन्नं सत् जगतः सृष्टेः प्राक् सर्वात्मना एक एवासीत् । सत्येवं प्रसरत्याक्षेपः यत् तदानीं सः अद्वितीयः, कार्यकारणसंघातरूपेण सः इदानीं नैक इति । अत्रैतत् समाधानम् - सृष्टेः पूर्वं यथा स एकः तद्वत् उपाधिविशिष्टोऽपि एक एव भवति सः इति ।

श्रुतौ वै इति शब्दः अवधारणार्थकः । इदमिदानीं सर्वैरपि प्रतीयमानं सर्वजनीनप्रत्यक्षामस्वप्नवत् जगत् सृष्टेः पूर्वमात्मरूपेणैवासीत्, न तु नामरूपात्मकरूपेण कार्यभूतेन पृथगासीत् इति । यथा मृत्कार्यभूतघटशरावाद्युत्पत्तेः पूर्वं मृदेवासीत् न तु घटशरावादि, अनन्तरमपि कारणभूतात् मृदः उत्पास्यमानाः घटशरावादयः स्वस्वरूपनाशे स्वकारणभूते मृदि एव अवतिष्ठन्ते तद्वत् अयं प्रपंचो ऽपि स्वोत्पत्तेः पूर्वं ब्रह्मरूपेणैवासीत्, प्रपंचसृष्ट्यनन्तरमपि महाप्रलये अयं प्रपंचः ब्रह्मण्येवावतिष्ठते । अनेन प्रपंचः ब्रह्मोपादानकः स्वकार्यभूतस्य सृष्टिरूपप्रपंचस्य ब्रह्म उपादानकारणमिति वा सिध्यतीति ।

ननु इदम् आत्मा च आसीदिति उभयोः सामानाधिकरण्येन आत्मनः जगद्वैशिष्ट्यं प्रतीयते । यथा नीलमुत्पलमित्यत्र सामानाधिकरण्यश्रवणे सति उत्पलशब्देन नीलत्वगुणवैशिष्ट्यं प्रतिभासते, तद्वदत्रापि इति चेत्-न । एवं

प्रतिपाद्यमाने सति श्रुतौ वर्तमानस्य 'अग्रे' इति शब्दस्य वैयर्थ्यप्रसंगात्। तेन 'अग्रे' इति शब्देन एवं द्योत्यते - इदानीं जगद्विशिष्टः आत्मा प्रतिभासत इति कथनेऽनुपपत्तिप्रसक्त्या, जगतः स्थितिकालं परित्यज्य सृष्टेः प्राचीनकालिकः केवलमात्मा इति। तथा च 'आत्मा वा इदमग्र आसीत्' इत्यनेन वाक्येन अखण्डैकरसम् आत्मतत्त्वं सूचितं भवति।

अस्मिन् वाक्ये मध्यवर्तिना एकशब्देन ब्रह्मणः सजातीय-विजातीय-स्वगतभेदाः दूरीक्रियन्ते। तथा हि - यथा लोके वृक्षे शाखास्कन्धपत्रादीनां परस्पर-प्रतियोगिकः स्वगतो भेदः, एवं तस्मिन् वृक्षान्तरप्रतियोगिकः सजातीयभेदः, एवं पाषाणप्रतियोगिको विजातीयभेदः इति त्रिविधः भेदाः अपि तस्मिन् संभवन्ति तद्वत् ब्रह्मणि एते त्रयः भेदाः न संभवन्ति इति व्यतिरेकदृष्टान्तेन अयमेक इति शब्दः एकत्वरूपमद्वितीयत्वं ब्रह्मणि साधयति। एवं चाद्वितीयं ब्रह्मेति। एवम-वसितो आत्मतत्त्वविचारः॥

अन्या भवति ऐतरेयश्रुतिः -

'स ईक्षत कथं न्विदं मदृते स्यात्' (ऐ० उ० ३-११)

इति श्रुत्या कार्यकारणसंघातं वक्ष्यमाणं कार्यं कथं नु खलु मामन्तरेण स्यात् पदार्थं सत् इत्यतः अभेदवादो सिध्यति॥

'स एतेन प्रज्ञेनात्मना' (ऐ० उ० ५-४)

इति श्रुत्या आत्मसाक्षात्कृतः पुरुषः एतेन ज्ञप्तिस्वरूपेण परमात्मना एकीभाव-मुपेत्य लोकादस्मात् गच्छतीत्यतः अद्वितीयत्ववादः स्थापितो भवति॥

'सो यमात्मा पुण्येभ्यः कर्मभ्यः' इत्यारभ्य

'वामदेव एवमुवाच' (ऐ० उ० ४-४,५)

इत्यन्तं वर्तमाना श्रुतिः आत्मनः संसारस्यानादित्वं प्रतिपादयति। अयं विषयः 'गर्भे नु सन्नन्वेषामवेदम्' इत्यस्मिन् मन्त्रव्याख्यानावसरे सुष्ठु प्रतिपादितः। एवमवसितो आत्मैक्यवादः इति॥

एवमेव बहवः अद्वैतसिद्धान्ताः अस्यामुपनिषदि प्रतिपादिताः सन्ति। विपश्चिद्वरेण्याः एवमेव तच्छ्रुतिमुपजीव्यवर्तमानान् सिद्धान्तान् अवधारयन्त्विति।

अत्र- वर्तन्ते च अस्यामुपनिषदि केचन सिद्धान्ताः तच्छ्रुत्युपजीविकाः ।
ते-तु त अविद्यास्वरूपम्, अविद्यायाः आत्मनः संसारनिरूपणं, अविद्याविलासः,
मायास्वरूपम्, मिथ्यात्वस्वरूपम्, जगन्मिथ्यात्वम्, जगत्सृष्टित्वं, अनिर्वचनीयत्वम्,
आत्मसाक्षात्कारो परमपुरुषार्थः, उपासनया क्रममुक्तिः, क्रममुक्त्या ब्रह्मावाप्तिः
इत्येते सिद्धान्ताः अस्यामवलोकनीयाः ।

प्रतिपादितप्रकरणद्वयेषु तत्र प्रथमे - निरुपाधिकं ब्रह्म, ब्रह्मणः सार्वात्म्यं
व्यापकत्वं च, सोपाधिकं ब्रह्म, ब्रह्मणः स्वातन्त्र्यनिरूपणं, जगत्स्रष्टा ब्रह्म ब्रह्म,
जगतः ब्रह्मोपादानकत्वं कार्यकारणसंघाततदेहे ब्रह्मणः अनुप्रवेशः इत्यादयो सिद्धान्ताः
प्रतिपादिताः ।

द्वितीये आत्मैकत्ववादे-तस्य तस्य ब्रह्मणः एकत्वं, जीवात्मनो रभेदः,
तस्याद्वितीयत्वं, स एव संसारी इत्यादयो सिद्धान्ताः तच्छ्रुत्या प्रतिपादिताः ।
एवमेव उपरि निगदिताः सिद्धान्ताः ऐतरेयोपनिषच्छ्रुतिपुरस्सरं द्रष्टव्या इति ।

Discussion incomplete

इति शम्

••••••••••••••••••••••••

उपसंहारः

उपसंहार:

शोधप्रबन्धस्यास्मिन् उपसंहारात्मके विभागे वेद-वेदान्तयो विचार: क्रियते । तत्र अद्वैतशास्त्रस्य मुख्यभूतानि तत्त्वानि अत्र सप्रपंचं प्रतिपाद्यन्ते । 'वेदोपजीव्यकानि शास्त्राणि' इति न्यायमनुश्रित्य शास्त्रविचारानन्तरं वेदस्य विचारोऽपि कृतो भवति । अस्मिन्नुपसंहारे स्वीकृतानां विषयाणां नामोल्लेख: एवं भवति -

अद्वैतभाव: श्रुतिशीर्षकेषु विमर्शं आत्मावगतेस्तत: परम् ।
स्याच्चत्वमस्यादि विमर्श एवं स्यात्सादिरूपोऽयमथान्तरात्मा ।।१ ।।
तज्ज्ञानरूपस्य फलं च साधनं समाधियोगश्च समन्वय: श्रुतौ ।
तर्कानुसन्धानमपीह युज्यते दशाविहीनश्च तयोरभेद: ।।२।।
आत्मा प्रमाता च भवेत्प्रमाणं प्रमेयमित्यादि विचारहीनम् ।
मिथ्यात्व-माया-सुनिरूपणे च आत्माऽद्वितीयश्च तथा अजश्च ।।३।।
शास्त्रैकगम्य: [श्रुतयश्च नैका: क्रमात्स्यवेद: प्रथमत्वमाप ।
ब्रह्माऽऽयतत्वेऽप्यज एव वेद: तद्देवतानां च विमर्शनं क्रमात् ।।४।।]

इति । अत्र आहत्य 'चतुर्विंशति' (षोडश) विमर्शात्मकविषयविचारा: कृता: वर्तन्ते । प्राय: एते विषया: अत्र यथामति सप्रपंचं विचार्यन्ते । इदानीं प्रदर्शितेषु तेषु विषयेषु यथाक्रमं एकैको विषय: विचारार्थं प्रस्तूयते । तथा हि -

१ उपनिषत्सु अद्वैतभाव:

सदानन्दयोगी स्वग्रन्थे वेदान्तसारे एवं वदति -

'वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च' इति । 'वेदान्त' इति पदस्य मुख्य-गौण इति भेदेन द्विविधो अर्थो भवति ।

वेदस्य अन्त: वेदान्त इति व्युत्पत्त्या वेदान्तेति पदस्य उपनिषद् मुख्यार्थो भवति। उपनिषदां अर्थबोधने सहायका: शारीरकसूत्र, उपनिषदर्थसंग्राहको भगवद्गीतादय: वेदान्तेति शब्दस्य गौणार्थका: भविष्यन्ति। तस्मात् मुख्यो वेदान्त: उपनिषद्भ्य एव ज्ञातव्यो भवति।

तत्र मन्त्रभागात्मकेषु उपनिषत्सु मन्त्र-स्वर:, एवं ब्राह्मणभागात्मकेषु उपनिषत्सु ब्राह्मणस्वरश्च स्वरस्च तथा तिष्ठत:। अत: एता: उपनिषद: गुरुमुखादध्ययनपूर्वकमेव पठनीया: भविष्यन्ति। शंकराचार्यैरपि मतमेतदंगीक्रियते। सांप्रदायिकानां च प्रणाली भवति। वेदान्ताचार्या: अद्वैतशास्त्रं प्रस्थानत्रयेण विभागीकुर्वन्ति - श्रुति-स्मृति-न्यायभेदेन। अत्र उपनिषद्भागात्मका: श्रुतावन्तर्भवन्ति, भगवद्गीता-सनत्सुजातसंहिता इत्यादय: स्मृतय: इत्युच्यन्ते। ब्रह्मसूत्रम् इत्यादिग्रन्थानां न्यायप्रस्थानमित्युच्यते।

केचन भाष्यप्रस्थानत्रयमेवं वर्णयन्ति - पंचपादिकाप्रस्थानम्, भामतीप्रस्थानम्, रत्नप्रभाप्रस्थानमिति। अन्ये तु, वादं पुरस्कृत्य प्रस्थानत्रयं प्रतिपादयन्ति - प्रतिबिम्बवाद:, अस्य प्रवर्तयितार: आचार्यशिष्या: पद्मपाद:, विवरणकार:, प्रकाशात्मा यतिश्च। आभासवाद: - अस्य वादस्य प्रवर्तयिता आचार्यशिष्य: सुरेश्वराचार्य: वार्तिककार इति नाम्ना प्रसिद्ध:। अवच्छेदवाद: - वादस्यास्य प्रवर्तक: भामतीकारो वाचस्पतिमिश्र: इति। एवं प्रस्थानत्रयमिति त्रेधा विभज्य वक्तुं शक्यते। तत्र प्रथमोक्तेरेव आदर:।

वेदस्य ज्ञानकाण्डभागानामुपनिषदां 'ब्रह्मविद्या' इति कथ्यते। ब्रह्मविद्या एव परमात्मज्ञानस्य परा विद्या इति श्रेष्ठत्वं भजते। उपनिषत्सु यत्र ब्रह्मविषयकज्ञानं प्रतिपाद्यते, सा विद्या पराविद्या, यत्र कर्मविषयकज्ञानं भवति तस्या: विद्याया: अपरविद्या इत्युच्यते। एवं परापरविद्याया: भेद:। अपरविद्याया: 'कर्मविद्या' इत्यपि अपरं नाम वर्तते। कर्मविद्या तस्मिन् काले फलं न जनयति, कालान्तरे एव तस्य फलं मिलति। कर्मफलस्य भुक्त्यनन्तरं नाशोऽपि भवति। ब्रह्मविद्या अस्या: विपरीतं भवति, तस्मिन्नेव काले तस्मिन्नेव देशे स्वफलं जनयति, अस्य फलस्य विनाश: सर्वदा न भवति। अत: ब्रह्मविद्या इतरविद्यापेक्षया ज्येष्ठा भवति।

इयमेव ब्रह्मविद्या मुक्तेः एकमात्रं कारणं भवति । कर्मविद्या मुक्तेः कारणं न भवति, किन्तु ब्रह्मविद्यायाः अवगमार्थं हेतुर्भवति । ब्रह्मविद्यायाः प्राप्त्यै हेत्वन्तरस्यावश्यकता नास्ति । अत एवोच्यते उपनिषत्सु - यदा आत्मज्ञानं न साक्षात्क्रियते तर्हि परमात्मनः ज्ञानेऽपि सः शक्तो भवति इति ।

श्रीशंकराचार्याणां मतरीत्या अद्वैतवाद एव सर्वासामुपनिषदां तात्पर्यभूतो भवतीत्युच्यते । तत्र एकं एव ब्रह्म परमार्थतो सत्, परिदृश्यमानेयं जगत् सत्यं न भवति, अपितु मिथ्या । सर्वं जगत् आभासतः दृग्गोचरी भवतीति अपारमार्थिकी इत्युच्यते । यथा स्वप्ने दृष्टानां पदार्थानां मिथ्यात्वमभ्युपगम्यते, तथा अस्यां जगत्यपि । जीवात्मा-परमात्मा च वास्तविकदृष्ट्या एकमेव भवतः, तयो भेदः नास्ति इति ईदृशानि अद्वैततत्वानि उपनिषदां सिद्धान्तानीति एतेषामाशयः । अयमेव सिद्धान्तः एकस्मिन्नेव श्लोके उद्घुष्यते(~~साम्प्रदायिकैः~~)-

'श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।।'

इति ।

द्वैतवादिनः माध्वाः कथयन्ति, स्वग्रन्थे लिखन्ति च यत् - द्वैतवाद एव प्राचीनो सिद्धान्तः तदपेक्षया अद्वैतवादः नवीनः सिद्धान्तः अस्य वादस्य जन्मदाता शंकराचार्यः । अतः शंकराचार्याणां पूर्वं अद्वैतवादस्य स्थितिरेव नासीदिति । एतन्न मनोहरम् ।कुत इति चेत् ? अद्वैतवादः न केवलं प्राचीनः किन्तु प्राचीनतमो भवति । तत्रैते कारणानि भवन्ति -

१) ऋग्वेदस्य प्रसिद्धे नासदासीये सूक्ते अद्वैतवाद एव उपन्यस्तः , न तु द्वैतवादस्य च नामोल्लेखः ।

२) छान्दोग्योपनिषदि 'सदेव सौम्येदमग्र आसीत्' (छा० उ० ६-२-१) इत्यत्र

'मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन ।
मृत्यो स मृत्युमाप्नोति य इह नानेव पश्यति ।।'

(बृ० उ० ४-४-१६) इत्यत्र च अद्वैतवादस्यैव वर्णना क्रियते ।

३) १, २१-२४ इत्यत्र सांख्यसूत्रे अद्वैतवादस्य वेदान्तमतमभ्युपगतं वर्तते ।

४) 'तदत्यन्तविमोक्षोऽपवर्गः' इत्यस्मिन् न्यायसूत्रे तद्भाष्ये च अद्वैतवेदान्त-
सिद्धान्तो उररीकृतः ।

५) कविवरो भवभूतिरपि स्वग्रन्थे अद्वैतवादं स्पष्टीकरोति । तथा च तस्य सूक्तिः-

'एको रसः रसः एव विवर्तभेदात्' इति

'ब्रह्म-जीवविवर्तानां क्वापि विप्रलयः कृतः' इति च ।

६) पुराणेष्वन्येषु, सूतसंहितायां, योगवासिष्ठेत्यादि प्राचीनग्रन्थेषु अद्वैत-
सिद्धान्तानां प्रतिपादनं कृतं वर्तते, तत्रतत्र दृश्यते ।

७) नैषधचरितस्य एकविंश अध्यायस्य अष्टाशीतितमे (२१-८८) श्लोके बुद्धः
'अद्वयवादी' इति संकेतं दत्तं वर्तते ।

८) दिगम्बराचार्यैः समन्तभद्रः स्वलिखिते आप्तमीमांसा इति पुस्तकस्य
चतुर्विंशतितमे श्लोके अद्वैतवादस्य चर्चां करोति ।

एवमेतादृशानि उदाहरणानि अन्यानि च अद्वैतवादस्य प्राचीनतमत्वं
स्पष्टं बोधयन्ति । अतः अद्वैतवादिनां मतं निर्मलं भवति । तस्मात् वस्तुतः
अद्वैतवाद एव इतरवादापेक्षया अत्यन्तं प्राचीन इति । अस्मिन् अद्वैतवादे प्रतिपादिताः
सिद्धान्ताः अनादयः इति अनेकेषामाचार्याणां मतं भवति । पूर्वमेते अद्वैतसिद्धान्ताः
संग्रहेणोपन्यस्ताः सूक्ष्मभूताश्चासन्, परं श्रीमच्छंकराचार्यैः तान्येव अद्वैतसिद्धान्तानि
स्वपुस्तके आत्मज्ञानसाक्षात्कारे प्रवर्तिष्यमाणानां उत्तमानां मन्दबुद्धीनां च
सम्यगवबोधनार्थं विशदीकृतानि । किन्तु तैरेव सर्वे सिद्धान्ताः स्वयमुपन्यस्ताः इति
माध्वानां मतम् स्वकपोलकल्पितमेव भवतीत्यन्यदेतत् ।

अद्वैतशास्त्रे प्रतिपादितेषु मुख्यसिद्धान्तेषु अत्र प्रतिपाद्यन्ते । 'तत्त्वमसि'
(छा० उ० ६-८-७) इत्यत्र तत्त्वं पदवाच्यश्च: आत्मा इति कथ्यते । ~~आत्मज्ञानार्थं~~
आत्मज्ञानलाभार्थमेव वैराग्यसंपन्नाः ... विपश्चितः श्रवण-मनन-निदिध्यासनादिभिः
उपनिषदि प्रोक्तप्रकारेण प्रयतन्ते । अतः प्रथमतः आत्मज्ञानमधिकृत्य एव
~~प्रस्तोकत~~ विचारः प्रस्तूयते -

२ आत्मज्ञानविचारः

किमात्मज्ञानं व्यर्थं वा ? इत्यस्य प्रश्नस्य र उत्तरमेतद् भवति यत् आत्मज्ञानं

व्यर्थं न भवति । एतदात्मज्ञानं भवतो उपयोगी भवति । इयं भक्तिः पुरुषस्य अश्रद्धारूपस्य मलस्य प्रक्षालनं करोति । ज्ञानात् अन्तःकरणरूपोपाधिधर्माणामध्यासः न नश्यति, कुत इति चेत् यथा ज्ञानात्पूर्वमन्तःकरणधर्माः अपरोक्षाः भवन्ति तथैव ज्ञानानन्तरमपि ते धर्माः अपरोक्षतया एव तिष्ठन्ति । तस्मात् आत्मस्वरूपस्य साक्षात्कारार्थं यत् त्रिगुणात्मकं परं ब्रह्म भवति तस्य ज्ञानमपेक्षितं भवति । गीतायामपि ज्ञानसंशयस्य नाशः उच्यते - 'ज्ञानसंछिन्नसंशयमिति'। अतः आत्मज्ञानं न ~~स्यात्~~ व्यर्थमिति ।

३ तत्वमसीत्यत्र परमतविचारः

पूर्वमीमांसायां तथा सांख्य-योगदर्शनयोश्च त्वं पदार्थस्य प्राधान्यमुच्यते । तत्र पूर्वमीमांसायां त्वंपदार्थभूतः ~~स~~ जीवः कर्ता भवति । तेन धर्मानुष्ठानं कथमाचरणीयम् ? इत्यादि जीवविषयकनिरूपणं तत्र विधीयते । अस्मिन् शास्त्रे ईश्वरस्य चर्चा नास्ति । ईश्वरः भवतु वा न वा जीवेनैव अनुष्ठितकर्मणा तेन निष्पादितापूर्वद्वारा स्वाभिलषितफलमनुभवितुं शक्यते । स्वानुष्ठितकर्मणः फलं अस्मिन्नेव जन्मनि वांछति चेत् तदपि सिध्यति, अथवा परजन्मनि चेत् तत्रापि सः फलभोक्ता भवति । अतः एतच्छास्त्रं बहिरंगशास्त्रमित्युच्यते ।

विवेकं प्रधानभूतं सांख्यदर्शनमित्युच्यते । अस्मिन् दर्शने दृश्यरूपप्रपंचस्य द्रष्टुः जीवस्य च विवेचनं क्रियते । अस्मिन्नपि शास्त्रे द्रष्टा तथा दृश्यमिति उभयोरेव विभागस्वीकारात् ईश्वरस्य विशेषतया निरूपणं न क्रियते । एतच्छास्त्रोक्तप्रकारेण त्वं पदार्थभूतः जीवः (कर्तृत्वरूपेण) कर्तृत्वोपाधिना मुक्तो भवति ।

योगदर्शने तु चित्तवृत्तेः निरोधेन द्रष्टृभूतस्य जीवस्य स्वरूपावस्था प्रतिपाद्यते । वृत्तीनां निरोधरूपप्रक्रियामार्गेण तत्पदार्थभूतस्य ईश्वरस्य प्रतिपादनं कृतं वर्तते । परं तु वृत्तीनां निरोधानन्तरं अस्मिन् शास्त्रेऽपि ईश्वरज्ञानस्यावश्यकता न दरीदृश्यते । अत्र दर्शने समाधिः साधनानि, समाधिफलभूताः विभूतयः अन्ते कैवल्यमित्यादयः प्रतिपाद्यन्ते । कैवल्यं त्वंपदार्थस्यैव भवति न त्वीश्वरस्य । ~~अतः~~ तस्मात् प्रतिपादितेषु त्रिषु दर्शनेषु त्वं पदार्थ एव प्रधानभूतो भवति ।

न्यायशास्त्रे वैशेषिक शास्त्रे च सामान्यतः तत्पदार्थस्यैव प्रतिपादनं क्रियते । भक्तिदर्शनेन प्रतिपादितं मुख्यभूतं परमेश्वरं स्वीकृत्य तस्मिन् ईश्वरे तज्ज्ञानविषयकमीमांसा क्रियते । एषः श्रौतमार्गः भवतीति कारणेन द्रव्याणां परमाणूनां तथा अन्यपदार्थानां च तद्विषयकानुसन्धाने न प्रदिपन्ति । भगवतः ईश्वरस्य तस्य भक्तेश्च वर्णनं क्रियते । अतः वैशेषिक-न्यायदर्शनयोः तत्पदार्थस्यैव प्राधान्यं भवति ।

जैनदर्शने तत्पदार्थमेव प्रधानतया स्वीकृत्य सविस्तरमुपपाद्यते । एतच्छास्त्रमन्यादृशं भवति । अत्र ईश्वरे भक्तिपूर्वकबुद्धेः लयं विना संसारस्य निवृत्तिः नांगीक्रियते । अतः तस्मिन् मते आत्मज्ञानं संसारस्य निवर्तकं न भवति, केवलमन्तःकरणस्याश्रद्धा संशय इत्यादि मलस्यापाकरणेन उपयोगः भवति । तत्कथमिति चेत् यथा यः कोऽपि मनुष्यः राज्ञः दर्शनलाभार्थं गन्तुमिच्छति तदा सः क्षौरं कर्म, स्नानं, सद्वस्त्रधारणं, अलंकारं, संस्कारमित्यादिना स्वदेहं सज्जीकृत्यानन्तरं राज्ञः संमुखे उपस्थितो भवति, तथा जीवः यदा ईश्वरस्य संमुखे उपस्थितो तदा सः जीवः प्रमाद-आलस्य-अशान्ति-क्रोध-लोभ-मोह-औद्धत्य-अभिमानादीनां परित्यागं करोति । एतेषां मते पूर्वोक्ताः धर्माः आत्मधर्मत्वेन न परिगण्यन्ते, किन्तु एते धर्माः संसर्गेण जीवे आगन्तुकाः भवन्तीति सिद्धान्तितो भवति ।

शांकराद्वैतदर्शने वाच्यार्थभूतयोः तत्त्वंपदार्थयोः तयोः लक्ष्यार्थभूते ब्रह्मणि समन्वयः इत्युच्यते । प्रतिपादितं चैतत् सविस्तरं सूत्रभाष्ये शंकराचार्यैः ।[1] विस्तरभिया तन्नेह अनूद्यते । तत्त्वमसीत्यत्र श्रुत्यनुमाननिदर्शनं प्रतिपाद्यते । तथा हि -

'स य एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स
आत्मा तत्त्वमसि श्वेतकेतो'

(छा० उ० ६-८-७) इति श्रुत्या -

'तत्त्वमस्यादिवाक्यमखण्डार्थनिष्ठं तन्मात्रप्रश्नोत्तरत्वात्,
सोऽयमित्यादि वाक्यवत्'

इत्यनुमानेन च तत्त्वंपदार्थयोः वाच्यार्थभूते लक्ष्यभूते ब्रह्मणि समन्वय इति सिध्यति । ~~तन्मात्रप्रतिपादकत्वं तत्त्वमस्यादिवाक्यनिवर्त्यमुमुक्षाविषयत्वादित्यर्थः । तद्विषयकत्वेन~~

---

१ ब्र० सू० शां० भा० पृ० ६१५ - ६१६

इष्टसाधनत्वं तदन्यविषये बुभुत्सायां मानाभावात् इति + अनमाने च वर्तमान-तन्मात्रप्रश्नोत्तरत्वादित्यस्य ब्रह्ममात्रप्रतिपादकस्य सत्यादिवाक्यनिवर्त्यबुभुत्सा-विषयत्वादित्यर्थः । तद्विषयकत्वेनेष्टसाधनत्वं तदन्यविषये बुभुत्सायां मानाभावात् इति । तथा च यः यन्नामार्थबुभुत्सानिवर्तकधीमात्रपरः सः तन्नामार्थप्रमापकः इति पर्यवस्यति । तत्वमस्येति वाक्ये तत्त्वंपदयोः उभयविशेषणपरित्यागेन विशेष्य-मात्रमभिन्नरूपं ब्रह्म बोध्यत इति + लक्षणावाक्यस्याखण्डार्थत्वं प्रतिपाद्यतेऽस्मिन् दर्शने । तथा चोच्यते अद्वैतग्रन्थेषु -

'अविरुद्धविशेषणाद्वय प्रभवत्वेऽपि विशिष्टयोर्द्वयोः ।
घटते न यदेकता तदा नतरां तद्विपरीतरूपयोः ।।'

इति । अस्मिन् शास्त्रे त्वं पदार्थः तत् पदार्थश्च विचार्येते । अत्र जीवविषयक-विचारः महता विस्तरेण अनुसन्धीयते । एवं ईश्वरमीमांसाऽपि क्रियते । जीवविषयकवाक्यानि तथा परमात्मविषयवाक्यानि च विचार्य उभयोरपि वाक्ययोः वाक्यार्थभूते लक्ष्ये परब्रह्मणि अन्वय इति प्रतिपाद्य स परब्रह्म एकः, अद्वितीयः, कूटस्थः, अजः, नित्य-शुद्ध-बुद्ध-मुक्तस्वभावः इत्यस्मिन् अद्वैतवेदान्तदर्शने उद्घुष्यते । तस्मात् इतरशास्त्रापेक्षया अद्वैतशास्त्रमुत्कृष्टतमम् अतः अवश्यं पठनीयमिति सांप्रदायिकैः विचारशीलैश्च कथ्यते ।

४ साक्षिरूपोऽयमात्मा

उपनिषत्सु सविस्तरं प्रतिपादितं यत् परमार्थतत्वं तत् वेदान्तिभिः वाक्येनैकेनैव उदाह्रियते -

'स एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा
तत्वमसि श्वेतकेतो' (छा०उ० ६-१४-३)

इति । अस्यां श्रुतौ तत्वमसि, तत्सत्यमित्युक्तत्वात् यथाकथंचित् सर्वैरपि परम-सूक्ष्मतत्त्वमेकं सर्वदा विद्यत इति अभ्युपगन्तव्यम् । सूक्ष्मतत्त्वरूपः स एव परमात्मा अस्य महतो जगतः आदिमध्यान्तवर्ती, चराचराणां हृदि द आत्मा च भवति । स परमात्मा एक एव परमार्थसत् । परमात्मभिन्नमन्यत्सर्वं भासमानमपि मिथ्या

इत्यद्वैतिनां राद्धान्तः। अयमेव परमात्मा सर्वेषां साक्षी इत्युच्यते।

एवंभूतः परमात्मा कथं सर्वैः ज्ञातुं शक्यत इति चेत् इति चेत्-उच्यते। अस्मिन् संसारभूते प्रपंचे वसतामस्मादृशानां व्यवहारोपयोगाय अहमिति अथवा त्वमिति शब्दप्रयोगेण च यः वाच्यभूतः परमार्थरूपः वस्तुसत् अभिधीयते स एव चराचराणां जीवस्वरूप इति कथनात् स्वात्मज्ञानेनैव परमात्मज्ञानं भवति। आत्मज्ञानार्थमेव वेद-वेदान्तोपनिषदः प्रवृत्ताः सन्ति। तस्मादियमुदाहृतश्रुतिः तत्, त्वम्, असि, इति पदत्रयेणैव संग्रहेण परमार्थतत्त्वं उत्तमाधिकारिणः उपदिशति। मध्यमाधिकारिणस्तु सर्वं वेदान्तशास्त्रमध्ययस्य तत्रोक्तश्रवणमनननिदिध्यासनद्वारा आत्मज्ञानं लभन्ते। अधमाधिकारिणस्तु - वेद-वेदान्ताः उपदिष्टाः। तत्रोक्तविधिना भक्त्या निष्कामकर्मणा वेदकर्मणा देवादीनभ्यर्च्य तेन चित्तपरिशुद्धिं लब्धवन्तः अनन्तरमेकाग्रचित्तध्यानेन परब्रह्म साक्षात्कुर्वन्ति। उत्तमाधिकारिणामात्मसाक्षात्कारः वेदान्तवाक्यजन्यज्ञानोत्तरक्षणे एव भवति। मध्यमाधिकारिणां देहान्ते। अधमाधिकारिणां तु यदा चित्तपरिशुद्धिः भवति तदानीं श्रवणादिना आत्मसाक्षात्कार इति उपनिषत्सु विहितं वर्तते।

ननु - 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' (तै० उ० २-६) इति एवमादिश्रुतिभिः ब्रह्म अनिरूप्यमिति उपपाद्यत इति चेत्- सत्यम्। उपनिषत्सु नामरूपकर्मनिर्देशादिभिः अयमेव आत्मा इति, यतः तस्मिन् जाति-गुण-क्रिया-संबन्धेत्यादि व्यवहारशब्दाः प्रयुज्यते। निर्गुणस्वरूपं परब्रह्म निरूपयितुं न शक्यते। किन्तु अध्यारोपापवादाभ्यां तस्य स्वरूपनिर्धारणं अवश्यं क्रियत एव। बृहदारण्यकभाष्ये शंकराचार्याः एवमुदलिखन्[१] -

'अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञानमानन्दं ब्रह्म'
विज्ञान घन एव' इति 'ब्रह्मात्मा' इत्येवमादिशब्दैः'

इति। अत्र अध्यारोपविधिना ब्रह्मनिरूपणं कृतम्। अपवादरूपेण ब्रह्म श्रुतिभिरेव साक्षात् प्रतिपाद्यते। तथा हि -

'अथात आदेशो नेति नेति'
न ह्येतस्मादिति नेत्यन्यत्परमस्ति' (बृ० उ० २-३-६)

१ ईशा० शां० भा० पृ० १३७ (द्वितीयः खण्डः)

'स एष नेति नेत्यात्मा' (बृ० उ० ३-६-२६)

इति । अन्याश्च श्रुतय: ब्रह्मण: साक्षात् अपनरूप्यत्वं प्रतिपादयन्ति -

'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।' 'यन्मनसा न मनुते येनाहुर्मनो मतम् ।+'

(कठ० १-५,६) इति । तैत्तिरीयेऽपि -

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'

(तै० उ० २-६) इति साक्षात् उच्यते । ब्रह्मण: अस्तित्वे आचार्यभाष्यम्[१] -

'सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वसिद्धि:'

इति ।

आत्मशब्दार्थे वादिनां विप्रतिपत्तय: भवन्ति । आत्मा देहरूप:, इन्द्रियरूप:, मनोरूप:, प्राणरूप:, क्षणिकविज्ञानम् आत्मा, शून्यरूप: आत्मा, कर्तृभोक्तृस्वरूप: आत्मा, केवलकर्तृरूप: आत्मा, केवलं भोक्तृरूप: आत्मा इति स्वस्वमतानुसारेण अभिप्रयन्ति । तत्र अद्वैतिन: सर्वज्ञ: सर्वशक्त: ईश्वर: भोक्तु: जीवस्यापि आत्मा तदेव ब्रह्म इत्यभ्युपगच्छन्ति । अत एवोच्यते -

'तन्त्वौपनिषदं पुरुषं पृच्छामि'

(बृ० उ० ३-९-२६) इति ।

'एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्ष: सर्वभूताधिवास: साक्षी चेता केवलो निर्गुणश्च ।।'

(श्वे० उ० ६-११) इत्येवमादिभि: श्रुतिभि: सर्वभूतानामन्तरात्मत्वेन निरूप्यमाण: स आत्मा साक्षिरूप इति सिध्यति । आत्मन: सर्वान्तर्यामित्वं छान्दोग्ये श्रूयते -

'यावान्वा अयमाकाश: तावानेषोऽन्तर्हृदय आकाश:'

(छा० उ० ८-१-३) इति । सूत्रभाष्ये शंकराचार्या: अपि[२] -

'सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति ।
पुरुषो विनाशहेत्वभावादविनाशी । विक्रियहेत्व-
भावाच्च कूटस्थनित्य: । अत एव नित्यशुद्धबुद्धमुक्तस्वभाव: ।'

इति + समन्वयसूत्रव्याख्यानावसरे प्रतिपादयामासु: । तस्मात् सर्वव्यापी आत्मा

---

१ ईश०-सर्व०-भा०-पृ० ब्र० सू० शां० भा० पृ० ७
२ ब्र० सू० शां० भा० पृ० २५

साक्षिरूप एवेति सिध्यति । अहंप्रत्ययगम्यस्तु विक्रियादिविशिष्टत्वात् परमार्थत: न आत्मशब्दप्रतिपाद्य इति विवेचनीयम् ।।

५ आत्मज्ञानस्य फलम्

आविद्यकसंसारस्य उच्छेद एव आत्मज्ञानस्य फलं भवति । अयमेव मुक्तिरिति कथ्यते । मुक्तेरनन्तरं तस्य जन्मान्तरप्राप्तिर्नास्ति । मुक्तिरिति अन्या काचन ब्रह्मभिन्ना अवस्था नास्ति । सा हि ब्रह्मरूपैव । अस्यामवस्थायां न कश्चिदतिशयोऽस्ति । सूत्रभाष्ये भाष्यकारा: एवमुपपादयामासु:[1] -

> 'उत्कृष्टैव हि विद्या भवति । तस्मात् तस्यां
> चिराचिरोत्पत्तिरूपोऽतिशयो भवन् भवेत् । न तु
> मुक्तौ कश्चिदतिशयसंभवो स्ति ।'

इति । मुक्ति: उपायान्तरेण साध्या तरतमभावापन्ना च न भवति, किन्तु नित्यसिद्धा + आत्मस्वरूपैव । आत्मज्ञानेऽपि तारतम्यं नास्ति यत: अबाध्यरूपं सम्यग्ज्ञानं ब्रह्मज्ञानमित्युच्यते । साधनचतुष्टयसंपत्तितारतम्येन कालविशेषे आत्मज्ञानं भवति । ज्ञानसमकाले एव ब्रह्मभावावाप्तिरिति उपनिषत्सु तत्र तत्र उद्घुष्यते । तथा चोक्तं बृहदारण्यके -

> 'तद्धैतत् पश्यन्नृषिर्वामदेव: प्रतिपेदे अहं मनुरभवं सूर्यश्च'

इति । भाष्यवचनं[2] च-

> 'तस्मादैकान्तिकी विदुष: कैवल्यसिद्धि:'

इति । ननु 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ० उ० ४-४-६) इति बृहदारण्यकश्रुत्यालोचनेन ब्रह्म एव ब्रह्मणि एकीभवति इति अर्थात् सिध्यति । एवं सति ज्ञानात् ब्रह्मावाप्ति:, अनन्तरं ब्रह्मणि एकीभाव: इति दिशा विदेहमुक्तिरूपा अन्या काचन वर्तते इति चेत्-उच्यते । एवमस्या: श्रुते: भूरिपरिश्रमेणार्थो[3] न कल्पनीयो भवति । बृहदारण्यकभाष्ये श्रुतेरस्या: आचार्यभाष्यमेवं भवति + -

> 'यस्मात् न हि तस्याब्रह्मत्वपरिच्छेदहेतव: कामा: सन्ति,
> तस्मात् इहैव ब्रह्मैव सन् ब्रह्माप्येति न शरीरपातोत्तरकालम् ।

---

१ ब्र० सू० शां० भा० पृ० ६१०-६११ ३ ईशा० शां० भा० पृ० २८६ (द्वितीय:खण्ड:)
२ ,, ,, ,, ,, ,, ५३७

न हि विदुषो मृतस्य भावान्तरापत्तिः, जीवतोऽन्यो
भावः । देहान्तरप्रतिसन्धानाभावमात्रेणैव तु
ब्रह्माप्येति इत्युच्यते ।'

इति । तस्मात् ब्रह्मज्ञानी देहान्तरं न प्राप्नोति इत्येव उदाहृतश्रुतेरर्थः इति ।

अपि च ब्रह्मज्ञानावाप्तस्य पुरुषस्य शरीरपातानन्तरं ब्रह्मभाव इति न मन्तव्यम् । एवमभ्युपगमे उपनिषत्सु जीवन्मुक्तिबोधकश्रुतीनामनेकासां वैयर्थ्यं प्रसज्येत । जीवन्मुक्तिस्वरूपं श्रुतयः एवं वर्णयन्ति । तथा च बृहदारण्यके -

'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं
शरीरं शेते थायमशरीरो मृतो ब्रह्मैव तेज एव ।'

(बृ० उ० ४-४-७) इति पठ्यते । तस्मात् उपनिषत्सु प्रदर्शितमार्गेण आत्मसाक्षात्कारी पुरुषः जीवन्नपि अविद्याकार्येषु कर्तृत्वंभोक्तृत्वं च न भजते, सः असंगी अकर्ता अभोक्ता च भवति इति सिध्यति । अत्र आचार्यभाष्यमपि प्रमाणं भवति[1] -

'कामकर्मप्रयुक्तशरीरात्मभावेन हि पूर्वं सशरीरो मर्त्यश्च ।
तद्वियोगादथेदानीमशरीरः । अत एव च अमृतः ।'

इति । तस्मादवसितो विचारः आत्मज्ञानस्य फलं ब्रह्मभावापत्तिरिति । अयमेव आविद्यकसंसारस्य मुक्तिरित्यपि कथ्यते ।।

६ आत्मज्ञानसाधनानि

'अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमातृत्वमात्मनः ।
अन्विष्टस्स्यात् प्रमात्रैव पाप्मदोषादिवर्जितः ।।'

इति सांप्रदायिकवचनानुसारेण आत्मनः एकत्वेऽपि ज्ञानात्पूर्वं तदन्वेष्टा प्रमाता, अन्वेष्टव्यः आत्मा इति च प्रमातृ-प्रमेयभेदः । परमात्मज्ञानानन्तरं तु प्रमाता एव परमात्मा इति एकज्ञानं सिध्यति । अत एव उपनिषत्सु ब्रह्मज्ञानात्पूर्वं ब्रह्मज्ञानसाधनानि अवश्यमनुष्ठातव्यानीति प्रतिपाद्यते । ब्रह्मज्ञानस्य नित्यकर्म- उपासना -शमदमादयः- श्रवणादयश्च साधनानि भवन्ति । तत्र नित्यकर्म कथमात्मज्ञाने

---

१ ब्र० सू० शां० भा० पृ० २९-३०

कारणं भवतीति शंकायां बृहदारण्यकश्रुतिरियं वदति -

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन
दानेन तपसा अनाशकेन'

(बृ० उ० ४-४-२२) इति। विविदिषायां कथं यज्ञदानादीनां संबन्धः इत्ययं विचारः भामती-विवरणादिमतानुसारेण पूर्वमेवास्माभिः उपपादितः। तथा च यज्ञदानादयः ज्ञानोत्पत्तेः साधनानि भवन्ति। तथाचोक्तमाचार्यैः[1] -

'विविदिषासंयोगात्त्वेषामुत्पत्तिसाधनभावो वसीयते।'

इति। अत्रोदाहृतश्रुत्या यज्ञेन दानेन तपसा नाशकेन इति चतुर्भिपदैः क्रमशः ब्रह्मचर्यादयः चत्वारो आश्रमाः अभिधीयन्ते। अतः एते चत्वारः आश्रमिणः ब्रह्मसाक्षात्कारे अधिकृताधिकारिणः भवन्ति इत्यपि सिध्यति।

उपासना कथमात्मज्ञानसाधने उपयोगिनी भवति इति चेत्-उच्यते। यः वर्णाश्रमधर्मान् ईश्वराराधनया उपयुंक्ते सः ज्ञाननिष्ठायां योगान्तं प्राप्नोति। तथा गीतायां भगवद्वचनम् -

'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।'

(भग० १८-४६) अन्यत्र च -

योगिनः कर्म कुर्वन्ति संगं त्यक्त्वाऽऽत्मसिद्धये।'

(भग० ५-११) इति भवति। कर्मयोगः ईश्वराराधनया उपासना इत्युच्यते। तथा च-शांकरं भाष्यम्[2] -

'यत्संगतया द्वन्द्वप्रहाणपूर्वकमीश्वराराधनार्थं कर्मयोगे'

इति। तस्मात् उपासना आत्मज्ञानसाधनं भवति।

शमदमादयोऽपि आत्मज्ञाने साधनीभूताः भवन्ति। तथा च श्रुतिः -

'तस्मादेवं विद् शान्तो दान्त उपरतः तितिक्षुः
समाहितो भूत्वा आत्मन्येव आत्मानं पश्यति।'

(बृ० उ० ४-४-२३) इति। तैत्तिरीयभाष्येऽपि शंकराचार्यः एवमलिखन्[3] -

'ब्रह्मचर्यं, तपः, सत्यवादनं, शमः, दमो हिंसेत्येवमादिभिरपि

---

१ ब्र० सू० शा० भा० पृ० ५६२
२ भग० शा० भा० पृ० २७
३ ईशा० शां० भा० पृ० ३५६

कर्माणि इतरां अप्रसिद्धानि विद्योत्पत्तौ
साधकतमानि इति ।'

भगवद्गीतायामपि -

'योगारूढस्य तस्यैव शम: कारणमुच्यते ।'

(भग० ६-३) इति आत्मज्ञानस्य साधनं शम: भवतीति स्पष्टं उच्यते ।

श्रवण-मनन-निदिध्यासनानि कर्माणि उपनिषत्सु प्रतिपादितात्म-साक्षात्कारे साधनानि भवन्ति । तथा च श्रुति: -

'आत्मा वा अरे द्रष्टव्य: श्रोतव्यो मन्तव्य: निदिध्यासितव्य:'

(बृ० उ० २-४-५) इति । आत्मदर्शने एव श्रवणादीनामुपयोग: । ज्ञानोत्पत्तादेव एते श्रवणादय: स्वात्मन: सार्थक्यं मन्यन्ते । आत्मसाक्षात्कार: सुलभतया न भवति । प्रथमं आत्मा पुन: पुन: श्रोतव्य: । केवलश्रवणेन नोपयोग:, आत्मविषयमधिकृत्य तदा तदा मन मननं कर्तव्यम् । मननेनापि अभीष्टं न सिध्यति । तदर्थं ब्रह्मविषयकज्ञानमधिकृत्य सर्वदा सर्वत्र च ध्यानं कर्तव्यम् । एवं शान्तचित्तेनाविरतनिदिध्यासनेनान्ते द्रष्टव्यो भवति । आत्मसाक्षात्कारो भवतीत्यर्थ: । यावदाविद्यकसंसारप्रतिबन्ध: अपगच्छति तावत्पर्यन्तं परब्रह्मण: ध्यानं कर्तव्यम् । संसारनिवृत्त्यनन्तरमेव ब्रह्मज्ञानं भवति । तथा च श्रुति: -

'एतावदरे खल्वमृतत्वम्' (बृ० उ० ४-५-१५)

इति । य: ब्राह्मण: ध्यानमेव सर्वदा करोति स: तद्भावमाप्नोति श्रुतिरुपदिशा

'ब्रह्मसंस्थो मृतृत्वमेति' (छा० उ० २-२३-१)

इति । एवं श्रवणादय: आत्मज्ञाने साधनानि भवन्ति ।

श्रवणादीनामनुष्ठानं ज्ञानपर्यन्तं करणीयं ते श्रवणादय: अस्मिन् जन्मन्येव आत्मसाक्षात्कारं जनयन्तीति न वक्तुं शक्यते । भाष्यकारै: सूत्रभाष्ये एवमुक्तम्[१] -

'यथा प्रक्रान्तस्य विद्यासाधनस्य कश्चित् प्रतिबन्धो नक्रियत उपस्थितविपाकेन कर्मान्तरेण तदैव विद्योत्पद्यते ।' यदा तु खलु तत्प्रतिबन्ध: क्रियते तदाऽमुत्र इति ।'

इति । यदि संचितदोषो न विद्यते तर्हि श्रवणादिकर्मफलेन अस्मिन् जन्मनि

---

१ ब्र० सू० शां० भा० पृ

इदानीमेव आत्मसाक्षात्कारो भवति । श्रुतिरेव साक्षाद्वदति -

'गर्भे एवैतच्छयानः वामदेवो एवमुवाच'

(ऐ० उ० २-५) इत्यत्र । ब्रह्मज्ञानानन्तरं पुनः तस्य अविद्याकृतसंसारबन्धो नास्ति । तथा च वदन्ति श्रुतयः -

'इमां मानवमावर्तं नावर्तन्ते' (छा० उ० ४-१५-५)

~~नेऽस्मिह न पुनरावृत्तिरस्ति~~

'न च पुनरावर्तते' (छा० उ० ८-१५-१)

इत्यादयः । एवं श्रवण-मनन-निदिध्यासनादि आत्मसाक्षात्कारे भवन्ति । इति ।

७ आत्मनः निदिध्यासनम्

आत्मसाक्षात्कारे निदिध्यासनस्योपयोगः महान् वर्तते । अतः तद्विषयक-चर्चा क्रियते । -

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ।'

(बृ० उ० २-४-५) इति बृहदारण्यके याज्ञवल्क्यः मैत्रेयीं प्रति आत्मदर्शनस्योपायं दर्शयति । अत्र श्रवणादयः कथं संपादनीया इति श्रुतेरस्याः आचार्यभाष्यमुपदिशति [1] -

'श्रोतव्यः पूर्वमाचार्यतः आगतश्च । पश्चान्मन्तव्यस्तर्कतः । ततो निदिध्यासितव्यो निश्चयेन ध्यातव्यः । एवं ह्यसौ दृष्टो भवति श्रवणमनननिदिध्यासनसाधनैर्निर्वर्तितैः । यदा एकत्वमेतान्युपगतानि तदा सम्यग्दर्शनं ब्रह्मैकत्वविषयं प्रसीदति, नान्यथा श्रवणमात्रेण ।'

इति । निदिध्यासनं विज्ञानमिति नामान्तरेणोच्यते । तथा च श्रुतिः -

'श्रवणेन मत्या विज्ञानेन' (बृ० उ०)

इति । अनेन निदिध्यासनमार्गेणैव आत्मज्ञानं भवति । अत्र श्रुतिरपि भवति-

'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा० उ० ८-७-१) इति ।

---

१ ईशा० शां० भा० पृ० १४१-१४२ (द्वितीयः खण्डः)

अस्या: श्रुतेरर्थं भाष्यकारा:[1] स्वमुल्लिखन्ति -

'विशेषेण ज्ञातुमेष्टव्य:, विजिज्ञासितव्य: स्वसंवेद्यतामापादयितव्य:'

इति । निदिध्यासनस्य फलं स्वसंवेद्यता इति सिध्यति । निदिध्यासनं ब्रह्मज्ञानस्य साक्षात्साधनं भवति । अयमेवाशय: व्यासाचार्येण सूत्ररूपेण प्रदर्शिता -

'अथातो ब्रह्मजिज्ञासा' (ब्र० सू० १-१-१)

इति । अस्य सूत्रस्य आचार्यभाष्यमेवं भवति[2] -

'अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छाया: कर्म ।
फलविषयत्वादिच्छाया: ज्ञानेन हि प्रमाणेनावगन्तु-
मिष्टं ब्रह्म । ब्रह्मावगतिर्हि पुरुषार्थ: । नि:शेषसंसार-
बीज अविद्याद्यनर्थनिबर्हणात् ।'

इति । यथा उपनिषच्छ्रवणात्मज्ञानस्योपकारकं भवति तथा मनननिदिध्यासने अपि अवगतिरूपात्मज्ञाने उपकारके भवत: ।

~~अवगत्यर्थत्वमनननम~~ 'अवगत्यर्थत्वान्मनननिदिध्यासनयो:'

इति भाष्यवचनानुसारेण[3] स्पष्टं भवति । आत्मदर्शनस्यैव अवगतिरिति नामान्तरम् यत: आत्मभिन्नमन्यन्नास्ति । अयमेवाशय: बृहदारण्यकभाष्ये आचार्यै: दृष्टान्त-मुखेन प्रतिपाद्यते[4] -

'क्रियाकारकफलात्मकविद्याप्रत्ययविषयं रज्ज्वामिव
सर्वप्रत्ययविषय:, तदुपमर्दनार्थमाह - आत्मनि --- भवति'

इति । अत: निदिध्यासनमार्गेण आत्मज्ञानं भवति चेत् तेन ज्ञानेन सर्वं ज्ञातं भवति । श्रुतिरपि -

'एकविज्ञानेन सर्वं विज्ञातं भवति' (बृ० उ०)

'एको देव: सर्वभूतेषु गूढ:' (केन०)

इति च ।

उपासना निदिध्यासनं च मानसक्रिया तदापि । ~~अनेक~~ अनयोर्मध्ये निदिध्यासनं दृष्टार्थं भवति । सूत्रभाष्ये आप्रयणाधिकरणे भाष्यकारै: स्वमु-पपादितम्[5] -

---

१ ईशा० शां० भा० पृ० ३१५ ३ ब्र० सू० शां० भा० पृ० २८
२ ब्र० सू० शां० भा० पृ० ६ ४ ईशा० शां० भा० पृ० १४२ (द्वितीयखण्ड:)

पपादितम्[1] -

'यानि तावत् सम्यग्दर्शनार्थान्युपासनानि तान्यवघाता-
दिवत् कार्यपर्यवसानानि इति ज्ञातमेवैषामावृत्तिपरिमाणम् ।
न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किंचिच्छासितुं शक्यम् ।'

इति । अतः सर्वासामुपासनानामपेक्षया निदिध्यासनं श्रेष्ठं भवति यतः ब्रह्मस्वरूपज्ञानानन्तरं ध्यानान्तरस्य नोपयोगः । यद्यपि इतरोपासनादिवत् निदिध्यासनं मानसक्रिया भवति तथाऽपि इयं ध्याने अपि ज्ञानसहकृतनिदिध्यासनरूपमानसक्रिया एकाग्रतया लक्ष्यभूतं वस्तुपरोक्षं कृत्वा सम्यग्ज्ञानं ददाति । एवं याज्ञवल्क्यः बृहदारण्यके व्याख्याति -

'ये इमस्तुवृत्यास्व व्याख्यास्यामि ते व्याचक्षाणस्य मे
निदिध्यासस्वेति'

(बृ० उ० २-४-४) इति । एवंभूतनिदिध्यासेन आत्मसाक्षात्कारो भवतीति ।

८ आत्मनि वेदान्तवाक्यसमन्वयः

वेदान्तवाक्यजन्यज्ञानं मुक्तेः कारणं भवतीति ये अभिप्रयन्ति ते आस्तिकाः परिगण्यन्ते । वेदान्तवाक्यानां क ब्रह्मप्रतिपादने तात्पर्यम् उत क्रियाविधौ इति जिज्ञासायां आस्तिकाः प्रतिवदन्ति - उपनिषदः एव वेदान्ताः इत्युच्यन्ते । उपनिषत्सु ब्रह्म एव प्रतिपाद्यते ।।

'ननु - न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणा-
र्थवत्ता दृष्टा उपपन्ना वा'

इति सूत्रभाष्यवचनानुसारेण[2] वेदवाक्यानां विधिसंबन्धं विना सार्थक्यं न दृश्यते । अतः वेदान्तवाक्यानामपि विधावेव तात्पर्यमिति चेत्-न । वेदान्ताः ब्रह्मपराः भवन्ति । ब्रह्म नित्य नित्यशुद्धबुद्धमुक्तस्वभावः उपनिषदि प्रतिपाद्यते । नित्यवस्तु वाक्यैः न विधातव्यं किन्तु ज्ञापनीयम् । स अतः वेदान्तवाक्यानि ब्रह्मज्ञापकानि भवन्ति अतः न ब्रह्मणः विध्यन्वयः । एवं प्रतिपादयते भाष्यकारः अध्यासभाष्यान्ते[3]-

'एवमयमनादिरनन्तो नैसर्गिको ध्यासः मिथ्याप्रत्ययरूपः

---

१ ब्र० सू० शां० भा० पृ० ६२७
२ ,, ,, ,, ,, ,, १३
३ ,, ,, ,, ,, ,, ४

कर्तृत्वभोक्तृत्वप्रवर्तक: सर्वलोकप्रत्यक्ष: । अस्या: अनर्थहेतो: प्रहाणाय आत्मैकत्वमिथ्याप्रतिपत्तये सर्वे वेदान्ता: आरभ्यन्ते ।'

इति । तस्मात् आत्मैकत्वज्ञापने एव सर्वे वेदान्ता: कृतार्था: भवन्ति । किंच सर्वेषां वेदान्तवाक्यानां ब्रह्मणि समन्वयो भवति । समन्वयस्त्रिविध: । प्रथमसमन्वय: - ऋग्यजुस्सामाथर्वणवेदसंबन्धिन: सर्वा: वेदान्तोपनिषद: अखण्डरूपं ब्रह्मतत्त्वं प्रतिपादयन्ति । वेदान्तोपनिषद्वाक्यानि तात्पर्यरूपेण ब्रह्मणि समन्वयन्तीति द्वितीय: । तृतीयस्तु वेदान्तवाक्येषु वर्तमानानि पदानि ब्रह्मस्वरूपं प्रतिपक्ष प्रतिपादयन्तीति इति तेषां समन्वय: । तथा च ब्रह्मणि उपनिषदां समन्वय:, तत्र वेदान्तवाक्यानां समन्वय:, वेदान्तवाक्यवर्तीनां पदानां समन्वय इति त्रिविधरूप: समन्वय: । एतै: त्रिभि: समन्वयै: परमार्थसद्रूपं ब्रह्म प्रतिपाद्यत इति वक्तुकाम: व्यासाचार्य: प्रणिनाय -

'तत्तु समन्वयात्' (ब्र० सू० १-१-४)

इति । समन्वयात् - तात्पर्यविषयत्वात् इति । अत्र भाष्यं भवति[१] -

सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य
'प्रतिपादकत्वेन समनुगतानि'

इति । श्रुतय: अपि -

'सदेव सौम्य इदमग्र आसीत्, एकमेवाद्वितीयम्'

(छा० उ० ६-१-२) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० उ० १-१-१)

'ब्रह्मैवेदममृतं पुरस्तात्' (मुण्ड० २-२-११)

इत्यादय: ब्रह्मण: एकत्वं साक्षाद्वदन्ति ।

'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० २-१)

इति ब्रह्मण: लक्षणवाक्यं भवति ।

अत्र सत्यज्ञानानन्दपदानि नियम्यनियामकभावेन सत्यादिशब्दवाच्यवस्तुभि: ब्रह्मस्वरूपं पृथक्कृत्य ब्रह्म ज्ञापयन्ति । अत: ब्रह्म सत्यपदवाच्यं, ज्ञानपदवाच्यं, आनन्दपदवाच्यं च न भवति । तथा च सत्स्वरूपं ब्रह्म, ज्ञानस्वरूपं ब्रह्म, आनन्दस्वरूपं ब्रह्म इति च सिध्यति ।

---

१ ब्र० सू० शां० भा० पृ० १३
२ ,, ,, ,, ,, ,, ,, ४२

ब्रह्म-स्वि-च-निरु

ब्रह्मज्ञापकप्रमाणं वेदान्तादिशास्त्रमेव भवति । उपनिषत्सु प्रकारद्वयात्मकं ब्रह्माभिधीयते । तत्र उपास्यरूप: सोपाधिक: नामरूपात्मक: एक: आत्मा । उपाधिरहित: ज्ञेयरूप: आत्मा अन्य इति । तथा च शांकरं भाष्यम्[1] -

'द्विरूपं हि ब्रह्मावगम्यते । नामरूपविकारभेदोपाधिविशिष्टं, तद्विपरीतं च सर्वोपाधिविवर्जितम् ।'

इति । परमार्थत: ब्रह्म एक एव । अविद्यावस्थायामेव ब्रह्मण: उपास्योपासकभाव: । तदानीमेव अस्मिन् सर्वे व्यवहारा: उपपद्यन्त इति । तस्मात् ब्रह्मणि अविद्याकृतो भेद: । उपास्यरूपे ब्रह्मणि रूपाद्याकारा: वर्तन्ते । अयमेव सगुणब्रह्म इति प्रोच्यते । ज्ञेयब्रह्मणि तु सर्वेऽपि विकारा: न संभवन्ति । एतत् निर्गुणं ब्रह्म केवलात्मा इति चोच्यते । तथा च श्रुतय: -

'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ० उ० ३-८-८)

'अशब्दमस्पर्शमरूपमव्ययम्' (कठ० १-३-१५)

'दिव्यो ह्यमूर्त: पुरुष: स बाह्याभ्यन्तरो ह्यज:' (मुण्ड० २-१-२)

इत्यादय: । निष्प्रपंचरूपस्य परब्रह्मण: ज्ञाने एव सर्वासामुपनिषच्छ्रुतीनां तात्पर्यं भवति । अत: निर्विकल्पकं ब्रह्म उपासनाविधे: अंगं न भवति । साकारब्रह्मवाक्यानि उपासनाविधिपराणि भवन्ति । अत: एता: श्रुतय: प्रधानतया परब्रह्मण: स्वरूपं न प्रतिपादयन्ति ।

अस्माकमात्मा एव ब्रह्म इत्युच्यते । अत: न कस्यापि प्रमाणस्य विषयो भवति । प्रमेय: न भवतीत्यर्थ: । तस्मिन् ब्रह्मणि गुणक्रियादिविशेषा: न सन्ति । शब्देन एवंरूप: इति निर्वक्तुं न शक्यते । अत एव वेदान्तिभि: अनिर्वचनीय आद्रियते ।

नन्वेवं सति वेदान्तवाक्यानि ब्रह्मणि समन्वितानि भवन्ति । उपनिषद्वाक्यपदानि ब्रह्मणि समन्वितानि, वेदान्तवाक्यज्ञानेन च आविद्यकसंसारस्य नाशो भवतीति कथनं न संगच्छत इति चेत्-उच्यते । आविद्यकदृष्ट्या आत्मानात्माध्यासेन वयं सर्वे प्रमातार: संसारिणश्च । संसारिणामस्माकं परब्रह्मस्वरूपज्ञानार्थं शास्त्रं प्रमाणं भवति । एतद्वेदान्तशास्त्रं च आत्मन: प्रमाण-प्रमेयव्यवहारान् दूरीकृत्य अयमात्मा 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनम्' ( )

---

१ ब्र० सू० शां० भा० पृ० ४२

इति श्रुतिप्रतिपादितब्रह्मेति उपदेशपूर्वकं परमार्थस्वरूपप्राप्त्यै कारणं भवति। ब्रह्मज्ञानानन्तरं परमार्थदृष्ट्या प्रमात्रादिभेदा: न सन्ति, आत्मप्रमाणविषयोऽपि न भवति इति श्रुत्युक्त: मार्ग: समीचीन एव। यावद्ब्रह्मज्ञानं तावत् शास्त्रस्यावश्यकता वर्तते एव। एवं सूत्रभाष्ये आचार्यैरुपदिष्टम्[1] -

'तस्मात् अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधय: सर्वाणि चेतराणि प्रमाणानि। न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्प्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति।'

इति। अनेन भाष्यवचनेन स्पष्टं भवति यत् वेदान्तवाक्यानि ब्रह्मज्ञानपर्यन्तं प्रमाणानि भवन्ति। सर्वेषु चोपनिषद्वाक्येषु एक एव ब्रह्म समधिगम्यते। सर्वा ब्रह्मज्ञानार्थं तत्स्वरूपनिर्णयार्थं च प्रवर्तन्ते इति। तस्मात् सर्वाणि वेदान्तोपनिषद्वाक्यानि ब्रह्मणि समनुगतानि इति सिद्धम्॥

६ आत्मानुभवे तर्कस्योपयोग:

'पण्डितो मेधावी' (छा० उ० ६-१४-२) इति छान्दोग्यश्रुतिपर्यालोचनेन उपदेशेन गान्धारदेशं मेधावी पण्डित: यथा गमिष्यति तथा आचार्योपदेशेन मेधावी पुरुष: ब्रह्मतत्त्वसाक्षात्कारं लभते इति सिध्यति। अत: आत्मतत्त्वसाक्षात्कारे प्रयत्नशीलस्य पुरुषस्य उपनिषच्छ्रुतय: साधनीभूतानि भवन्ति। उपनिषच्छ्रुतीनां सम्यगर्थनिर्धारणाय तदुपयुक्तस्य तर्कस्य स्थानं महद्वर्तते। उपनिषच्छ्रुतय: स्ववाक्यजन्यज्ञानं जनयन्ति। अनन्तरमयमर्थ: इत्थमेवेति निर्धारणसामान्यतर्केणैव क्रियते। साधनीभूतेषु श्रवण-मनन-निदिध्यासनेषु मननमेव तर्को भवति।

श्रुत्युपदेशानन्तरं श्रवणजन्यज्ञानेनैव य: आत्मसाक्षात्कारेकरण कृतकृत्यो भवति तर्कस्योपयोगो नास्ति। पूर्वसुकृतानां कवन पुरुषाणां 'तत्त्वमसि' इत्यादिश्रुतिश्रवणादेव आत्मसाक्षात्कारो भवति। एते आत्मज्ञाने उत्तमाधिकारिण इति परिगण्यन्ते। एषां कृते ब्रह्मसाक्षात्कारानन्तरं तर्कस्योपयोगो नास्ति। बहूनां जीवानां श्रवणमात्रेण आत्मसाक्षात्कारो न भवति। एवं श्रूयते कठवल्याम् -

'श्रवणायाऽपि बहुभिर्यो न लभ्य: शृण्वन्तो पि बहवो बन्म यं न विद्यु:।
आश्चर्यो वक्ता कुशलो स्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट:॥' (१-२-७)

---

१ ब्र० सू० शां० भा० पृ० २६

इति । एतेषां कृते श्रुत्युपयुक्ततर्कस्योपयोग: भवत्येव । तथा चात्र शांकरभाष्यम्[1] -

'तत्र येषामेतौ पदार्थावज्ञानसंशयविपर्यासप्रतिबद्धौ तेषां
तेषां तत्त्वमसीत्येतद् वाक्यं स्वार्थे नोत्पादयितुं शक्नोति
पदार्थज्ञानपूर्वकत्वाद् वाक्यार्थज्ञानस्येत्यत:, तान् प्रत्येष्टव्य:
पदार्थविवेकप्रयोजन: शास्त्रयुक्त्यभ्यास:'

इति । आत्मतत्त्वम् अणोरपि अणु इति श्रुतिषु प्रतिपाद्यते । अत: लौकिक-तर्केण ज्ञातुं न योग्य इति । एवं काठकश्रुति: -

'अतर्क्यमणुप्रमाणात्' 'नैषा तर्केण मतिरापनेया'

(कठ० १-२-८,६) इति । अत: आत्मज्ञानस्य लौकिकतर्कस्योपयोगो नास्तिरिति श्रुत्या सिध्यति । श्रुतेरस्या: अयमर्थ: - आत्मानुभवविशिष्टाचार्यस्योपदेशं विना केवलतर्केण आत्मज्ञानं न सिध्यतीति । अत एवोक्तं तत्रैव -

'अनन्यप्रोक्ते गतिरत्र नास्ति, प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ'

(कठ० १-२-८,६) इति । अत: प्रामाण्यहीन इति उपनिषच्छ्रुतिषु निषिध्यते ।

तर्क इति पदं वादिन: विभिन्नार्थेषु प्रतिपादयन्ति - यथा नैयायिका: अनुमानमेव तर्क इति पदेन व्यवहरन्ति । 'पर्वतो वह्निमान् धूमवत्त्वात्' इत्यनुमान-प्रयोगे अनिश्चितं वह्निं तर्केण साधयन्ति । अस्मिन्नेवानुमानप्रयोगे यदि वह्नि: न स्याद् धूमोऽपि न स्याद् इति युक्तिमपि तर्क इति पदेन व्यवहरन्ति । एवं विभिन्नशास्त्रकारै: निरूप्यमानस्तर्कशब्द: श्रोतव्यो मन्तव्य: इत्याद्युपनिषच्छ्रु-तिषु न प्रतिपाद्यते, यत: आत्मतत्त्वस्य यथार्थस्वरूपं आगमं विना अन्येन प्रमाणेन ज्ञातुं न शक्यते । सूत्रभाष्ये पि -

'न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनमागममन्तरेणो-
त्प्रेक्षितुमपि शक्यम्'

इति आचार्यभाष्यं[2] निगदितं दृढीकरोति ।

श्रुत्यनुगृहीतस्य तर्कस्य केवलतर्कस्य च एतावान् भेद: - श्रौततर्क: अनुभवांगत्वात् अनुभवविरुद्धं न साधयति । एवमाचार्यभाष्ये ~~सिद्ध~~ जिज्ञासाधिकरणे भिप्रेत: -

'तस्माद्ब्रह्म जिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा,

---

१ ब्र० सू० शां० भा० पृ० ६१५ - ६१६
२ ,, ,, ,, ,, ,, २५२
३ ,, ,, ,, ,, ,, ८

तदविरोधितर्कोपकरणा नि:श्रेयसप्रयोजना प्रस्तूयते ।'

इति । एवं ब्रह्मजिज्ञासाया: वेदान्तवाक्यं करणम्, तस्याविरोधी तर्क: उपकरणं भवति । केवलतर्कस्तु बुद्धिवैशद्येन वस्तुनिर्धारण उपयोगी भवति । तथा च भाष्यम्[1] -

'उत्प्रेक्षाया: निरंकुशत्वात् ------ । ---

---- न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुम् ।

पुरुषमतिवैरूप्यात् ।'

इति । अवैदिकस्तर्क: स्वबुद्धिकल्पनानुसारेण लघुमेकमाधारीकृत्य प्रवर्तयति । अयं तर्क: मूलतत्त्वप्रत्यक्षपर्यन्तं नागमिष्यति । तदानीं युक्तियुक्तत्वेन दृश्यमाणो प्ययं तर्क: तत्त्वसाक्षात्कारे अस्य नोपयोग एव । अत एव प्रधानकारणतावादिसांख्यमतं वैशेषिकानां परमाणुवाद: बौद्धमतं च सूत्रभाष्ये तत्र तत्र खण्ड्यते । एतेषां शास्त्रकाराणां युक्त्या कल्पितानि सिद्धान्तानि शास्त्रसंमतानि न भवन्तीति सद्भाष्यकाराणामाशय: । एवं जैनै: पाश्चात्यशास्त्रज्ञैश्च कल्पितानि तत्त्वानि विवादास्पदानि भवन्ति । कल्पितं सर्वं मिथ्या इति अद्वैतिनां मतम् । वैदिकतर्कस्तु वेदाख्यशास्त्रमाधारं कृत्वा प्रवर्तते । शास्त्रे तु अनुभवसिद्धं सर्वसंमतमर्थमेव प्रतिपादयति उदाहरणेन - सर्वेषामपि हृदि साक्षी एक वर्तते, स एवात्मा इत्यभ्युपगच्छन्ति, यत: स आत्मा सर्वेषामेक एव भवति । य: अमुं सिद्धान्तं नांगीकरोति, तस्यापि अयमेव साक्षिरूप आत्मा एव । तस्मात् सर्वै: अवश्यमात्मन: अस्तित्वमभ्युपगन्तव्यम् अत्र शांकरं भाष्यम्[2] -

'आत्मत्वाच्चात्मनो निराकरणशंकानुपपत्ति:'

इति । इतरतर्कापेक्षया वैदिकतर्क: प्रबलो भवति यत: तर्कस्यास्य सार्वत्रिकानुभव: आधारो वर्तते । इतरे तर्का: शुष्का: भवन्ति । सूत्रभाष्येऽपि आचार्यै: प्रतिपादितम्[3]-

'नानेन मिषेण शुष्कतर्कस्यात्र आत्मलाभं संभवति ।

श्रुत्यनुगृहीत एव ह्यत्र तर्को नुभवांगत्वेनाश्रीयते ।'

इति । ननु अद्वैतशास्त्रे भ्युपगतस्तर्क: द्वैतसापेक्ष एवेति चेत् - सत्यम् । यद्यपि वस्तुत: आत्मनि न कोऽपि धर्मो वर्तते, तथाऽपि आत्मस्वरूप: एक: पदार्थो स्ति इति सम्यग्ज्ञानात्पूर्वं उपाधिसंस्कृतब्रह्मण: स्वरूपज्ञानार्थं तस्मिन् धर्मान् प्रकल्प्य धर्मस्वरूप: तर्केण निर्धार्यते । धर्मिस्वरूपज्ञानानन्तरमेव हि एते धर्मा ब्रह्मणि न

---

१ ब्र० सू० शां० भा० पृ० २५१ ३ ब्र० सू० शां० भा० पृ० २४६
२ ,, ,, ,, ,, ३५५

भवन्तीत्युच्यते । गीताभाष्ये आचार्याः एवमर्थं प्रणीय आहुः[1] -

'उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्योच्यते'

इति । तस्मात् कल्पिते द्वैतरूपे धर्मे एव तर्कस्योपयोगः । अध्यारोपापवादन्यायेन अवस्थात्रये कार्यकारणसंघातमात्मा तर्केणैव ज्ञातव्यः । तदानीमेव कर्ता-कर्म-करणमित्यादिद्वैतव्यवहारानुपपत्तेः । अतः तर्कः द्वैतसापेक्ष एव । तस्मात् अद्वैतशास्त्रे आत्मज्ञानात्पूर्वं तर्कस्योपयोगाभ्युपगमे ऽपि अद्वैतवेदान्तस्य न कोऽपि हानिर्जायत इति मन्तव्यम् ।

ननु यदि अद्वैतशास्त्रमेव परमार्थरूपमित्युच्यते तदा प्रत्यक्षानुमानकर्मकाण्डादीनां विरोधः प्रसज्येत । किंच तत्वावबोधकमद्वैतशास्त्रम्, तस्योपदेष्टा गुरुः, उपदिष्यमानः अन्तेवासी इति च न सिध्यन्ति । एवमभ्युपगमे आत्मसाक्षात्कार एव न भवेत्, द्वैतापत्तिश्च । तस्मात् अद्वैतश्रुतीनां स्वात्मनः अस्तित्वे एव व्याघात इति चेत्-न । आत्मा प्रत्यक्षस्य अनुमानस्य च विषयो न भवति । अयं विषयः सविस्तरं पूर्वमेवोपपादितः । कर्मकाण्डं तु क्रिया-कारक-फलभेदमवलम्ब्य प्रवर्तते । आचार्या अपि बृहदारण्यकभाष्ये एवमभणन्[2]-

'यथा प्राप्तस्यैव अविद्याप्रत्युपस्थापितस्य क्रियाकारकफलस्य आश्रयणेन इष्टानिष्टप्राप्तिपरिहारोपायसामान्ये प्रवृत्तस्य तद्विशेषमजानतः तदाचक्षाणा श्रुतिः क्रियाकारकफलभेदस्य लोकप्रसिद्धस्य सत्यतां वा नाचष्टे न च वारयति ।'

इति । कर्मकाण्डे इष्टानिष्टप्राप्तिपरिहारसाधनीभूतकर्मणः अनुष्ठानाननुष्ठान-विचारः तत्तत्कर्मणः फलविचारश्च प्रतिपाद्यन्ते । तस्मात् अयमद्वैतसिद्धान्तः कस्यापि प्रमाणस्य विरोधो न भवति यतः प्रमाणानि स्वविषयज्ञापने एव प्रमाणम् स्मर्यते च गीताभाष्यम्[3] -

'लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य'

इति । वस्तुज्ञानानन्तरं तद्विषये प्रमाणं पुनः न प्रवर्तते ।

अद्वैतशास्त्रे आत्मा एकः परमार्थरूपश्च इत्युच्यते । अतः आत्मनि उपदेशादयः भेदश्च न सन्ति । सति ह्येवं विरोधस्याशंका एव नास्ति । तथा च भाष्यम्[4] -

---

१ भग० शां०.भा० पृ० २०४
२ बृ० उ० शां० भा० पृ० १२४-१२५ (द्वितीयखण्डः)
३ भग० शां०.भा० पृ० ३६
४ बृ० उ० शां० भा० पृ० १२७ (द्वितीयखण्डः)

> एकस्मिन् ब्रह्मणि निरुपाधिके नोपदेशः, नोपदेष्टा
> न च उपदेशग्रहणमूफलम्'[१]

इति । वेदान्ते उपयुक्तस्य सार्वत्रिकानुभवानुसारिणः तर्कस्य स्वरूपं सूत्रभाष्ये आचार्यैः एवं निर्णीतं वर्तते -

> 'स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनो
> नन्वागतत्वम्, संप्रसादे च प्रपंचपरित्यागेन सदात्मना
> संपत्तेर्निष्प्रपंचसदात्मत्वम् । प्रपंचस्य ब्रह्मप्रभवत्वात् कार्यकारणा-
> नन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवंजातीयकः(तर्कः)

इति । एवमद्वैतशास्त्रे एवं विमर्शः अंगीकृतो भवति ।

अन्येषां वादिनां मते पक्षप्रतिपक्षपूर्वकं परस्परविवादेन अन्ते सिद्धान्तत्वेन अद्वैत एव स्थापितो भवति, यतः सर्वेऽपि तार्किकाः द्वैतं सत्यत्वेनांगीकृत्य स्वसिद्धान्त-मण्डनपूर्वकं परपक्षं खण्डयन्ति । खण्डनमण्डनावसरे स्वे स्वमते उद्भावितान् दोषान् दूरीकृत्य 'एतदेवसर्वसंमतम्' इति न प्रतिपादयन्ति । एतावता द्वैतशास्त्रमेव विवादस्य कारणं भवति, तस्मिन् तर्ककृतदोषाः वर्तन्त एवेति सिध्यति । अद्वैतशास्त्रे प्रतिपादितमात्मानं न कोऽपि नास्तीति ~~न~~ भणति । यतः अनुभवरूपः आत्मा एव सर्वेषां आत्मा भवति । तस्मात् आत्मानुभवस्य कृते आवश्यकमननात्मक-तर्कस्योपयोगः वर्तत एवेति सिध्यति ।।

१० आत्मा अवस्थात्रयरहितः

जाग्रत्स्वप्नसुषुप्तिरूपः इति त्रयः अवस्थाः सन्ति । एतेषां स्वरूपं अलातशान्तिप्रकरणे माण्डूक्यकारिकाभाष्ये आचार्यैः सम्यक् ~~प्र~~ प्रतिपादितम्[२] -

> 'लौकिकं शुद्धलौकिकं लोकोत्तरं येन ज्ञानेन ज्ञायते तज्ज्ञानम् ।
> ज्ञेयमेतान्येव त्रीणि । एतद्व्यतिरेकेण ज्ञेयानुपपत्तेः ।
> सर्ववादिकल्पितवस्तुनः अत्रैवान्तर्भावात् । विज्ञेयं
> परमार्थसत्यं तुर्याख्यमद्वयमजमात्मतत्त्वम् ।'

इति । प्रमातृत्वदृष्टिरेव अविवादृष्टिरित्युच्यते । आविद्यकदृष्ट्या एव पुरुषस्य

---

१ ब्र० सू० शां० भा० पृ० २४६
२ मां० शा० भा० ४६३

लौकिक-वैदिकास्सर्वे व्यवहारा: उपपन्ना: भवन्ति । तथा च गीताभाष्यम्[1] -

'योऽयं लौकिको वैदिकश्च व्यवहार: स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते । अविद्यायाश्च विद्याविरोधान्निवृत्ति: ।'

इति । यथा सूर्यस्योदयात् तमस: निवृत्ति: तथा विद्योदयादनन्तरमविद्याया: निवृत्तिरिति । अयं विषय: अवस्थात्रयपरीक्षणेन दृढीकृतो भवति ।

तत्र जागरितान्तरित: आत्मा आध्यात्मिक, आधिभौतिक, आधिदैविक-प्रपंचोपाधिक: भवति । अस्य नाम वैश्वानर इति । स्वप्नावस्थाया: आत्मा तैजस इति आचक्षते । सुषुप्तावस्थाया: आत्मा प्राज्ञ इत्याम्नायते । पूर्वस्मिन्नुत्तरस्यलयदर्शनार्थं पाद इति पदमुच्यते । तथा च माण्डूक्योपनिषद्भाष्ये[2]-

त्रयाणां विश्वादीनां पूर्वपूर्वप्रविलापनेन तुरीयस्य प्रतिपत्तिरिति करणसाधन: पादशब्द: ।'

इति आचार्यै: स्पष्टं कथितम् । पद्यते अनेनेति पाद: इति करणे ल्युट् । तुरीये तु भावेल्युडन्तम् । तुरीय: निजस्वरूप: केवल आत्मा भवति । अत्र श्रुति:-

'सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म, सो यमात्मा चतुष्पात् ।'

(माण्डू० उ० २) इति । जना: कथयन्ति जाग्रद्रूप: प्रपंच: सत्स्वरूप: स्वप्न: मिथ्याभूत इति । एवं वक्तव्ये शास्त्रप्रमाणं नास्ति । यत: अत्र आचार्या[3]:

'प्रसिद्धेनैव भेदानां ग्राह्यग्राहकत्वेन हेतुना समत्वेन स्वाप्न-जागरितस्थानयोरेकत्वमाहुर्विवेकिन: इति ।'

इति पठन्ति । स्वप्नवत् जाग्रदिति माण्डूक्यकारिका प्रतिपादयति -

'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथै: सदृशा: सन्त: अवितथा इव लक्षिता: ।।

(माण्डू० का० २-६) इति । अन्त:कल्पित: पदार्थ: यावत् चित्तवृत्ति: तावत्का-लपर्यन्तं भाति । जाग्रत्पदार्था: एकैकेन परस्परपरिच्छेद्या: कालवर्तिनश्च सन्ति । केचन पदार्था: मनसि अव्यक्ता: भवन्ति, केचन बहि: स्फुटा: भवन्ति । सर्वे एते जाग्रत्स्वप्नयो: समाना न भवन्ति । देशकालनिमित्तादय: जाग्रत्स्वप्नयो:

---

१ भग० शां० भा० पृ० ३८ ३ ईशा० शां भा० पृ० ४४३
२ ईशा० शां भा० पृ० ४२६

पृथक् पृथगेव भवन्ति । तस्मात् इमे जाग्रत्स्वप्नावस्थे स्वतन्त्री भवत: सममेव मिथ्याभूतौ च । अत: स्वप्नवत् जाग्रदपि मिथ्या एव । चोक्तमाचार्यै: -

> 'तस्मात् स्वप्ने मृषाध्यारोपिता एव आत्मभूतत्वेन लोका अविद्यमाना एव सन्त: तथा जागरिते पि इति प्रत्येतव्यम् ।'[1]

इति बृहदारण्यकभाष्ये ।

स्वप्नवत् जाग्रदपि मिथ्यक चित्तं द्वैतरूपेण प्रतिभासते । यथा स्वप्ने विभिन्नजीवा: साक्षात्क्रियन्ते तथा जाग्रति अनेके जीवा: दरीदृश्यन्ते । स्वप्ने चिति दृश्यमाना: पदार्था: चित्तात् न भिद्यन्ते, चिति अध्यस्ता: भवन्ति । एतत् चित्तं द्रष्टुरात्मन: पृथक् नास्ति । एवं जाग्रत्यपि मन्तव्यम् । स्वप्नजीवा: मायाजीवा: मन्त्रादिना निर्मितजीवाश्च यथा तथा जाग्रत्काले वर्तमाना: जीवा अपि कल्पिता: भवन्ति । जाग्रत्स्वप्नावस्थयो: सर्वो व्यवहार: चिन्मय: भवति । चित्तमपि वस्तुत: आत्मा भवति । चोक्तं काठके -

> 'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
> महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।।'

(कठ० २-१-४) इति । सुषुप्तावस्थाया: स्वरूपं माण्डूक्ये श्रूयते -

> 'यत्र सुप्तो न कंचनकामं कामयते, न कंचन स्वप्नं पश्यति तत् सुषुप्तम् ।'

(माण्डू० उ० ५) इति । सुषुप्तौ पदार्था: भिन्न-भिन्ना: न भवन्ति । पदार्थानां ~~ज्ञानमपि तु~~ ज्ञानमपि भिन्नं न भवति । सुखमपि भिन्नत्वेन नानुभूयते । अस्यामवस्थायामात्मा सत्स्वरूप: आनन्दरूपश्च । इयमवस्था ब्रह्मण: तृतीय: पाद: । तथा चोच्यते श्रुतौ -

> 'सुषुप्तस्थाने एकीभूत: प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चे-तोमुख: प्राज्ञस्तृतीय: पाद: ।'

(माण्डू० उ० ५) इति । अत्र प्रमातुर्जीवस्य प्रमातृत्वव्यवहारो नास्ति । सुषुप्ते: स्वरूपं छान्दोग्ये एवमुपवर्ण्यते -

---

१ ईशा० शां० भा० पृ० ११२ (द्वितीय: खण्ड:)

'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो
भवति, स्वमीतो भवति तस्मादेनं स्वपितीत्याचक्षते'

(छा० उ० ६-७-१) इति । सुषुप्तौ जीवः असंसारिकः शुद्धो भवति इति बहवः श्रुतयः प्रतिपादयन्ति । अत्रैवात्मनः आनन्दः परमानन्दो भवति ।

'अत्र पिताऽपिता भवति माताऽमाता लोका अलोका
देवा अदेवा वेदा अवेदाः ।'

(बृ० उ० ४-३-२२) इति बृहदारण्यकश्रुत्युक्तदिशा जीवात्मनः अस्यामवस्थायां सर्वे व्यवहाराः मिथ्यारूपाः इति । अस्यां श्रुतौ सुषुप्तिः सम्यक् प्रतिपाद्यते । सुषुप्तौ क्रियाकारकफलविशिष्टः प्रपंचो नास्ति । जाग्रत्स्वप्नयोः यः [illegible] साक्षिरूपो भवति स एव अत्रापि साक्षी इति । सुषुप्तेः जाग्रत्स्वप्नयोश्च अयं विशेषः - जाग्रत्-स्वप्नकाले विशेषात्मनः तथा क्रियाकारकफलरूपस्य प्रपंचस्य च सद्भावासद्भावे अभ्युपगम्यते । सुषुप्तौ तु अस्याभावः अंगीक्रियते । अनेनैव कारणेन सिध्यति यत् आत्मा प्रपंचस्योपादानकारणं निमित्तकारणं च भवतीति ।

(निष्प्रपंच-सप्रपंच) निष्प्रपंचत्वं सप्रपंचत्वं च आत्मनः भवतः, तत्र नामरूपप्रपंचात्मना परिदृश्यमानं सप्रपंचत्वमविद्यया भवति । परमार्थदृष्ट्या दृश्यमाने सर्वमेतत् मिथ्या भवति । तस्मात् त्रयाणामवस्थानां साक्षीरूपेण वर्तमानः परमार्थरूपः आत्मा एक एव । अस्यात्मनः एताः अवस्थाः न परमार्थाः इति विवेचनीयम् ।

एवमवस्थात्रयविचारेण एतत्सिद्धं भवति यत् त्रिष्वपि अवस्थासु चैतन्यात्मनि एकस्मिन् वर्तमाने अन्तःप्रज्ञत्व-बहिःप्रज्ञत्वादीनि इतरस्वरूपाणि परस्परं व्यधिकरणत्वात् असत्यानि भवन्ति । उदाहरणेन जाग्रत्काले दृश्यमानः धर्मः वर्तमानत्वेन व्यवह्रियते, स्वप्ने स्वात्मन्येवायं धर्मः दरीदृश्यते । सुषुप्तौ तु चैतन्यमात्रत्वरूपः धर्मः अथवा अप्रज्ञत्वरूपः धर्मः दृश्यते । अत एव शास्त्रकारैः बहिःप्रज्ञत्वं अन्तःप्रज्ञत्वाप्रज्ञत्वरूपेण जाग्रत्स्वप्नसुषुप्त्यवस्थाः व्यवह्रियन्ते । तस्मात् एकैकस्यामवस्थायां दृश्यमानेषु धर्मेषु एकमपि आत्मस्वरूपे सत्यं न भवते । एवमेताः तिस्रः अवस्थाः आत्मस्वरूपे सत्यत्वेन न वर्तन्ते । अतः सप्रपंचत्वं वा निष्प्रपंचत्वं वा आत्मनि नान्तर्भवतः, आत्मनः केवलचैतन्यस्वरूपं परमार्थं तु भवति ।

'तमेतदविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य
सर्वे प्रमाणप्रमेयव्यवहारा: लौकिका: वैदिकाश्च प्रवृत्ता: ।'[१]

इति । अपि च भाष्ये -

'देहेन्द्रियादिष्वहं ममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ते:'

इत्युक्तत्वात् देहादय: साध्या: भवन्ति आत्मन:, किन्तु देहादय एव आत्मा न भवति इति सिध्यति । मम देहम्, मदीयानि इन्द्रियाणि आत्मनि आत्म-व्यवहारे एव अहं प्रमाता, प्रमाणभूतै: इन्द्रियै: प्रमेयं ज्ञानामीत्यादि प्रमातृ-प्रमाणप्रमेयव्यवहारा: उपपद्यन्ते । एते व्यवहारा: आविद्यका: इति यस्य सम्यग्ज्ञानं भवति, तस्य एते: भिन्न: सर्वसाक्षिरूप: आत्मा एक एवेति ब्रह्मसाक्षात्कारो भवति । तस्मात् आत्मनि प्रमाणप्रमेयरूपोऽयं विभाग: नोपपद्यते, एते अपरमार्थिक अपारमार्थिकाश्चेति ।।

१३ मिथ्यात्वनिरूपणम्

यद्यपि आत्मन: एकत्वे एव सर्वं मिथ्येति सिध्यति, तथापि संग्रहेण तस्य स्वरूपमुपवर्ण्यते । तथा हि - दृश्यप्रपंच: बुध्यादयश्च मिथ्याभूता: इत्य-स्मिन् शास्त्रे प्रतिपाद्यन्ते । अद्वितीय: स परमात्मा स्वशक्त्या विचित्ररूपममुं प्रपंचं सृजति, अनन्तरं च सृष्टं सर्वं जगत् स्वात्मनि विलीनं करोति । प्रपंचस्य जन्म-नाशयो: विद्यमानत्वात् दृश्यमान: प्रपंच: मिथ्या भवति । यद्यत् उत्पत्तिमत् तत्तत् मिथ्या इत्युच्यते । बुध्यादयस्तु जीवस्य धर्मा: भवन्ति । शरीरे आत्मन: प्रवेशानन्तरं तत्र तस्य बुध्यादय: जायन्ते । यदा उपाधिभूत-शरीरात् आत्मा निर्गच्छति, तदा सर्वे बुध्यादय: तस्मिन् लीयन्ते । अत: बुध्यादयोऽपि मिथ्याभूता: भवन्ति । अत: एवोच्यते सांप्रदायिका: -

'ब्रह्म सत्यं जगन्मिथ्या अभेदो परमार्थत: ।'

इति । परिदृश्यमाना: नामरूपादिविशिष्टा: एते जीवात्मान:, भूतभौतिक-प्रपंचश्च तस्मात् परमात्मन: उत्पद्यन्त इति शास्त्रादवगम्यते । अत: दृश्यमानं सर्वं मिथ्येत्युच्यते इति ।।

---

१ ब्र० सू० शां० भा० पृ० ३

इत्युच्यते । ज्ञानसाधनरूपाणि इन्द्रियाणि प्रमाणानि । ज्ञानस्य विषयः प्रमेय इति विवेकः । प्रमाणकाले एते विभागास्त्रयः अत्यावश्यकाः भवन्ति, आत्मज्ञानस्योपकारकाश्च । प्रमेयभिन्नमात्मतत्त्वमेकं मन्तव्यम् । तथा च श्रुतिः -

'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्'

(बृ० उ० ४-४-२०) इति । ननु यद्यपि आत्मज्ञानसाक्षात्कारार्थमिन्द्रियाणामवश्यकत्वं नास्ति, तथाऽपि मनसः आवश्यकता अतीव वर्तते । मनसा एव हि तज्ज्ञानं ज्ञातुं शक्यते, मनसा विना अन्येन पुनः कथं ज्ञातुं शक्यते । अतः मनः आवश्यकमेवेति चेत् - सत्यम् । मनसा एव आत्मज्ञानसाक्षात्कारो भवति । एवं बृहदारण्यकश्रुतिः वदति -

'मनसैवानुद्रष्टव्यं नेह नानास्ति किं चन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।।'

(बृ० उ० ४-४-१९) इति । गीताभाष्येऽपि आचार्याः[1] -

'शास्त्राचार्योपदेशशमदमादिसंस्कृतं मनः आत्मदर्शने कारणम्'

इत्यभ्यधुः । आत्मज्ञाने मनः कारणं न भवति अपि तु निमित्तकारणं भवति । कारणव्यपदेशस्तु प्रामुख्यमात्रेणैवेति । गौडपादाचार्याः स्वकारिकायामेव -

'आत्मसत्यानुबोधेन न संकल्पयते यदा ।
अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ।।'

(मा० का० ३-३२) इत्युपादिशन् ।

नच प्रमातृ-प्रमाण-प्रमेयव्यवहाराः सर्वैरपि दृश्यमानत्वात् कथमेते असत्याः इत्युच्यन्त इति वाच्यम् । एते व्यवहाराः दृश्यत्वमात्रेणैव सत्याः न भवन्ति । यतः शुक्तौ रजतं दृश्यते, केवलदृश्यत्वेन रजतं सत्यमिति नाभ्युपगम्यते, एवं 'एकश्चन्द्रः स द्वितीयः' इत्यत्र एक एव चन्द्रः दृष्टिदोषेण सः द्वितीयवद् भवति । अमुं व्यवहारं सर्वे सत्यमिति नांगीकुर्वन्ति । एवं दृश्यमानं सर्वं सत्यमित्यंगीकर्तव्यमिति न नियमः । तथा अध्यासेन शुक्तौ रजतमिति प्रतीतिः तथा आत्मनि कर्तृत्वादिप्रमाणप्रमेयव्यवहाराः अध्यासाद्भवन्ति । आत्मनि अनात्माध्यासः आविद्यक इत्युच्यते । भाष्येऽपि आचार्यैः एकाम्नातं भवति[2] -

---

१ भग० शां० भा० पृ० २०
२ ब्र० सू० शा० भा० पृ० ३

उपाधियोगे तु तस्य जीवस्यैव ब्रह्मणि एकीभाव इति अस्माकं सिद्धान्तः। तस्मात् वस्तुतः जीवब्रह्मणोरभेद एव वेदान्तेषु श्रुतिषु जोघुष्यते,+ एवं तयोरैकत्वं च।

युक्तिरपि यथा जले तरंगे च सूर्यस्य प्रतिबिम्बाः अनेके भवन्ति, एवं ब्रह्म साकारोपाधिना तद्विशिष्टमनेकमिव भवति। तस्मादस्मिन् शास्त्रे जीवब्रह्मणोरभेद एव प्रतिपाद्यत इति सिद्धम्॥

१२ आत्मनि प्रमातृप्रमाणप्रमेयविभागः न परमार्थः

आत्मनि प्रमातृप्रमाणप्रमेयादिव्यवहाराः न परमार्थसत्याः भवन्ति,+ किन्तु औपाधिका एव। तथा हि - सर्वसाक्षिरूपो यमात्मा अप्रमेय इत्यभ्युपगमात् अमुमात्मानं प्रमाणादिव्यवहारैः ज्ञातुं न शक्यते। प्रमेयभूताः सर्वे इन्द्रियादीनां दर्शनयोग्याः भवन्ति। शब्दस्पर्शरूपरसगन्धेत्यादयः धर्माः इन्द्रियवेद्याः इत्युच्यन्ते। आत्मनि धर्मस्य वासना किं नास्ति। तथा च श्रुतिः -

'अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते॥'

(कठ० १-३-१५) इति। आत्मा प्रमेयोऽपि नास्ति। किं च इन्द्रियानुभवस्य प्रत्यक्षस्य सेन्द्रियाणामनुमानानामयमात्मा अगोचरो भवति। अयमेवाशयः सूत्रभाष्ये नूप भाष्यकारैः समुह्यते।[१] तथा हि -

'यदुक्तं परिनिष्पन्नत्वात् ब्रह्मणि प्रमाणान्तराणि संभवेयुरिति। तथा पि मनोरथमात्रम्। रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः। (इन्द्रियस्य) लिंगाद्यभावाच्च नानुमानादीनाम्। आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत्। तथा च श्रुतिः - नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ।+
(कठ० १-२-६) इति।'

इति। अतः आगम एक एव आत्मज्ञाने अस्मानुपकरोति। यथा अतीन्द्रियाः धर्माधर्मादिरूपात्मधर्माः शास्त्रेणैकेनैव ज्ञायन्ते + तद्वत्।

प्रमाणं यत्र प्रमेयज्ञानमुत्पादयति तस्य ज्ञानस्य साक्षात्कर्ता यः सः प्रमाता

---

१. ब्र० सू० शां० भा० पृ० २४५-२४६

तथा च प्रतिपादितं भाष्यकारैः माण्डूक्योपनिषद्भाष्ये[1] -

'ज्ञस्वरूपाविशेषेऽपि इतरेतरव्यभिचारादसत्यत्वं रज्ज्वादाविव सर्पधारादिविकल्पित भेदवत्। सर्वत्राव्यभिचाराज्ज्ञस्वरूपस्य सत्यत्वम्।'

इति। स्पष्टोऽयमर्थः। तस्मात् परमार्थरूपेऽस्मिन् आत्मनि प्रमाणप्रमेयादि विभागः क्रियाकारकफलविभागस्च न संभविष्यतः। एतयोर्भिन्नः आत्मा आनन्दस्वरूप इति सार्वत्रिकानुभवोऽस्ति इति सिध्यति।

११ जीवब्रह्मणोरभेदः

अस्मिन् वेदान्तशास्त्रे जीवः ब्रह्म च किं वस्तुतः पृथक् उत एक इति तत्र तत्र विचार्यते। एवं विचार्यमाणे अद्वैतिनः उत्तरं दास्यन्ति यत् जीवब्रह्मणोरभेद इति। शास्त्रे स्मिन् ईश्वर सर्वत्र एवमेव प्रतिपाद्यत इति च। तथा च श्रुतयः -

'य इमं च लोकं परमं च लोकं सर्वाणि च भूतानि
यो न्तरो यमयति।'

(बृ० उ० ३-७-१) इति। स्मृतिरपि -

'क्षेत्रज्ञं चापि मां विद्धि' (भग० १३-२)

इत्यादयः द्रष्टव्याः। सूत्रभाष्ये अस्मदाचार्याः -

'सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वो हि आत्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात् सर्वो लोको नाहमस्मीति प्रतीयात्। आत्मा च ब्रह्म।'

इति प्रत्यपादयन्[2]। जीवब्रह्मणोरभेदः कथं सिध्यतीति चेत् - शृणु। जीवस्य ब्रह्मभावापत्तिरेव मुक्तिः आत्मावगतिः साक्षात्कार इत्यादिशब्दैः व्यवह्रियते। ब्रह्मभावापत्तिस्तु जीवब्रह्मणोरभेदे सति न सिध्यति। किन्तु उभयोरैक्येनैव। तस्मात् अभेद एव प्रतिपाद्यत इति।

ननु यदि जीवः ब्रह्म च वस्तुतः भिन्नौ स्यातां तर्हि जीवस्य ब्रह्मस्वरूप-साक्षात्कारः कथं भवतीति चेत्-उच्यते। विभिन्नोपाधियोगेन ब्रह्मजीवयोर्नानात्वं,

---

१ ईशा० शां० भा० पृ० ४३४
२ ब्र० सू० शां० भा० पृ० ७

१४ मायाया: निरूपणम्

जो-जगदादिरूपेण लीलया क्रीडत: परमेश्वरस्य संबन्धिनीं तदधीनां पिण्ड-ब्रह्माण्डादिरूपेण विततां 'मामहं न जानामि' इति साक्षिप्रत्यक्षत्वेनापलापानर्हा इन्द्रजालादेरिव प्रपंचस्य प्रकाशिका सत्त्वादिगुणमयी माया इति शास्त्रेषु प्रतिपाद्यते। शुद्धसत्त्वप्रधाना सा सैव माया इति भवति । तथा च श्रुति: -

'मायिनं तु महेश्वरम्' (श्वे० उ० ४-१०)

'देवी ह्येषा गुणमयी मम माया दुरत्यया ।'

(भग० ७-१४) इति गीतायामपि । सत्वरजस्तमसामियं माया अधिष्ठात्री अस्ति । स्वत्रिगुणव्याप्त्या सुखदु:खमोहनिमित्तत्वेन सलिलादिभूतेषु नानारूपतां निष्पादयन्ती सती सर्वाणि भूतानि परिच्छिनत्ति ।

ननु स्रष्टव्यज्ञानशून्या अचेतना केवला इयं प्रकृति: अनेकविधं विचित्ररूपमिमां प्रपंचसृष्टिं कर्तुं कथं प्रभवेदिति चेत्- उच्यते । उपनिषच्छास्त्रेषु तस्या: एवं प्रसिद्धि: वर्तते । एवं लोके दृश्यते च दृष्टानुसारित्वादेव अदृष्टकल्पना क्रियते । इयं माया चेतनसत्तामादाय सर्वं विधातुं प्रभवति । एतेन स्वतन्त्राया: प्रकृते: जगद्रचनाकर्तृत्वं सांख्याभिमतं प्रत्याख्यातं भवति ।

त्रिगुणात्मकस्यान्त:करणस्य अनियतभावनाविशेषसंस्कारात् तेषां च सुखदु:खादिनिमित्तत्वमपि अनियतमेव भवति । यस्य यस्मिन् पदार्थे रमणीयत्वादि भावना यदा उद्बुद्धा भवति, तदा स पदार्थ: सुखाय भवति अथवा मोहाय भवति । एवं यदा अरमणीयत्वादिवासनाया: उद्बोधो भवति तदा दु:खाय मोहाभावाय वा भवति । एवं घटादिपदार्थेषु मायाया: नानारूपतानिष्पादनं द्रष्टव्यम् । इयं माया अधिष्ठाने ब्रह्मणि विषयत्वेन आश्रयत्वेन च कल्पिततादात्म्यसंबन्धेन अवस्थिता वर्तते । तथा च शांकरं[1] भाष्यम् -

'अत्यन्तविविक्तयो: धर्मधर्मिणो: मिथ्याज्ञाननिमित्त: सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिको यं लोकव्यवहार: ।'

इति । अस्या: मायाया एव अविद्या इत्यपि नामान्तरम् । भाष्यादिषु मायास्थाने 'अविद्या' इति पदमेव प्रयुंजन्ति भाष्यटीकाकारा: । सूत्रभाष्ये

१ ब्र० सू० शां० भा० पृ० १

आचार्या[1]: -

'तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि

शास्त्राणि च । पश्वादिभिश्चाविशेषात् ।'

इति इत्थमभ्यधुः । मायायाः स्वरूपं देवीभागवते देवीगीतायां श्रूयते -

'अप्रतर्क्यमनिर्देश्यमनौपम्यमनामयम् ।

तस्य काचित्स्वतःसिद्धा शक्तिर्मायेति विश्रुता ।।

न सती सा नासती सा नोभयात्मा विरोधतः ।

एतद्विलक्षणा काचिद्वस्तुभूता ऽस्ति सर्वदा ।।'

(देवी० देवी० २-३,४) इति । एवं माया तमोरूपेण चित्रविचित्ररूपे प्रपंचे सर्वत्र व्याप्य तिष्ठतीति मायायाः स्वरूपमुपवर्णनम् ।।

१५ आत्मा अजः अद्वितीयश्च

'अनादि मायया सुप्तो यदा जीवः प्रबुध्यते ।

अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ।।'

(मा० का० १-१६) इति माण्डूक्यकारिकातः आत्मनः स्वरूपं ज्ञायते । आत्मा अजः अद्वितीयश्चेति अनया सिध्यति । आत्मा निरवयवत्वात् निर्गुणत्वाच्च तस्मिन् भिन्नरूपौ विभिन्नदेशकालौ न संभवतः । आत्मनः जन्मादिविकाराः न सन्ति । अनेन कारणेन स अद्वितीयः । एवं स्थितेऽपि लोकेऽस्मिन् वर्तमानाः जनाः अनेकेषु जीवेषु एको जीवः, उपासनारूपसाधनबलेन देहान्ते परमात्म-सायुज्यं प्राप्नोमि इति भावयन्ति । वस्तुतस्तु परमात्मा प्रपंचं सृजति, जीवा अपि परमात्मना एव सृष्टाः भवन्ति । एवं श्रुतिः -

'सोऽकामयत बहु स्यां प्रजायेयेति । स तपो तप्यत ।

स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किंच ।'

(तै० उ० २-६) इति । सृष्टानां पदार्थानां तथा जीवानां च उावत्पर्यन्तं स्थायित्वमिति भाष्यकाराः सूत्रभाष्ये[2] प्रत्यपादयन् -

~~सर्वं सर्वं हि विविध~~ सर्वं विनश्यद्विकारजातं पुरुषान्तं

---

१ ब्र० सू० शां० भा० पृ० ३

२ ,, ,, ,, ,, ,, २५

'विनश्यति । पुरुषो विनाशहेतुत्वाभावादविनाशी, विक्रियाहेतुत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्ध-बुद्ध मुक्तस्वभावः ।'

इति । श्रुतिरपि -

'स वा एष महानज आत्माजरो मरो मृतो मयो ब्रह्म'

(बृं० उ० ४-४-२) इति भवति ।

ननु उपनिषच्छ्रुतीनां प्रपंचस्योत्पत्तौ तात्पर्यं नास्ति चेत् कथं बहुदृष्टान्त-पूर्वकं सविस्तरा सृष्टिः प्रतिपाद्यत ? इति चेत्-उच्यते । ब्रह्मणः स्वरूपज्ञानार्थमेव श्रुतिषु विचित्ररूपा सृष्टिः कथ्यते । एवं विविधदृष्टान्तपुरस्सरं प्रतिपाद्यमानायाः सृष्टेः ब्रह्म उपादानकारणं भवतीति परमतात्पर्यं एव तासां श्रुतीनां दृष्टिः भवति । तथा च श्रुतिः -

'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'

(छा० उ० ६-१-१) इति । एवं समानजातीयकाः श्रुतयः द्रष्टव्याः ।

ननु प्रपंचे जननमरणात्वेन अनेके जीवाः परिदृश्यन्ते । अतः भवत्सिद्धान्तः प्रत्यक्षाविरोध इति चेन्न । एक एवात्मा उपाधीनां निमित्तेन अनेके जीवा इति भाति । अमुं विषयमधिकृत्यैव अनेके वादाः प्रवृत्ताः सन्ति - एकजीववादः, अनेकजीववादः, परिच्छिन्नत्ववादः, अवच्छेदकतावादः इत्यादयः । विस्तरभिया एतेषां विस्तारः अत्र न क्रियते । सूत्रभाष्ये भाष्यकाराः एवमपठन्[1] -

'बुध्याद्युपाधिनिमित्तत्वं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसंबन्धवत् ।'

इति । यथा स्वप्ने अनेके जीवाः, तेषां देहेन्द्रियादीनां संघातः, मायानिर्मिताश्च जीवाः प्रतिभासन्ते, एतेषां सत्यत्वं नाभ्युपेयते तद्वत् । चोक्तं श्रुतावपि -

'यथा स्वप्नमयो जीवः जायते म्रियते पि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ।।'

(मा० का० ४-६८) इति । अन्यत्र च -

'संघाताः स्वप्नवत्सर्वे आत्ममाया विसर्जिताः ।' (मा०का० ३-१०)

---

१ ब्र० सू० शां० भा० पृ० ३६७

इति । एतादृशानां श्रुतानां पर्यालोचनेन श्रवणमननैनिदिध्यासनेन नच सम्यक् ज्ञानं भवति । एतज्ज्ञानं श्रुत्या नया उद्घुष्यते -

'प्रपंचो यदि विद्येत निवर्त्येत न संशय: ।
मायामात्रमिदं द्वैतमद्वैत परमार्थत: ।।'

(मा० का० १-११) इति । वेदान्तिभि: सत्वावाद: अंगीक्रियते । तथा हि - माण्डूक्यकारिकायामेवं श्रूयते -

'सतो हि मायया जन्म युज्यते न तु तत्वत: ।'

(मा० का० १-२७) इत्यस्या: कारिकाया: अर्थ: आचार्यैरेवोपवर्णित:[१] -

'सतो हि विद्यमानात् कारणान्मायानिर्मितस्य हस्त्यादि-
कार्यस्येव जगज्जन्म युज्यते । नासत: कारणात् । ----
--अथवा सतो विद्यमानस्य वस्तुतो रज्वादे: सर्पादिवन्मायया
जन्म युज्यते । नतु तत्वत: यथा तथा ग्रह्यस्यापि सत
एवाजस्य आत्मनो जन्म ।'

इति । ख्यातिपंचकेषु अद्वैतिन: अनिर्वचनीयख्यातिमाद्रियन्ते । तथा चात्र-

'अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृता-
व्याकृतात्मकेन तत्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामा-
दिसर्वव्यवहारास्पदत्वं प्रतिपद्यते ।'

६ इति शांकरभाष्यम्[२] ।

'आत्मख्यातिरसख्यातिरख्याति: ख्यातिमन्यथा ।
तथा निर्वचनीयख्याति: ---------- ।।'

इति ख्यातीनां स्वरूपम् । एता: ख्यातय: प्रकरणग्रन्थेषु सप्रपंचं प्रतिपादिता: वर्तन्ते । उपसंहारे स्मिन् प्रकरणे विचारभूता: एता: न विशदीक्रियन्त इति ।

तथा च - 'इन्द्रो मायाभि: पुरुरूप ईयते' (बृ० उ० २-५-१९)

'अजायमानो बहुधा विजायते' (तै० आ० ३ - १३)

'यदा तु परमार्थदृष्ट्या परमात्मतत्वात् श्रुत्यनुसारिभि-[३]
रन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवदस्त्व-

---

१ ईशा० शा० भा० पृ० ४६४ ३ ईशा० शां भा० पृ० १८८ (द्वितीय: खण्ड:)
२ ब्र० सू० शा० भा० पृ० २७७
३- ,, ,,

न्तरेण तावन्तौ न स्त:,+ सलिलफेनघटादिविकारवदेव
तदपेक्ष्य एकमेवाद्वितीयम्, नेह नानास्ति किंचन । इत्यादि
परमार्थदर्शनगोचरत्वं प्रतिपाद्यते ।'

इत्यादिश्रुतितद्भाष्यपर्यालोचनेन आत्मा अज: एक: अद्वितीयश्चेति परमार्थज्ञानं भवति । अत एव वेदान्तिनां डिण्डिमघोष: अयं भवति + -

'न कश्चिज्जायते जीव: संभवोऽस्य न विद्यते ।
एतदुत्तमं सत्यं यत्र किंचिन्न जायते ।।'

इति । तस्मात् आत्मा अज: अद्वितीयश्चेति ++ सिद्धं भवति ।।

१६ आत्मज्ञानस्य शास्त्रं प्रमाणम्

ननु यदि आत्मनि प्रमाणप्रमेयविभागो असत्यो भवति, तर्हि आत्मन: अस्तित्वे किमपि प्रमाणं नास्तीत्युक्तं भवति । प्रमाणेनैव वस्तुसिद्धिरिति न्यायेन आत्मसिद्धेरभावात् शून्यवादस्यैव प्रसर इति चेत्-न । आत्मा अन्यत् प्रमाणेन न सिध्यति । स: वेदप्रमाणेनैव ज्ञातो भवति । तथा चोक्तम् -

'नावेदविन्मनुते तं बृहन्तम्' (तै० ब्रा० ३-१२-२-७)

इति तैत्तिरीयब्राह्मणे । उपनिषद्यपि -

'तन्त्वौपनिषदं पुरुषं पृच्छामि' (बृ० उ० ३-९-२६)

इत्यात्मन: प्रमाणवाक्यं भवति । अत: अस्मिन् वेदान्तशास्त्रे शून्यवादस्याप्रसर इति । वेदस्यैव शास्त्रमित्यपरं नाम भवति ।

ननु शास्त्रं कथं प्रमाणं भवतीति चेत्-उच्यते । अस्मिन् विषये अनेके विप्रतिपत्तय: भवन्ति । यथा आप्तवाक्ये प्रमाणं तद्वद्वेदवाक्योऽपि इति केचन मन्यन्ते । एतेषां प्रमाणान्तरस्यावश्यकत्वमुक्तं भवति । यथा नदीतटे पंचफलानि वर्तन्ते इति आप्तवाक्येन बोधित: पुरुष: वाक्यमेतत् सत्यमसत्यं वा इति परिक्षणार्थं तत्र गमिष्यति, तत्र आप्तवाक्यस्य प्रत्यक्षप्रमाणस्यापेक्षा वर्तते । एवं वेदस्यापि प्रमाणान्तरस्यापेक्षा भवेदेव इत्यस्मिन् मते स्मार्कं नादर: । अपरे तु ईश्वरस्योपदेशो वेद इति कथयन्ति । मतेऽस्मिन् ईश्वरस्य

सिद्धिर्विना वेदवाक्यानि ईश्वरप्रोक्तानि इति न सिध्यति । एवं वेदावेद-ईश्वरज्ञानमित्यत: ईश्वरेण वेदप्रामाण्यसिद्धि: वेदप्रामाण्यात् वेदान्तसिद्धिरिति अन्योन्याश्रयप्रसंग: । अत: एतन्मतमपि अनुपादेयं भवति ।

मीमांसका: वेद: अपौरुषेय इति मन्यन्ते । एतेषामाशय: - वेदस्य रचयिता क इति न कस्यापि ज्ञायते । अयं वेद: अनाद्यनन्त इति श्रुतिस्मृतिषु प्रतिपाद्यते । अत: अपौरुषेयो वेद: स्वत:प्रमाणं भवति इति । मतमुमनेके आस्तिका: अभ्युपगच्छन्ति ।

बौद्ध-जैनादयस्तु वेदस्य स्वत:प्रामाण्यमिति पक्षं नांगीकुर्वन्ति । वैदिकास्तु वेदस्य रचयिता पुरुष: क इति अज्ञानादपि अयं वेद: केवल ऋषीणां मूलेनैव लोकेऽस्मिन् प्रचारं प्राप्त इति भणन्ति । अन्ये केवल स्वरचितधर्मग्रन्थस्य प्रामाण्यसिध्यर्थं स्वग्रन्थस्यापि वेदवत् अपौरुषेयत्वं वदन्ति । तदा वेदस्य धर्मग्रन्थस्य चाविरोधो भवत्यस्मिन् मते । अत: एतन्न मनोहरम् । अत: अस्मिन् मते विवादस्य प्रसक्ति: अतीव वर्तते । तस्मात् एतन्न विचार्यते ।

आचार्या: शंकरभगवत्पादास्तु आस्तिकै: सह वादसमये तत्तन्मतानुसारिणां दृष्ट्या एव विचारमकार्षु: । विचारसमये विशेषत: मीमांसकानामभिप्रायमेव उररीचक्रतु: अथापि आत्मनि श्रुतिप्रामाण्यनिदर्शनावसरे एकमसाधारणमभिप्रायं प्रकटयांचक्रतु: । तथा हि -

'न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम् ।[1]
किन्तु श्रुत्यादयो ऽनुभवादयश्च यथा संभवमिह प्रमाणम् ।
अनुभवावसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ।'

इति । किं च वेदोक्तानि कर्माणि नित्यसिद्धवस्तूनि न भवन्ति, प्रयत्नसाध्यत्वात् पुरुषतन्त्रत्वाच्च । एतेषां कर्मणामनुभवस्य अपेक्षा नास्ति । अत: कर्मणि श्रुत्यादीनि प्रमाणानि भवन्ति । एवं नात्मनि । आत्मा नित्यसिद्धवस्तु भवति क्रियया न साध्यं भवति । अत: आत्मज्ञानं अनुभवैकवेद्यं भवति । तस्मात् - 'वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये । पुरुषवचसां तु मानान्तरापेक्षं वक्तृस्मृतिव्यवहितं चेति विप्रकर्ष:' इति

---

१ ब्र० सू० शां० भा० पृ० ६

वेदविषये आचार्यवचनमेव[1] प्रमाणं भवति ।

प्रत्यक्षादीनि प्रमाणानि भवन्ति तत्रापि प्रत्यक्षप्रमाणं तर्केण न साध्यते । प्रत्यक्षादय: स्वस्वविषये अबाधितरूपं निश्चितज्ञानमेव प्रतिपादयन्ति । अत: एव तानि प्रमाणानि इत्यभिधीयन्ते । एवं वेदान्तवाक्यमपि स्वविषयरूपमात्मानं निश्चिततया ज्ञापयति । वेदान्तवाक्यैरुत्पन्नं ज्ञानमबाधितं भवति । अत: अनुभवरूपं फलमुत्पस्यमानत्वादेव शास्त्रं प्रमाणं भवति । तथा चोक्तं शांकरभाष्ये[2] -

> 'आत्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य
> प्रामाण्यं शक्यं प्रत्याख्यातुम् ।'

इति ।

ननु आत्मा अप्रमेय: । अ: न कस्यापि प्रमाणस्य विषयो भवतीति प्रतिपादयता भवता आत्मविषयस्य शास्त्रं प्रमाणमित्युक्ति: व्याहता भवेत्, विरोधश्चेति चेत्-न । आत्मा स्वयंज्योतिस्वरूप: अप्रमेयश्चेति शास्त्रं निरूपयति, किन्त्वय किन्त्वेतच्छास्त्रम् अहमेव प्रमाणम्, आत्मा मम प्रमेय इति न साधयति । चोक्तं शांकरभाष्ये[3] -

> 'न ह्यात्मा आगन्तुक: कस्यचित् । स्वयं सिद्धत्वात् ।'

इति । तस्मादात्मा स्वतस्सिद्धो भवति । न च 'आत्मा एवं एष:' इति शास्त्रे अप्रतीयमानत्वात् एतच्छास्त्रं तस्यात्मन: कथं प्रमाणं भवतीति शंकनीयम् । अमुं (इमम्) विषयमधिकृत्य भाष्यकारै: एवं प्रत्यपादि[4] -

> 'अविषयत्वे ब्रह्मण: शास्त्रयोनित्वानुपपत्तिरिति चेत्-न । अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हि शास्त्रमिदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति । किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपिपादयिषत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति ।'

इति । एवंरूपेणात्मन: शास्त्रं प्रमाणं भवति ।

---

१ ब्र० सू० शा० भा० पृ० २३८   ३ ब्र० सू० शां० भा० पृ० २५४
२ ,, ,, ,, ,, ,, १४   ४ ,, ,, ,, ,, , २०

ननु शास्त्रं शब्दरूपत्वात् तेन शास्त्रेण प्रतिपाद्यमानः आत्मा कथमशब्दो भवति न वक्तव्यम् । यतः शास्त्रमात्मनः अभिधायकं न भवति । तथा चोक्तं बृहदारण्यकभाष्ये आचार्यैः[1] -

'सर्वस्यात्मत्वे केन कं पश्येद्विजानीयादिति प्रमातृ-
प्रमाणव्यापारप्रतिषेधेनैव आगमो ऽपि विज्ञापयति ।
न त्वभिधानाभिधेयलक्षणवाक्यधर्माङ्गीकारेण ।'

इति । अयमात्मा प्रमाणादिव्यवहारात्पूर्वमेव स्वतस्सिद्धो भवति । गीताभाष्ये ऽपि आचार्याः एवमवोचन्[2] -

'सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा
भवति । न हि पूर्वमित्थमहम् इत्यात्मानं प्रमाय
पश्चात् प्रमेयपरिच्छेदाय प्रवर्तते ।'

इति । एवं शास्त्रम् आत्मा अजः अद्वितीयश्चेति बोधयति । स्थिते सत्येवं शास्त्रम् अन्यप्रमाणानां प्रमेयत्वमपजहाति । भवति च श्रुतिः -

'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् ------
------ तत्केन कं विजानीयात् ।'

(बृ० उ० ४-५-१५) इति । तस्मात् आत्मज्ञानस्य अन्त्यप्रमाणं शास्त्रमिति । शास्त्रमिति प्रमाणं भवतीत्यतः आत्मज्ञानानन्तरं तदपि स्वप्नप्रमाणं जाग्रति अप्रमाणं भवतीतिवत् स्वप्रमाणत्वं जहाति । चोच्यते श्रुतावपि -

'वेदाः अवेदाः' (बृ० उ० ४-३-२२)

इति । तस्मात् आत्मज्ञानस्य शास्त्रं प्रमाणम् इत्यत्र आचार्यवचनमेव भवति । तथा हि -

'अतः[3] स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम् वेदान्तवाक्यसमन्वयादिति सिद्धम् ।'

इति । सूत्रभाष्ये -

---

१ ईशा० शा० भा० पृ० २६६-२६७ (द्वितीयः खण्डः)
२ भग० शा० भा० पृ० १६
३ ब्र० सू० शा० भा० पृ० २६

सूत्रभाष्ये[1] -

'वेदस्य तु नित्यत्वे विज्ञानोत्पत्तेः हेतुत्वे च सति
व्यवस्थितार्थविषयत्वोपपत्तेः ------ अशक्यम् ।'

इत्याचार्याः वाक्यमेकं प्रत्यपादयन् । अत्र वेदस्य स्वरूपावगमनानन्तरं हि तस्य नित्यत्वं सिध्यति इति ।। इति शम् ।।

:o:o:o:o o:o:o:o:o:o:

---

१ ब्र० सू० शां भा० पृ० २५३

ऋङ्मन्त्राणां सूचीपट्टिका

ग्रन्थेऽस्मिन् प्रतिपादितानाम् ऋङ्‌मन्त्राणामकारादिक्रमेण

सूचीपट्टिका

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्रः
प्रथमाध्याये -			
ऋचो अक्षरे परमे व्योमन्	१	१६४	३६
इयं विसृष्टिर्यत आबभूव	१०	१२६	७
एतावानस्य महिमा	१०	६०	३
को अद्धा वेद क इह प्रवोचत्	१०	१२६	६
तद्विष्णोः परमं पदम्	१	२२	२०
द्वा सुपर्णा सयुजा सखाया	१	१६४	२०
न मृत्युरासीदमृतं न तर्हि	१०	१२६	२
यत्पांचजन्यया विशा	८	६३	७
यज्ञेन वाचः पदवीयमायन्	१०	७	३
यो जातः प्रथमो मनस्वान्	२	१२	१
यो भानुना पृथिवीं द्यामुतेमाम्	१०	८८	३
योनिष्ट इन्द्र निषदे अकारि	१	१०४	१
विश्वस्मा अग्निं भुवनाय देवाः	१०	८८	१२
वैश्वानरस्य सुमतौ स्याम	१	६८	१
सूर्याचन्द्रमसौ धाता	१०	१६०	३
हिरण्यगर्भः समवर्तताग्रे	१०	१२१	१
द्वितीयाध्याये -			
अग्निमीळे पुरोहितम्	१	१	१
अपाङ्‌ प्राङेति स्वधया गृभीतः	१	१६४	३८
अर्हन् बिभर्षि सायकानि धन्व	२	३३	१०
अपां नपादाह्यस्थादुपस्थम्	२	३५	६

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्रः
अम्बितमे नदीतमे	२	४१	१६
अहं मनुरभवं सूर्यश्च	४	२६	१
अहं भूमिमददामार्याय	४	२६	२
अग्निर्देवेषु राजति	५	२५	४
अयं होता प्रथमं पश्यतेमं	६	६	४
अयं स यो वरिमाणं पृथिव्याः	६	४७	४
अपाम सोममृता अभूम	८	४८	३
अन्तरिच्छन्ति तं जने	८	७२	३
अहं रुद्राय धनुरातनोमि	८	१२५	६
अक्षैर्मा दिव्यः कृषिमित्कृषस्व	१०	३४	१३
अहमिन्द्रो न पराजिग्य इद्धनम्	१०	४८	५
अग्निरिन्द्रो वरुणो मित्रो अर्यमा	१०	६५	१
अहं राष्ट्री संगमनी वसूनाम्	१०	१२५	३
अहमेव वात इव प्रवामि	१०	१२५	८
आहिष्मा सूनवे पिता	१	२६	३
आ त्वा रम्भं न जिव्रयः	८	४५	२०
आ त्वा रथं यथोतये	८	६८	१
आ त्वा विशन्त्विन्दवः	८	६२	२२
इह त्वष्टारमग्रियम्	१	१४	१०
इमे त इन्द्र ते पुरुष्टुत	१	५७	४
इन्द्रं मित्रं वरुणमग्निमाहुः	१	१६४	४६
इन्द्रश्च मृलयाति नः	२	४१	११
इन्द्रं परेऽवरे मध्यमासः	४	२५	८
इच्छन्ति देवाः सुन्वन्तम्	८	२	१८
इन्द्रो ब्रह्मेन्द्र ऋषिः	८	१६	७

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्रः
इमं मे गङ्गे यमुने सरस्वति	१०	७५	५
इन्द्रो दिव इन्द्र ईशे पृथिव्याः	१०	८९	१०
इदं श्रेष्ठं ज्योतिषां ज्योतिरागात्	१०	१७०	३
उतत्व: पश्यन्न ददर्श वाचम्	१०	७१	४
ऋचो अक्षरे परमे व्योमन्	१	१६४	३९
ऋतस्य हि शुरुधः सन्ति पूर्वीः	४	२३	८
ऋतं शंसन्त ऋजुदीध्यानाः	१०	६२	२
एक एवाग्निः बहुधा समिद्धः	८	५८	२
एक: सुपर्णः स समुद्रमाविवेश	१०	११४	४
कामस्तदग्रे समवर्ततापि	१०	१२९	४
कतूयन्ति क्रतवो हृत्सु धीतयः	१०	६४	२
केतुं कृण्वन्न केतवे	१	६	३
गर्भे नु सन्नन्वेषामवेदम्	४	२७	१
गायन्ति त्वा गायत्रिणः	१	१०	१
गौरीर्मिमाय सलिलानि तक्षती	१	१६४	४१
चत्वारिवाक्परिमितापदानि	१	१६४	४५
जाया तप्यते कितवस्य हीना	१०	३४	१०
तद्विष्णोः परमं पदम्	१	२२	२०
तद्विप्रासो विपन्यवः	१	२२	२१
तद्वां नरा सनये दंस उग्रम्	१	११६	१२
तदस्य प्रियमभिपाथो अस्याम्	१	१५४	५
तमुस्तोतारः पूर्व्यं यथा विदे	१	१५६	३
तत्सवितुर्वरेण्यम्	३	६२	१०
तवेमाः प्रजाः दिव्यस्य रेतसः	६	८६	२८
तम आसीत्तमसा गूहलमग्रे	१०	१२९	३

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्र:
तिरश्चीनो विततो रश्मिरेषाम्	१०	१२९	५
त्वं विश्वस्य मेधिर:	१	२५	२०
त्वमिमा ओषधीस्सोमविश्वा:	१	९	२२
त्वमग्ने वरुणो जायसे यत्	५	३	१
त्वं न: पश्चादधरादुत्तरात्पुर:	८	६१	१६
त्वं हि न: पितावसो	८	९८	११
देवो देवानामसि मित्रो अद्भुत:	१	९४	१३
न विजानामि यदि वेदमस्मि	१	१६४	३७
न भोजा मम्रुर्न न्यर्थमीयु:	१०	१०७	८
नामानि ते शतक्रतो	३	३७	३
नासदासीन्नो सदासीत्तदानीम्	१०	१२९	१
निषुसीद गणपते गणेषु	१०	११२	९
पवमानस्य ते वयं	९	६१	४
पतङ्गमक्तमसुरस्य मायया	१०	१७७	१
प्रक्षोदसा धायसा सस्र एषा	७	९५	१
ब्रह्मा देवानां पदवी: कवीनाम्	९	९६	६
मर्ता अमर्त्यस्य ते	८	११	५
मया सो अन्नमत्ति यो विपश्यति	१०	१२५	४
मोघमन्नं विन्दते अप्रचेता:	१०	११७	६
य: पूर्व्याय वेधसे नवीयसे	१	१५४/६	५/२
यदग्ने स्यामहं त्वम्	८	४४	२३
युवा: सुवासा: परिवीत आगात्	३	८	४
यो जागार तमृच: कामयन्ते	५	४४	१४
रूपं रूपं मघवा बोभवीति	३	५३	८
रूपं रूपं प्रतिरूपो बभूव	६	४७	१८

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्रः
वरुणः प्राविता भवतु	१	२३	६
वनेषु व्यऽन्तरिक्षं ततान	५	८५	२
वामं नो अस्त्वर्यमन्	८	८३	४
विश्वे देवानो अद्या स्वस्तये	५	५१	१३
विप्रं विप्रासोऽवसे	८	११	६
शं नो अज एकपाद्देवो अस्तु	७	३५	१३
सना ददामुतक्रतुम्	६	४	३
सरस्वतीं देवयन्तो हवन्ते	१०	१७	७
सविता पश्चातात्सविता पुरस्तात्	१०	३६	१४
सर्वे नन्दन्ति यशसाऽगतेन	१०	७१	१०
समानीव आकूतिः	१०	१९१	४
सोमः पवते जनिता मतीनाम्	९	९६	५
सोमं मन्यते पपिवान्	१०	८५	३
सं चोदय चित्रमर्वाक्	१	९	५
स्त्रियः सतीस्तां उमे पुंस आहुः	१	१६४	१६
स्थिरेभिरङ्गैः पुरुरूप उग्रः	२	३३	९
स्वस्तये वायुमुपब्रवामहै	५	५१	१२

अथ पादद्वयमन्त्राः

अग्नेर्वयं प्रथमस्यामृतानाम्	१	२४	२
अग्निं विश्वा अभिपृक्षः सचन्ते	१	७१	७
अत्राह तदुरुगायस्य वृष्णः	१	१५४	६
अनुत्तमा ते मघवन्न किर्नु	१	१६५	९
अग्ने कदा त आनुषक्	८	७	२
आरे ते गोघ्नमुत पूरुषघ्नम्	१	११४	१०

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्रः
आ ते शुष्मो वृषभ एतु पश्चात्	६	१९	९
आसीदद्विश्वा भुवनानि सम्राट्	८	४२	१
इयं मे नाभिरिह मे सधस्थम्	१०	६१	१९
उरुं हि राजा वरुणश्चकार	१	२४	८
ऋतावानं महिषं विश्वदर्शतम्	१०	१४०	६
एका चेतत्सरस्वती नदीनाम्	७	९५	२
एषा विश्वविन्त्पवते मनीषी	९	९७	५६
जहि शत्रूं रपमृधो नुदस्व	३	४७	२
त्वं त्राता तरणे चेत्यो भूः	६	१	५
त्वं भासा रोदसी आ ततन्थ	७	५	४
त्वं विश्वस्य जगतः	१०	११२	१२
दिव्या अङ्गारा इरिणे न्युप्ताः	१०	३४	९
द्यौर्मे पिता जनिता नाभिरत्र	१	१६४	३३
नामानि चिद्दधिरे यज्ञियानि	६	१	४
परिर्भूयासमो जनानाम्	६	३४	४
पिता माता भ्रातर एनमाहुः	१०	३४	४
पुरूरवः पुनरस्तं परेहि	१०	९५	२
प्रेष्ठ मु प्रियाणाम्	८	१०३	१०
बाधस्व दूरे निर्ऋतिं पराचैः	१	३४	९
मा ते वयद्मरसे पप्रथानः	५	१५	४
मा नो अग्ने दर्भूतये सचैषु	७	१	२२
यदग्ने मर्त्यस्त्वम्	८	१९	२५
कस्मै यस्य ते स्वादु सख्यम्	८	६१	११
यदचरस्तन्वा वावृधानः	१०	५४	२
यो अप्सु चन्द्रमा इव	८	८२	~~२~~ ८

मन्त्रनामानि	मण्डलम्	सूक्तम्	मन्त्रः
यो अदधा ज्योतिषि ज्योतिरन्तः	१०	५४	६
विश्वस्मा अग्निं भुवनाय देवाः	१०	८८	१२
शतं ते राजन् भिषजः सहस्रम्	१	२४	२६
स पत्रत्री त्वरं स्था जगत्	१०	८८	४
हये जाये मनसा तिष्ठ घोरे	१०	९५	१
हिरण्यरूपः स हिरण्यसन्दृक्	२	३५	१०

अथ एकपादमन्त्राः

इन्द्रस्य सख्यमृभवः समानशुः (प्रथमः पादः)	३	६०	३
कदान्वश्न्तर्वरुणे भुवानि (द्वितीयः पादः)	७	८६	२
कदा मृळीकं सुमना अभिख्यम् (अन्तिमः पादः)	७	८६	२
त्वां देवासो अमृताय कं पपुः (अन्तिमः पादः)	६	१०६	८
परित्मना विषुरूपो जिगासि (अन्तिमः पादः)	५	१५	४
महिज्योतिर्निहितं वक्षणासु (प्रथमः पादः)	३	३०	१४
यच्छानः शर्म सप्रथः (अन्तिमः पादः)	१	२२	१५
सखा पिता पितृतमः पितृणाम् कर्ता (तृतीयः पादः)	४	१७	१७

सूक्तानि

नासदासीयसूक्तम्

पुरुषसूक्तम्

~~वागाम्भृणीसूक्तम्~~

~~हिरण्यगर्भसूक्तम्~~

इति शम्

00000---00000

ग्रन्थानां सूचीपट्टिका

ग्रन्थानां सूचीपट्टिका

गन्थनाम — संपादकनाम — मुद्रणस्थानम् — वर्षम्

अथर्ववेद: विश्वबन्धु: विश्वेश्वरानन्द वैदिकशोध संस्थानम्

अमरकोश: नारायण राम आचार्य: - निर्णयसागर प्रेस मुंबई - १९५०

अद्वैतसिद्धि: - अनन्तकृष्णशास्त्री - निर्णयसागर प्रेस मुंबई - १९१७

अष्टोत्तरशतदशोपनिषत्: भाग- १,२,३ -

आश्वलायन श्रौतसूत्रम् भाग-१ मंगलदेव शास्त्री - जे कृष्णदासगुप्त विद्या विलास प्रेस बनारस सिटि, - १९३८

,, ,, ,, भाग-२ कुबेरनाथ शुक्ल - ,, ,, ,, ,, १९५५

ईशादिदशोपनिषत् - शंकराचार्यग्रन्थावली - मोतीलाल बनारसी दास वाराणसी १९६४

ऋक् संहिता - विश्वबन्धु: - विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, - होशियापुरम्

ऋग्वेदसायणभाष्यम् - वैदिकसंशोधन मण्डल तिलक् महाराष्ट्रा यूनिवर्सिटी

ऋग्वेद यास्क - डा० कुंजुण्णिराजा - अडेयार लाईब्ररी अडेयार - १९४७

ऋग्वेद सिद्धांजनभाष्यम् - श्री कपालि शास्त्रि - नन्दिनी मुद्रणालय - १९५० सिरसि

एकादशोपनिषद: - मोतीलाल बनारसी दास - १९६६

ऐतरेयारण्यकम् - सायणाचार्य: - आनन्दाश्रमसंस्कृतग्रन्थावलि:-पूना १८९८

ऐतरेयब्राह्मणम् ,,, ,, ,,, १८९६

कारिकावली - विश्वनाथ पंचानन: - बालमनोरमा प्रेस मद्रास १९२३

कूर्मपुराणम् - श्रीराम शर्मा आचार्य - विश्वभारती प्रेस मथुरा - १९७०

गीताभाष्यम् - वासुदेव लक्ष्मण शास्त्री - निर्णयसागर प्रेस मुंबई - १९१२

,, ,, शंकराचार्यग्रन्थावली - मोतीलाल बनारसी दास वाराणसी-१९६४

चित्सुखी - -स्वामि चित्सुखाचार्य: - उदासीन संस्कृतविश्वविद्यालय:-काशी-१९५६

तर्कसंग्रह: - श्रीमदन्नंभट्ट: - श्रीहरिकृष्णनिबन्धनम् - १९६०

तैत्तिरीय संहिता - वैदिकसंशोधन मण्डल पूना - १९७०

ग्रन्थनाम	संपादकनाम	मुद्रणस्थानम्	वर्षम्
तैत्तिरीयारण्यकम् -	सायणाचार्य? -	आनन्दाश्रमसंस्कृतग्रन्थावलिः -	१८९८
तैत्तिरीय ब्राह्मणम् -	,,	,, ,, ,,	,,
दैवतसंहिता -	म. ब्रह्मर्षि	स्वाध्यायमण्डली पारडी -	१९६४
निरुक्तम् -	सुदर्शन कुमार -	भारत भारती प्रेस - दिल्ली -	१९६३
न्यायसूत्रम् भाग- १	गोपीनाथ कविराज -	विद्याविलास प्रेस वाराणसी -	१९२७
,, ,, भाग-२	,, ,,	,, ,,	१९२८
न्यायनिर्णयः -	आनन्दगिरिः -	वेंकटेश्वर प्रेस मुंबई -	१८३५
परिमलम् -	आन्तकृष्णाशास्त्री -	निर्णयसागर प्रेस मुंबई	१९४१
पंचदशी -	अप्पय्यदीक्षितः -	वाणी विलास प्रेस श्रीरंगम् -	१९१२
प्रौढमनोरमा -	भट्टोजिदीक्षितः -	विद्याविलास प्रेस बनारस -	१९२०
ब्रह्मानन्दीयम् -	अनन्तकृष्णाशास्त्री -	निर्णयसागर प्रेस मुंबई -	१९१७
ब्रह्मसिद्धिः -	मण्डनमिश्रः -	गोरमेण्ड आफ् मद्रास -	१९३७
ब्रह्मसूत्रशांकरभाष्यम् -		वेंकटेश्वर प्रेस मुंबई -	१८३५
,, ,,		निर्णयसागर प्रेस मुंबई -	१९१५
,, ,,		कामकोटिकोशस्थानम् मद्रास -	१९५४
ब्रह्मसूत्रभाष्यम् -	विज्ञानभिक्षुः -	चौखम्बा संस्कृतग्रन्थावली वाराणसी-	१९०१
ब्रह्मसूत्रदीपिका -	भगवान् शंकरानन्दः -	बनारस संस्कृत सीरिज़ वाराणसी-	१९०६
ब्रह्मसूत्राणि -	हरिनारायण आपटे	पूना	१९०३
बृहदारण्यकवार्तिकसारः -	श्रीमद्विद्यारण्यस्वामी -	अच्युतग्रन्थमाला काशी-	१९४०
भामती --	वाचस्पति मिश्रः -	वेंकटेश्वर प्रेस मुम्बई	१८३५
भाष्य रत्नप्रभा -	गोविन्दानन्दः	,, ,	,,,
महाभारतम् भाग-१	पि. पि. सुब्रह्मण्यशास्त्री-	वाविलह रामस्वामि शास्त्रुलु एण्ड सन्स् चेन्नपुरी -	१९३५
,, ,, भाग-२	,,,	,,,, , -	१९३६
मनुस्मृतिः -	जयन्तकृष्ण हरिकृष्ण दवे -	भारतीय विद्याभवनम्-	१९७२

ग्रन्थनाम	संपादकनाम	मुद्रणस्थानम्	वर्षम्
याज्ञवल्क्यस्मृतिः	काशीसंस्कृतग्रन्थमाला	चौखांबा संस्कृतसीरिज आफीस् वाराणसी	१९३७
योगसूत्रम्	हरि नारायण आपटे	आनन्दाश्रम-मुद्रणालय	~~१९९९~~ १९१९
लिंगपुराणम्	श्रीराम शर्मा आचार्य	शान्ति प्रेस - मथुरा	१९७०
विवरणादिप्रस्थानविमर्शः	वीरमणिप्रसाद उपाध्यायः	चौखाम्बा संस्कृत सीरिज वाराणसी	१९५९
विवेकचूडामणिः	स्वामी माधवानन्दः	अद्वैत आश्रम हिमालय	१९४४
वेदभाष्यभूमिकासंग्रहः	पण्डित बलदेव उपाध्याय	चौखांबासंस्कृतसीरिज	१९५८
वैदिक साहित्य और संस्कृति	वाचस्पति गैरोला	संवर्तिका प्रकाशन इलाहाबाद	१९४६
वैदिक-साहित्य	रामगोविन्द त्रिवेदी	भारतीय ज्ञानपीठ काशी	१९४०
शतश्लोकी		वाणी विलास प्रेस श्रीरंगम्	---
शतपथब्राह्मणम् - भाग-१,२	मुक्तिरवशर्मा	राजस्थानवैदिकतत्त्वशोध-संस्थान, जयपुर	१८५९
शारीरकन्यायसंग्रहः	प्रकाशात्मयति	मद्रास युनिवर्सिटी मद्रास	१९३६
शारीरकभाष्यम्	ढुण्ढिराज शास्त्री	चौखांबासंस्कृतसीरिज वाराणसी	१९२९
श्रौतकोशः	------	वैदिक संशोधन मण्डल पुणे	१९७०
सर्वदर्शनसंग्रहः	माधवाचार्यः	चौखांबा विद्याभवनम् --	१९६४
सामान्य-वेदान्त-उपनिषदः	अ. महादेव शास्त्री	अड्यार लाईब्रेरी अड्यार	१९२१
सिद्धान्तलेशसंग्रहः	अप्पय्यदीक्षितः	श्रीविद्यामुद्राक्षरशाला कुंभकोणम्	१८९४

0000000000000